Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# ॥ श्री व्यवहारसूत्रम् ॥

## भाग-३ - उद्देश-४-५

आ.श्री
कैलाससागरसूरि
ज्ञानमंदिर
कोबा, गांधीनगर
P
1
4
4
4
7



संपादकः आचार्य विजय मुनिचन्द्रसूरिः

For Private and Personal Use Only



પ.પૂ આચાર્યદેવશ્રી ૐકારસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



પ.પૂ આચાર્યદેવશ્રી ભદ્રસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



આરાધનારત પ.પૂ. મુનિરાજશ્રી જિનચન્દ્રવિજયજી મ.સા.ના
કર કરમળમાં સમર્પિત

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

आ. श्रीॐकारसूरिज्ञानमंदिर ग्रंथावली - ४९/१

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम् भाग ३

## ( उद्देश-४-५ )

आगमप्रभाकर मुनिश्री पुण्यविजयजी सज्जीकृत सामग्रीसहायेन

संपादकः

आचार्य विजय मुनिचन्द्रसूरिः

सहायकः मुनि दिव्यरत्नविजयः

प्रकाशक

आचार्यश्री ॐकारसूरिज्ञानमंदिर, सुभाषचोक, गोपीपुरा, सूरत.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Vyavahara Sootraṁ part - 3
Editor Ac. Munichandrasoori

प्रथम संस्करण
वि. सं. २०६६, ई. स. २०१०
नकल : २५०

## प्राप्तिस्थान

**आचार्य श्रीॐकारसूरिज्ञानमंदिर**
आचार्य श्रीॐकारसूरिआराधनाभवन
सुभाषचोक, गोपीपुरा, सूरत.
फोन : ९८२४१५२७२७
E-Mali : omkarsuri@rediffmail.com
mehta_sevantilal@yahoo.co.in

**आचार्य श्रीॐकारसूरिगुरुमंदिर**
वावपथकनी वाडी,
दशापोरवाड सोसायटी,
पालडी चाररस्ता, अमदावाद-७
फोन : (०७९) २६५८६२९३

**विजयभद्रचेरिटेबल ट्रस्ट**
पार्श्वभक्तिनगर, नेशनल हाईवे १४,
भीलडीयाजी जि. बनासकांठा. पीन-३८५५३५.
फोन : ०२७४४-२३३१२९, २३४१२९

मुद्रक :-
किरीट ग्राफिक्स २०९, आनंद शोपींग सेन्टर, रतनपोल, गोलवाड, अहमदाबाद-०१ फोन : ९८९८४९०००९



For Private and Personal Use Only

## પ્રકાશનના લાભાર્થી

સુવિશાલગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય
રામચન્દ્ર - ભદ્રંકર - કુંદકુંદસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન
વર્ધમાનતપોનિધિ ૧૦૦ + ૬૭ ઓળીના આરાધક
પૂ. ગણિવર્યશ્રી નયભદ્ર વિ.મ.સા.ની પ્રેરણાથી
શ્રી દેવકીનગર જૈન સંઘ બોરીવલી વેસ્ટ મુંબઈ.
શ્રી વર્ધમાનભક્તિ શ્વે.મૂ. ઈરાનીવાડી જૈન સંઘ કાંદીવલી, (વેસ્ટ) મુંબઈ.
શ્રી ધર્મવર્ધક શ્વે.મૂ.પૂ. જૈન સંઘ મધુપાર્ક
કાર્ટરરોડ નં. ૧ બોરીવલી ઇસ્ટ મુંબઈ આદિએ
જ્ઞાનદ્રવ્યમાંથી સુંદર લાભ લીધો છે.

**અનુમોદના....અનુમોદના....અનુમોદના....**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# પ્રકાશકીય

પૂ.આ.ભ. **શ્રીઅરવિંદસૂરિ** મ.સા. અને પૂ.આ.ભ.શ્રી **યશોવિજયસૂરિ** મ.સા.ના આશીર્વાદ અને માર્ગદર્શન પૂર્વક આ ગ્રંથમાળામાં નવા નવા ગ્રંથો પ્રગટ થતા રહે છે.

વ્યવહારસૂત્ર નિર્યુક્તિ-ભાષ્ય અને પૂ.આ.શ્રી મલયગિરિસૂરિ મ.સા.ની ટીકા સાથે ઘણાં વર્ષો બાદ પ્રગટ થઈ રહ્યું છે.

તાડપત્રીય વગેરે વિવિધ પ્રતો અને આગમપ્રભાકર મુનિશ્રી પુણ્યવિજયજી મ.સા.એ તૈયાર કરાવેલ સામગ્રીના આધારે પૂ.આ.ભ. શ્રીમુનિચન્દ્રસૂરિ મ.સા.એ સંશોધન-સંપાદન કાર્ય કર્યું છે.

વ્યવહારસૂત્ર છેદગ્રંથ છે. સાધુ-સાધ્વીજીના પ્રાયશ્ચિત્ત વગેરે વિષયો આમાં આવતા હોવાથી એનું વાંચન-પઠન અધિકારપ્રાપ્ત મુનિઓ જ ગુરુ આજ્ઞા મુજબ કરી શકે.

ગ્રંથ ઘણો વિશાળ હોવાથી એ છ ભાગોમાં બહાર પડે છે. વિહારમાં વાંચન કરતાં પૂ. મુનિ ભગવંતોની જરૂરિયાતને ધ્યાનમાં લઈ પ્રતાકારે પણ થોડી નકલો પ્રકાશિત થઈ રહી છે.



For Private and Personal Use Only

આ અતિ મહત્ત્વના ગ્રંથનું સારી રીતે સંશોધન થાય એ માટે સંપાદક આચાર્યશ્રીએ જુદા જુદા વિદ્વાન આચાર્ય ભગંવતો આદિને વિનંતી કરી હતી. સદ્ભાગ્યે વિવિધ વિદ્વાનોએ આ ગ્રંથને આત્મીયભાવે તપાસી આપ્યો છે. પૂ.આ.ભ.શ્રી રાજશેખરસૂરિ મ.સા. (પૂ. આ.ભ.શ્રી રામચન્દ્રસૂરિ મ.સા. સમુદાય), પૂ. આ.ભ.શ્રી કુલચન્દ્રસૂરિ મ.સા., પૂ.આ.શ્રી પુણ્યરત્નસૂરિ મ.સા., પૂ.આ.શ્રી યશોરત્નસૂરિ મ.સા.(પૂ. આ.શ્રી ભુવનભાનુસૂરિ મ.સા. સમુદાય), પં. મુક્તિચન્દ્ર વિ. ગણી., પં. મુનિચન્દ્ર વિ. ગણી (પૂ.આ.ભ.શ્રી કલાપૂર્ણસૂરિ મ.સા. સમુદાય) આદિએ ગ્રંથ સંશોધનમાં સહકાર આપ્યો છે. આમ અનેક વિદ્વાનોના સહકારથી સંશોધિત થતાં આ આગમગ્રંથને પ્રકાશન કરતાં અમે ગૌરવ અનુભવીએ છીએ.

અનેક સંઘોએ જ્ઞાનદ્રવ્યમાંથી પ્રકાશનનો લાભ લીધો છે. તે બધાના અમો આભારી છીએ.

**લી. ટ્રસ્ટીગણ,**

**આ.ૐકારસૂરિ આરાધના ભવન.**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# સંપાદકીય

વ્યવહારસૂત્ર(સટીક)ના આ બીજા ભાગમાં વ્યવહારસૂત્રનો પ્રથમ ઉદ્દેશ એના ઉપરની નિર્યુક્તિ-ભાષ્ય ગાથા. ૧૮૩ થી ૯૬૩ અને તેના ઉપરની આ. શ્રી મલયગિરિસૂરિ મહારાજે રચેલી ટીકા વગેરે પ્રસિદ્ધ થઈ રહ્યા છે.

સંપાદન માટે ઉપયુક્ત હસ્તલિખિત પ્રતો વગેરેનો પરિચય અને ગ્રંથ-ગ્રંથકાર વિષેનો સંક્ષિપ્ત પરિચય વગેરે પ્રથમભાગના સંપાદકીયમાં આપવામાં આવ્યા છે. જિજ્ઞાસુઓએ ત્યાંથી જોઈ લેવા વિનંતી.

## ઋણસ્વીકાર

પ્રસ્તુત વ્યવહારસૂત્રના સંશોધનમાં પાઠ શુદ્ધીકરણ વગેરેમાં જેઓએ આત્મીયભાવે સહાય કરી છે -

પૂ. આ. ભ. રાજશેખરસૂરિમ.સા., આ.શ્રી કુલચન્દ્રસૂરિ મ.સા., આ. શ્રી પુણ્યરત્નસૂરિમ.સા. આ.શ્રી. યશોરત્નસૂરિ મ.સા., પં. શ્રી મુક્તિચન્દ્રવિ. ગણી, પં. શ્રી મુનિચન્દ્રવિ. ગણી આદિના અમે ખૂબ ખૂબ ઋણી છીએ. આભાર.

લી.

પૂ. આ.ભ.શ્રી **ભદ્રસૂરીશ્વરજી** મ.સા.ના શિષ્યરત્ન
પૂ. મુનિરાજશ્રી **જિનચન્દ્રવિજય** મ.સા.ના વિનેય
આ. વિજય **મુનિચન્દ્રસૂરિ.**



For Private and Personal Use Only

## વિશેષ સૂચના

પોથી આકારે પ્રગટ થતાં આ ગ્રંથમાં પુસ્તક આકારના એક પેજનું મેટર બે પેજમાં લેવામાં આવ્યું છે. એટલે અનુક્રમણિકા વગેરેમાં પેજ નંબર બન્ને સંસ્કરણમાં સમાન રહે તે માટે પોથીમાં પેજ નંબર **A - B** એ પ્રમાણે આપ્યા છે.

એટલે પુસ્તકનું પેજ ૨= પોથીનું પેજ ૨**A** - ૨**B** સમજવું.

પરિશિષ્ટોમાં જ્યાં પંક્તિ નંબર દર્શાવ્યા છે. તે પોથીના **A - B** બાજુમાં સળંગ પંક્તિ નંબર ગણવાથી મળી રહેશે.

જેમ કે અવતરણસૂચિમાં 'તૃસ્ત્રોઽવાત્' પૃષ્ઠ ૬ પંક્તિ ૨માં છે તે પોથીમાં ૬**A** બાજુમાં છે 'શબ્દપ્રથા' પૃષ્ઠ ૬ પંક્તિ ૧૮માં બતાવેલ છે તે ૬**B** બાજુમાં છે.

# विषयानुक्रमः भाग-३

## उद्देश : ४


| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र १-८ | ऋतुबद्धकाले वर्षाकाले च | |
| | जघन्यविहारपरिमाणम् | ७९३ |
| १७११-१४ | जघन्यविहारपरिमाणम् | ७९३-७९५ |
| १७१५ | हीनपरिमाणे प्रायश्चित्तम् | ७९५ |
| १७१६ | सूत्रप्रयोजनसूचा | ७९६ |
| १७१७-३० | ऋतुबद्धकाले द्विकविहारप्रयोजनादिः | ७९६-८०१ |
| १७३१-३२ | वर्षाकाले त्रिकविहारप्रयोजनादिः | ८०१-८०२ |
| १७३३-४५ | वसतिशून्यकरणे दोषाः | ८०२-८०६ |
| १७४६-९ | अपवादे द्विकविहारे जयणा | ८०६-८०८ |
| १७५०-७५ | चातुर्मासयोग्यक्षेत्रगुणाः १३ | ८०८-८१८ |

| गाथा | विषयः | पेज |
|---|---|---|
| १७६९-७५ | वसतिपालस्वरूपम् | ८१५-८१८ |
| सूत्र ९-१० | अन्योन्यनिश्रया विहारः | ८१८ |
| १७७७-९३ | क्षेत्रम् आभाव्यमनाभाव्यम् | ८१९-८२५ |
| १७८३-१८१६ | असमाप्तकल्पानामनाभाव्यम् | ८२२-८३३ |
| १७८७-९३ | अक्षेत्रे उपाश्रयमार्गणा | ८२३ |
| १७९४-१८०० | विपरिणामस्थानानि मुमुक्षोः | ८२६-८२८ |
| १८०१-७ | वर्षावासे क्षेत्राऽऽभाव्यादिः | ८२८-८२९ |
| १८०८-१२ | सूत्रविषये आभवनव्यवहारः | ८३०-८३१ |
| १८१३-१६ | आवलिका-मण्डल्योः स्वरूपम् | ८३२-८३३ |
| १८१७ | समाप्तकल्पे आभवनव्यवहारः | ८३३-८३४ |
| १८१९-३२ | साधारणशैक्ष्ये व्यवहारः | ८३४-८३८ |
| १८२७-३२ | एकशैक्ष्ये व्यवहारः | ८३६-८३८ |
| १८३३-७ | गणावच्छेदकसामाचारी | ८३८-८४० |

| गाथा | विषयः | पेज |
|---|---|---|
| १८३८-४३ | श्रुतनिश्राविशेषः | ८४०-८४१ |
| १८४४-४५ | पश्चात्कृत आभवनव्यवहारः | ८४२ |
| १८४६-९ | गृहस्थस्य आभवनव्यवहारः | ८४२-८४३ |
| १८४७ | भद्रबाहुस्वामिकृतमर्यादा | ८४३ |
| १८५०-९ | सारूपिकस्य आभवनव्यवहारः | ८४४-८४७ |
| १८६०-७२ | व्यवहारविशेषः सदृष्टान्तः | ८४७-८५० |
| सूत्र ११ | उपसम्पत्सामाचार्यादयः | ८५०-८५२ |
| १८७५-८१ | उपसम्पत्स्वरूपम् | ८५२-८५४ |
| १८८२-३ | अनुगामिस्थापने सामाचारी | ८५५ |
| १८८४-९२ | उपसम्पदनाऽनर्हे सामाचारी | ८५६-८५८ |
| १८९३-६ | पदस्थापनार्हे परीक्षा | ८५८-८६० |
| १८९७-८ | आत्मपरोपनिक्षेपयोजना | ८६० |
| १८९९-१९६५ | **अन्यत्रगमने चतुर्भङ्गी** | ८६०-८८२ |

| गाथा | विषयः | पेज |
| --- | --- | --- |
| १९०५-१८ | उपसम्पदनार्हगच्छस्वरूपम् | ८६२-८६६ |
| १९१९-२४ | राज्ञः दृष्टान्तम् | ८६६-८६७ |
| १९२४-८ | नूतनाचार्ये गच्छव्यवस्था | ८६७-८६९ |
| १९२९-३१ | दृष्टान्ताः | ८६९-८७० |
| १९३२-३४ | आगमनद्वारम् | ८७०-८७१ |
| १९३५-८ | वृषभप्रेरणा | ८७१-८७२ |
| १९३९ | स्थविरागमनादिद्वाराणि | ८७२ |
| १९४०-४१ | गच्छतः मार्गे विधिः | ८७३ |
| १९४२ | नैत्यिक-यथाच्छन्दादौ वसननिषेधः | ८७३-८७४ |
| १९४५-५२ | संवसने विधिः यतना च | ८७५-८७७ |
| १९५४-५९ | नैत्यिकादीनां भङ्गाः १६ | ८७८-८८० |
| १९६०-२ | नैत्यिकादिषु संवसने यतना | ८८०-८८१ |
| १९६३-६५ | निसृष्टद्वारम् | ८८१-८८२ |

| गाथा | | विषयः | पेज |
|---|---|---|---|
| | सूत्र १२ | वर्षावासे उपसम्पत्सामाचारी | ८८२-८८३ |
| १९६६ | | वर्षाकाले विशेष | ८८३ |
| १९६७-६९ | | भिक्षायां विशेषः | ८८३-८८४ |
| १९७० | | वसतिद्वारम् | ८८४ |
| १९७१-२ | | उपसम्पदर्थं गमने यतना | ८८५-८८६ |
| | सूत्र १३ | अनुगामिस्थापनाविधिः | ८८६ |
| १९७४-७६ | | आचार्यस्य ग्लान्ये पट्टधरस्थापना | ८८७ |
| १९७७-२००० | | आचार्यपदार्हचयनविधिः | ८८९-८९६ |
| | सूत्र १४ | आचार्यस्यावधावने पट्टधरस्थापना | ८९६ |
| २००३-१३ | | ग्लानत्वे चिकित्सा | ८९८-९०१ |
| | सूत्र १५ | उपस्थापनाकरणसामाचारी | ९०१ |
| २०१४ | | उपस्थापनाविस्मरणे प्रायश्चित्तम् | ९०२ |
| २०१५ | | पित्रादीनां कारणे विलम्बादिः | ९०२-९०३ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| गाथा | विषयः | पेज |
|---|---|---|
| २०१६-२० | प्रवज्याविधिः | १०३-१०४ |
| २०२१-४ | अयोग्ये उपस्थापनानिषेधः | १०४-१०६ |
| २०२५-७ | उपस्थापनायोग्यस्य परीक्षा | १०६-१०७ |
| २०२८-३५ | उपस्थापनासामाचारी | १०७-१११ |
| सूत्र १६ | उपस्थापनाविस्मरणे प्रायश्चित्तम् | १११ |
| २०३६-८ | विस्मरणकारणानि | १११-११२ |
| २०३९ | स्मरणेऽस्मरणे प्रायश्चित्ताभावः | ११२ |
| सूत्र १७ | उपस्थापनाविलम्बे प्रायश्चित्तम् | ११२ |
| २०४१-५ | स्मरणाऽस्मरणे प्रायश्चित्तम् आदेशौ १-२ | ११३-११४ |
| सूत्र १८ | गीतार्थनिश्रायां विहारः | ११५ |
| २०४७-५६ | गणान्तरसङ्क्रमणे प्रश्नोत्तराणि | ११५-११८ |
| २०४८-५२ | सूत्राऽर्थव्याख्यादिः | ११६-११७ |
| सूत्र १९ | अभिनिचारिकाविधिः | ११८ |



For Private and Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| २०५७-५८ | आज्ञापूर्वकमेव बहिर्निस्सरणम् | ११८-११९ |
| सूत्र २०-१ | चरिकाप्रविष्टस्य सामाचारी | १२० |
| सूत्र २२-२३ | चरिकानिर्वृत्तस्य सामाचारी | १२१ |
| २०५९-६३ | चरिकाप्रविष्टस्य आलोचनादिः | १२२-१२३ |
| २०६४-६५ | २१ सूत्रस्य पाठान्तरादिः | १२३-१२४ |
| २०६६-६९ | नियत-नैत्यशब्दयोः व्याख्या | १२४ |
| २०७० | चरिकाप्रयोजनम् | १२५-१२६ |
| २०७१ | निष्प्रयोजनगमने निषेधः | १२६ |
| २०७२ | पुनः आपृच्छाकरणम् | १२६ |
| २०७३ | क्षेत्रप्रत्युपेक्षणम् | १२७ |
| २०७५-८३ | चरिकायां विपरिणामे आभवनादिः | १२७-१३० |
| २०८४-८५ | विदेशे दूरगते च विधिः | १३०-१३१ |
| २०८६ | आभवनव्यवहारः | १३१ |

| गाथा | विषयः | पेज |
|---|---|---|
| २०८७-९० | उपसम्पद्यमानानां सामाचारी | १३२ |
| २०९१-९९ | निर्गमनकारणानि | १३२-१३५ |
| २०९९ | व्यवहारविधिः | १३५ |
| २१०२-०७ | आभवद्व्यवहारः | १३५-१३७ |
| २१०८ | अनिर्गतानां विधिः | १३७ |
| २१०९-११ | योगभङ्गस्वरूपम् | १३८ |
| २११२-२८ | योगविसर्जनकारणानि | १३९-१४४ |
| २१२९-३९ | उपसम्पन्नस्य आभवद्व्यवहारः | १४५-१४७ |
| २१४०-४१ | अभिधारयतः व्यवहारविधिः | १४८-१४९ |
| २१४२-६ | आभाव्यविधिः | १४९-१५१ |
| २१४७-५६ | संविज्ञानां दानविधिः | १५१-१५३ |
| २१५७ | शिष्ये आभवनविधिः | १५३-१५४ |
| सूत्र २४ | रात्निक-शैक्षयोः उपसम्पद्विधिः | १५४ |

| गाथा | विषयः | पेज |
|---|---|---|
| २१६०-६ | उपसम्पद् ग्रहणसामाचारी | ९५५-९५७ |
| सूत्र २५ | सपरिवारं रात्निकम् उपसम्पत्तव्यम् | ९५७ |
| २१६७-७० | सहायकदानविधिः | ९५७-९५८ |
| सूत्र २६-३२ | यथारात्निकपार्श्वे उपसम्पत्तव्यम् | ९५९ |
| २१७४ | पथि समागतानां भिक्षूणां सामाचारी | ९६१ |
| २१७५-८२ | अन्योन्ययोः आलोचना | ९६१-९६३ |
| २१८३ | सपरिच्छदम् उपसम्पत्तव्यम् | ९६३ |
| २१८४-७ | परस्परोपसम्पदा | ९६४ |
| २१८८-९१ | अवग्रहस्वरूपम् | ९६५-९६६ |
| २१९२-९३ | सूत्रोक्त-वागन्तिकव्यवहारौ | ९६६ |
| २१९४-६ | क्षेत्रव्यवहारः गीतार्थऽगीतार्थानाम् | ९६७ |
| २१९७ | अवग्रहप्रकारादिः | ९६८ |
| २१९८-२२०३ | अवग्रहाऽयोग्या योग्याश्च | ९६८-९७० |

| गाथा | विषयः | पेज |
|---|---|---|
| २२०४-१० | क्षेत्राऽवग्रहस्वरूपम् | १७०-१७२ |
| २२११ | साधारणक्षेत्रे असंस्तरणे विधिः | १७२ |
| २२१२-४ | साधूनां चतुर्भङ्गी | १७२-१७४ |
| २२१५-२४ | समाप्तासमाप्तश्रुते विधिः | १७४-१७७ |
| २२२०-३ | वर्षाकाले अवग्रह | १७५-१७६ |
| २२२४-२६ | अध्वनष्टेषु मार्गणाविधिः | १७७-१७८ |
| २२२७-३१ | दिग्धारणविधिः | १७८-१७९ |
| २२३२-५ | उपसम्पन्नस्य विधिशेषः | १७९-१८० |
| २२३६ | अवग्रहस्य कालः | १८१ |
| २२३७-४४ | वृद्धवासस्वरूपम् | १८१-१८३ |
| २२४५-४७ | वृद्धस्य व्याख्या | १८३-१८४ |
| २२४८-४९ | वृद्धस्य सेवा | १८४-१८५ |
| २२५०-२ | विहाराऽयोग्यः स्थविरः | १८५ |

| गाथा | विषयः | पेज |
|---|---|---|
| २२५३-७ | स्थविरस्य सहायदानम् | १८६-१८८ |
| २२५४ | गच्छपरिमाणम् | १८६-१८७ |
| २२५८ | स्थिरवासे यतना | १८८ |
| २२५८-६० | क्षेत्रयतना | १८८-१८९ |
| २२६१-३ | कालयतना | १८९ |
| २२६४-५ | वसतियतना | १९० |
| २२६६-९ | संस्तारकयतना | १९०-१९२ |
| २२७०-१ | ग्लानाऽसहाय-दौर्बल्यद्वाराणि | १९२ |
| २२७२-८ | उत्तमार्थ-तरुणनिष्पत्तिद्वारे | १९२-१९४ |
| २२७९ | क्षेत्रलाभद्वारम् | १९५ |
| २२८० | कृतसंलेख-तरुणप्रतिकर्मद्वारे | १९५ |
| २२८१-८२ | अवग्रहाभावः | १९५-१९६ |
| २२८३-८४ | उत्कृष्टावग्रहः | १९६ |

| गाथा | | विषय: | पेज |
|---|---|---|---|
| | | **उद्देश : ५** | |
| | सूत्र १-८ | प्रवर्त्तिन्यादीनां हेमन्त-ग्रीष्मयो: विचरणसंख्या | ९९७ |
| | सूत्र ५-८ | वर्षावासे संख्यापरिमाणम् | ९९७ |
| | सूत्र ९-१० | बहूनां प्रवर्तिन्यादीनां संख्यापरिमाणम् | ९९७ |
| | सूत्र ११-१२ | प्रवर्तिन्या कालधर्मे व्यवस्था | ९९८ |
| | सूत्र १३ | ग्लानप्रवर्तिन्या अनुगामिनीसूचा | ९९८-९९९ |
| | सूत्र १४ | अवधावमान्या प्रवर्तिन्या: सूचा | ९९९ |
| २२८७ | | सूत्रप्रयोजनकारणानि | १००० |
| २२८८-९ | | प्रवर्तिनीकालधर्मे आचार्यपार्श्वे गमनम् | १०००-१००१ |
| २२९०-१ | | ग्लान-अवधावनसूत्रयो: प्रयोजनम् | १००१-१००२ |
| | सूत्र १५ | निर्ग्रन्थ्या आचाराङ्गविस्मरणे दण्डादि: | १००२ |
| | सूत्र १६ | निर्ग्रन्थस्य आचाराङ्गविस्मरणे पदायोग्यतादि: | १००३ |

| गाथा | विषयः | पेज |
|---|---|---|
| २२९३ | श्रमणीनां प्रमादबाहुल्यात् निग्रन्थीसूत्रं पूर्वम् | १००४-०५ |
| २२९४ | नव-डहर-तरुणीनां व्याख्या | १००४ |
| २२९५-९९ | विस्मरणशङ्कायां परीक्षादिः | १००४-०५ |
| २३००-८ | प्रमादतः विस्मरणे प्रवर्त्तिन्यादिपदायोग्यत्वम् | १००६ |
| २३०१-२ | प्रमादकारणानि | १००६ |
| २३०३-४ | अजापालकदृष्यन्तः प्रमादे | १००६-१००७ |
| २३०५ | वैद्यदृष्टान्तः प्रमादे | १००७ |
| २३०६ | योधदृष्टान्तः प्रमादे | १००८ |
| २३०७ | फलकदृष्टान्तः प्रमादे | १००८ |
| २३०९ | आबाधातः विस्मरणकारणानि | १००९ |
| २३१० | निर्ग्रन्थस्यापि विस्मरणकारणानि | १००९ |
| २३११-१२ | देवकृतास्तूपरचना | १०१० |
| सूत्र १७ | स्थविराणां विस्मरणेऽपि न गणहरणम् | १०१० |

| गाथा | विषयः | पेज |
|---|---|---|
| २३१४-५ | सूत्रार्थोभयधरस्य गणधारणम् | १०११ |
| २३१६-७ | उभयधरे असति केवलार्थधरस्यापि गणधारणम् | १०११-१०१२ |
| सूत्र १८ | विस्मरणे स्थविराणां प्रतीच्छनादिविधिः | १०१२ |
| २३१८ | अवमरात्निकस्यापि विनयः सूत्रग्रहणे | १०१२ |
| २३१९-२० | वन्दनाऽकरणे प्रायश्चित्तम् | १०१३ |
| २३२१-२४ | अविनये प्रायश्चित्तम् | १०१३-१०१४ |
| २३२५-२७ | विनयकरणविधानम् | १०१४-१०१५ |
| सूत्र १९ | आलोचनाग्रहणविधिः | १०१५ |
| २३२९ | आलोचना गीतार्थस्थविरपार्श्वे | १०१५-१०१६ |
| २३३०-३५ | सम्भोगः षड्विधः | १०१६-१०१९ |
| २३३२-३३ | ओघसम्भोगस्य प्रकाराः १२ | १०१६-१०१७ |
| २३३४ | उपधिसम्भोगस्य प्रकाराः ६ | १०१७-१०१९ |
| २३३६-३८ | विसम्भोगे दृष्टान्ताः | १०१७-२१ |

| गाथा | विषयः | पेज |
|---|---|---|
| २३३९-४० | साम्भोगिकपरीक्षादिः | १०२१ |
| २३४१ | आलोचनाविधिः सपक्षे कार्या | १०२१ |
| २३४२-४४ | विपक्षे दोषाः | १०२२-१०२३ |
| २३४५-२३४७ | आर्यरक्षितपर्यन्तं निर्ग्रंथीनाम् छेदसूत्राध्ययनादिः | १०२३-१०२४ |
| २३४८-५८ | आलोचनाग्रहणविध्यादिः | १०२४-१०२७ |
| सूत्र २० | वैयावृत्त्यकरणविधिः | १०२७ |
| २३५९-६० | विपक्षे वैयावृत्त्यकरणे दोषाः | १०२७ |
| २३६१-५ | अपवादे विषप्रयोगादौ वैयावृत्त्यम् | १०२८-१०२९ |
| २३६६-७३ | वैयावृत्त्यकरणयोग्याया लक्षणानि | १०२९-१०३१ |
| सूत्र २१ | सर्पदंशादौ वैयावृत्त्यविधिः | १०३१ |
| २३७४-८० | उत्सर्गतः स्वपक्षे वैयावृत्त्यम् | १०३१-१०३३ |
| २३८१-९१ | औषधसङ्ग्रहे शिष्यस्य तर्कः | १०३३-१०३६ |
| २३९२-२४०२ | औषधसंग्रहे दोषाः, निषेधः | १०३६-१०३९ |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथा | विषयः | पेज |
| --- | --- | --- |
| २४०३-०४ | विषनिवरणार्थं विद्याग्रहणम् | १०३९ |
| २४०५-०७ | सर्पदंशे अन्यरोगे च द्रव्याणि विद्यादयश्च | १०४० |
| २४०८-१२ | चिकित्साया अज्ञाने दोषाः | १०४०-११०४ |
| २४१३-४ | लवसप्तमदेवस्वरूपम् | १०४२ |
| २४१६ | विपक्षे वैयावृत्त्यम् कारणिकम् | १०४३ |
| २४१७-८ | वैयावृत्त्ये यतना | १०४३-१०४४ |
| २४१९-२४ | विद्यादिभिः सर्पदंशोपचारः | १०४४-१०४६ |
| २४२५-६ | जिनकल्पिक-स्थविरकल्पिकनानात्वम् | १०४६ |


■ ■ ■



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# व्यवहारसूत्रग्रन्थस्य विभागव्यवस्था


| भाग | ग्रन्थः | भाष्यगाथाटीकासहिता | पृष्ठ |
|---|---|---|---|
| १ | पीठिका | गाथा १-१८२ | १-१०८ |
| २ | उद्देश १ | गाथा १८३-९६३ | १०९-५१२ |
| ३ | उद्देश २-३ | गाथा ९६४-१७१० | ५१३-७९२ |
| ४ | उद्देश ४-५-६ | गाथा १७११-२८१३ | ७९३-११६८ |
| ५ | उद्देश ७-८-९ | गाथा २८१४-३८०९ | ११६९-१४८४ |
| ६ | उद्देश १० | गाथा ३८१०-४६७५ | १४८५-१७२५ |


✲ ✲ ✲



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्‌गुरुभ्यो नमः

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## भाग ३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥

॥ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## ॥ चतुर्थ उद्देशकः ॥

For Private and Personal Use Only

सूत्रम्— नो कप्पइ आयरियउवज्झायस्स एगाणियस्स हेमंतगिम्हासु चरए[१] ॥१॥ कप्पइ आयरियउवज्झायस्स अप्पबिइयस्स हेमंतगिम्हासु चरए ॥२॥ नो कप्पइ गणावच्छेइयस्स अप्पबिइयस्स हेमंतगिम्हासु चरए ॥३॥ कप्पइ गणावच्छेइयस्स अप्पतइयस्स हेमंतगिम्हासु चरए ॥४॥ नो कप्पइ आयरियउवज्झायस्स अप्पबिइयस्स वासावासं वत्थए ॥५॥ कप्पइ आयरियउवज्झायस्स अप्पतइयस्स वासावासं वत्थए ॥६॥ नो कप्पइ गणावच्छेइयस्स अप्पतइयस्स वासावासं वत्थए ॥ ७ ॥ कप्पइ गणावच्छेइयस्स अप्पचउत्थस्स वासावासं वत्थए ॥ ८॥

अथास्य सूत्राष्टकस्य कः सम्बन्ध ? इति सम्बन्धप्रतिपादनार्थमाह—

एयद्दोसविमुक्को, होइ गणी भावतो पलिच्छन्नो ।
दव्वपलिच्छागस्सा, परिमाणट्ठा इमं सुत्तं ॥१७११॥



१. चरिए-श्युब्रींग । चरित्तए-श्युब्रींग B b पाठभेदः ॥

एते-अनन्तरं तृतीयोद्देशके ये दोषा उक्तास्तैरेतैर्दोषैर्विमुक्त **एतद्दोषविमुक्तो भवति गणी** आचार्य उपाध्यायो गणावच्छेदको वा भवति । स च नियमाद् **भावतः परिच्छन्नः** सूत्रा-ऽर्थतदुभयोपेतः, द्रव्यपरिच्छदः परिवारो वस्त्रादिकं लक्षणसम्पन्नता च। तत्र परिवारस्य **द्रव्यपरिच्छदस्य परिमाणार्थमिदमादिमं सूत्रं** सूत्राष्टकम् ॥ १७११ ॥

पुनः प्रकारान्तरेण सम्बन्धकथनार्थमाह—

**आदिमसुत्ते दोण्णि वि, भणिया तइयस्स इह पुणिं तेसिं ।**
**कालविभागविसेसो, कत्थ दुवे? कत्थ वा तिण्णि? ॥१७१२॥**

**तृतीयस्योद्देशकस्यादिमे सूत्रे द्वावपि** साधर्मिकौ विहरन्तावुक्तौ। तथा चादिसूत्रपाठः-''दो साहम्मिया एगतो विहरंति' इत्यादि। **इह पुनस्तयोर्द्वयोः कालविभागविशेषो** भण्यते। यथा-**कुत्र** कस्मिन् कालविशेषे **द्वौ** कल्पेते? **कुत्र वा त्रय** ? इति कालविशेषविभागतो द्वि-त्रादिसाधुविहारकल्पाऽकल्पविधिप्रतिपादनार्थमिदं सूत्राष्टकम्। इह कालेऽपि वाच्ये सामान्यतः सप्तम्यर्थमात्रविवक्षायां त्रप्रत्ययो न विरुद्ध इति कुत्रेत्युक्तम् ॥ १७१२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथवाऽन्येन प्रकारेण सूत्रसम्बन्धः, तमेवाह—

**पारायणे समत्ते व, निग्गतो अत्थतो भवे जोगो ।**
**बहुकायव्वे गच्छे, एगेण समं बहिं ठाति ॥१७१३॥**

पारायणं नाम–सूत्रार्थतदुभयानां पारगमनं तस्मिन् **पारायणे समाप्ते, वा**शब्दः सम्बन्धस्य प्रकारान्तरो(रतो)पदर्शनार्थः, **निर्गतः** आत्मद्वितीय इति वाक्यशेषः। कस्मान्निर्गतः? इति चेद्,अत आह- **बहुकायव्वे** इत्यादि, गच्छः सबाल–वृद्धाकुलस्ततस्तस्मिन् बहु वैयावृत्त्यं कर्तव्यम्, अतो **गच्छे** बहुकर्तव्ये तिष्ठतो मा सूत्रार्थतदुभयानां स्मरणे विघ्नो भूद् इत्ये**केन समं** गच्छाद्बहिः पृथक् **तिष्ठति**। यदि पुनरेकाकी स्थातुमिच्छति तदा न कल्पते, एतदर्थप्रतिपादनार्थमादिसूत्रद्विकम्, तत्प्रसङ्गतः शेषाण्यपि सूत्राणीत्येषो**ऽर्थतः योगः** सम्बन्धः ॥ १७१३ ॥ अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**न कल्पते** आचार्यश्चोपाध्यायश्च समाहारो द्वन्द्वः, आचार्योपाध्यायं तस्य **आचार्यस्योपाध्यायस्य** चेत्यर्थः,**एकाकिनः हेमन्त-ग्रीष्मयोः** शीतकाले उष्णकाले चेत्यर्थः, **चरितुं** विहर्तुम्। **कल्पते आचार्योपाध्यायस्यात्मद्वितीयस्य हेमन्तग्रीष्मयोश्चरितुम्** ॥ एवं द्वे सूत्रे



For Private and Personal Use Only

गणावच्छेदकस्य भावनीये। नवरम्-अत्राद्यसूत्रे आत्मद्वितीयस्य प्रतिषेधः। द्वितीयसूत्रे त्वात्मतृतीयस्यानुज्ञा ॥

एवममीषां चत्वारि सूत्राणि वर्षाविषयाण्यपि वेदितव्यानि। नवरम्-अत्र प्रथमसूत्रे आचार्यस्योपाध्यायस्य चात्मद्वितीयस्य प्रतिषेधः। द्वितीयसूत्रे त्वात्मतृतीयस्यानुज्ञा। तृतीयसूत्रे गणावच्छेदकस्यात्मतृतीयस्य प्रतिषेधः। चतुर्थसूत्रे त्वात्मचतुर्थस्यानुज्ञेति॥ इहोत्सर्गतो द्वयोस्त्रयाणां वा जघन्यतोऽपि विहारो न कल्पते, यत इदं जघन्यादिभेदतो विहारपरिमाणम्॥

**पणगो व सत्तगो वा, कालदुवे जहण्णतो भवे गच्छो ।**
**बत्तीसईसहस्सो, उक्कोसो सेसओ मज्झो ॥ १७१४ ॥**

**कालद्विके** ऋतुबद्धे काले वर्षाकाले च **जघन्यतः** खलु यथाक्रमं **गच्छो भवति पञ्चकः सप्तकश्च,** पञ्च परिमाणमस्य[इति] पञ्चकः, एवं सप्तकः। **वाशब्दः** समुच्चये। किमुक्तं भवति? ऋतुबद्धे काले पञ्चकः, वर्षाकाले सप्तकः। कथम्? इति चेत्, उच्यते-ऋतुबद्धे काले आचार्य आत्मद्वितीयः, गणावच्छेदकस्त्वात्मतृतीयः, एवं पञ्चकः। वर्षाकाले जघन्यतः आचार्य आत्मतृतीयः, गणावच्छेदक आत्मचतुर्थः एवं सप्तक इति। **उत्कर्षतः** कालद्विकेऽपि

**द्वात्रिंशत्सहस्राणि**। तथा च भगवत **ऋषभस्वामिनो** ज्येष्ठस्य गणधरस्य **पुण्डरीकनाम्नो** द्वात्रिंशत्सहस्रो गच्छोऽभूत्। **शेषकः** शेषपरिमाणो गच्छो **मध्यमः** ॥१७१४॥

सम्प्रति जघन्यतः पञ्चक-सप्तकाभ्यां हीनाभ्यां प्रायश्चित्तमाह—

**उउ वासे लहु लहुगा, एए गीते अगीते गुरुगुरुगा ।**
**अकयसुयाण बहूण वि, लहुओ लहुया वसंताणं ॥ १७१५ ॥**

**उउत्ति** ऋतुकाले पञ्चकाद् हीनानां गीतार्थानां विहरतां प्रायश्चित्तं **लघुको** मासः। **वासेत्ति** वर्षाकाले सप्तकाद् हीनानां गीतार्थानां विहरतां चत्वारो **लघुका** मासाः। **एते** लघुलघुकाः **गीते** गीतार्थविषया द्रष्टव्याः। **अगीते** अगीतार्थविषयाः **पुनर्गुरुगुरुकाः**। किमुक्तं भवति? ऋतुकाले पञ्चकाद् हीनानामगीतार्थानां वसतां प्रायश्चित्तं गुरुको मासः। वर्षाकाले सप्तकाद् हीनानामगीतार्थानां चत्वारो गुरुका मासाः । **अकृतश्रुतानाम**गृहीतोचितसूत्रार्थतदुभयानां **बहूनामपि** पञ्चकसप्तकादीनामपि **वसतां** यथाक्रमम् ऋतुकाले प्रायश्चित्तं **लघुको** मासः, वर्षाकाले चत्वारो **लघुकाः** ॥१७१५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र चोदक आह—

**एवं सुत्तविरोहो, अत्थे वा उभयतो भवे दोसो ।**
**कारणियं पुण सुत्तं, इमे य तहिं कारणा हुंति ॥ १७१६ ॥**

यदि नाम एतद् जघन्यादिभेदेन गच्छपरिमाणं, तत **एवं** सति **सूत्रतोऽर्थतः तदुभयतश्च विरोधो दोषो भवेत्**, सूत्रेऽन्यथा विहारानुज्ञानात् । अत्र आचार्यः प्राह-**कारणिकं** कारणैर्निर्वृत्तं पुनरिदं **सूत्रम्** अतोऽदोषः। तानि च **कारणानि** पुनः **इमानि** वक्ष्यमाणानि **तत्र** अधिकृतसूत्रप्रवर्तने **भवन्ति** ॥१७१६॥

तान्येवाऽऽह—

**संघयणे१ वाउलणा २ नवमे पुव्वम्मि ३ गमणमसिवादी ४ ।**
**सागर ५ जाते ६ जयणा ७ उउबद्धो८, लोयणा ९ भणिया ॥१७१७॥**

[सूचागाहा]

इयं कारणविषया शेषवक्तव्यविषया च सूचागाथा। ततोऽयं संक्षेपार्थः- **संहननं** यद्युत्तमं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवति १, **व्याकुलना** वा व्याकुलीभवनं वा गच्छे २, **नवमे** वा **पूर्वे**, उपलक्षणमेतत्, दशमे वा सूत्रमभिनवगृहीतं सम्यक् स्मर्तव्यमस्ति ३, **गमनं** वा **अशिवादि**भिः अशिवावमौदर्यादिभिः सम्पन्नं ४, **सागर**त्ति **स्व**यम्भूरमणसद्दशमतिप्रभूतमनेकातिशयसम्पन्नं नवमं पूर्वं परावर्तनीयमस्ति ५, तत एतैः कारणैर्द्वावपि विहरेयाताम्। एतानि कारणान्यधिकृतसूत्रप्रवृत्तौ **भणितानि**। तथा **जाते**त्ति जातादिकल्पो वक्तव्यः६। तत्रापि भङ्गचतुष्टये प्रथमवर्जेषु शेषेषु त्रिषु भङ्गेषु **यतना** वक्तव्या ७, तथा **ऋतुबद्धे** काले आगच्छद्गच्छद्भिरविरहितं तत्स्थानं कर्तव्यम् ८। गणिनाप्य**वलोकना** स्वयं करणीया कारणीया च ९ ॥१७१७॥

साम्प्रतमेनामेव गाथां व्याचिख्यासुः प्रथमतः संहननमिति पदं व्याख्यानयति—

**आयरिय-उवज्झाया, संघयण धितीए जे उ उववेया ।**
**सुत्तं अत्थो य बहुं, गहितो गच्छे य वाघातो ॥ १७१८ ॥** दारं १।



**आचार्या** वा **उपाध्याया** वा ये **संहननेन** प्रथमेन वज्रर्षभनाराचलक्षणेन **धृत्या** च वज्रकुड्यसमानया **उपेताः** युक्ताः। **सूत्रमर्थो वा बहुः** प्रभूतो **गृहीतः, गच्छे** च सूत्रार्थस्मरणे **व्याघातः**। कुतो व्याघातः? इति चेत्, उच्यते व्याकुलनातः १॥ १७१८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तामेव व्याकुलनामाह—

**धम्मकहि महिड्डीए, आवाससनिसीहिया य आलोए ।**
**पडिपुच्छण वादिमहगण, रोगी तह दुल्लभं भिक्खं ॥ १७१९ ॥**
**वाउलणेसा भणिया, जह उद्देसम्मि पंचमे कप्पे** । दारं २।
**नवम-दसमा उ पुव्वा, अभिणवगहिया उ नासेज्जा ॥ १७२० ॥** दारं ३ ॥

स हि **धर्मकथा**लब्धिसम्पन्नस्ततस्तत्रत्यो भूयान् जनः श्रोतुमागच्छतीति धर्मकथया व्याकुलना। तथा **महर्द्धिकः** राजादिः धर्मश्रवणाय तस्य समीपमुपागच्छति ततस्तस्य विशेषतः कथनीयम्, तदावर्जने भूयसामावर्जनाद् अन्यथा व्याकुलनातः सम्यग्धर्मग्रहणाभावे तस्य रोषः स्यात्, तस्मिंश्च रुष्टे भूयांसो दोषाः। अथवा अन्यः कश्चनापि महर्द्धिकाय कथयति तदानीमपि तूष्णीकैर्भवितव्यम् मा भूत् कोलाहलतस्तस्य सम्यग्धर्माप्रतिपत्तिः इति कृत्वा । तथा महति गच्छे बहवः **आवश्यिकीं** निर्गच्छन्तः कुर्वन्ति बहवः प्रविशन्तो **नैषेधिकीं,** ते सम्यग् निरीक्षणीयाः, अन्यथा तयोरकरणे, उपलक्षणमेतद्, अन्यस्या अपि च सामाचार्याः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रत्युपेक्षणादेः सम्यगकरणे यदि स्मारणं न करोति तत उपेक्षाप्रत्ययप्रायश्चित्तसम्भवः, ततः आवश्यिक्यादिनिरीक्षणायां व्याघातः। तथा भिक्षामटित्वा समागतस्य तस्य सङ्घाटस्याऽऽलोचयतो यदि पठ्यते तदा विकटनायामग्रेतनस्य पश्चात्तनस्य च सम्मोहः, सम्मोहाच्च सम्यगनालोचना तद्भावाच्च चरणकरणव्याघात इति तदा**लोचनायां** न पठनीयम्। तथा गच्छे वसतो बहवः **प्रतिपृच्छा**निमित्तमागच्छन्ति ततस्तेषामपि प्रत्युत्तरदाने व्याघातः। तथा तं बहुश्रुतं तत्रस्थितं श्रुत्वा **वादिनः** समागच्छन्ति, ततस्तेऽपि निग्रहीतव्याः, अन्यथा प्रवचनोपघातः, ततस्तन्निग्रहणेऽपि व्याकुलना। तथा **महति गणे** बहवः प्राघूर्णकाः समागच्छन्ति, ततस्तेषां विश्रामणया पर्युपासनया च व्याघातः। तथा बहवः खलु महति गणे **ग्लाना**स्तेषां च यावदालोचना श्रूयते तावद् व्याकुलना । तथा महति गणे भूयसां प्राघूर्णकादीनां प्रायोग्यं **भैक्षं दुर्लभम्** इति साधवः केऽपि कुत्राप्यन्यत्र प्रेषणीया इति व्याघातः॥ १७१९॥

**वाउलणेसा** इत्यादि, एषा व्याकुलना **यथा कल्पे** कल्पाध्ययने **पञ्चमे उद्देशे** सविस्तरं **भणिता** तथाऽत्रापि द्रष्टव्या २। नवमे पुव्वम्मीति व्याख्यानयति- **नवमदशमे पूर्वेऽभिनवगृहीते** यदि सततं न स्मर्येते ततो नश्येताम् अतोऽर्थं द्वयोर्विहारः३ ॥१७२० ॥

For Private and Personal Use Only

'गमणमसिवादी'ति व्याख्यानार्थमाह—

**असिवादिकारणेहिं, उम्मुगनायं ति होज्ज वा[1] दोण्णि** । दारं ४।
**सागरसरिसं नवमं, अतिसय-नय-भंगगहणत्ता** ॥ १७२१ ॥

**अशिवं** नाम-मारिः, सा उपस्थिता, तत्र च ज्ञातमुल्मुकम्, यथा उल्मुकानि बहून्येकत्राऽऽहृतानि ज्वलन्ति, एकं द्वौ वा न ज्वलतः, एवं त्रिप्रभृतिषु बहुषु मारिः प्रभवति, नैकस्मिन् द्वयोर्वा। तत एवमशिवकारणेन **आदिशब्दादवमौदर्येण** राजप्रद्वेषतो वा गणभेदस्तावद्भवति यावत् पृथक् पृथग् **द्वावपि भवेताम्**, अतो नानुपपन्नो द्वयोर्विहारः४। सागरेति व्याख्यानयति-**सागरसदृशं** स्वयम्भूरमणजलधितुल्यं **नवमम्** उपलक्षणमेतद् दशमं च पूर्वम्। कस्माद्? इत्याह-**अतिशय-नय-भङ्गगहनत्वा**दनेकैरतिशयैरनेकैर्नयैरनेकैर्भङ्गैश्च गुपिलत्वात् । ततोऽगीतार्थानामतिशयाकर्णनं मा भूत्, नयबहुलतया भङ्गबहुलतया वा बहूनां मध्ये परावर्तनं दुष्करमिति द्वयोर्विहारः ॥ १७२१ ॥

---

१. जा-भाष्यप्रतिषु मुद्रिते च॥

अन्यच्च—

**पाहुड विज्जातिसया, निमित्तमादी सुहं च पइरिक्के ।**
**छेदसुयम्मि व गुणणा, अगीयबहुलम्मि गच्छम्मि ॥ १७२२ ॥**

**प्राभृतं** योनिप्राभृतं गुणयितव्यम् । **विद्यातिशया** नाम विद्याविशेषा यैराकाशगमनादीनि भवन्ति ते वा परावर्तनीया वर्तन्ते । **निमित्त**मतीतादिभावप्ररूपकम्, आदिशब्दाद् योगा मन्त्राश्च परिगृह्यन्ते, एते सर्वेऽपि **सुखं** सुखेन **प्रतिरिक्ते** विविक्ते प्रदेशेऽभ्यस्यन्ते, न च अगीतबहुले अगीतार्थसङ्कुले **गच्छे छेदश्रुतस्य** व्यवहारादेः, गाथायां सप्तमी षष्ठ्यर्थे, गुणना परावर्तनं कर्तुं शक्यम्, मा तेषामगीतार्थानां कर्णाभ्यटनतः श्रुत्वा विपरिणामतो गच्छान्निर्गमनं भूदिति सूरेरुपाध्यायस्य चाऽऽत्मद्वितीयस्यान्यत्र गमनम् ॥ १७२२ ॥ सम्प्रति यादृशयोर्द्वयोरन्यत्र गमनमुचितं तादृशावाह—

**कयकरणिज्जा थेरा, सुत्तत्थविसारया सुयरहस्सा ।**
**जे य समत्था वोढुं, कालगयाणं उवहि देहं ॥ १७२३ ॥**

**कृतकरणा** नाम गीतार्थतया परिणामकतया वाऽन्यदाऽपि अन्यैः सहानेकश ईदृशानि कार्याणि कृतवन्तः। यद्यपि च कदाचिद् द्वितीयः सहायो न कृतः तथापि योग्यतया स कृतकरणीय इव द्रष्टव्यः। **स्थविराः** श्रुतेन पर्यायेण च। तथा सूत्राऽर्थयोर्विशारदाः **सूत्रार्थविशारदाः**। तथा श्रुतानि रहस्यान्यनेकान्यनेकशो यैस्ते **श्रुतरहस्याः**। इदं सहायं प्रति विशेषणम्, सूरेरुपाध्यायस्य वा पूर्वगतसूत्रार्थधारिणोऽधिगतछेदश्रुतस्य च श्रुतरहस्यत्वाव्यभिचारात् । तथा द्वयोरेकतरस्मिन् कालगतेऽपरेण शरीरपारिस्थापनिकां कर्तुं गच्छता द्वयोरप्युपधिः शून्यायां वसतौ न मोक्तव्यः, मा दस्यवस्तमपहार्षुरिति कृत्वा द्वयोरप्युपधिं मृतकशरीरं चान्यतरेण वोढव्यम्, ततो **ये कालगतानां देहं** द्वयोरप्यु**पधिं** च **वोढुं समर्था**स्ते अधिकृतसूत्रविषयाः॥ १७२३॥

तथा चाऽऽह —

**एयगुणसंपउत्ता, कारणजाएण ते दुवग्गा वि ।**
**उउबद्धम्मि विहारो, एरिसयाणं अणुन्नातो ॥ १७२४ ॥** दारं ५॥

एतैरनन्तरगाथोक्तैर्गुणैः सम्प्रयुक्ता **एतद्गुणसम्प्रयुक्ताः कारणजातेन** अनन्तरोदितेन

केनचित्कारणविशेषेण तौ आचार्यादिकावुपाध्यायादिकौ वा [ **द्विवर्गौ** ] ऋतुबद्धे काले विहरतः, न कश्चिद्दोषः,अधिकृतसूत्रेणानुज्ञानात्। तथा चाऽऽह **ईदृशयोः ऋतुबद्धे** काले अधिकृतसूत्रेण **विहारोऽनुज्ञातः** दोषाभावात्, कारणविशेषस्य च गरीयस्त्वात् ५ ॥ १७२४॥

जातेति चत्वारः कल्पाः सूचिताः, तानेवाऽऽह—

**जातो य अजातो वा, दुविहो कप्पो य होति नायव्वो ।**
**एक्केक्को वि य दुविहो, समत्तकप्पो य असमत्तो ॥ १७२५ ॥**

**द्विविधः** खलु **कल्पो भवति ज्ञातव्यः**, तद्यथा **जातोऽजातश्च। एकैकोऽपि च द्विधा-समाप्तकल्पः असमाप्तकल्पश्च** ।। १७२५॥

एतानेव चतुरो व्याख्यानयति—

**गीयत्थो जायकप्पो१-ऽगीतो खलु भवे अजातो तु२।**
**पणगं समत्तकप्पो३, तदूणगो होति असमत्तो ॥ १७२६ ॥**

**जातकल्पो** नाम यो **गीतार्थः**, सूत्रार्थतदुभयकुशलः१ **अगीतः** अगीतार्थः **खलु भवेद-जातो**ऽजातकल्पः। **समाप्तकल्पो** नाम परिपूर्णसहायः, स च जघन्येन **पञ्चकं** पञ्चपरिमाणः ऋतुबद्धे काले, वर्षाकाले सप्तपरिमाणः। **तदूनक**स्तस्मात् पञ्चकात्सप्तकाद्वा हीनतरः कल्पो **भवत्यसमाप्तः**, अपरिपूर्णसहायत्वात्। अत्र भङ्गचतुष्टयम् ॥ १७२६॥

तदेवाह—

**अहवा जातो समत्तो१ जातो चेव य तहेव असमत्तो २।**

**अ[1]ज्जातो य समत्तो३, अज्जातो चेव असमत्तो** ४ ॥ **१७२७** ॥ दारं ६॥

**अथवेति** प्रकारान्तरे। पूर्वं कल्पचतुष्टयं सामान्यतः प्ररूपितम्, इदानीं संयोगतः प्ररूप्यते-**जात**कल्पोऽपि **समाप्त**कल्पोऽपीत्येको भङ्गः१ **जात**कल्पो**ऽसमाप्त**कल्प इति द्वितीयः२ **अजात**कल्पः **समाप्त**कल्प इति तृतीयः३ **अजात**कल्पो**ऽसमाप्त**कल्प इति चतुर्थः ४। अत्र प्रथमो भङ्गः शुद्धः, शेषेषु त्रिषु भङ्गेषु यतना कर्तव्या ६॥ १७२७॥



---

**१. असमत्तो जातो या ३ असमेत्ता चेव उ अजातो ४ - सर्वासु टीकाप्रतिषु खंभा. जेभा। केवलं वाभा. आदर्शे लाडनूसंस्करणे च शुद्धपाठ उपलभ्यते ६॥**

तामेव "जयणा" [गा-१७१७] इति सूचागाथोक्तं पदं व्याख्यानयन् प्राह—

**तेसिं जयणा इणमो, भिक्खग्गह निक्खमप्पवेसे य ।**
**अणुणवणं पि य समगं, बेंति य गिहे दिज्ज ओहाणं ॥ १७२८ ॥** दारं ७॥

**तेषा**माद्यवर्जानां त्रयाणां भङ्गाना**मियं यतना**— समकमेककालं **भिक्षाग्रहणाय,** उपलक्षणमेतत्, विचाराय च **निष्क्रमः**, समकमेव च **प्रवेशः, समकमेव** चावग्रहस्या**नुज्ञापनम्**। इयमत्र भावना—भिक्षाग्रहणाय विचाराय वा सर्वमुपकरणमादाय समकमेव निष्क्रामतः, समकमेव च प्रविशतः, तथा वसतिं प्रथमं याचमानौ समकमेव शय्यातरमनुज्ञापयतः। तथा निर्गच्छन्तौ समकमेव शय्यातर[1]समीपमुपगम्य **ब्रुवाते**— यथा **गृहे** गृहस्य प्रतिश्रयस्य **उपधानं** स्थगनं दद्या इति ७ ॥ १७२८॥

'उउबद्धे' [गा.१७१७] इति पदव्याख्यानार्थमाह—



१. °तरमुपगम्य- वा. मो. पु. ता.॥

**उउबद्धे अविरहियं, इतं जंतेहि होइ साहूहिं** । दारं ८ ।
**कारेइ कुणइ व सयं, गणीवि ओलोयणमभिक्खं ॥ १७२९ ॥** दारं ९॥

**ऋतुबद्धे** काले तयोः कारणवशतस्तथास्थितयोस्तत्स्थानमागच्छद्भिः— भिक्षार्थं ग्रामं प्रविशद्भिः विचारार्थाय वा निर्गत्य मिलनार्थमागच्छद्भिः **गच्छद्भिश्च** पुनः स्वस्थानं प्रतिप्रचलद्भिः **साधुभिरविरहितं भवति** ८। ओलोयणं [गा.१७१७]त्ति पदं व्याख्यानयति–योऽसौ **गणी** आचार्यः **सोऽपि** तयोर्द्वयोर्जनयोः अवलोकनां गवेषणा**मभीक्ष्णं** द्वितीये तृतीये वा दिने **स्वयं करोति** अन्यैर्वा **कारयति** ९ ॥ १०२९॥

उपसंहारमाह—

**एएहिं कारणेहिं, हेमंते घिंसु अप्पबीयाणं ।**
**धिइ-देहमकंपाणं, कप्पति वासो दुवेण्हंपि ॥ १७३० ॥**

**एतैः**अनन्तरोदितैर्व्याकुलनादिभिः **कारणैर्हेमन्ते** शीतकाले **ग्रीष्मे** उष्णकाले[१] **द्वयोरप्या**–



---
१. घर्म्मकाले- वा. पु. मु. ॥

**त्मद्वितीय**योराचार्योपाध्याययोः **धृत्या देहेन चाकम्प्ययोः** अचाल्ययोः, धृतेर्वज्रकुड्य-समानत्वात्, देहस्य च प्रथमसंहननात्मकत्वात्, **कल्पते वासः** ।।१७३०॥

तदेवमृतुबद्धकालविषयाणि सूत्राणि भाष्यकृता प्रपञ्चितानि। सम्प्रति वर्षाकालविषयाणि प्रपञ्चयति—

**नियमा होइ असुण्णा, वसही नयणे य वण्णिया दोसा ।**
**दुस्संचर बहुपाणा, वासावासे विउच्छेदो ॥ १७३१ ॥**

**वर्षावासे** वर्षाकाले **नियमाद्वसतिरशून्या** कर्तव्या । किं कारणम्? इति चेत्, उच्यते— वर्षासूपकरणं सह न नीयते। अथ भिक्षादि गच्छन्नयति तर्हि वर्षाप्रपातेन तिम्यते। तथा चाह— उपकरणस्य सह नयने पूर्वं **कल्पाध्ययने** तेमनादयो **दोषा वर्णिताः**। अन्यच्च शून्यायां वसतौ कृतायां गवादिभिर्भञ्जनं भटादिभिर्वा रोधनं भवेत् । तथा च सत्यन्यस्यां वसतौ गन्तव्यम् । तस्या अलाभे अन्यद् ग्रामान्तरं गमनीयम्। तत्र च **दुस्सञ्चरा** मार्गाः सलिल-हरितादिभिरात्मविराधना-संयमविराधनाभावात् । तथा **बहुप्राणा** मार्गाः, द्वित्रिचतुः-पञ्चेन्द्रियाणामनेकजातीयानां सम्मूर्च्छनात् । तथा शय्यातरेण शून्यां वसतिमालोक्य 'अदाक्षिण्या

एते, क्वाप्यनापृच्छ्य गताः' इति प्रद्वेषतस्तेषां सर्वेषां वा तद् द्रव्यस्यान्यद्रव्यस्य वा **व्युच्छेदः** क्रियेत । यत इमे दोषास्तस्मात् शून्या वसतिः न कर्तव्या इति जघन्यतोऽप्याचार्यस्योपाध्यायस्य चाऽऽत्मतृतीयस्य वर्षाकाले विहारः, अन्यथा प्रायश्चित्तम् ॥ १७३१ ॥

तथा चाऽऽह—

**वासाण दोण्ह लहुया, आणादिविराहणा वसहिमादी१ ।**
**संथारग उवगरणे२, गेलन्ने ससल्लमरणे य ॥ १७३२ ॥** दारगाहा।

यदि पुनर्द्वौ जनौ वर्षाकाले वसतस्तदा प्रायश्चित्तं चत्वारो **लघुकाः आज्ञादय**श्च दोषाः। तथा **विराधना वसत्यादेः**, आदिशब्दादात्म-संयम-प्रवचनपरिग्रहः १। तथा **संस्तार**कविषये **उपकरण**विषये च भूयांसो दोषाः २। तथा द्वयोर्जनयोर्विहरतोरेकः कथञ्चनापि **ग्लानो** जायेत ततो ग्लानं वसतौ मुक्त्वा परस्मिन् भिक्षादिनिमित्तं बहिर्गते ये पश्चाद् ग्लानस्य दोषा द्वितीयोद्देशकेऽभिहिताः, यच्च सशल्यस्य सतो मरणं तदेतत्सर्वमत्रापि द्रष्टव्यम्। एष द्वारगाथासङ्क्षेपार्थः ॥ १७३२॥

साम्प्रतमेनामेव विवरीषुः प्रथमतो विराधना वसत्यादेरिति विवृण्वन्नाह—

**सुण्णं मोत्तुं वसहिं, भिक्खादिकारणाउ जइ दोवि ।**
**वच्चंति ततो दोसा, गोणाईया हवंति इमे ॥ १७३३ ॥**

**यदि द्वावपि शून्यां वसतिं मुक्त्वा भिक्षादिकारणवशतो व्रजतस्ततः इमे** वक्ष्यमाणा **दोषाः गवादिकाः** गवादिनिमित्ता **भवन्ति** ॥ १७३३ ॥

तानेवाऽऽह—

**गोणे साणे छगले, सूगरमहिसे१ तहेव परिकम्मे२ ।**
**मिच्छत्तबडुगमादी३, अच्छंते सलिंगमादीणि ४ ॥ १७३४ ॥** दारगाहा॥

**गौः श्वा छगलः शूकरो महिषो** वा शून्यां वसतिमवबुध्य प्रविशेत्। **तथा परिकर्म** गृहस्थः कुर्यात् । यदि वा **मिथ्यात्वोप**हता **बटुकादयः** प्रविशेयुः। अथैको गच्छत्येकः पश्चात्तिष्ठति ततः एकस्मिन् पश्चात्तिष्ठति **स्वलिङ्गादी**नि स्वलिङ्गप्रतिसेवनादय आत्मपरोभयसमुत्था बहवो दोषाः ॥ १७३४ ॥

एषापि द्वारगाथा। तत्र गवादिद्वारव्याख्यानार्थमाह—

**गोणादीए पविट्ठे, धाडंतमधाडणे भवे लहुया ।**

**अहिगरण-वसहिभंगा, तह पवयणे संजमे दोसा ॥ १७३५ ॥** दारं १ ॥

गवादिके गो-श्व-छगल-शूकरादिके **प्रविष्टे** यदि तान् गवादीन् **धाटय**ति ततस्तप्ता-योगोलककल्पास्तिर्यञ्च इति तद्धाटने भवति प्रायश्चित्तं चत्वारो **लघुकाः**। तथा ते गवादयो निर्द्धाटिताः सन्तो हरितादीनि खादेयुस्ततोऽ**धिकरण**दोषसम्भवः। **अधाडणे**त्ति अथ न निर्धाटयति तर्हि **वसतिभङ्गः,तथा प्रवचने संयमे** च **दोषाः** प्रवचनविराधना संयमविराधना, उपलक्षणमेतत्, आत्मविराधना चेत्यर्थः। तथाहि यदि श्वादयो बालमृतकलेवरादि भक्षयन्तस्तिष्ठन्ति तदा महती प्रवचनस्य कुत्सेति प्रवचनविराधना। शूकरप्रभृतयश्चाऽनिष्कास्यमानाः कदाचित्सम्मुखा अपि चलेरन् तत आत्मविराधना, श्वादयश्च तिष्ठन्तो मार्जार-मूषिकादिकमुपहन्युरिति संयमविराधना ॥१७३५॥

तदेवं 'गोणे साणे' इत्यादि व्याख्यातम् । अधुना 'परिकम्मे'त्ति व्याख्यानयति—

**दुक्खं ठिएसु वसही, परिकम्मं कीरइ त्ति इति नाउं ।**
**भिक्खादिनिग्गएसुं, सअट्ठमीसं विमं कुज्जा ॥ १७३६ ॥**

ते गृहस्थाः परिभावयन्ति-**स्थितेषु** साधुषु दुःक्खं महता कष्टेन **वसतेः परिकर्म क्रियते**, स्वाध्यायभङ्गादिदोषभावात्। गतेषु तु न कश्चिद् दोष इति **ज्ञात्वा** परिभाव्य **भिक्षादि**निमित्तं **निर्गतेषु** साधुषु **सअट्ठ**त्ति स्वार्थं स्ववसतिबलिष्ठताकरणार्थं **मिश्रं वा** संयता अपि सुखेन स्वाध्यायादिकं शयनादिकं च कुर्युरिति स्वार्थं संयतनिमित्तं च **इदं** वक्ष्यमाणं परिकर्म **कुर्युः** ॥ १७३६ ॥

तदेवाऽऽह—

**उच्छेव बिलत्थगणे, भूमीकम्मे संपुच्छणाऽऽमज्जे ।**
**कुड्डाण लिंपणं दूमणं च एयं तु परिकम्मं ॥ १७३७ ॥**

**उच्छेवो** नाम यत्र पतितुमारब्धं तत्रान्यस्येष्टकादेः संस्थापनम्। **बिलस्थगनं** कोलादिकृत-बिलेष्विष्टकाशकलादि प्रक्षिप्योपरि गोमयमृत्तिकादिना पिधानम् । **भूमिकर्म** नाम विषमाणि

भूमिस्थानानि भङ्क्त्वा सर्वत्र समभूमिकरणम्। [१]**संपुच्छणा** सम्मार्जन्या सम्मार्जनम्। **आमर्जनं**[२] मृद्-गोमयादिना लिम्पनम् । तथा **कुड्यानां लेपनम्**। कुड्यानामेव **च दूमणं**ति धवलनम्। **एतत्परिकर्म** कुर्युः ॥ १७३७॥

अत्रैव प्रायश्चित्तविधिमाह—

**जइ ढक्कित्तोच्छेवा, तति मास बिलेसु गुरुग सुद्धेसु ।**

**पंचेंदियउद्दाते, एगदुगतिगे उ मूलादी ॥ १७३८॥**

**यति** यावन्त **उच्छेवा ढक्कित्ता** समारचितास्**तति** तावन्तो लघु**मासाः** प्रायश्चित्तम्। **बिलेषु शुद्धेषु** पञ्चेन्द्रियजीवरहितेषु स्थगितेषु **गुरुग**त्ति चत्वारो गुरुका मासाः। अथ पञ्चेन्द्रियव्याघातो बिलस्थगने अभूत् तत **एकद्वित्रिषु** व्याहतेषु यथाक्रमं **मूलादि**। एकस्मिन् **पञ्चेन्द्रियेऽपद्राविते** मूलम्, द्वयोरनवस्थाप्यम्, त्रिषु त्रिप्रभृतिषु पाराञ्चितमिति ॥ १७३८॥

**भूमीकम्मादीसु, फासुग देसे उ होइ मासलहुं ।**

**सव्वम्मि लहुग अप्फासुगेण देसम्मि सव्वे वा ॥ १७३९ ॥**

१. संपुंसना- पु. प्रे. ॥ २. °र्जनम् उदक गोम ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भूमिकर्मादिषु** भूमिकर्म-सम्मार्जना-ऽऽमर्जन-कुड्यलेपन-धवलनेषु **देशतः प्राशुकेषु** कृतेषु प्रत्येकं प्रायश्चित्तं भवति **मासलघु**। **सर्वस्मिन्** उपाश्रयेषु प्राशुकेषु कृतेषु प्रत्येकं चत्वारो **लघुकाः**। **अप्राशुकेनापि** जलादिना **देशतः सर्वतो वा** भूमिकर्मादिषु कृतेषु प्रत्येकं चत्वारो लघुकाः ॥१७३९॥

सम्प्रति शय्यातरमधिकृत्य प्रायश्चित्तविधिमाह—

**सोच्चा गयत्ति लहुगा, अप्पत्तिय गुरुग जं च वोच्छेदो** । दारं २।
**बडु चारण भड मरणे, पाहुण निक्कयणा सुण्णे ॥ १७४० ॥** दारं ३।

शय्यातरो यदि शून्यां वसतिमालोक्य, कस्यापि पार्श्वे दृष्ट्वा **श्रुत्वा** च एतज्जानाति, यथा— '**गताः** साधवः' इति, न चाप्रीतिरुत्पन्ना तदा प्रायश्चित्तं चत्वारो **लघुकाः**। अथ**प्रीतिकं** करोति, यथा- 'अदाक्षिण्या एते, अनापृच्छया गताः' इति, तर्हि **गुरुगत्ति** चत्वारो गुरुका मासाः। अथैकाऽनेकभेदेन तद्द्रव्याऽन्यद्रव्य**व्यवच्छेद**स्तदा तन्निमित्तमपि



For Private and Personal Use Only

चतुर्गुरुकं प्रायश्चित्तम् २। अधुना 'मिच्छत्तबडुगमादी' [गा.१७३४] इति व्याख्यानयति-**बडु चारणे**त्यादि, बटुका द्विजातयः, चारणाः वैतालिकविशेषाः, **भटाः** प्रतीताः, ते 'गताः क्वापि साधवः' इति विज्ञाय तस्मिन् शून्ये उपाश्रये आवासयेयुः, तत्र च कलहादिप्रसङ्गः। तथा शून्यां वसतिमालोक्य कश्चित्तिरश्चो मनुष्यो वा समागत्य **म्रियेत**, तत्र च राजग्रहादि-दोषसम्भवः। तथा केचित् शय्यातरस्य **प्राघूर्णकाः** '**शून्ये**यं वसतिः' इति कृत्वा शय्यातरानुज्ञया तत्र तिष्ठेयुः, न च ते निष्काशयितुं शक्यन्ते, **निष्काशने** वा प्रद्वेषादिप्रवृत्तिः। तथा तिरश्ची मानुषी वा प्रसवितुकामा शून्यां दृष्ट्वा तत्राऽऽगत्य प्रसुवीत। तस्याः **निष्केतने** आश्रयत्याजने संयमविराधनादयो दोषा यथोक्ताः प्राक्। एते उपाश्रये **शून्ये** क्रियमाणे दोषाः ॥१७४०॥

सम्प्रति 'अच्छंते सलिंगमादीणि' [गा.१७३४] इति व्याख्यानयति—

**अह चिट्ठति तत्थेगो, एगो हिंडइ उभयहा दोसा ।**
**सलिंगसेवणादी, आउत्थ परे य उभयतो य ॥ १७४१ ॥**

**अथ तत्र एकस्तिष्ठति एको हिण्डते** तत **उभयथा** उभयेन प्रकारेण, यस्तिष्ठति तद्गता यश्च हिण्डते तद्गताश्चेत्यर्थः, **स्वलिङ्गसेवनादयो दोषाः** स्वलिङ्गसेवना-संयतीप्रतिसेवना, आदिशब्दात्परलिङ्गसेवना गृहलिङ्गसेवना च परिगृह्यते । कथम्भूताः ? इत्याह-**आत्मोत्थाः**, आत्मनैव संयत्यादिकं कदाचित्प्रार्थयते इत्यर्थः। तथा **परे** परतः संयत्यादिकृतक्षोभनात्, **उभयतः** स्वतः परतश्च समुत्थाः॥ १७४१ ॥

यदुक्तं प्राक् "सोच्चा गयत्ति लहुगा"[१७४०] इत्यादिगाथापूर्वार्धं, तद्व्याख्यानार्थमाह—

**सुण्णे सागरि दट्ठुं, संथारे पुच्छे कत्थ समणा उ ।**
**सोउं गयत्ति लहुगा, अप्पत्तियछेदे चउ गुरुगा ॥ १७४२ ॥** दारं १॥

संस्तरन्ति साधवोऽस्मिन्निति संस्तारः- उपाश्रयः, सागारिकः शय्यातरः, सप्तमी प्राकृतत्वाद् द्वितीयार्थे, ततोऽयमर्थः— **शून्यं संस्तारमुपाश्रयं सागारिको दृष्ट्वा पृच्छेत्- कुत्र** गताः **श्रमणाः ?** इति। तत्र प्रतिवचः **श्रुत्वा गताः इति** ज्ञाते अप्रीत्यकरणे प्रायश्चित्तं चत्वारो **लघुकाः। अप्रीतिके** समुत्पन्ने **छेदे** च तद्द्रव्यान्यद्रव्यव्यवच्छेदे **चत्वारो गुरुकाः**॥ १७४२॥

तदेवं "विराधना वसत्यादेः" इति व्याख्यातम् १। सम्प्रति "संथारग उवगरणे" [गा. १७३२] इति व्याख्यानयति—

**कप्पट्ठग संथारे, खेलण लहुगो तुवट्टे गुरुगो उ ।**
**नयणे डहणे चउलहु, एत्तो उ महल्लए वोच्छं ॥ १७४३ ॥**

**संस्तारे** उपाश्रये यदि **कप्पट्ठग**त्ति बालकः खेलति-क्रीडति ततः **खेलने** प्रायश्चित्तं **लघुको** मासः। अथ त्वग्वर्तनं कुर्यात्तर्हि **त्वग्वर्तने** कृते **गुरुको** मासः। अथ स बालकस्तत्र स्थितः स्तेनेन **नीयते** प्रदीपनकेन वा लग्नेन **दह्यते** तदा **चतुर्लघु। अत** ऊर्ध्वं **महति** त्वग्वर्तनादि कुर्वति प्रायश्चित्तं **वक्ष्ये**॥ १७४३ ॥

प्रतिज्ञातमेव निर्वाहयति—

**तुवट्ट नयण डहणे, लहुगा गुरुगा हवंतऽणायारे ।**
**अह उवहम्मति उवहित्ति घेत्तुणं हिंड मासलहुं ॥ १७४४ ॥**

**उल्ले लहुग गिलाणादिगा, य सुण्णे ठवेंति चउ लहुगा ।**
**अणरक्खितोवहम्मति हिते व पावेंति जं जत्थ ॥ १७४५ ॥**

महान् पुरुषः शून्यमुपाश्रयं दृष्ट्वा तत्र त्वग्वर्तनं करोति, यदि वा उपकरणं नयति दहति वा, तदा **त्वग्वर्तने नयने दह**ने वा प्रत्येकं प्रायश्चित्तं चत्वारो **लघुकाः**। अथाऽनाचारं करोति तत्रापि चत्वारो **गुरुकाः**। अधुना ''उपकरणे''ति व्याख्यानार्थमाह— **अहे**त्यादि, अथ **उपहन्यते उपधिरिति** कृत्वा तं सह **नीत्वा** भिक्षार्थं **हिण्डते** तदा प्रायश्चित्तं **मासलघुः** ॥१७४४॥ अथ कथमपि सह नीतः वर्षेणा**र्द्रीक्रियते** तदा चत्वारो **लघुकाः**। अथ तस्मिन्नुपाश्रये **शून्ये** सति **ग्लानादिकान्**, आदिशब्दात् प्राघूर्णकादिपरिग्रहः, गृहस्थाः **स्थापयन्ति** तदापि **चत्वारो लघुकाः**। अथोपधिं सह न नयति, तदा सो**ऽरक्षितः** सन् **उपहन्यते** तस्करैर्वाऽपह्रियते तदऽपहारे च जघन्य-मध्यमोत्कृष्टापहारनिमित्तं प्रायश्चित्तम्। **हृते** च तस्मिन्नुपकरणे **यद्** अनेषणादिकं **यत्रो**पकरणविषये तौ सेवाते तन्निमित्तमपि प्रायश्चित्तं तौ प्राप्नुतः॥ १७४५॥

सम्प्रति ''गेलण्णे [स]सल्लमरणे'' [गा. १७३२] इति द्वारद्वयमाह—

**गेलण्ण मरणसल्ला, बितिउद्देसम्मि वण्णिया पुव्विं ।**
**ते चेव निरवसेसा, नवरं इहइं तु बितियपयं ॥ १७४६ ॥**

**ग्लान्यं मरणसल्लत्ति** सशल्यमरणमेते द्वे अपि **पूर्वं द्वितीयोद्देशके** प्रथमसूत्रे ये दोषतया सविस्तरं **वर्णिते ते एव निरवशेषे** अत्रापि वक्तव्ये। **नवरं** तत्र **द्वितीयपद**मपवादपदं नोक्तम्, **इह तु**कारः पादपूरणे, तदुच्यते ॥ १७४७॥

तदेवाह—

**असिवादिकारणेहिं, अहवा फिडिया उ खेत्तसंकमणे ।**
**तत्तियमेत्ता व भवे, दोण्हं वासासु जयण इमा ॥ १७४७ ॥**

**अशिवादिभिः कारणैर्द्वा**वपि वर्षासु विहरतः, **अथवा** एकस्मात् क्षेत्रादन्यस्मिन् **क्षेत्रे सङ्क्रमणे** कथमपि मार्गतः **स्फिटितौ** परिभ्रष्टावेकत्र वर्षासु विहरतः। उपलक्षणमेतत्, तेनैतदपि द्रष्टव्यम्- अशिवादिकारणतो गणस्फेटनं कृत्वैकाकिनो जाताः, सङ्केतवशाच्च क्वचिद्वर्षासु द्वौ मिलिताविति । **तत्तियमेत्ता व भवे** इति अथवा शेषाः प्रतिभग्ना मृता वा अवशिष्टौ तावन्मात्रावेव द्वावेव **भवत**स्तिष्ठतः। एवं द्वौ वर्षासु सम्भवतः। तयोश्च **द्वयोर्वर्षासु इयं** वक्ष्यमाणा **यतना** ॥ १७४७॥

तामेवाह—

**एगो रक्खति वसहिं, भिक्ख-वियारादि बितियतो जाति ।**
**संथरमाणे असंथरे, [1]निद्दोच्चुवरिं ठवेंतुवहिं ॥ १७४८ ॥**

**एको वसतिं रक्षति द्वितीयः भिक्षा-विचारादौ** भिक्षायां विचारे बहिर्भूमौ, आदिशब्दादन्यस्मिन् वा प्रयोजने **याति**। एवं यतना तदा भवति यदा तौ द्वौ **संस्तरतः**। **असंथरे**त्ति, अथैकाकिनो भिक्षाया अलाभादन्यतो वा कुतश्चित्कारणान्न संस्तरतस्तदा असंस्तरे द्वावपि सह हिण्डेते तत्रेयं यतना- यदि वसतौ [2]**निर्दौत्यं** निर्भयं तदा **उपधिमुपरि** वसतेः मध्यभागे **स्थापयतः** बध्नीतः, यथा न कोऽपि पश्यतीति। एवम्भूतां च तां यतनां कुर्वन्तौ तावप्रायश्चित्तविषयौ। अथ न कुरुतस्तदा यद् आपद्यते प्रायश्चित्तं तत्प्राप्नुत इति ॥१७४८॥

**सुत्तेणेवुद्धारो, कारणियं तं तु होति सुत्तंति ।**
**कप्पोत्ति अणुण्णातो, वासाणं केरिसे खेत्ते? ॥ १७४९ ॥**

यत एवं दोषास्ततो द्वयोर्विहारो वर्षासु साक्षात्पञ्चमेन **सूत्रेण** प्रतिषिद्धः। त्रयाणां तु

गाथा १७४३-१७४९ सकारणे द्विकविहारे यतना ८०७ (B)

---

१. निद्दोस्सु० मु. ॥ २. निर्दौस्यं ( ष्यं ) मु. ॥

विहारस्य **उद्धारः** अनुज्ञानं **सूत्रेणैव** षष्ठेन कृतः। सोऽप्युत्सर्गतो न कल्पते ततस्तत्**सूत्रं कारणिक**मशिवादिकारणनिष्पन्नं **भवति** वेदितव्यम्। अथ **कीदृशे क्षेत्रे वर्षासु,** गाथायां षष्ठी सप्तम्यर्थे प्राकृतत्वात्, त्रयाणां विहारः **कल्पः इति** 'कल्पते' इत्यनेन पदेन **अनुज्ञातः?** ॥१७४९॥

सूरिराह—

**महती वियारभूमी १, विहारभूमी य सुलभ २ वित्ती य ३।**
**सुलभा वसही य जहिं ४, जहण्णयं वासखेत्तं तु ॥ १७५० ॥**

यत्र **महती विचारभूमिः** पुरीषोत्सर्गभूमिः १, यत्र च महती **विहारभूमि**र्भिक्षानिमित्तं परिभ्रमणभूमिः २, यत्र **च वृत्ति**र्भिक्षावृत्तिः **सुलभा** ३, **वसतिश्च यत्र सुलभा** ४, तद् **जघन्यं वर्षायोग्यं क्षेत्रम्** ॥ १७५० ॥

उत्कृष्टं त्रयोदशगुणोपेतम् । तानेवाऽऽह—

**चिक्खल्ल१ पाण२ थंडिल३, वसही४ गोरस५ जणाउलो६ वेज्जो७।**
**ओसह८ निचया९ऽहिवती१०, पासंडा११ भिक्ख१२ सज्झाए१३ ॥१७५१॥**

दारगाहा ॥

गाथा १७५०-१७५५ चातुर्मास-योग्य-क्षेत्रगुणाः १३



For Private and Personal Use Only

यत्र **चिक्खल्लः** कर्दमो भूयान्न भवति १, **प्राणाश्च** द्वीन्द्रियादयो भूयांसो न सम्मूर्च्छन्ति २, यत्र च भूयांसि **स्थण्डिलानि** ३, **वसतयश्च** द्वित्रादयो यत्र प्राप्यन्ते ४, **गोरसं** च प्रभूतम् ५, प्रत्येकं भूयो**जनसमाकुलः** कुलवर्गः ६, **वैद्यश्च** यत्र विद्यते ७, **औषधानि** च सुप्रतीतानि ८, **निचयाश्च** धान्यानामतिप्रभूताः ९, **अधिपतिः** प्रजानामतीव सुरक्षको वर्तते १०, **पाषण्डाश्च** स्तोका विद्यन्ते ११, **भिक्षा** च सुलभा १२, **स्वाध्यायश्च** निर्व्याघातः १३। एतदुत्कृष्टं वर्षासु योग्यं क्षेत्रम् ॥ १७५१ ॥

साम्प्रतमेतद्गुणाभावे वर्षासु वसतां प्रायश्चित्तमाह—

**पाणा१ थंडिल २वसही३, अहिवति४ पासंड५ भिक्ख६ सज्झाए७ ।**
**लहुया सेसे लहुओ, केसिंची सव्वहिं लहुगा ॥ १७५२ ॥**

यदि यत्र प्राणा अतिबहवः१, यदि वा न विद्यन्ते **स्थण्डिलानि**२, **वसतयो** वा द्वित्रादिका न विद्यन्ते३, **अधिपतिर्वा** नास्ति४, **पाषण्डा** वा बहवः५, **भिक्षा** वा न सुप्रापा ६, **स्वाध्यायो**



For Private and Personal Use Only

वा न निर्वहति ७, तत्र वर्षाकालं करोति तदैतेषु दोषेषु प्रत्येकं प्रायश्चित्तं चत्वारो **लघुकाः**। **शेषे** चिक्खल्लादिके दोषे प्रत्येकं लघुको मासः। **केषाञ्चि**दाचार्याणां मतेन पुनः **सर्वत्र** सर्वेष्वपि दोषेषु प्रत्येकं चत्वारो **लघुकाः** ॥ १७५२॥

सम्प्रति 'चिक्खल्ले' दोषानभिधित्सुराह—

**नीसरण-कुच्छणा-गार, कंटका सिग्ग आयभेदो य ।**
**संजमतो पाणादी, आगाह निमज्जणादीया ॥ १७५३ ॥**

**निस्सरणं** नाम फेल्हसणम्, **कुत्सना** अङ्गुल्यन्तराणां कोथः, **गाराः** कर्करकाः, **कण्टकाः** बब्बूलशूलादयः, **सिग्ग**त्ति देशीपदमेतत्, परिश्रम इत्यर्थः। एष **आत्मभेदः**, एते आत्मविराधनायै दोषा इत्यर्थः। **संयमतः** संयमे पुनरयं दोषः— **प्राणाः** द्वीन्द्रियादयः, **आदि**शब्दात् पृथिवीकायादिपरिग्रहः, ते विपद्यन्ते। तथा यदि 'सुखेनात्र गच्छामि' इति विचिन्त्य सोदके कर्दमे गच्छति तदा क्वचिदगाधे **निमज्जति, आदि**शब्दात् पादजङ्घादि-क्षोभिताः सकर्दमजलविप्रुष उत्थापयति, ताभिश्च प्राणादिविघातः, सम्मुखागच्छत्पुरुषादिखरण्टनं

निजशरीरोपकरणखरण्टनं चेति परिग्रहः ॥ १७५३ ॥

**धुवणे वि होंति दोसा, उप्पिलणादी य बाउसत्तं च ।**
**सेहादीणमवण्णा, अधोवणे चीरनासो वा ॥ १७५४ ॥** दारं १।

कर्दमाकुले मार्गे गमनतः कर्दम उपकरणे लगति, तस्य चोपकरणस्य **धावनेऽपि**, आस्तामधावने इत्यपि शब्दार्थः, **दोषाः**। के ते? इत्याह— **उत्पीडनादयः**, उत्पीडनं— प्राणादीनां प्लावनम्, आदिशब्दात् शरीरायास-स्वाध्यायविघातादिपरिग्रहः। अपि च वस्त्राणि शरीरं च प्रक्षालयतो **बाकुशिकत्व**मुपजायते, शरीरोपकरणबकुशीकरणात्। अथ न प्रक्षालयति, तर्हि **अधावने शैक्षकादीनामवज्ञा**सम्भवः, **चीवरनाश**श्च कर्दमेन शटनात् । **वा**शब्दः समुच्चये १ ॥ १७५४ ॥

सम्प्रति प्राणसम्भवे दोषानाह—

**मुइंग-विच्छुगादिसु, दो दोसा संजमे च सेसेसु ।** दारं २।
**नियमा दोस दुगुंछिय, अथंडिल निसग्ग धरणे य ॥ १७५५ ॥** दारं ३।

**मुइङ्गा** नाम- पिपीलिका, **वृश्चिकादिषु शेषेषु च** प्राणेषु बाहुल्येन संभवत्सु **द्वौ दोषौ**। तद्यथा— **संयमे**, चशब्दादात्मनि च, आत्मविराधना संयमविराधना चेत्यर्थः। तत्र वृश्चिकादिभिर्दंशादात्मविराधना, कीटकादिसत्त्वव्याघाताच्च संयमविराधना २। स्थण्डिलाभावे दोषानाह— **नियमे**त्यादि, स्थण्डिलाभावे **अस्थण्डिले जुगुप्सिते** वा स्थण्डिले **निसर्गे** पुरीषप्रश्रवणोत्सर्गे **नियमाद् दोषाः** संयमविराधनादयः। तत्र अस्थण्डिले हरितकायादि-व्यापादनात् संयमविराधना, पादादिल्हसनादात्मविराधना, जुगुप्सिते स्थण्डिले प्रवचनविराधना। अथैतद्दोषभयान्न व्युत्सृजति किन्तु धारयति तत आह— **धारणे च** दोषा आत्मविघातादयः। तथा च पुरीषादिधारणे जीवितनाशादिः, '**मुत्तनिरोहे चक्खुं, वच्चनिरोहे य जीवियं चयति**' [ ओघ नि. गा. १९८ ]' इत्यादिवचनात्। ग्लानत्वे च चिकित्साकरणतः संयमव्याघातः, ३ ॥१७५५॥



यत्र सङ्कटा वसतिर्यत्र च द्वित्रादयो वसतयो न लभ्यन्ते तत्र दोषानाह—

**वसहीए संकडाए, विरल्ल- अविरल्लणे भवे दोसा ।**
**वाघातेण व अण्णाऽसतीए दोसा उ वच्चंते ॥ १७५६ ॥** दारं ४।

**वसतौ सङ्कटायां** सत्यामुपधेः **विरल्लेति** विस्तारणे **अविस्तारणे** वा **दोषा भवन्ति**। के ते? इति चेद्, उच्यते— यदि उपधिस्तीमितो विस्तार्यते ततः स वसतेः सङ्कटत्वादन्यमप्यतीमितमुपधिं तीमयति। अथ न विस्तार्यते तर्हि स कोथमुपयाति, तत्संसर्गतः शरीरस्य च मान्द्यमुपजायते। एकस्याश्च वसतेः कथमपि **व्याघाते अन्यस्याश्च अभावे** ग्रामान्तरं व्रजनीयम्, तत्र च **व्रजति** संयमाऽऽत्म-प्रवचनविराधना। तथाहि- मार्गे जलहरितकायादिव्यापादनात् संयमविराधना, अगाधे सलिले प्रविशत आत्मविराधना, वसत्यलाभतो वर्षाकालेऽपि वर्षाप्रपातेनावरुध्यमानान्पथि गच्छतस्तान् दृष्ट्वा लोकः प्रवचनं कुत्सयते— ईदृशा एवैते, वर्षास्वपि नाऽऽश्रमं क्वचिदपि लभन्ते इति प्रवचनविराधना ४ ॥ १७५६ ॥

गोरसाभावे दोषानाह—

**अतरंतबाल-वुड्ढा, अभाविता चेव गोरसस्सऽसती ।**
**जं पाविहिंति दोसं, आहारमएसु पाणेसु ॥ १७५७ ॥**

**अतरन्तो नाम** असहाः तथा **बाला वृद्धाश्च** तथा ये **अभाविता** येषां गोरसव्यतिरेकेण नान्यत्किमपि प्रतिभासते ते **गोरसस्य असति** अभावे **आहारमयेषु प्राणेषु** सत्सु यद्

आगाढाऽनागाढपरितापनादिकं **दोषं प्राप्स्यन्ति**, तन्निमित्तं सर्वमपि प्रायश्चित्तमाचार्यो लप्स्यते, तस्माद्यत्र तदभावस्तत्र न वस्तव्यम् ॥ १७५७॥

अत्र पर आह—

**नणु भणितो रसचाओ, पणीयरसभोयणे य दोसा उ ।**
**किं गोरसेण भंते!, भण्णइ सुण चोयग! इमं तु ॥ १७५८ ॥**

**ननु सूत्रे रसानां**- क्षीरादीनां **त्यागो भणितः**, "**अनशनमूनोदरता, वृत्तेः सङ्क्षेपणं रसत्यागः**" [ **प्रशमरति** गा.१७५ ] ' इत्यादिबाह्यतपोव्यावर्णनात्; **प्रणीतरसभोजने च दोषाः** कामोद्रेकादयः, शरीरोपचयादिभावात्; ततः किं **भदन्त! गोरसेन** कर्तव्यम्? । सूरिराह— **भण्यते शृणु चोदक! इदं** वक्ष्यमाणम् ॥ १७५८॥

तदेवाह—

**कामं तु रसच्चाओ, चतुत्थमंगं तु बाहिरतवस्स ।**
**सो पुण सहूण जुज्जति, असहूण य सज्ज वावत्ती ॥ १७५९ ॥**

काममनुमतमेतत्, **रसत्यागश्चतुर्थमङ्गं** चतुर्थो भेदो **बाह्यतपसः** षड्भेदात्मकस्य, केवलम्, **पुनः**शब्दः केवलार्थः, स रसत्यागः **सहानां युज्यते** सङ्गच्छते, **असहाना**मसमर्थानां रसाभावे **सद्यः** तत्कालं **व्यापत्ति**र्मृत्युः ॥ १७५९ ॥

अन्यच्च—

**'अगिलाए तवोकम्मं, परक्कमे संजतो' ति इति वुत्तं ।**
**तम्हा उ रसच्चाओ, न नियमतो होति सव्वस्स ॥ १७६० ॥**

**संयतस्तपःकर्म** प्रति **अग्लान्या पराक्रमेद् इत्युक्तं** भगवता, **तस्मान्न नियमतः सर्वस्य रसत्यागो भवति** ॥ १७६० ॥

**जस्स उ सरीरजवणा, रिते पणीयं न होइ साहुस्स ।**
**सो वि य हु भिण्णपिंडं, भुंजउ अहवा जहसमाही ॥ १७६१ ॥** दारं ५।

**यस्य साधोः शरीरयापना प्रणीतं प्रणीतरसम् ऋते न भवति, सोऽपि च,** आसतां पूर्वोक्ता असहा इत्यपिशब्दार्थः । **हुः** निश्चितं **भिन्नपिण्डं** घृतादिना मिश्रितं गलन्तं पिण्डं

**भुञ्जीत। अथवा यथासमाधि** क्षीरादि भुङ्क्ताम्, केवलं 'मा गृद्धिर्भूयाद्' इति संसृष्टपानकादिना मीलयित्वा क्षीरमापिबेत् ५ ॥ १७६१॥

सम्प्रति जनाकुलपदव्याख्यानार्थमाह—

**चउभंगो अजणाउल-कुलाउले चेव ततियओ गज्झो ।**
**भोइयमादि जणाउल, कुलाउल मडंबमादीसु ॥ १७६२ ॥** दारं ६॥

जनाकुल-कुलाकुलयो**श्चतुर्भङ्गिका**- जनाकुलमपि कुलाकुलमपीति प्रथमो भङ्गः१ जनाकुलं न कुलाकुलमिति द्वितीयः२ न जनाकुलं कुलाकुलमिति तृतीयः३ न जनाकुलं नापि कुलाकुलमिति चतुर्थः४। प्रथमभङ्गे बहूनि कुलानि बहूनि मानुषाणि १। द्वितीयभङ्गे कुलानि स्तोकानि जनास्त्वतिबहवः, कुले कुले भोजिकादिजनानां सहस्रसङ्ख्याया भावात् २। तृतीयभङ्गे बहूनि कुलानि जनाः स्तोकाः, गृहे गृहे एकस्य द्वयोर्वा मानुषयोर्भावात् ३। चतुर्थभङ्गे न बहूनि कुलानि नापि बहवो जनाः, कतिपयकुलानां प्रतिकुलं च स्तोकमानुषाणां भावात् ४॥ अत्र यौ भङ्गौ ग्राह्यौ तावाह-**अजणाकुलेत्यादिना**- न जनाकुलं कुलाकुलमिति **तृतीयो ग्राह्यः**। एतदनुज्ञानात् प्रथमः सुतरामनुज्ञातो द्रष्टव्यः, तस्योभयगुणोपेतत्वात् । आह

च **चूर्णिकृत्** - "**जइ ताव तइओ भंगो अणुण्णाओ प्रागेव पढमो भंगो अणुण्णातो**" इति। शेषौ तु द्वौ भङ्गौ नानुज्ञातौ, कुलानामल्पत्वात् । सम्प्रति जनाकुलतां कुलाकुलतां च व्याख्यानयति--**भोइय** इत्यादि। प्रथमभङ्गे द्वितीयभङ्गे च **जनाकुलम्** भोजिकादिभिरति-प्रभूतैर्जनैराकीर्णत्वात्। **कुलाकुलं मडम्बादिषु** स्थानेषु, तथा च मडम्बे अष्टादश कुलसहस्त्राणि, आदिशब्दात्पत्तनादिपरिग्रहः ॥१७६२॥

व्याख्यातं जनाकुलद्वारम् ६। अधुना वैद्यद्वारमौषधद्वारं च युगपदाह—

**वेज्जस्स ओसहस्स व, असतीए गिलाणओ उ जं पावे ।**
**वेज्जसगासं निंते, आणेंते[१] चेव जे दोसा ॥ १७६३॥** दारं ७-८॥



यदि नाम कोऽपि ग्लानो जायते तदा **वैद्यस्य औषधस्य वाऽसति** अभावे यद् ग्लानो अनागाढा-ऽऽगाढपरितापनादि **प्राप्नोति** तन्निमित्तं सर्वं प्रायश्चित्तमाचार्यः प्राप्नोति । अन्यच्च तादृशे क्षेत्रेऽवतिष्ठमानो वैद्योऽत्र नास्तीति ग्लानेऽन्यस्मिन् **ग्रामे वैद्यस्य सकाशं नीयमाने**

---
१. अणंते- वा. मो. पु.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**आनीयमाने वा ये दोषा** अनागाढमागाढं वा परितापनं स्तेनैरुपकरणाद्यपहरणं व्याघ्रादि-श्वापदैर्भक्षणमित्यादि तद्धेतुकमपि प्राप्नोति। एवमौषधस्याप्यानयनाय साधुषु ग्रामान्तरे प्रेष्यमाणेषु दोषा वाच्याः ७-८॥ १७६३॥

अधुना निचयद्वारमधिपतिद्वारं चाह—

**नेचइया पुण धन्नं, दलंति असार-अंचितादीसु** । दारं ९।
**अहिवम्मि होइ रक्खा, निरंकुसेसुं बहू दोसा ॥ १७६४ ॥** दारं १०।

निचयेन- सञ्चयेन, अर्थाद् धान्यानां ये व्यवहरन्ति ते **नैचयिकाः ते, असाराः**- दरिद्रा **अञ्चिताः**-पूज्या राजमान्याः पितृव्यादयो वा, आदिशब्दादनञ्चितादिपरिग्रहः, **तेषु** क्रयेणान्यथा वा **धान्यं ददति** ततः सर्वत्र भिक्षा सुलभोपजायते ९। तथा **अधिपे** अधिपतौ विद्यमाने **रक्षा भवति। निरङ्कुशेषु** लोकेषु मध्ये पुनर्वसतो **बहवो दोषा** उपकरणाऽपहाराऽपमानादिलक्षणाः१० ॥१७६४॥

---

१. अनियमाने- मो.॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाषण्डद्वारमाह—

**पासंडभाविएसु, लभंति ओमाण मो अतिबहूसु ।**
**अवि य विसेसुवलद्धी, हवंती कज्जेसु उ सहाया ॥ १७६५ ॥** दारं ११ ॥

यदि स्तोकाः पाषण्डास्ततोऽशनादीनि वस्त्राणि भैषजानि चाऽतिसुलभानि भवन्ति। अतिबहुषु पुनः पाषण्डेषु सत्सु **पाषण्डभावितेभ्यो** जनेभ्यो, गाथायां सप्तमी पञ्चम्यर्थे, **अपमानं लभन्ते**। **अपीति** सम्भावने। **चः** पुनरर्थे, सम्भाव्यते पुनरियं **विशेषोपलब्धिः**- अन्यपाषण्डेभ्योऽतिशयोपलब्धिः यथा- यदन्यत् पाषण्डिनां कल्पते तत्साधूनां न कल्पते, तत एवं लोको भावितः सन् साधूनां कल्पिकं ददाति। तथा **कार्येषु** च बहुप्रकारेषु शृङ्गनादितादिलक्षणेषु वयमपि पाषण्डाः, एतेऽपि च पाषण्डा धर्मस्थिता इति कृत्वा **सहाया भवन्ति** ११ ॥ १७६५ ॥

सम्प्रति भिक्षाद्वारमाह—

**नाणतवाण विवड्ढी, गच्छस्स य संपया सुलभभिक्खे ।**
**न य एसणाए घातो, नेव य ठवणाए भंगो उ ॥ १७६६ ॥** दारं १२ ॥

सुलभा भिक्षा यत्र तस्मिन् **सुलभभिक्षे** ग्रामादौ वसतां **ज्ञानस्य** श्रुतज्ञानस्य **तपस**श्चानशनादेर्विशिष्टा **वृद्धि**र्भवति, आहारोपष्टम्भतः स्वाध्यायस्य तपसश्च कर्तुं शक्यत्वात्। तथा **गच्छस्य सम्पत्** स्फीतताऽतिविशिष्टा भवति शिष्याणां प्रातीच्छिकानां चाऽनेकेषामागमनात्। **न च एषणायाः घातः** प्रेरणा **नापि स्थापनायाः** मासकल्प-वर्षाकल्परूपायाः अथवा स्थापनाकुलानां **भङ्गः** प्रेरणा १२॥ १७६६॥

स्वाध्यायद्वारमाह—

**वायंतस्स उ पणगं, पणगं च पडिच्छतो भवे सुत्तं ।**
**एगग्गं बहुमाणो, कित्ती य गुणा य सज्झाए ॥ १७६७ ॥**



यत्र स्वाध्यायश्चतुष्कालं निर्वहति तत्र वर्षावासः कर्तव्यः, यतः **स्वाध्याये**ऽमी **गुणाः**-**सूत्रम्** आचारादिकं सूत्रतोऽर्थतस्तदुभयतश्च **वाचयतः पञ्चकं** वक्ष्यमाणं सङ्ग्रहादिकं भवति। यथा च वाचयतः पञ्चकं तथा **प्रतीच्छतः** श्रोतुरपि **पञ्चकम्,** तस्यापि सङ्ग्रहादिनिमित्तं श्रुतश्रवणाय प्रवृत्तेः। तथा वाचयतः प्रतीच्छत**श्चैकाग्र्यं** श्रुतैकपरतोपजायते, सा च विश्रोतसिकावारिका भवति। तथा **बहुमानं** भक्तिः श्रुतस्य तीर्थकरस्य च कृतं भवति।

**कीर्ति**श्चावदाता सकलधरामण्डलव्यापिनी, यथा भगवतः **आर्यवैरस्येति**[1] ॥ १७६७ ॥

अधुना पञ्चकं व्याख्यानयति—

**संगहु १ वग्गह २ निज्जर ३, सुयपज्जवजायम ४ ऽव्ववच्छित्ती ५।**

**पणगमिणं पुव्वुत्तं, जे वाऽऽयहितोपलंभादी ॥ १७६८ ॥** दारं १३ ॥

यत्पञ्चकं **पूर्वमुक्तं** तद् **इदम्** तद्यथा—**सङ्ग्रहः १ उपग्रहः २ निर्जरा ३ श्रुतपर्यवजातम्**[2] **४ अव्यवच्छित्तिश्च** ५। तत्र सङ्ग्रहः शिष्यादेः, तथा च श्रुतेन शिष्यादयः सङ्गृह्यन्ते १। उपग्रहः उपष्टम्भः स च श्रुतज्ञानादिप्रदानतः २। निर्जरा ज्ञानावरणादिकर्मविनिर्जरणम् ३। श्रुतपर्यवजातं[3] प्रभूता प्रभूततरा श्रुतज्ञानपर्यायवृद्धिः ४। अव्यवच्छित्तिस्तीर्थस्य ५। ये **वाऽऽत्महितोपलम्भादयः** आत्महितोपलम्भः१ परहितोपलम्भः२ उभयहितोपलम्भः३ एकाग्र्यं४ बहुमानं५ चेति। एतद्वा पञ्चकं प्रतिपत्तव्यम् १३ ॥ १७६८ ॥



---

१. आर्यरक्षितस्य-पु. प्रे. C आदर्शे ॥ २. ०ज्ञानम्- मो. सं. ॥ ३. ०ज्ञानम्- C ॥

**एवं ठियाण पालो, आयरियो सेस मासियं लहुयं ।**
**कप्पट्ठिनीलकेसी, आयसमुत्था परे उभए ॥ १७६९ ॥**

**एवं** त्रयोदशदोषविप्रमुक्ते त्रयोदशभिर्गुणैरुपेते क्षेत्रे कारणवशतस्त्रयाणां वर्षासु **स्थितानां** द्वयोर्भिक्षार्थं विनिर्गमे तृतीयः पश्चात्**पालः** वसतिपालः **आचार्यः** स्थापनीयः। अथान्यं स्थापयति तत आह— **शेषे** आचार्यव्यतिरिक्ते वसतिपाले स्थाप्यमाने प्रायश्चित्तं **मासिकं लघु**। तथा यदि तरुणं श्रमणं वसतिपालं पश्चात् स्थापयति तत इमे स्वलिङ्गासेवनादिका दोषाः, तद्यथा— **आत्मसमुत्थाः परे** परसमुत्था **उभयस्मिन्** उभयसमुत्थाः। कस्या इव? इत्याह- **कप्पट्ठिनीलकेसी**ति कल्पस्थिता बालिका, नीलकेशी-कृष्णकेशी तरुणीत्यर्थः, ततो विशेषणसमासः, तस्या इव, विभक्तिलोप इवलोपश्च प्राकृतत्वात्। इयमत्र भावना-यथा तरुणी बालिका तरुणानां महतां च प्रार्थनीया भवति। एवं तरुणोऽपि तरुणीनां महतीनां च प्रार्थनीयः। ततस्तस्मिन् पश्चात्स्थाप्यमाने स्वलिङ्ग-परलिङ्ग-गृहिलिङ्गासेवनविषया आत्मसमुत्था परसमुत्थाः उभयसमुत्थाश्च मैथुनदोषाः सम्भवन्ति ॥१७६९॥

एतदेवाऽऽह—

**तरुणे वसहीपाले, कप्पट्ठिसलिंगमादि आउभया ।**
**दोसा उ पसज्जंती, अकप्पिए दोसिमे अण्णे ॥ १७७० ॥**

**तरुणे वसतिपाले** सति **कप्पट्ठित्ति** तरुण्याः बालिकाया इव **स्वलिङ्गादिकाः** स्वलिङ्गासेवन-परलिङ्गासेवन-गृहिलिङ्गासेवनरूपा **आउभया** इति आत्मसमुत्था उभयसमुत्थाः, उपलक्षणमेतत्, परसमुत्थाश्च **दोषास्तस्य प्रसजन्ति। अकल्पिके** च बालादौ **इमे अन्ये दोषाः** ॥ १७८० ॥

तानेवाह—

**बलि१ धम्मकहा२ किड्डा३, पमज्जणा४ ऽऽवरिसणा ५ य पाहुडिया६ ।**
**खंधार७ अगणि८ भंगे-मालवतेणा, य९ णाती य१० ॥ १७७१ ॥**

साधवः कदाचित्कारणवशतः सप्राभृतिकायां वसतौ स्थिता भवेयुस्तत्र यदि बालादिर्वसतिपालः क्रियते तदा **बलिदोषः**। तथाहि— तत्र बलिकारकाः स्वभावेन वा

समागच्छेयुः कैतवेन वा, तत्र ये कैतवेन ते प्रथमत एवोपकरणहरणबुद्ध्या, ये तु स्वभावतस्ते नोपकरणहरणनिमित्तमागच्छन्ति किन्त्वागतानां बलिं कुर्वतां बालमेकाकिनं दृष्ट्वा हरणबुद्धिरुपजायते ततोऽपहरन्ति। अथवा बलौ विक्षिप्यमाणे उपकरणं कूरेण खरण्ट्यते ततो बालो जल्पति-बहिरुपकरणं निष्काशयामि; एवमुक्त्वा स किमप्युपकरणमादाय बहिर्निर्गतस्तावदभ्यन्तरे ते उपधिमपहरन्ति। ये तु कैतवेन समागच्छन्ति ते उपधिमपहर्तुकामा ब्रुवते- 'क्षुल्लक! बलिरेष समागच्छति ततस्त्वं बहिर्निर्गच्छ;' एवं तं बालं बहिर्निष्काश्योपधिमपहरन्ति। अथवा ब्रूयुरिदम् 'वयं बलिं करिष्यामस्ततस्त्वं बहिस्तिष्ठ अन्यथा कूरेण खरण्टना भविष्यति;' एवमुक्ते बहिर्निर्गते बाले उपधिमपहरन्ति। अथवेदमाचक्षते— उपधिमभ्यन्तराद् बहिरपनय यावद्बलिं वयं विदध्महे; स च बालस्तत्कार्यमजानानः समस्तमुपकरणमेकवारं ग्रहीतुमशक्नुवन् स्तोकं गृहीत्वा बहिः संस्थाप्य यावदन्यस्य ग्रहणाय मध्ये प्रविशति तावत्ते धूर्ता अपहरन्ति १। **धम्मकह**त्ति धर्मकथाश्रवणाय केचित्स्वभावत आगच्छेयुः, अपरे कैतवेन; समागत्य चेदं ब्रुवते- 'कथय क्षुल्लक! अस्माकं धर्मकथाम्,' स च तत्त्वमजानानः कथामारभते, ततः कथाप्रमत्ते केचित्तत्रैवोपविष्टाः शृण्वन्ति, अपरे तूपधिमपहरन्ति २। **किड्ड**त्ति क्रीडानिमित्तमपि केचित् स्वभावतः समागच्छन्ति, अपरे

कैतवेन; तेषु च समागतेषु स बालकः स्वयं वा क्रीडति, तान् वा क्रीडतः पश्यति, ततः क्रीडया व्याक्षिप्तस्य सतोऽपहरन्ति ३। **पमज्जणाऽऽवरिसणा** यत्ति य एव बलावुक्तो गमः स एव प्रमार्जने आवर्षणे च वेदितव्यः ४-५। **पाहुडिया** इति प्राभृतिका भिक्षा अर्चनिका च, तत्र केचित् स्वभावेन कैतवेन वा वदन्ति[1]— 'क्षुल्लक! गृहाण भिक्षाम्, अथवा बहिर्निर्याहि यावद्वयमर्चनिकां कुर्मः;' ततो यावद्भिक्षार्थं याति बहिर्वा निर्गच्छति तावदपहरन्ति ६। **खंधारत्ति** अपरे कैतवेन स्वभावेन वा वदेयुः- 'यथा एष राज्ञा सह स्कन्धावारः समागच्छति;' तत्र यदि स्वभावेन ततो नश्यति, स नश्यन् बालस्तैरपह्रियते; कैतवेन समागता ब्रुवते- 'क्षुल्लक! पलायस्व, स्कन्धावारः समागच्छति;' ततः स नश्यति, इतरे अपहरन्ति ७। **अगणित्ति** प्रदीपनकं लग्नं परतः स्वभावेन श्रुत्वा स्वयं वाऽवलोक्य स बालक उपधिलोभाद् भयाद्वा स्वयं वसतेर्बहिर्न निर्गच्छति नापि किञ्चिदुपकरणं निष्काशयति ततस्तस्य बालकस्योपकरणस्य च विनाशः, यदि वा उपकरणनिष्काशनाय मध्ये प्रविष्टो गुप्तः सन् स बालको दह्येत। कैतवेन वा केचिद् ब्रूयुः- 'मन्दभाग्य! नश्य, प्रदीपनकं लग्नं वर्तते।' तैरेवमुक्ते स उपकरणं



---

१. वदेयुः क्षु॰ वा. पु.॥

बहिर्निष्काशयितुमारभते ततोऽपहरन्ति ८। **भंगे मालवतेण**त्ति मालवाः- म्लेच्छविशेषाः शरीरापहारिणः, स्तेनाः-उपकरणापहारिणः, तैर्भङ्गे स बालको भयतो जनेन सार्धं नश्यति, न च सारमुपधिं गृह्णाति, यदि वा उपधिप्रतिबद्धः सन् - वसतावेव तिष्ठेत ततः स मालवैरपह्रियते, स्तेनैर्वा उपकरणमिति। अथवा केचित् कैतवेन ब्रूयुः- 'मालवाः स्तेना वा क्षुल्लक! समापतिताः, तस्मात् पलायस्व जनेन सार्धमिति;' एवमुक्ते स बालकस्तत्त्वमजानानो नश्यति, इतरे तूपकरणमपहरन्ति ९। **नाति**त्ति ज्ञातयः स्वजनास्ते समागताः तैरेकाकी दृष्टस्ततो नीयते, अन्ये चोपधिमपहरन्ति। अथवाऽन्येन केनचित् ते आगच्छन्तो दृष्टास्तेन कथितम्- 'क्षुल्लक! तव ज्ञातयः समागच्छन्ति,' ततः स पलायते, इतरश्चोपकरणमपहरति । अथवा कोऽपि धूर्तः कैतवेन ब्रूयात्- 'क्षुल्लक! क्व ते निजकाः?,' क्षुल्लकः प्राह- 'अमुके ग्रामे नगरे वा;' सोऽन्यस्मै कथयति, ततः स तेषां सज्ञातीनां नाम-चिह्नान्यवगम्य तस्य क्षुल्लकस्य समीपमागत्य भणति— 'अमुकस्य त्वं निजकः?' क्षुल्लकः प्राह- 'कथं त्वं जानासि?' ततः स तन्मातापित्रादीनां नाम-वर्णादिकं कथयति, ततः क्षुल्लकस्य प्रत्यय उपजायते, ततो वक्ति- सत्यमहं तेषां निजकः; ततो धूर्तो ब्रूते— 'ते आगतास्तव निमित्तम्, मया अमुकप्रदेशे दृष्टा' इति, ततः स पलायते, इतरे हरन्त्युपकरणम् १०। एवं यथा बालेऽकल्पिके दोषास्तथा

अव्यक्ते निद्राप्रमते कथाप्रमत्ते वाऽकल्पिके वेदितव्याः ॥१७७१॥

**तम्हा पालेइ गुरू, पुव्वं काउं सरीरचिंतं तु ।**
**इहरा आउवहीणं, विराहण धरंतमधरेंते ॥ १७७२ ॥**

यतस्तरुणे बालकादौ वाऽकल्पिके वसतिपाले स्थितेऽनन्तरोक्ता दोषाः; आचार्ये तु न भवन्ति, **तस्माद्गुरुः** आचार्यो वसतिं **पालयति**। कथम्? इति चेत्, अत आह—**पूर्वं शरीरचिन्तां कृत्वा** संज्ञाभूमिं गत्वा इत्यर्थः। अथ शरीरचिन्तां न करोति ततः प्रायश्चित्तं मासलघु। इमे च दोषाः— **इहरा उ** इत्यादि, इतरथा शरीरचिन्ताया अकरणे यदि संज्ञां **धारयति** तत **आत्म**विराधना, मरणस्य ग्लानत्वस्य चावश्यं तन्निरोधे भावात् । अथ **न धारयति** किन्तु मात्रके व्युत्सृजति ततः श्राद्धादीनामागतानां गन्धागमनतः उड्डाहः। अथ बहिर्याति तत्र **उपधे**र्विराधना तस्करापहाररूपा, ये चैकाकिनो दोषास्ते च भवन्ति । एष संस्तरणे विधिरुक्तः। असंस्तरणे पुनराचार्यो वसतिं प्रलोकमानस्तस्मिन्नेव पाटके प्रत्यासन्नेषु गृहेषु भिक्षार्थं हिण्डते ॥ १७७२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा चाऽऽह—

**जइ संघाडो तिण्ह वि, पज्जत्ताऽऽणेइ तो गुरु ण नीति ।**
**अह नवि आणे ताहे, वसहिआलोग हिंडणाया ॥ १७७३ ॥**

**यदि सङ्घाटः** साधुयुग्मं **त्रयाणामपि** आत्मद्विकस्य गुरोश्चेत्यर्थः **पर्याप्तं परिपूर्णमानयति ततो गुरुर्भिक्षार्थं न न्येति** निर्गच्छति। **अथ नैव** त्रयाणां पर्याप्त**मानयति** अलाभाद् अशक्तेर्वा, **तदा वसतेरालोको** यथा भवत्येवमाचार्यस्य प्रत्यासन्नेषु गृहेषु **हिण्डनम्** ॥ १७७३॥

कियत्पुनस्तत्र गृह्णाति? इति चेत्, अत आह—

**आसण्णेसुं गेण्हइ, जत्तियमेत्तेण होइ पज्जत्तं ।**
**जावइएण य ऊणं, इयराणीयं तु तं गेण्हे ॥ १७७४ ॥**

तस्मिन्नेव पाटके **प्रत्यासन्नेषु** गृहेषु **गृह्णाति** तावन्मात्रं **यावन्मात्रेण पर्याप्तं** परिपूर्णं **भवति**। अथ तावन्न लभ्यते तर्हि **यावता ऊनं तत्** तावद् **इतराभ्यामानीतं गृह्णाति**। न च ते त्रयोऽपि परिपूर्णं भुञ्जते किन्त्वल्पम् ॥ १७७४॥



For Private and Personal Use Only

तथा चाऽऽह—

**सव्वे वऽप्पाहारा, भवंति गेलण्णमादिदोसभया।**
**एवं जयंति तहियं, वासावासे वसंता उ ॥ १७७५ ॥**

**ग्लान्यादिदोषभयात्सर्वेऽपि तेऽल्पाहारा भवन्ति । एवं तत्र वर्षावासे** वर्षायोग्ये क्षेत्रे **वसन्तो यतन्ते**॥ १७७५ ॥

**सूत्रम्— [१] से गामंसि वा जाव सन्निवेसंसि वा बहूणं आयरियउवज्झायाणं अप्पबिइयाणं बहूणं गणावच्छेइयाणं अप्पतइयाणं कप्पइ हेमंतगिम्हासु चरिए अन्नमन्नं निस्साए ॥ ९ ॥**

**से गामंसि वा जाव सन्निवेसंसि वा बहूणं आयरियउवज्झायाणं अप्पतइयाणं बहूणं गणावच्छेइयाणं अप्पचउत्थाणं कप्पइ वासावासं वत्थए अन्नमन्नं निस्साए ॥ १० ॥**



---

१. से गामंसि वा, नगरंसि वा, निगमंसि वा, रायहाणीए वा, खेडंसि वा, कब्बडंसि, वा, मडंबंसि वा, पट्टणंसि वा, दोणमुहंसि वा, आसमंसि वा, संवाहंसि वा, इति श्युब्रींगसंस्करणे पाठः। एवमग्रेतनसूत्रेपि ज्ञेयम्॥

"से गामंसि वा जाव सन्निवेसंसि वा" इत्यादि,

अथास्य सूत्रस्य सम्बन्धमभिधित्सुराह—

**इति पत्तेया सुत्ता, पिंडगसुत्ता इमे पुण गुरूणं ।**
**दुप्पभिई तिप्पभिई, बहुत्तमिह मग्गणा खेत्ते ॥ १७७६ ॥**

**इति** एवमुपदर्शितेन प्रकारेणाष्टौ **प्रत्येकानि** प्रत्येक[1]भवानि **सूत्राण्युक्तानि**। प्रत्येकानन्तरं च समुदाय इती**मे** पुनर्द्वे वक्ष्यमाणे **पिण्डकसूत्रे**। केषां पिण्डकः ? इत्याह–**गुरूणा**माचार्यादीनाम्, आचार्यादिसमुदायविषय[2]ः इत्यर्थः ॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**से** शब्दोऽथशब्दार्थः। अथ **ग्रामे वा, यावत्**करणात् **नगरंसि वा पट्टणंसि वा मडंबंसि वा** इत्यादिपरिग्रहः, **सन्निवेशे वा बहूनां** द्वित्रिप्रभृतीना**माचार्योपाध्यायानामात्मद्वितीयानां बहूनां** द्वि-त्रिप्रभृतीनां **गणावच्छेदकानामात्मतृतीयानां हेमन्त-ग्रीष्मयोश्चरितुं कल्पते अन्योन्यनिश्रया** परस्परोपसम्पदा। अथ **ग्रामे वा** यावत् **सन्निवेशे वा बहूनामाचार्यो-**

---

१. °कभावीनि- वा. मो. पु. सं. ॥ २. °ये- पु. प्रे.॥

**पाध्यायानामात्मतृतीयानां बहूनां गणावच्छेदकानामात्मचतुर्थानां च वर्षावासं वस्तुं कल्पते अन्योऽन्यनिश्रयेति।** एष सूत्रसङ्क्षेपार्थः। अत्र बहुत्वव्याख्यानार्थमाह—

**दुप्पभिइ** इत्यादि, द्विप्रभृति त्रिप्रभृति वाऽत्र **बहुत्व**मवगन्तव्यम् । किमर्थमिदं सूत्रम्? इति चेत् उच्यते- **इह मार्गणा क्षेत्रे** कर्तव्येत्येतदर्थम्। एकस्मिन् क्षेत्रेऽवस्थितानां कस्य क्षेत्रमाभवति? कस्य न? इति चिन्तायां ये परस्परनिश्रया समाप्तकल्पा वर्तन्ते तेषामाभवति, अन्येषां नेत्येवमर्थमित्यर्थः ॥१७७६॥

एतदेवाऽऽक्षेपपुरस्सरमाह—

**हेट्ठा दोण्ह विहारो, भणितो किं पुण इयाणि बहुयाणं? ।**
**एगक्खित्तठियाणं, तु मग्गणा खेत्त-अक्खेत्ते ॥ १७७७ ॥**

ऋतुबद्धे काले **द्वयोर्विहारोऽधस्तात्पूर्वं** द्वितीयसूत्रेण उक्तः, उपलक्षणमेतत्, वर्षासु षष्ठसूत्रेण त्रयाणाम् [भणितः], ततस्तेनैवेदं गतार्थमिति किं किमर्थं **पुनरिदानीं बहुकानामा**-चार्यादीनां सूत्रम् ?। सूरिराह— **एकक्षेत्रस्थितानां मार्गणा** कर्त्तव्या कस्य **क्षेत्रमा**भवति?

कस्य **अक्षेत्रम्**? कस्य नाऽऽभवति क्षेत्रम्? इत्यर्थः। तत्र परस्परोपसम्पदा समाप्तकल्पभूतानां भवति, अन्येषां न भवतीत्येवमर्थम् ॥ १७७७॥

तथा चैतदेव निर्युक्तिकृत्सविस्तरमाह—

**उउबद्धे समत्ताणं, उग्गहो एग-दुगपिंडियाणं पि ।**
**साहारणपत्तेगे, संकमति पडिच्छए पुच्छा ॥ १७७८ ॥**

पञ्च जनाः समासकल्पः, ऊनाः असमाप्तकल्पः। **ऋतुबद्धे** काले बहूनामाचार्याणां परस्परोपसम्पदा **समाप्तकल्पानामेक-द्विकपिण्डितानामपि** पञ्चाप्येकका: सन्तः पिण्डिता एकपिण्डिताः; अथवा द्विकेन-वर्गद्वयेन एक एकाकी एकश्चतुर्वर्गः अथवा एको द्विवर्गोऽपरस्त्रिवर्ग इत्येवंरूपेण पिण्डिता द्विकपिण्डिताः, तेषामेकद्विकपिण्डितानाम्। अपिशब्दात् त्रिवर्गपिण्डितानां चतुर्वर्गपिण्डितानामपि। तत्र त्रिवर्गपिण्डिता द्वावेकाकिनावेकस्त्रिवर्गः, चतुर्वर्गपिण्डितास्त्रय एकाकिन एको द्विवर्गः। **अवग्रह** आभवति, न शेषाणामसमाप्तकल्पस्थितानाम् । यदि पुनर्द्वौ गच्छौ समासकल्पावेकत्र क्षेत्रे समकं स्थितौ

स्यातां तदा तत्क्षेत्रमाभवति द्वयोरपि तयोः साधारणम् । तच्च **साधारणं** क्षेत्रं तेषां समासकल्पतया **प्रत्येकं** प्रत्येकं स्थितानां मध्ये ये सूत्राऽर्थनिमित्तं यानुपसम्पद्यन्ते तत उत्तीर्य तेषामुपसम्पद्विषयाणामाभाव्यतया **सङ्क्रामति**। तथा चाऽऽह— साधारणं क्षेत्रं प्रत्येकं व्यवस्थितमपि **प्रतीच्छके** प्रतीच्छकादुत्तीर्य येषां समीपमुपसम्पद्यते तेषां सङ्क्रामति, ते हि प्रतीच्छकास्तन्निश्रामुपपन्नास्ततस्तेषां क्षेत्रमितरेषां सङ्क्रामति । अथ प्रतीच्छका नोपसम्पद्यन्ते, केवलं **पुच्छ**त्ति पृच्छामात्रं सूत्रार्थविषयं क्रियते तदा 'पुच्छाहि तिहिं' [गा.१७८६] इत्यादिना मार्गणा कर्तव्या ॥१७७८॥

अत्रैव विशेषमाह—

**अप्पबितियऽप्पतईयद्वियाण खेत्तेसु दोसु दोण्हं तु ।**
**उडुबद्धे होइ खेत्तं, गमणागमणं जतो अत्थि ॥ १७७९ ॥**

एकस्मिन् क्षेत्रे एक आचार्य उपाध्यायो वा स्थितः, अपरस्मिन् क्षेत्रेऽपर आचार्य उपाध्यायो गणावच्छेदको वाऽऽत्मतृतीयः स्थितः, केवलं परस्परमुपसम्पदा, ततस्तयो**र्द्वयोः अपि द्वयोः क्षेत्रयोरात्मद्वितीयात्मतृतीयस्थितयोः ऋतुबद्धे** काले तदुभयमपि **क्षेत्र**माभाव्यं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भवति** कुत? इत्याह—**गमनागमनं यतः** परस्पर**मस्ति,** परस्परोपसम्पन्नत्वाद्, अतः समाप्तकल्पतया भवत्याभाव्यमिति ॥१७७९॥

सम्प्रति यैः कारणैरुपसम्पद्यते तान्याह—

**खेत्तनिमित्तं सुह-दुक्खतो, व सुत्तत्थकारणे वा वि ।**
**असमत्ते उवसंपय, समत्ते सुहदुक्खयं मोत्तुं ॥ १७८० ॥**

असमाप्तस्य असमाप्तकल्पस्योपसम्पद्भवति **क्षेत्रनिमित्तं सुखदुःखहेतोर्वा सूत्रार्थ-कारणाद्वा**। किमुक्तं भवति? अन्यत् तादृशं क्षेत्रं न विद्यते, यदि वा असमाप्तकल्पतया विहरतां दुःखं, समाप्तकल्पतया विहरतां सुखमिति सुख-दुःखहेतोः, अथवा सूत्रार्थकारणाद्वा **असमाप्त**कल्पा अन्यं गच्छ**मुपसम्पद्यन्ते** इति। **समाप्ते** समाप्तकल्पस्य पुनरुपसम्पदि, **सुखदुःखतां मुक्त्वा** शेषाणि कारणानि द्रष्टव्यानि, समाप्तकल्पा अन्यत् क्षेत्रं तादृशं नास्तीति क्षेत्रनिमित्तं सूत्रनिमित्तमर्थनिमित्तं तदुभयनिमित्तं वाऽन्यद् गच्छान्तरमुपसम्पद्यन्ते, न सुख-दुःखहेतोः, समाप्तकल्पतया तेषां विहरणे दुःखाभावादिति भावः ॥ १७८०॥

अथ ते कथमेकाकिनोऽसमाप्ता वा जाताः? इत्यत आह—



For Private and Personal Use Only

**पडिंभग्गेसु मएसु व, असिवादीकारणेसु फिडिया वा ।**
**एएण तु एगागी, असमत्ता वा भवे थेरा ॥ १७८१ ॥**

शेषेषु साधुषु व्रतात्[1]**प्रतिभग्नेषु मृतेषु वा**, अथवा **अशिवादिभिः कारणैः स्फिटिताः** परस्परं वित्रुटिताः, **एतेन** कारणजातेन **स्थविरा एकाकिनोऽसमाप्ता वा भवेयुः** ॥१७८१ ॥

साम्प्रतं 'एगदुगपिंडियाणं पि'[गा.१७७८] इत्यस्य व्याख्यानार्थमाह—

**एग-दुगपिंडिया वि हु, लभंति अण्णोण्णनिस्सिया खेत्तं ।**
**असमत्ता बहुया वि हु, न लभंति अणिस्सिया खेत्तं ॥ १७८२ ॥**



एकका: पिण्डिता **एक**पिण्डिताः, द्विकेन- वर्गद्वयेन पिण्डिता [**द्विकपिण्डिताः**] अपिशब्दात् त्रिकपिण्डिताश्चतुष्कपिण्डिताश्च । अमीषां भावना प्रागेवोक्ता, **हु** निश्चितम्, **अन्योन्यनिश्रिताः** परस्परमुपसम्पन्ना **लभन्ते** क्षेत्रम्, ये पुनः **असमाप्ताः** परस्परोपसम्पद्ग्रहणा-भावतोऽसमाप्तकल्पास्तिष्ठन्ति ते परस्पर**मनिश्रिताः**, "निमित्त-कारण-हेतुषु सर्वासां विभक्तीनां

---

१. परिभग्नेषु- मो.॥

प्रायो दर्शनम्'' इति **न्यायादत्र** हेतौ प्रथमा, ततोऽयमर्थः— परस्परमनिश्रितत्वाद् **बहुका अपि** सन्तो हुः निश्चितं **न लभन्ते क्षेत्रम्,** समाप्तकल्पानामेव क्षेत्रस्याऽऽभवनात्, तथा पूर्वाचार्यकृतस्थितेः ॥१७८२॥

**जइ पुण समत्तकप्पो, दुहा ठितो तत्थ होज्ज चउरन्ने ।**
**चउरो वि अप्पभू ते, लभंते दो ते इतरनिस्सा ॥ १७८३ ॥**

**यदि पुनः समाप्तकल्पः** पञ्चजनात्मको वसतेः सङ्कटतादोषेणैकस्मिन् क्षेत्रे **द्विधा स्थितः** एकस्यां वसतौ द्वौ जनावपरस्यां त्रयः, तथा **तस्मिन्** क्षेत्रेऽन्यस्यां वसता**वन्ये चत्वारो** जनाः स्थिता भवेयुः तथापि ते **चत्वारोऽपि** तस्य क्षेत्रस्य **अप्रभवः**, न तेषां तत् क्षेत्रमाभाव्यं भवति, यौ पुन**र्द्वौ तौ** तत्क्षेत्रं **लभेते**। कुतः? इत्याह–**इतरनिश्रौ,** अत्रापि हेतौ प्रथमा, यतस्तावितरत्रयनिश्रौ,अतः समाप्तकल्पत्वाल्लभेते ॥ १७८३॥

अथ कस्मादसमाप्तकल्पानामेकाकिनां चाऽऽभाव्यं क्षेत्रं न भवति? तत आह—

**एगागिस्स उ दोसा, असमत्ताणं च तेण थेरेहिं ।**
**एस ठविया उ मेरा, इति वि हु मा होज्ज एगागी ॥ १७८४॥**

यत **एकाकिनः** सतोऽसमाप्तानां च **असमाप्तकल्पानां च दोषा** भूयांसः, **तेन** कारणेन **स्थविरैरेषा मर्यादा स्थापिता। इत्यपि खलु** कारणात् क्षेत्रानाभवनलक्षणाद् **एकाकि**नोऽसमाप्तकल्पा वा **मा भूवन्निति** ॥ १७८४॥

सम्प्रति 'साहरणपत्तेगे' [गा. १७७८] इत्यादि व्याख्यानयति—

**दोमादि ठिया साहारणम्मि, सुत्तऽत्थकारणा एक्के ।**
**जति तं उवसंपज्जे, पुव्वठिया वा वि संकंतं ॥ १७८५ ॥**

**द्व्यादयः** द्विप्रभृतयो गच्छाः समाप्तकल्पाः समकमेकस्मिन् क्षेत्रे स्थितास्तेषां तत् क्षेत्रमाभाव्यतया साधारणम्। तस्मिन् **साधारणे** क्षेत्रे **स्थिताः** सन्तो यदि तमेकं गच्छमन्ये **सूत्रार्थकारणा**दुपसम्पद्यन्ते, अथवा ये पूर्वं समाप्तकल्पतया स्थितास्तेषामाभवति तत्क्षेत्रम्, न पश्चादागतानां समाप्तकल्पानामपि। परं ते **पूर्वस्थिता अपि यदि** पश्चादागतं गच्छं सूत्रार्थकारणा**दुपसम्पद्यन्ते** तर्हि यस्य समीपमुपसम्पद्यन्ते तस्य तत्क्षेत्रं **सङ्क्रान्तम्,** तस्य

तदाऽऽभवति नान्येषामिति भावः। ते हि तस्य प्रतीच्छकीभूतास्तेन तेषां क्षेत्रमितरस्य सङ्क्रामतीति॥ १७८५॥

अथ नोपसम्पद्यन्ते किन्तु सूत्रमर्थं वा पृच्छन्ति तत्राह—

**पुच्छाहि तीहिं दिवसं, सत्तहि पुच्छाहि मासियं हरति।**
**अक्खेत्तुवस्सए पुच्छमाणे दूराऽऽवलिय मासो ॥ १७८६ ॥**

**तिसृभिः पृच्छाभिः** कृताभिः पृच्छ्यमानः परिपूर्णं **दिवसं** यावत् तत्क्षेत्रगतं सचित्तादि हरति गृह्णाति, त्रिपृच्छा[1]दारतस्तस्य क्षेत्रस्यैकं दिवसं यावत्तदाभवनात्। **सप्तभिः पृच्छाभिर्मासिकं हरति**। किमुक्तं भवति?- सप्तसु पृच्छासु कृतासु पृच्छ्यमानः परिपूर्णं मासं यावत्तत् क्षेत्रगतं सचित्तादि लभते, मासं यावत्तस्य क्षेत्रस्य तदाऽऽभवनादिति । **अक्खेत्तुवस्सए** इति अक्षेत्रे स्थितानामुपाश्रये- उपाश्रयविषया मार्गणा कर्तव्या, सा चाग्रे करिष्यते । तथा यदि **पृच्छ्यमान** आत्मीयमुपाश्रयं **दूरम्,** उपलक्षणमेतत्, आसन्नं वा **आवलिका**प्रविष्टम्, उपलक्षणमेतत्,

---

१. °दानतस्तस्य - सं.। दानतस्य - मो. ॥

मण्डलिकाप्रविष्टं पुष्पावकीर्णं वा कथयति, तदा तस्मिन् प्रायश्चित्तं **मासो** लघुकः, तं च पृच्छन्तं न लभन्ते। एष सङ्क्षेपार्थः। व्यासार्थोऽग्रे कथयिष्यते ॥ १७८६ ॥

'अक्षेत्रे उपाश्रयस्य मार्गणा कर्त्तव्या' इत्युक्तं तत्र तावदक्षेत्रमाह—

**ण्हाणाऽणुजाण अद्धाणसीसए कुल गणे चउक्के य।**
**गामादि-वाणमंतरमहे य उज्जाणमादीसु ॥ १७८७ ॥**

**इंदक्कील मणोग्गाहो जत्थ व राया व पंच इमे ।**
**अमच्च१ पुरोहिय२ सेट्ठी३, सेणावइ४ सत्थवाहो उ५ ॥ १७८८ ॥**

**स्नानम्** अर्हत्प्रतिमानां तन्निमित्तमेकत्र मिलितानाम्, **अनुयानं** रथयात्रा, तन्निमित्तं मिलितानाम्, अथवा **अध्वशीर्षकं** यतः परं समुदायेन सार्थेन सह गन्तव्यं सम्यग्मार्गावहनात् तत्र मिलितानाम्, **कुलत्ति** कुलसमवायमिलितानाम्, **गणत्ति** गणसमवायमिलितानाम् **चतुष्कं** सङ्घस्तत्समवायमिलितानां, **गामाइ** इत्यादि, **ग्राम**महे वा, **आदि**शब्दान्नगरादिमहे वा, **वानमन्तरमहे** वा, **उद्यान**महे वा **आदि**शब्दात्तडागादिमहे वा, **इन्द्रकील**कमहे वा, यत्र च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकलजन**मनोग्राहो राजा, यत्र वा इमे अमात्य-पुरोहित-श्रेष्ठि-सेनापति-सार्थवाहाः पञ्च** गता वर्तन्ते, तत्र कथमपि गताः समकं स्थितास्तर्हि साधारणा वसतिः । अथ विषमं स्थितास्तर्हि ये पूर्वं स्थितास्तेषां वसतिराभवति, नेतरेषां पश्चादागतानाम्, तस्यां च वसतौ यः शिष्यः शिष्यतया उपतिष्ठति तं वसतिस्वामिनो लभन्ते, नेतरे ॥१७८७-८८॥

"पुच्छमाणे दूरावलिय मासो" [गा.१७८६] इत्यस्य व्याख्यानार्थमाह—

**पुप्फावकिण्ण[1] मंडलि[2] आवलिय[3] उवस्सया भवे तिविहा ।**
**जो अब्भासे तस्स उ, दूर[1] कहंतो न लभे मासो ॥ १७८९ ॥**

क्वचिद् ग्रामे नगरे वा साधवः पृथग् उपाश्रये स्थिताः, ते **चोपाश्रयाः त्रिविधा भवेयुः**- **पुष्पावकीर्णकाः**, **मण्डलिका**बद्धा **आवलिका**स्थिता वा। स्थापना—



१. दूरे-ला.॥



For Private and Personal Use Only

एतेषामुपाश्रयाणां मध्ये कुतश्चिदेकतरस्मादुपाश्रयाद्विचारादिनिमित्तं कोऽपि विनिर्गतः, तं दृष्ट्वा कोऽपि प्रविव्रजिषुः पृच्छेत्, यथा— कुत्र साधूनां वसतिः ? इति। स ब्रूते—किं कारणं त्वं पृच्छसि ? शैक्षः प्राह—प्रव्रजिष्यामीति। तत्र स यदि एवं पृष्टः सन् **दूर कहंतो न लभे मासो** इति आत्मीयमुपाश्रयं दूरमासन्नं वा कथयति तर्हि तस्य प्रायश्चित्तं लघुको मासः, न च तं शिष्यं लभते। कस्य पुनः स आभवति ? इति चेत्, तत आह— **योऽभ्यासे तस्य**। किमुक्तं भवति ? तस्मादवकाशाद् यस्य प्रत्यासन्नतर उपाश्रयस्तस्याऽऽभवति॥ १७८९ ॥

**किह पुण साहेयव्वा, उद्दिसियव्वा जहक्कमं सव्वे ।**
**अह पुच्छइ संविग्गे, तत्थ व सव्वे व अद्धा वा ॥ १७९० ॥**

**कथं पुनः कथयितव्या** उपाश्रयाः ? । सूरिराह— **उद्देष्टव्या यथाक्रमं सर्वे** । यथा— अमुकस्याऽऽचार्यस्यामुकप्रदेशे उपाश्रयः, अमुकस्यामुकप्रदेशे । एवं कथिते यत्र व्रजति तस्य स आभवति । **अथ** स **पृच्छति संविग्नान्** बहुश्रुततरान् तपस्वितरांश्चेत्यर्थः, **तत्र** यथाभावमाख्यातव्यम्। वितथाख्याने मासलघु, न च स तं लभते । किन्तु ये तपस्वितरा बहुश्रुततराश्च तेषां स आभवति । अथ **सर्वे अर्धा वा** संविग्नास्ततस्तथैवाऽऽख्याने यत्र स व्रजति तस्य स आभवति, न शेषस्येति॥१७९०॥

एतदेव सविशेषमाह—

**मोत्तूण असंविग्गे, जे जहियं ते उ साहती सव्वे ।**
**सिट्ठम्मि जेसि पासं, गच्छति तेसिं न अन्नेसिं ॥ १७९१ ॥**

इह ये पार्श्वस्थादयोऽ**संविग्ना**स्ते यदि पृच्छ्यन्ते तदा ते न कथनीयाः, तान् **मुक्त्वा** शेषेषु पृष्टेषु **ये यत्र** विद्यन्ते **तान्** तत्र **सर्वान् कथयति** । **शिष्टे** च कथिते च सति **येषां पार्श्वं गच्छति** **तेषा**माभवति, **नान्येषाम्** ॥ १७९१ ॥

**णीयल्लगाण व भया, हिरि व त्ति असंजमाहिगारे वा ।**
**एमेव देस रज्जे, गामेसु व पुच्छ कहणं तु ॥ १७९२ ॥**

इह कोऽपि तस्मिन् ग्रामे नगरे देशे राज्ये वा न प्रव्रजति। किं कारणम्? इति चेत्, उच्यते— **निजकानां** स्वज्ञातीनां **भयात्,** मा निजका उत्प्रव्राजयेयुः, प्रव्रजन्तं वा मा रुन्ध्युरिति। यदि वा तेषां निजकानां समक्षं लज्जते, ततो **ह्रीतः**। **वा** अथवा **असंयमाधिकारः**

असंयमाधिकरणमेतद् ग्रामादि, अप्कायादिप्रचुरत्वात्, ततोऽन्यद् ग्रामादिकं गन्तुमनास्तथैव विचारादिगतं पृच्छेत्, यथा— कस्मिन् ग्रामे नगरे देशे राज्ये वा साधवः ?। एवमन्यस्मिन् **देशे राज्ये ग्रामेषु** वा पृच्छायामेव**मेव** पूर्वोक्तेनैव प्रकारेण यथाभावं कथनं कर्तव्यम्। किमुक्तं भवति ? -यथा त्रिविधेषूपाश्रयेषु आसन्न-दूर-तपस्वि-बहुश्रुतानां पृच्छायां व्याकरणमनाभाव्यमाभाव्यं च वर्णितं तथाऽत्रापि द्रष्टव्यम् । तद्यथा— यद् यथा ग्रामादिकं **पृष्टं** तत्तथा **कथनीयम्**। वितथाख्याने तस्य प्रायश्चित्तं मासलघु, तत्र च गतो येषां समीपमुपगच्छति स तेषामाभवति, नान्येषामिति ॥ १७९२ ॥

**अहवा वि अण्णदेसं, संपट्ठियगं तगं मुणेऊण ।**
**माया-नियडिपहाणो, विप्परिणामे इमेहिं तु ॥ १७९३ ॥**

**अथवेति** प्रकारान्तरे, तच्च प्रकारान्तरं विपरिणामविषयं वक्ष्यमाणरीत्या द्रष्टव्यम्। विचारादिविनिर्गतं साधुं दृष्ट्वा कोऽपि परेण आदरेण वन्दते, तं च तथा वन्दमानं पृच्छति— कुतस्त्वम् कुत्र वा सम्प्रस्थितः इति स प्राह— अमुकं देशं सम्प्रस्थितः, तत्र गत्वा प्रव्रजिष्यामि; तत **एवमन्यदेशं सम्प्रस्थितं तं ज्ञात्वा** माया- परवञ्चनाभिप्रायः, निकृतिः-आकार-

वचनाच्छादनं यथा कूटाख्यातृत्वेन न लक्ष्यते, **मायानिकृती प्रधाने** यस्य स तथा, **एभिर्वक्ष्य**-माणैश्चैत्यादिभि**र्विपरिणामयति** ॥१७९३॥

तान्येव विपरिणामस्थानानि चैत्यादीनि दर्शयति—

**चेइय१ साहू२ वसही, वेज्जा४ व न संति तम्मि देसम्मि ।**
**पडिणीय ५ सण्णि६ साणे७ वियार८ खेत्ता९ अहिगमग्गो१० ॥ १७९४॥**

दारगाहा॥

यत्र त्वया गन्तव्यं **तस्मिन् देशे चैत्यानि** १ यदि **वा साधवः** २अथवा **वसतयः** ३ यद्वा **वैद्या न सन्ति** ४। तथा बहवस्तत्र **प्रत्यनीकाः** ५ न च दानादिप्रधानानि **संज्ञि**कुलानि ६ **श्वानः** प्रभूताः ७ न च तत्र **विचार**भूमिः, सर्वत्र पानीयाकुलत्वात् ८ नापि तत्र विहारयोग्यानि **क्षेत्राणि** ९ **अधिकश्च** भूयान्**मार्गः** पन्थाः १०। एतैः प्र[1]कारैर्विपरिणामयति ॥ १७९४॥

तत्र प्रथमतश्चैत्यमधिकृत्याह—



१. कारणै० पु. प्रे.॥

**वंदण पुच्छा कहणं, अमुगं देसं वयामि पव्वइउं ।**
**नत्थि तहि चेइयाइं, दंसणसोही जतो होइ ॥ १७९५ ॥**

परया भक्त्या विचारादिनिर्गतस्य साधोर्**वन्दनम्**। ततः **पृच्छा**- कुत्र गन्तव्यम्? तदनन्तरं तस्य **कथनम् 'अमुकं देशं व्रजामि प्रव्रजितुम्'** इति। एवमुक्ते स प्राह— **न सन्ति तत्र चैत्यानि, यतः** येभ्यः **दर्शनशोधिः** सम्यग्दर्शननिर्मलता **भवति**॥ १७९५॥

कथं तेभ्यो दर्शनशोधिः? इत्यत आह—

**पूया उ दट्ठुं जगबंधवाणं, साहू विचित्ता समुवेंति तत्थ ।**
**चागं च दट्ठूण उवासगाणं, सेहस्स वि थीरइ धम्मसद्धा ॥ १७९६ ॥**

दारं १॥

**जगद्बान्धवानां पूजां द्रष्टुं तत्र** तेषु चैत्येषु **साधवः विचित्राः** भव्य-भव्यतराः **समुपयन्ति** ततस्तेषां मूर्तिं दृष्ट्वा देशनां वा समाकर्ण्य; तथा **उपासकानां** श्रावकाणां स्नान-विलेपनादिषु **त्यागं च** वित्तत्यागं **दृष्ट्वा,** आस्तामन्येषां शुभपरिणामोल्लासः, **शैक्षस्यापि धर्मश्रद्धा स्थिरति**

स्थिरीभवतीत्यर्थः। चैत्यानि तु तत्र न विद्यन्ते ततः किं तत्र गत्वा त्वया कार्यम्? इति १ ॥ १३७९६ ॥

साधुद्वारमाह—

**न संति साहू तहियं विवित्ता, ओसण्णकिण्णो खलु सो कुदेसो।**
**संसग्गिहज्जंमि इमम्मि लोए, सा भावणा तुज्झ वि मा हवेज्जा ॥१७९७॥**

दारं २।

**न सन्ति तत्र साधवः विविक्ताः** एकान्तसंविग्नाः, किन्तु **अवसन्नकीर्ण** अवसन्नव्याप्तः **खलु स कुदेशः। अयं च लोकः संसर्गिहार्यः**— संसर्ग्या ह्रियते संसर्ग्यनुयायी भवति, तथास्वाभाव्यात्, ततः **संसर्गिहार्येऽस्मिन् लोके** वर्तमानस्य **तवापि सा** अवसन्न**भावना मा भूदिति** तत्र न गन्तव्यम् २ ॥ १७९७॥

शय्याद्वारमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सेज्जा न संती अहवेसणिज्जा, इत्थी-पसू-पंडगमादिकिण्णा ।**
**आउत्थमादीसु य तासु निच्चं, ठायंतयाणं चरणं न सुज्झे ॥ १७९८ ॥**

दारं ३ ॥

तत्र **शय्या न सन्ति, अथवा एषणीया** न विद्यन्ते, यदि परमात्मकृताः स्युः, यदि वा **स्त्री-पशु-पण्डकाद्याकीर्णाः** सन्ति। **तासु चात्मोत्थादिषु** आत्मकृतादिषु **नित्यं** सर्वकालं **तिष्ठतां चरणं न शुध्यति** चारित्रशुद्धिर्नोपजायते ३ ॥ १७९८ ॥

वैद्यादिद्वारचतुष्टयमाह—

**वेज्जा तहिं नत्थि तहोसहाइं ४, लोगो य पाएण सपच्चणीओ ५।**
**दाणाइ सण्णी य तहिं न संति, साणेहि किण्णो सहलूसएहिं ॥ १७९९ ॥**

दारं ७।

**तत्र वैद्यास्तथा औषधानि च न सन्ति**४ लोकश्च प्रायेण तत्र सप्रत्यनीकः ५ दानादिप्रधानाश्च **संज्ञिनः**-श्रावकास्तत्र **न सन्ति** ६ तथा **श्वभिः सह लूषकैः** चौरैः **कीर्णः** व्याप्तः ७ ॥ १७९९ ॥



For Private and Personal Use Only

विचार-विहारक्षेत्रद्वारे आह—

**अणूवदेसम्मि वियारभूमी, विहारखेत्ताणि य तत्थ नत्थी ।** दारं ८-९।
**साहूसु आसण्णठिएसु तुज्झं, को दूरमग्गेण मडप्फरो ते॥ १८००॥**
दारं १०॥

यत्र त्वया गन्तव्यं तस्मिन् **अनूपदेशे** सजले देशे **विचारभूमिर्नास्ति** ८। नापि **तत्र** सन्ति **विहारयोग्यानि क्षेत्राणि** ९। अन्यच्च **साधुष्वासन्नस्थितेषु तव को दूरमार्गेण मडप्फरो** गमनोत्साहः १०॥ १८००॥

तदेवमृतुबद्धकालविषयं सूत्रं भावितम् । अधुना वर्षावासविषयं भावयति—

**वासासुं अमणुण्णा, असमत्ता जे ठिया भवे वीसुं ।**
**तेसिं न होइ खेत्तं, अह पुण समणुण्णय करेंति ॥ १८०१॥**
**तो तेसि होति खेत्तं, को[1] य पभू तेसि जो य रायणिओ ।**
**लाभो पुण जो तत्था, सो सव्वेसिं तु सामण्णो ॥ १८०२॥**

१. कोति- B 3 । कोइ- P। को उ- मु.

**वर्षासु** वर्षाकाले **ये अमनोज्ञाः** परस्परोपसम्पद्विकला **असमाप्ताः** असमाप्तकल्पाः, **विष्वक्** पृथक् **स्थिता भवेयुस्तेषां न भवति क्षेत्र**माभाव्यम्, असमाप्तकल्पत्वात्। **अथ पुनः** सुख-दुःखादिनिमित्तं **समनोज्ञतां** परस्परोपसम्पदं **कुर्वन्ति, ततो भवति, तेषा**माभाव्यं क्षेत्रम् परस्परोपसम्पदा समाप्तकल्पीभूतत्वात्। अथ **तेषां कः प्रभुः** ? उच्यते, **यो रात्निकः** रत्नाधिको यस्य पर्यायाधिकतया वन्दनादीनि क्रियन्ते स तेषां प्रभुः। **लाभः पुनर्यस्तत्र** भवति **स सर्वेषां सामान्यः** साधारणः, सर्वेषामप्याचार्यत्वादुपाध्यायत्वाद्वा ॥ १८०१-०२॥

**अहव जइ वीसु वीसुं, ठिया उ असमत्तकप्पिया हुज्जा ।**
**अण्णो समत्तकप्पी, एज्जाही तस्स तं खेत्तं ॥ १८०३ ॥**

**अथवा असमाप्तकल्पिका यदि विष्वग् विष्वक् स्थिता भवेयुः, अन्यः समाप्तकल्पी** समाप्तकल्पोपेतः पश्चादा**गच्छेत् तस्य तदा**भवति **क्षेत्रम्,** नेतरेषां पूर्वस्थितानामपि, असमाप्तकल्पत्वात्॥ १८०३॥

**अहवा दोण्णि व तिण्णि व, समगं पत्ता समत्तकप्पी उ ।**
**सव्वेसिं तु तेसिं, तं खेत्तं होइ साहारं ॥ १८०४ ॥**

**अथवा द्वौ वा त्रयो वा** गच्छाः **समाप्तकल्पिनः** पृथक् पृथक् समाप्तकल्पोपेताः **समकं प्राप्ताः** ततस्तेषां **सर्वेषा**मपि **तत्क्षेत्र**माभाव्यतया **साधारणं भवति**॥ १८०४॥

**अपुण्णकप्पा व दुवे तयो वा, जंकाल कुज्जा समणुण्णयं तु ।**
**तक्कालपत्तो य समत्तकप्पो, साहारणं तं पि हु तेसि खेत्तं ॥ १८०५॥**

पूर्वम् **अपूर्णकल्पाः** असमाप्तकल्पा **द्वौ त्रयो वा** गच्छाः स्थिताः न च परस्परमुपसम्पद् गृहीताः, पश्चाच्च सूत्रार्थादिनिमित्तमुपसम्पद् ग्रहीतुमारब्धाः, ते च यत्कालं यस्मिन् काले समनोज्ञतां परस्परमुपसम्पदं कुर्युः कुर्वन्ति **तत्कालप्राप्तः** तस्मिन् काले प्राप्तोऽन्यः **समाप्तकल्पस्तेषामपि तत् क्षेत्रं** भवति **साधारणम्,** परस्परोपसम्पद्ग्रहणवेलायामेव समाप्तकल्पस्यापि प्राप्तत्वात् ॥१८०५॥ सम्प्रति परस्परोपसम्पन्नानां साधारणावग्रहावस्थितानां सूत्रमर्थं वाऽधिकृत्य य आभवनविशेषस्तमभिधित्सुराह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**साहारणट्ठियाणं, जो भासति तस्स तं हवति खेत्तं ।**
**वारग तद्दिण पोरिसि, मुहुत्त भासे उ जो जाहे ॥ १८०६ ॥**

**साधारणस्थितानां** साधारणावग्रहावस्थितानां मध्ये **यः** सूत्रमर्थं वा **भाषते तस्य तद्भवति क्षेत्रम्** न शेषाणाम्। अथ ते वारंवारेण भाषन्ते तत आह— **यो यदा वारकेण दिनं पौरुषीं मुहूर्तं** वा **भाषते** तस्य तावन्तं कालमाभाव्यम्, न शेषकालम्। इयमत्र भावना- यो यतिदिवसान् भाषते तस्य ततिदिवसानाभाव्यम् अथवा प्रतिदिवसं यो यतिपौरुषीर्भाषते तस्य ततिपौरुषीरवग्रहः, यदि वा यो यतिमुहूर्तान् भाषते तस्य तावन्तं कालमवग्रहः, न शेषकालमपीति ॥ १८०६ ॥

**आवलिया१ मंडलिया२, घोडगकंडूइय३ एव भासेज्जा ।**
**सुत्तं भासति सामाइयादि जावऽट्ठसीतिं तु ॥ १८०७ ॥**

इह सूत्रस्यार्थस्य वा भाषणे त्रयः प्रकाराः तद्यथा-**आवलिकया१ मण्डल्या२ घोटक-कण्डूयितेन** च ३। तत्र या[1]ऽविच्छिन्ना एकान्ते भवति मण्डली सा आवलिका १, या पुनः



१. याऽवच्छिन्ना- पु. प्रे. ॥

For Private and Personal Use Only

स्वस्थान एव सा मण्डली२ घोटककण्डूयितं नाम-यद्वारंवारेण परस्परं प्रच्छनं तद्घोटकयोः परस्परं कण्डूयितमिव घोटककण्डूयितम्३, तत्र सूत्रमर्थं वा भाषते आवलिकया१ मण्डलीकया२ घोटककण्डूयितेन वा३। तत्र **सूत्रं भाषते सामायिकादि** तावद् **यावद् दृष्टिवाद**गतानि **अष्टाशीति** सूत्राणि। पूर्वेषु तु विशेषो वक्तव्य इति तदनुपादानम् ॥ १८०७॥

सम्प्रति यथोक्तप्रमाणमेव सूत्रं भाषमाणानामाभवनविधिमाह—

**सुत्ते जहोत्तरं खलु, बलिया जा होति दिट्ठिवादोत्ति ।**
**अत्थे वि होइ एवं, छेयसुयत्थं नवरि मोत्तुं ॥ १८०८॥**

**सूत्रे** भाष्यमाणे **यथोत्तरं खलु बलिका**स्तावद् **भवन्ति यावद् दृष्टिवादः**। तथाहि-एकः एकस्य पार्श्वे आवश्यकमधीते, आवश्यकवाचनाचार्यः पुनरावश्यकार्थप्रतिप्रच्छकस्य समीपे दशवैकालिकमधीते, दशवैकालिकवाचनाचार्यस्याऽऽभवति क्षेत्रम्। तथा एकः एकस्य पार्श्वे दशवैकालिकमधीते, दशवैकालिकवाचनाचार्यः पुनर्दशवैकालिकप्रतिप्रच्छकस्य पार्श्वे उत्तराध्य-यनान्यधीते, उत्तराध्ययनवाचनाचार्यस्याभाव्यं क्षेत्रम्। एवं यथोत्तरं तावद्भावनीयं यावदष्टा-

शीतिसूत्राणि। यथा सूत्रे यथोत्तरं बलिष्ठतोक्ता, **एवमर्थेऽपि** भावनीया, तद्यथा- एक एकस्य पार्श्वे आवश्यकार्थमधीते, आवश्यकार्थवाचनाचार्यः पुनरावश्यकार्थे प्रतिप्रच्छकस्य समीपे दशवैकालिकार्थमधीते, दशवैकालिकार्थवाचनाचार्यस्याभवति क्षेत्रम् । एवं तावद्वाच्यं यावदष्टाशीतिसूत्रार्थः। **नवरं छेदसूत्रार्थं मुक्त्वा** अर्थाचार्याणामुपरि छेदसूत्रार्थाचार्यो वक्तव्यः। तद्यथा-एक एकस्य पार्श्वे दृष्टिवादगतानामष्टाशीतेः सूत्राणामर्थमधीते, अष्टाशीतिसूत्रार्थवाचनाचार्यः पुनरष्टाशीतिसूत्रार्थप्रतिप्रच्छकस्य समीपे छेदसूत्रार्थमधीते, छेदसूत्रार्थवाचनाचार्यस्याऽऽभाव्यं तत् क्षेत्रम् ॥ १८०८॥

**एमेव मीसगम्मि वि, सुत्तातो बलवगो पगासो उ ।**
**पुव्वगयं खलु बलियं, हेट्ठिलत्था किमु सुयातो ? ॥ १८०९ ॥**

**एवमेव** अनेनैव प्रकारेण **मिश्रकेऽपि** सूत्रार्थरूपोभयस्मिन्नपि वक्तव्यम्, सर्वत्र **सूत्राद् बलवान् प्रकाशः** अर्थस्य प्रकाशकः। तद्यथा-एक एकस्य पार्श्वे आवश्यकसूत्रमधीते, तस्य समीपे पुनः सूत्रवाचनाचार्य आवश्यकस्यार्थमधीते, आवश्यकार्थवाचनाचार्यस्याभवति तत्क्षेत्रम्। एवं तावद्भावनीयं यावदष्टाशीतिसूत्रार्थवाचनाचार्यः। सर्वत्राधस्तनात्सूत्रादर्थाद्वा पूर्वगतं बलीयः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा चाह- **पुव्वगय**मित्यादि, यदि **पूर्वगतं सूत्रं खलु अधस्तनादर्थाद्** भवति **बलवत्** किमङ्ग **सूत्रात्?** सुतरामधस्तनात् सूत्राद् बलीय इत्यर्थः। तद्यथा- एक एकस्य पार्श्वे आवश्यकस्य सूत्रमर्थं तदुभयं वाऽधीते, तस्य समीपे पुनरावश्यकसूत्राऽर्थ-तदुभयवाचनाचार्यः पूर्वगतं सूत्रमधीते, आवश्यकसूत्रादिप्रतीच्छकस्याभवति। एवं तावद्वाच्यं यावदष्टाशीतिसूत्राणि। पूर्वगतसूत्राच्च पूर्वगतार्थो बलीयान्। तत एक एकस्य पार्श्वे पूर्वगतं सूत्रमधीते, तस्य समीपे पूर्वगतसूत्रवाचनाचार्यः पूर्वगतमर्थं, पूर्वगतसूत्रप्रतीच्छकस्याभवति ॥१८०९॥

अथ किं कारणं शेषात् सूत्रादर्थाच्च पूर्वगतं सूत्रं बलीयः? तत आह—

**परिकम्मेहि य अत्था, सुत्तेहि य जे य सूइता तेसिं ।**
**होइ विभासा उवरिं, पुव्वगयं तेण बलियं तु ॥ १८१० ॥**

दृष्टिवादः पञ्चप्रस्थानः। तद्यथा-परिकर्माणि१ सूत्राणि२ पूर्वगतम्३ अनुयोगः४ चूलिकाश्च ५। तत्र **ये परिकर्मभिः** सिद्धश्रेणिकाप्रभृतिभिः **सूत्रै**श्चाष्टाशीतिसङ्ख्यै**रर्थाः सूचितास्तेषां** सर्वेषामप्यन्येषां च **उपरि** पूर्वेषु **विभाषा भवति,** अनेकप्रकारास्ते तत्र भाष्यन्ते इत्यर्थः। तेन कारणेन **पूर्वगतं** सूत्रं **बलिकम्** ॥ १८१० ॥



For Private and Personal Use Only

सम्प्रति येन कारणेन सूत्रादर्थो बलीयान् तदभिधित्सुराह—

**तित्थगरत्थाणं खलु अत्थो, सुत्तं तु गणहरत्थाणं ।**
**अत्थेण य वंजिज्जइ, सुत्तं तम्हा उ सो बलवं ॥ १८११ ॥**

**अर्थः खलु तीर्थकरस्थानम्** तस्य तेनाभिहितत्वात्। **सूत्रं तु गणधरस्थानम्** तस्य तैर्दृब्धत्वात्। **अर्थेन** च यस्मात्**सूत्रं व्यज्यते** प्रकटीक्रियते, **तस्मात्सः** अर्थः सूत्राद् **बलवान्** ॥१८११ ॥

अथ कस्मात् शेषार्थेभ्यः छेदसूत्रार्थो बलीयान्? इत्यत आह—

**जम्हा उ होइ सोही, छेयसुयत्थेण खलियचरणस्स ।**
**तम्हा छेयसुयत्थो, बलवं मोत्तूण पुव्वगयं ॥ १८१२ ॥**

**यस्मात् स्खलितचरणस्य** स्खलितचारित्रस्य **छेदश्रुतार्थेन शोधिर्भवति, तस्मात्पूर्वगतमर्थं मुक्त्वा** शेषात्सर्वस्मादप्यर्थात् **छेदश्रुतार्थो बलवान्** ॥१८१२ ॥

तदेवमावलिकामधिकृत्योक्तम्। अधुना मण्डलीमधिकृत्याह—

**एमेव मंडलीए वि, पुव्वाहियनट्ठ धम्मकहि वादी ( ? दे ) ।**
**अहवा पइण्णगसुए, अहिज्जमाणे बहुसुते वि ॥ १८१३ ॥**

यथा अधस्तादावलिकायामुक्त**मेवमेव मण्डल्यामपि** द्रष्टव्यम्। सा मण्डली क्व भवति? इति चेत्, उच्यते— **पूर्वाधीते नष्टे** उज्ज्वाल्यमाने, **धर्मकथायां** धर्मकथाशास्त्रेषु, **वादे** वादशास्त्रेषु उज्ज्वाल्यमानेष्वधीयमानेषु वा, **अथवा प्रकीर्णकश्रुते अधीयमाने बहुश्रुतेऽपि** बहुश्रुतविषयेऽपि मण्डली भवति। तत्राप्याभाव्यमावलिकायामिव। अथ कथमावलिकायामिव मण्डल्यामपि द्रष्टव्यम्? इति चेत्, उच्यते- एक एकस्य पार्श्वे पूर्वाधीतं नष्टमावश्यकमुज्ज्वालयति, आवश्यकवाचनाचार्यः पुनस्तस्य समीपे दशवैकालिकम्, दशवैकालिकवाचनाचार्यस्याभवति इत्यादि सर्वं तथैव। तथा एक एकस्य पार्श्वे आवश्यकं नष्टमुज्ज्वालयति, एषोऽप्यावश्यकवाचनाचार्योऽन्यस्य समीपे दशवैकालिकम्, दशवैकालिकवाचनाचार्योप्यपरस्य समीपे उत्तराध्ययनानि, उत्तराध्ययनवाचनाचार्योऽप्यन्यस्य समीपे आचाराङ्गम्, एवं यावद् विपाकश्रुतवाचनाचार्यः पूर्वाधीतं नष्टमन्यस्य पार्श्वे दृष्टिवादमुज्ज्वालयति, दृष्टिवादवाचनाचार्यस्याऽऽभवति, न शेषाणाम्,

आभवनस्योत्तरोत्तरसङ्क्रान्त्याऽन्तिमेऽवस्थानाद्। एतच्चावलिकायामपि द्रष्टव्यम्। तथा यस्य पार्श्वे धर्मकथाशास्त्राणि वादशास्त्राणि वा उज्ज्वालयति अधीते वा तस्य पाठकस्याऽऽभवति, न पाठ्यमानस्य। तथा बहुश्रुततरोऽपि यद्यन्यस्य समीपे प्रकीर्णकश्रुतमधीते तदा तस्य प्रकीर्णकश्रुतवाचनाचार्यस्याऽऽभवति, न बहुश्रुततरस्य। किं बहुना? यो यस्य समीपे पठत्युज्ज्वालयति वा तस्य सत्कमाभाव्यमितरो वाचनाचार्यो हरतीति॥ १८१३॥

अथावलिकाया मण्डल्याश्च कः प्रतिविशेष? इत्यत आह—

**छिण्णाछिण्णविसेसो, आवालियाए उ अंतए ठाति।**
**मंडलिए सट्ठाणं, सच्चित्तादीसु संकमति ॥ १८१४ ॥**

आवलिका-मण्डल्योः परस्परं **छिन्नाछिन्नरूपो विशेषः**, आवलिका छिन्ना विविक्ता एकान्ते भवति। मण्डलिका त्वच्छिन्ना, "**आवलिय तत्थ च्छिन्ना मंडलिया होइ अच्छिन्ना उ**" [ ] इति वचनात् । एतदेव सुव्यक्तमाह— **आवलिकाया**मुपाध्यायः **अन्तः** मध्ये विविक्ते प्रदेशे **तिष्ठति**। **मण्डल्यां** पुनः **स्वस्थान**माभवनं च पाठयितरि **सङ्क्रामति सचित्तादिषु** तत्क्षेत्रगत-सचित्तादिविषयम् ॥१८१४॥

अधुना घोटककण्डूयितमधिकृत्याह—

**दोण्हं तु संजयाणं, घोडगकंडूइयं करेंताणं ।**
**जो जाहे जं पुच्छइ, सो ताहे पडिच्छतो तस्स ॥ १८१५ ॥**

**द्वयोः संयतयोः** घोटककण्डूयितमिव **घोटककण्डूयितम्** परस्परं प्रच्छनमित्यर्थः, तत् **कुर्वतां यो यदा यं पृच्छति स तदा तस्य प्रतीच्छकः**, इतरः प्रतीच्छ्यः। यावच्च यः प्रतीच्छ्यस्तावत्तस्याभवति, न शेषकालमिति ॥ १८१५ ॥

उपसंहारमाह—

**एवं ता असमत्ते, कप्पे भणितो विहि उ जो एस ।**
**एत्तो समत्तकप्पे, वुच्छामि विहिं समासेण ॥ १८१६ ॥**

**एवं तावदसमाप्ते कल्पे यो विधिर्भवति स एष भणितः। अत उर्ध्वं समासेन समाप्तकल्पे विधिं वक्ष्यामि** ॥ १८१६ ॥

प्रतिज्ञातमेव निर्वाहयति—

**गणि-आयरियाणंतो, खेत्तम्मि ठियाण दोसु गामेसु ।**
**वासासु होति खेत्तं, निस्संचारेण बाहिरतो ॥ १८१७ ॥**

गणोऽस्यास्तीति **गणी**-गणावच्छेदकः, **आचार्यः** प्रतीतः, **तयोः [ द्वयोः ] ग्रामयोः** पृथक् पृथक् स्थितयो**र्वर्षास्वाभवति क्षेत्रं** ग्रामद्वयलक्षणम्, **अन्तः क्षेत्रे स्थितयोः** क्षेत्रमध्यव्यवस्थितयोः, न पुनः परस्परं गमनागमनतः। कुतः? इत्याह **बहिर्निस्सञ्चारेण** स्वस्वग्रामाद्बहिः पानीय-हरिताद्याकुलतया सञ्चाराभावतः ॥ १८१७॥



**वासासु समत्ताणं, उग्गहो एगदुगपिंडियाणं पि ।**
**साहारणं तु सेहं, वोच्छं दुविहं च पच्छकडं ॥ १८१८ ॥**

**वर्षासु** बहूनामाचार्याणां परस्परोपसम्पदा **समाप्तकल्पानां**, वर्षासु सप्त जनाः समाप्तकल्पः, ऊना असमाप्तकल्पः **एगदुगपिंडियाणं पि** इति सप्ताप्यैकका: सन्तः पिण्डिताः एकपिण्डिताः, अथवा द्विकेन-वर्गद्वयेन 'एक एकाकी एकः षड्वर्गः, यदि वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एको द्विवर्ग एकः पञ्चवर्गः इत्यादिरूपेण पिण्डिता द्विकपिण्डिताः, तेषा**मेकद्विकपिण्डितानाम्, अपि**शब्दात् त्रिकचतुष्कादिपिण्डितानां **चाऽवग्रह** आभवति, न शेषाणामसमाप्तकल्पस्थितानाम्। तथा **साधारणं शैक्षं वक्ष्ये**। साधारणः शैक्षो यस्याभवति तस्य तं वक्ष्ये। तथा **द्विविधं च** गृहस्थ-सारूपिकभेदतो द्विप्रकारं च **पश्चात्कृत**मुपरि गणावच्छेदकपृथक्सूत्रे [गा.१८५२] वक्ष्यामि ॥१८१८॥

तत्र साधारणं शैक्षं वक्तुमाह—

**अक्खेत्ते जस्सुवट्ठितो, खेत्ते वा समठियाण साहारे ।**
**वायंतियववहारे कयम्मि जो जस्सुवट्टाइ ॥ १८१९ ॥**

**अक्षेत्रे** स्नानादिप्रयोजनतः क्वाप्येकत्र मिलितानां यो **यस्योपतिष्ठते** शैक्षः स तस्याभवति। अथवा सममेककालं ये स्थिताः पृथक् पृथक् समाप्तकल्पास्तेषां समस्थितानां तत्क्षेत्रं साधारणम्, तस्मिन् **साधारणे क्षेत्रे समकस्थितानाम्**। अथवा पश्चादागता अप्येवं व्यवस्थां कृत्वा प्रविष्टाः- यद् यस्योपतिष्ठते तत् तस्याऽऽभवतीति। तत एवं **वाचन्तिके व्यवहारे कृते, यो यस्योपतिष्ठते** स तस्याभवति॥१८१९॥



For Private and Personal Use Only

**साहारणट्ठियाणं, सेहे पुच्छंतुवस्सए जो उ ।**
**दूरत्थं पि हु निययं, साहति ऊ तस्स मासगुरू ॥ १८२० ॥**

विचारादिविनिर्गतं साधुं दृष्ट्वा कोऽपि **शैक्षकः पृच्छति** कुत्र साधूनां वसतयः ? इति; एवं **साधारणस्थितानां** साधारणक्षेत्रावस्थितानाम**उपाश्रयान् पृच्छति शैक्षे यः निजक**मात्मीयमुपाश्रयं **दूरस्थम्, अपि**शब्दात् प्रत्यासन्नं वा **साधयति** कथयति **तस्य हुः** निश्चितं प्रायश्चित्तं **मासगुरुः** ॥१८२० ॥

कथं पुनः कथनीयम् ? इत्याह—

**सव्वे उद्दिसियव्वा, अह पुच्छे कयरो एत्थ आयरितो ।**
**बहुसुय तवस्सि पव्वायगो य ? तत्था वि तहेव ॥ १८२१ ॥**

**सर्वे** यथाक्रममुपाश्रया **उद्देष्टव्याः**। यथा- अमुकस्याचार्यस्योपाश्रयोऽमुकप्रदेशे अमुकस्यामुके इति। एवं कथिते यत्र याति तेषामाभवति। **अथ स पृच्छेत् कतरोऽत्राचार्यो बहुश्रुतो**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वा तपस्वी** वा **प्रव्राजको वा? तत्रापि** तस्यामपि पृच्छायां **तथैव** कथनीयम्, अन्यथा कथने मासगुरुः ॥१८२१॥

**सव्वे सुयत्था य बहुस्सुया वा, पव्वावगा आयरिया पहाणा ।**
**एवं तु वुत्ते समुवेति जस्स, सिट्ठे विसेसे चउरो उ किण्हा ॥ १८२२॥**

अथ **सर्वे श्रुतार्थाः**, सर्वे **बहुश्रुताः**, सर्वे च **प्रव्राजकाः**,सर्वे **वाऽऽचार्याः प्रधानाः** ततस्तथैव यथाभावं कथनीयाः। **एवं तूक्ते यस्य** समीपं **समुपैति** तस्याऽऽभवति। अथात्मीयानां बहुतरगुणोत्कीर्तनतोऽन्येषां बहुतरनिन्दनेन रागद्वेषाकुलतया **विशेषं** कथयति ततः **शिष्टे विशेषे** तस्य विशेषकथकस्य प्रायश्चित्तं **चत्वारो** मासाः **कृत्स्नाः** परिपूर्णा, गुरुका इत्यर्थः ॥ १८२२॥

अथ सर्वेषां मिलितानां स शैक्षः समागत एवं ब्रूयात्—

**धम्ममिच्छामि सोउं, जे पव्वइस्सामि रोइए ।**
**कहणा लद्धितो अहीणो जो पढमं सो उ साहति ॥ १८२३॥**



For Private and Personal Use Only

**धर्मं श्रोतुमिच्छामि** युष्माकं पार्श्वे । **जे** इति पादपूरणे । श्रुते च धर्मे **रुचिते** प्रतिभासिते सति **प्रव्रजिष्यामि**। एवमुक्ते **कथना** धर्मस्य भवति। कः कथयति? इति चेद्, अत आह— **यः लब्धितः** कथनलब्धेर**हीनः स प्रथमं साधयति** कथयति। अथान्येऽपि द्वि-त्रिप्रभृतयो लब्धितः समानास्तर्हि यो रत्नाधिकस्तेन कथयितव्यम् ॥ १८२३॥

**पुणोवि कहमिच्छंते, तत्तुल्लं भासते परो ।**
**एवं तु कहिए जस्सा, उवट्ठायति तस्स सो ॥ १८२४ ॥**

अथ[१] **पुनरपि कथां** धर्मकथां श्रोतुमिच्छामि इति ब्रवीत, ततः पुनरपि कथां धर्मकथां श्रोतु**मिच्छति** अपरः अन्यो **भाषते, परं तत्तुल्यं** तावन्मात्रमेवमपरवेलायामन्योऽपि । उक्तं च "**जारिसं पढमेण कहियं तारिसं सेसेहिं वि कहेयव्वं**' इति— **एवं** प्रथम[२]कथनसदृशतया सर्वैः **कथिते यस्योपतिष्ठति तस्य स** आभवति । अथान्ये विशेषेण विशेषतरेण कथयन्ति तर्हि ते तं न लभन्ते, किन्तु यो रत्नाधिकस्तेषां तस्य स आभवति ॥ १८२४॥

१. अहं पुन° मो. सं. ॥ २. प्रदीपकथन° वा. मो. पु. सं. P. B 3॥

**अणुवसंते व सव्वेसिं, सलद्धि कहणा पुणो ।**
**राइणियादि उवसंतो, तस्स सो मा य नासउ ॥ १८२५ ॥**

अथ यादृशं प्रथमेन कथितं तादृशेऽन्यैरपि कथिते स नोपशाम्यति- न प्रव्रज्याभिमुखीभूतो भवति, ततस्तस्मिन्**ननुपशान्ते पुनः कथना** धर्मस्य **सर्वेषां रात्निकादीनां** रत्नाधिकप्रभृतीनां **स्वलब्ध्या** यथास्वशक्तितुलनया। एवं च कथने यस्य समीपे **स उपशान्त**स्तस्याभवति। कस्मादेवं कथना? इति चेद् अत आह—**मा सो**ऽनुपशान्तः सन् **नश्यतु** संसारं परिभ्रमत्विति कृत्वा॥ १८२५॥

अथ सर्वे आचार्या एकत्र मिलितास्तिष्ठन्ति, स च शैक्षक एकं कञ्चन पृच्छति— कोऽत्राचार्यः?, तत एवं कथनीयम्— सर्वे बहुश्रुताः, सर्वे चाचार्याः सर्वे प्रधाना इति। एवमुक्ते यदि शैक्षको ब्रूते— यं जानीथ यूयमाचार्यं तं मम दर्शयत। तत्राह—

**जं जाणह आयरियं, तं देह ममं ति एव भणियम्मि ।**
**जइ बहुया ते सीसा, दलंति सव्वेसिमेक्केक्कं ॥ १८२६ ॥**

**यं जानीथ यूयमाचार्यं, तं मम देह**त्ति दर्शयत इत्ये**वं भणिते यदि ते शिष्याः** शिष्यत्वेनोपस्थिता **बहवो** भवन्ति ततः **सर्वेषामेकैकं** शिष्यं ते एकत्र मिलिताः परस्परसम्मत्या **ददति** प्रयच्छन्ति ॥१८२६॥ अथ एक एव शिष्यस्तत्र विधिमाह—

**राइणिया थेराऽसति, कुल-गण-संघे दुगादिणो भेदा ।**
**एमेव वत्थ-पाए, तालायर सेवगा वणिया ॥ १८२७ ॥**

यद्येक एव शिष्यस्तदा यस्तेषां सर्वेषामपि **रात्निको** रत्नाधिकस्तस्य तं समर्पयन्ति, अथ सर्वे समरत्नाधिकास्ततो यत् तेषां वृद्धतरस्तस्य। अथ सर्वे **वृद्धा**स्तर्हि यस्य शिष्या न सन्ति तस्य। अथ सर्वेषामपि शिष्या न विद्यन्ते तत इयं सामाचारी—सर्वेषां शिष्याणाम् **असति** अभावे **कुल**त्ति यदि ते सर्वे समानकुलास्ततः कुलस्थविरस्य तं ददति। अथाऽन्यकुलसत्का अपि तत्र वर्त्तन्ते तत आह— **गण**त्ति गणस्थविरस्य समर्पयन्ति। अथाऽन्यगणसत्का अपि तत्र विद्यन्ते तत आह— **संघे** इति सङ्घस्थविराय ददति । अथवा स एकः शिष्यः साधारणस्तावत् क्रियते यावदन्ये उपतिष्ठन्ति, उपस्थितेषु च तेषु यदा सर्वेषां परिपूर्णा भवन्ति तदा विभज्यन्ते। एवं **द्विकादयोऽपि भेदा** वाच्याः, द्विप्रभृतीनामपि

शिष्याणामुपस्थितानामेवं विभाषा कर्तव्या। **एवमेव** अनेनैव प्रकारेण **वस्त्रपात्रेऽपि** वस्त्र-पात्रादिलाभेऽपि द्रष्टव्यम्। तच्च वस्त्र-पात्रादिकं **तालाचरा** वा दद्युः **सेवका** वा वणिजो वा, एतेषां प्रायो वर्षासु दानसम्भवात् ॥ १८२७॥

एनामेव गाथां व्याचिख्यासुः प्रथमतः "राइणिया थेराऽसति" इति व्याख्यानयति—

**रायणियस्स उ एगं, दलंति तुल्लेसु थेरगतरस्स ।**
**तुल्लेसु जस्स असती, तहा वि तुल्ले इमा मेरा ॥ १८२८ ॥**

**एकं** शिष्यमुपस्थितं **रात्निकस्य** रत्नाधिकस्य **ददति** । अथ सर्वे समरत्नाधिकास्ततस्**तुल्येषु** रत्नाधिकेषु यः **स्थविरतर**स्तस्य। अथ सर्वे स्थविरतरास्तर्हि **तुल्येषु** स्थविरतरेषु **यस्य** शिष्याणा**मभाव**स्तस्य। अथ शिष्याभावेना**पि** सर्वे **तुल्या**स्तत **इयं मर्यादा** ॥ १८२८॥

तामेवाह—

**सकुलगा कुलथेरे, गणथेरे गणिच्चएयरा संघे ।**
**रायणियथेर असति, कुलादिथेराण वि तहेव ॥ १८२९ ॥**

यदि ते सर्वे **सकुलकाः** समानकुलकास्ततः **कुलस्थविरस्य** ददति, अथान्यकुलका अपि विद्यन्ते तदा **गणस्थविरस्य** । अथान्यगणसत्का अपि विद्यन्ते तदा **सङ्घे** सङ्घस्थविरस्य। अथैषां मध्ये तत्कालमेकस्याप्यभावस्तत आह— **रायणिएत्यादि, रत्नाधिकस्थविरस्याभावे कुलादिस्थविराणामपि च तथैव** अभावे सति ॥ १८२९॥

**साहारणं व काउं, दोण्णि वि सारेंति जाव अण्णो उ ।**
**उप्पज्जइ सिं सेहो, एमेव य वत्थपत्तेसु ॥ १८३० ॥**

**साधारणं वा** तं शिष्यं **कृत्वा द्वावपि** तं ताव**त्सारयतो यावदन्यः शिष्यस्तयोरुत्पद्यते** ततो विभजनमिति अत्र द्विग्रहणं त्रिप्रभृतीर्नामुपलक्षणम्, तेन बहूनामप्ययं न्यायो दृष्टव्यः। **एवमेव वस्त्रपात्रेष्वपि** साधारणतया सम्पन्नेषु विधिर्द्रष्टव्यः ॥ १८३०॥

अत्र पर आह—

**चोएइ वत्थ-पाया, कप्पंते वासवासे घेत्तुं जे? ।**
**जह कारणम्मि सेहो, तह तालचरादिसु वत्था ॥ १८३१ ॥**

**चोदयति** शिष्यः— **वर्षावासे वस्त्र-पात्राणि ग्रहीतुं कल्पन्ते** काक्वा पाठ इति प्रश्नावगमः। सूरिराह–**यथा कारणे** पूर्वोपस्थित इत्येवंलक्षणे 'अव्यवच्छित्तिकारको भविष्यति' इत्येवंरूपे वाऽपवादतः **शैक्षः** कल्पते **तथाऽ**पवादत**स्तालाचरादिषु वस्त्राणि,** उपलक्षणमेतत्, पात्राणि च कल्पन्ते ॥ १८३१॥

**साहारणो अभिहितो, इयाणि पच्छाकडस्स अवयारो ।**
**सो उ गणावच्छेइयपिंडगसुत्तम्मि भण्णिहिती ॥ १८३२ ॥**

यदुक्तं प्राक् साधारणं शैक्षं वक्ष्ये, 'द्विविधं च पश्चात्कृतम्'[गा.१८१८] इति तत्र **साधारणः** शैक्षोऽ**भिहितः, इदानीं पश्चात्कृतस्यावतारः** प्रस्तावः। **स तु गणावच्छेदकपिण्डकसूत्रे** गणावच्छेदकबहुत्वसूत्रे **भणिष्यते**॥ १८३२॥

तदेवमाचार्योपाध्यायगतान्यप्येकत्व-बहुत्वसूत्राणि भावितानि। सम्प्रति गणावच्छेदकैकत्व-बहुत्वसूत्राणि बिभावयिषुराह—

**एमेव गणावच्छे, एगत्त-पुहुत्त दुविहकालम्मि ।**
**जं एत्थं नाणत्तं, तमहं वुच्छं समासेणं ॥ १८३३॥**

**एवमेव** आचार्योपाध्यायसूत्रगतेन प्रकारेण **द्विविधे काले** ऋतुबद्धे काले वर्षाकाले च **गणावच्छेदकैकत्व**पृथक्त्वसूत्राणि भावयितव्यानि, किमुक्तं भवति ?— यथा आचार्योपाध्यायानामेकत्व-पृथक्त्वसूत्राणि, द्विविधकाले गतानि व्याख्यातानि, या चाऽऽभवत्यनाभवति च सामाचारी, तथा गणावच्छेदकस्याप्येकत्व-पृथक्त्वसूत्राणि द्विविधकालगतानि भावयितव्यानि। सैव च सामाचारी आभवत्यनाभवतीति। **नवरमत्र यन्नानात्वं तदहं समासेन वक्ष्ये** ॥ १८३३ ॥

तत्र ऋतुबद्धे तावद् भण्यते— यदि गणावच्छेदक आत्मद्वितीयो वसति तदा तस्य प्रायश्चित्तं मासलघु, इमे च दोषाः—

**जह होति पत्थणिज्जा, कप्पट्ठी नीलकेसी सव्वस्स ।**
**तह चेव गणावच्छे, किं कारण? जेण तरुणो उ ॥ १८३४ ॥**

**यथा कप्पट्ठी**ति बालिका **नीलकेशी** कृष्णकेशी तरुणीत्यर्थः, **सर्वस्य** तरुणस्य महतो वा **प्रार्थनीया भवति, तथा गणावच्छेदको**ऽपि। **किं कारणम्**? सूरिराह—**येन** कारणेन स गणावच्छेदकस्तरुणः, ततस्**तरुण**तया तरुण्या महत्या वा प्रार्थनीयो जायते॥ १८३४॥



For Private and Personal Use Only

**दोण्ह चउकण्ण रहसं, हवेज्ज छक्कण्ण मो न संभवति ।**
**सिद्धं लोके तेण उ, परपच्चयकारणा तिन्नि ॥ १८३५ ॥**

**लोके** इदं **सिद्धं** प्रतीतम् यथा- **द्वयोश्चतुष्ककर्णं रहस्यं भवति, षट्कर्णं मो** इति पादपूरणे, त्रयाणां रहस्यं **न सम्भवति, तेन** कारणेन **परप्रत्ययकारणात्** परेषां प्रत्ययोत्पादनार्थं **त्रयो** विहरन्ति, इतरथाऽसमर्थः स आत्मनिग्रहं कर्तुम्। त्रयोऽपि चोत्सर्गतो न कल्पन्ते तत इदमपि सूत्रं कारणिकमवगन्तव्यम् ॥ १८३५॥

कारणतश्च तेषां त्रयाणां तिष्ठतामियं यतना—

**जयणा तत्थुउबद्धे, समभिक्खाऽणुण्णनिक्खम-पवेसा ।**
**वासासु दोण्हि चिट्ठे, दो हिंडे असंथरे इयरे ॥ १८३६ ॥**

**तत्र ऋतुबद्धे** काले इयं **यतना— समकं भिक्षा,** समकं शय्यातरस्य समीपे **वसतेरनुज्ञा,** समकं विचारार्थं **निष्क्रमः**, समकं वसतौ **प्रवेशः**। **वर्षासु** पुनरियम्- **द्वौ** पश्चात्तिष्ठ**तः, द्वौ हिण्डेते,** एतच्च संस्तरणे। **असंस्तरणे इतरौ** द्वौ गणावच्छेदक-तदन्यलक्षणौ वसतेः प्रत्यासन्नेषु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गृहेषु वसतिं प्रलोकमानौ हिण्डेते, यावता च न पूर्यते तावदितरानीतं गृह्णीतः, इदमपि वर्षाविषयं कारणिकम्। अकारणे चतुर्णां तिष्ठतां प्रायश्चित्तं चतुर्लघु ॥१८३६॥

सम्प्रति बहुत्वविषये **गणावच्छेदकसूत्रे** भावयति—

**एमेव बहूणं पी, जहेव भणिया उ आयरियसुत्ते ।**
**जाव उ सुयोवसंपय, नवरि इमं तत्थ नाणत्तं ॥ १८३७॥**

**एवमेव** अनेनैव प्रकारेण । किमुक्तं भवति? यथा एकत्वे ऋतुबद्धे वर्षासु च पूर्वं सूत्रमुक्तमेवं **बहूनामपि** ऋतुबद्धे वर्षासु च वक्तव्यम् । भावनाऽपि च **यथा** बहुत्वविषये **आचार्यसूत्रे भणिता** तथैवात्रापि भणनीया, सा च तावद्, **यावत् श्रुतोपसम्पत्**[1]। तथाहि— तैरपि समाप्तकल्पीकरणार्थमन्योन्यनिश्रया वर्तितव्यं, परस्परोपसम्पदा इत्यर्थः । सा च निश्रा द्विविधा-गीतार्थनिश्रा श्रुतनिश्रा च। तत्र यद्गीतार्थस्य समीपे उपसम्पदनं सा गीतार्थनिश्रा। तया गीतार्थनिश्रया परस्परोपसम्पन्नत्वेन समाप्तकल्पीभूतयोर्द्वयोस्त्रयाणां वा वर्गाणां समकमा-

१. ॰म्पन्नः सन् त॰ खं.॥

For Private and Personal Use Only

गमनेन साधारणं क्षेत्रम् । तथा श्रुतार्थं निश्रा श्रुतनिश्रा, सापि च यथा प्राक् आचार्यसूत्रेऽभिहिता तथाऽत्रापि [१]भावयितव्या **नवरमिदं तत्र** निश्रायां नानात्वम्॥ १८३७॥

तदेवाह—

**साधारणट्ठिया ऊ, सुत्तऽत्थाइं परोप्परं गिण्हे ।**
**वारंवारेण तहिं, जह आसा कंडुयंते उ ॥ १८३८ ॥**

ते सर्वे द्विवर्गास्त्रिवर्गा वा समाप्तकल्पाः समकमेकस्मिन् क्षेत्रे यदि स्थितास्ततः साधारणं तत् क्षेत्रम्। ते **तस्मिन् साधारणे** क्षेत्रे **स्थिता** यदि **यथा वारंवारेण अश्वाः परस्परं** कण्डूयन्ति एवं वारेण वारेण परस्परं **सूत्रमर्थं** वा **गृह्णन्ति**, यथा- अहमद्य तव पार्श्वे गृह्णामि, कल्ये त्वं मम पार्श्वे ग्रहीष्यसि। अथवा पौरुषीप्रमाणेन मुहूर्तैर्वा वारकं कुर्वन्ति तदा यो यदा यस्य पार्श्वे गृह्णाति तस्य तावन्तं कालमाभाव्यमितरः सूत्रस्यार्थस्य वा प्रदाताऽपहरति ॥१८३८॥

**अह पुव्वठिए पच्छा, अण्णो एज्जाहि बहुस्सुतो खेत्ते ।**
**सो खेत्तुवसंपन्नो, पुरिमिल्लो खेत्तिओ तत्थ ॥ १८३९ ॥**



१. भाषितव्या- वा. मो. पु. सं.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अथ पूर्वस्थिते** क्षेत्रिके क्षेत्रस्वामिनि गणावच्छेदके आचार्ये वा **पश्चादन्यो बहुश्रुतस्**तस्मिन् **क्षेत्रे आगच्छति** तर्हि **स** तदनुमत्या तत्**क्षेत्रमुपसम्पन्न** इति। **तत्र** क्षेत्रे **क्षेत्रिकः** क्षेत्रस्वामी पूर्व एव, न **पश्चात्तनः** ॥ १८३९ ॥

**खेत्तितो जइ इच्छेज्जा, सुत्तादी किंचि गेण्हिउं ।**
**सीसं जइ मेहाविं, पेसे खेत्तं तु तस्सेव ॥ १८४० ॥**

**क्षेत्रिकः** क्षेत्रस्वामी **यदि** पश्चादागतस्य समीपे **किञ्चित् सूत्रादि ग्रहीतुमिच्छति**, तत्र **यदि शिष्यं मेधाविनं प्रेषयति** तर्हि **क्षेत्रं तस्यैव** पूर्वस्थितस्य, न पश्चादागतस्य ॥ १८४० ॥

**असती तव्विह सीसे, अणिखित्तगणे उ वाए संकमति ।**
**अह वावि अगीयत्थे, निक्खिवई[१] गुरुग न य खेत्तं ॥ १८४१ ॥**

अथ तथाविधो मेधावी शिष्यो नास्ति ततस्**तद्विधे** तथाविधे **शिष्ये असति** अविद्यमाने **अनिक्षिप्ते** च स्वशिष्यस्य गीतार्थस्य **गणे** यदि सूत्रादि पश्चादागतस्य समीपे वाचयति, तर्हि

१. ०क्खिववओ- C । ०क्खिववइ-B 3 ॥



For Private and Personal Use Only

तत्क्षेत्रं पश्चादागते **वाचयति सङ्क्रामति** । **अथागीतार्थे** स्वशिष्ये गणं **निक्षिपति,** निक्षिप्य च **पश्चात्सूत्रादि** वाचयति तर्हि अगीतार्थे गणं निक्षिपतस्तस्य प्रायश्चित्तं चत्वारो **गुरुकाः**। **न च** तस्य क्षेत्रम् किन्तु सूत्रादिवाचयितुः पश्चादागतस्य॥ १८४१॥

**अह निक्खिवती गीते, होइ खेत्तं तु तो गणस्सेव ।**
**तस्स पुण अत्तलाभो, वायंते न निग्गतो जाव ॥ १८४२ ॥**

**अथ गीते** गीतार्थे शिष्ये गणं **निक्षिपति,** निक्षिप्य च पश्चादागतस्य समीपे सूत्रादि गृह्णाति, **तोत्ति**' ततः **क्षेत्रं गणस्यैवाऽऽभवति** न पाठयितुः पश्चादागतस्याचार्यस्य । अथ यदा गणमनिक्षिप्य अगीतार्थे वा निक्षिप्य सूत्रादि गृह्णाति, तदा कियन्तं कालमाभाव्यं तत्क्षेत्रं पाठयितुः ? अत आह— **तस्से**त्यादि, तस्य **पुनः** पाठयितुः पुनस्तस्मिन् क्षेत्रिके **वाचयति आत्मलाभः** आत्मीयत्वेन क्षेत्रस्य लम्भनं तावद् **यावत्** स ततो गच्छान्न **निर्गतो** भवति, किमुक्तं भवति, यावत्तस्य समीपे अध्ययनार्थमवतिष्ठते तावत्तस्याध्यापयितुः पश्चादागतस्याऽऽ-भवति ? तत् क्षेत्रम्, यदपि च शिष्यादिकं तस्य सूत्रादि ग्रहीतुरुपतिष्ठति तदपि तस्याऽऽभवति। निर्गते च ततो गच्छात्तस्मिन् भूयस्तस्यैव पूर्वस्थितस्य क्षेत्रं सङ्क्रामतीति ॥ १८४२॥

**आगंतुगो वि एवं, ठवेंतो खेत्तोवसंपयं लभति ।**
**साहारणे य दोण्हं, एसेव गमो य नायव्वो ॥ १८४३ ॥**

**आगन्तुकोऽपि एवं** पूर्वोक्तेन प्रकारेण गच्छे **स्थापयन् क्षेत्रोपसम्पदं लभते** । इयमत्र भावना-आगन्तुकोऽपि यदि पूर्वस्थिते सूत्रादि गृह्णाति अन्यस्यागन्तुकस्य समीपे सूत्रादि जिघृक्षुं मेधाविनं शिष्यं प्रेषयति, यदि वा गीतार्थे गणं निक्षिप्य स्वयं वाचयति तदा तत् क्षेत्रं तस्यैव मूलागन्तुकस्य। अथ गणमनिक्षिप्य अगीतार्थे वा गणं निक्षिप्य सूत्रादि गृह्णाति तदा ग्राहयितुः क्षेत्रम्। अगीतार्थस्य च गणं निक्षिपतः प्रायश्चित्तं चतुर्गुरुकमिति। तथा **साधारणे च द्वयोराचार्ययोः** क्षेत्रे सूत्रादिग्रहणचिन्तायामेष एव गमो ज्ञातव्यः। तद्यथा-द्वयोः साधारणे क्षेत्रे एको यद्यपरस्य समीपे सूत्रादिकं ग्रहीतुकामः प्राज्ञं विनीतं शिष्यं प्रेषयति, गणं वा गीतार्थे निक्षिप्य स्वयं गृह्णाति तदोभयोरपि साधारणम् । अथ गणमनिक्षिप्य अगीतार्थे वा निक्षिप्य वाचयति तदाऽध्यापयितुः क्षेत्रम्, नेतरस्य, तदपि च तावद्यावत् स ततो गच्छान्न निर्गच्छति। निर्गते उभयोः साधारणम्। अगीतार्थस्य गणाध्यारोपे चात्रापि प्रायश्चित्तं चतुर्गुरुकम् ॥ १८४३ ॥

**साहारणो उ भणितो, इयाणि पच्छाकडं तु वुच्छामि ।**
**सो दुविहो बोधव्वो, गिहत्थ सारूविओ चेव ॥ १८४४ ॥**

**साधारणोऽभिहितः। इदानीं पश्चात्कृतं वक्ष्यामि । स** च पश्चात्कृतो **द्विविधः**। तद्यथा— **गृहस्थः सारूपिकश्च** । गृहे-गृहलिङ्गे तिष्ठतीति गृहस्थः । समानं रूपं सरूपम् तेन चरतीति सारूपिकः ॥ १८४४॥

अनयोरेव स्वरूपमभिधित्सुराह—

**असिहो ससिह गिहत्थो, रयहरवज्जो उ होइ सारूवी ।**
**धारेइ निसिज्जं तू, एगं ओलंबगं चेव ॥ १८४५ ॥**

**गृहस्थः** पश्चात्कृतो द्विविधः **अशिखः सशिखाकश्च**। तत्र यः केशान् धारयति स सशिखाकः। यस्तु मुण्डनेन तिष्ठति सः अशिखाकः। स चाशिखाको **भवति रजोहरवर्जः** रजोहरणवर्जः। रजोहरणग्रहणं दण्डक-पात्रादीनामुपलक्षणम्, ततोऽयमर्थः— यः केवलं शिरसो मुण्डनमात्रं कारयति, न च रजोहरण-दण्डक-पात्रादिकं **धरते** सोऽशिखाक इति। **यस्तु**

**सारूपी** सारूपिकः स एकां **निषद्यामेक**निषद्योपेतं रजोहरणम् **अवलम्बकं** दण्डकम्, उपलक्षणमेतत्, पात्रादिकं च धारयति शिरश्च मुण्डयति॥ १८४५॥

अत्राऽऽभवनविधिमाह—

**गिहिलिंगं पडिवज्जइ, जो ऊ तद्दिवसमेव जो तं तू ।**
**उवसामेती अण्णो, तस्सेव ततो पुरा आसी ॥ १८४६ ॥**

**यो** व्रतं मुक्त्वा **गृहिलिङ्गं प्रतिपद्यते, तं** च गृहिलिङ्गप्रतिपन्नं **योऽन्यः**, उपलक्षणमेतत्, मूलाचार्यो वा **तद्दिवसमेव उपशमयति** पुनरपि व्रतग्रहणायाभिमुखीकरोति स येनैवोपशमितस्तस्यैवाऽऽभवति, न मूलाचार्यस्यैव । उक्तं च "**पच्छाकडो गिहत्थीभूतो जइ तद्दिवसं चेव पव्वइउमिच्छइ जस्स सगासे इच्छइ तस्सेव सो[ चूर्णौ ]**" इति। एष विधिः **पुरा आसीत्**। सम्प्रति पुनर्लिङ्गे परित्यक्तेऽपि त्रिषु वर्षेषु गतेषु तदाभवनपर्यायः परिपूर्णो भवति, नारतः ॥१८४६ ॥

किं कारणम्? केन वाऽऽचार्येणेयं मर्यादा स्थापितेति चेत्? अत आह—

**इण्हिं पुण जीवाणं, उक्कडकलुसत्तणं वियाणित्ता ।**
**तो भद्दबाहुणा ऊ, तेवरिसा ठाविया ठवणा ॥ १८४७ ॥**

**इदानीं पुनर्जीवानामुत्कटं कलुषत्वं**-कषायकलुषत्वं **विज्ञाय ततो भद्रबाहुना त्रैवर्षिका** त्रिवर्षप्रमाणा **स्थापना** मर्यादा **स्थापिता,** चारित्रतटाके संयमोदकपरिवहनरक्षणार्थं त्रैवार्षिकी मर्यादापाली कृतेति भावः॥ १८४७॥

सम्प्रति त्रैवार्षिक्यामेव स्थापनायां विशेषमभिधित्सुरिदमाह—

**परलिंगनिण्हवे वा, सम्मद्दंसणजढे तु संकंते ।**
**तद्दिवसमेव इच्छा, सम्मत्तजुते समा तिण्णि ॥ १८४८ ॥**

**परलिङ्गं** द्विधा-गृहिलिङ्गं परतीर्थिकलिङ्गं च। तत्रेह परतीर्थिकलिङ्गं गृह्यते। तस्मिन् परतीर्थिकलिङ्गे **निह्नवे वा त्यक्तसम्यग्दर्शने सङ्क्रान्ते** यस्य समीपे **तद्दिवसमपीच्छा** तस्य स आभवति। अयमत्र भावः— स भग्नचारित्रपरिणामः सम्यग्दर्शनमपि परित्यज्य परिव्राजकादीनां निह्नवानां वा मध्ये गतो यदि **तद्दिवसमेव** यस्य समीपे प्रव्रजितु**मिच्छ**ति ततः स तस्यैवाभवति, न मूलाचार्यस्य । अथ सम्यक्त्वसहितः परलिङ्गादिषु गतस्ततस्तस्मिन्

**सम्यक्त्वयुते** परलिङ्गादिगते मूलाचार्यमर्यादा **तिस्रः समाः** त्रीणि वर्षाणि, त्रिषु वर्षेषु पूर्णेषु पूर्वपर्यायस्त्रुट्यति[१] ॥ १८४८ ॥

**एमेव देसियम्मि वि, सभासिएणं[२] तु समणुसिट्ठम्मि ।**
**ओसण्णेसु वि एवं, अच्चाइण्णे न पुण एण्हिं ॥ १८४९ ॥**

**एवमेव** अनेनैव प्रकारेण **दैशिकेऽपि सभाषिकेण** समानभाषाव्यवहारिणा **समनुशिष्टे** ज्ञातव्यम्। किमुक्तं भवति? द्रमिलाऽऽन्ध्रादिदेशोद्भवो म्लेच्छप्राय आर्यभाषामजानानो यो विपरिणतः सन् त्यक्तसम्यक्त्वो गृहस्थीभूतः परिव्राजकादिषु निह्नवेषु वा मिलितो यदि केनापि साभाषिकेण समनुशिष्टः सन् प्रत्यावर्तते तर्हि स तस्य समनुशासकस्याऽऽभवति, नान्यस्य। अथ ससम्यक्त्वः परलिङ्गादिषु गतस्तर्हि मूलाचार्यपर्यायपरिमाणं तिस्रः समाः। **अवसन्नेषु अपि एवं** पूर्वमासीत्। यथा— अवसन्नीभूतं तद्दिवसमेव[३] य उपशमयति स तस्याभवति। **इदानीं पुनः** कषायैः **अत्याकीर्णे नेयं** व्यवस्था किन्तु त्रीणि वर्षाणि ॥ १८४९ ॥



---

१. आभवनपर्याय इत्यर्थः ॥ २. संभा° CPB ३ ॥ ३. °समपि य- वा. मो. पु. सं. ॥

उक्तो गृहस्थः पश्चात्कृतः। सम्प्रति सारूपिकमधिकृत्याह—

**सारूवी जज्जीवं, पुव्वायरियस्स जे य पव्वावे ।**
**अपव्वाविए [1]सच्छंदो, इच्छाए जस्स सो देइ ॥ १८५० ॥**

**सारूपिकः** रजोहरणादिधारी स **यावज्जीवं पूर्वाचार्यस्या**ऽऽभवति, न तु त्रिवर्षप्रमाणा तस्य मर्यादा। **यानि च** स सारूपिकः **प्रव्राजयति** मुण्डितानि करोति तान्यपि पूर्वाचार्यस्याऽऽभवन्ति, तेन मुण्डितत्वात्। यानि पुनस्तेन न मुण्डितानि किन्त्वद्यापि सशिखाकानि वर्तन्ते तदायत्तानि च ता**न्यप्रव्राजिता**न्यधिकृत्य तस्य **स्वच्छन्दः** आत्मेच्छा । तथा चाह- **यस्येच्छया स ददाति** तस्याभवन्ति, नान्यस्येति। एतच्चापुत्रादिषु द्रष्टव्यम्, पुत्रादीनि पुनः पूर्वाचार्यस्याभवन्ति ॥ १८५० ॥

गाथा १८५०-१८५५ सारूपिकादेः आभवनादिः

**जो पुण गिहत्थमुंडो, अहवा मुंडो उ तिण्हवरिसाणं ।**
**आरेणं पव्वावे, सयं च पुव्वायरिए सव्वं ॥ १८५१ ॥**

१. सच्छंदे-पु. प्रे.॥



For Private and Personal Use Only

**यः पुनर्गृहस्थ** इव मुण्डो **गृहस्थमुण्डः**, क्षुरेण मुण्ड इत्यर्थः, **अथवा मुण्डो** लोचेन मुण्डः, एष द्विविधोऽपि मुण्डो गृहस्थत्वं करोति, न तु रजोहरण-दण्डक-पात्रादि धारयति, तेन सारूपिकाद्भिन्नः, स **त्रयाणां वर्षाणामारतो**ऽर्वाग् यानि **प्रव्राजयति** मुण्डितानि करोति तानि **स्वयं च** यावत्त्रीणि वर्षाणि न पूर्यन्ते तावत्**सर्वं पूर्वाचार्यस्या**ऽऽभवति ॥ १८५१ ॥

**अपव्वाविते सच्छंदा, तिण्हं उवरिं तु जाणि पव्वावे ।**
**अपव्वावियाणि जाणि य, सो वि य जसिच्छए तस्स ॥ १८५२ ॥**

यानि पुनस्त्रयाणां वर्षाणामारतो **न प्रवाजितानि** न मुण्डितानि कृतानि, किन्तु सशिखाकानि वर्तन्ते तानि **स्वच्छन्दाद्** यस्मै प्रयच्छति तस्याऽऽभवन्ति, **त्रयाणां** वर्षाणा**मुपरि पुनर्यानि प्रव्राजयति** मुण्डितानि करोति, **यानि चाऽप्रवाजितानि** सशिखाकानि तिष्ठन्ति, **सोऽपि च** स्वयमात्मना **यस्य** सकाशे **इच्छति** प्रतिभासते **तस्य** समीपे प्रव्राजयति प्रव्रजति च, त्रिवर्षमर्यादा[1]याः परिपू[2]र्णीकृतत्वात् ॥ १८५२ ॥

१. °दया. सं.। दयामपि-मो.॥ २. °पूर्णीभूत° मो. सं. B 3 P मु.॥

**गंतूणं जइ बेती, अहयं तुब्भं इमाणि अन्नस्स ।**
**एयाणि तुब्भ नाहं, दो वी तुब्भं दुवेऽण्णस्स ॥ १८५३ ॥**

त्रिवर्षप्रमाणायां मर्यादायामतिक्रान्तायां पूर्वाचार्यस्य **समीपं गत्वा यदि ब्रूते अहं-युष्मा**कमन्तिके प्रव्रजिष्यामि, यानि पुन**रिमानि** मम समीपे उपस्थितानि तानि **अन्यस्या**मुकस्य पार्श्वे प्रव्रजिष्यन्ति; अथवा **एतानि युष्माकम्, अहमन्यस्य**; अथवा **द्वावपि** एतान्यहं च युष्माकम्; यदि वा **द्वावपि** एतान्यहं **चान्यस्य** तदा यदिच्छति तत्प्रमाणम् ॥ १८५३ ॥

तदेवाह—

**छिण्णम्मि उ परियाए, उवट्ठिहंते उ पुच्छिउं विहिणा ।**
**तस्सेव अणुमएणं, पुव्वदिसा पच्छिमा वा वि ॥ १८५४ ॥**

**छिन्ने पर्याये** वर्षत्रयमर्यादायामतिक्रान्तायामित्यर्थः, तस्मिन् स्वय**मुपतिष्ठति** अन्यांश्चोपस्थापयति **विधिना** तं **पृष्ट्वा तस्यै**वोपतिष्ठतः **अनुमतेने**च्छया **पूर्वा दिक् पश्चिमा वा** दीयते। किमुक्तं भवति? -यदि पूर्वाचार्यमिच्छति ततः पूर्वाचार्यस्याऽऽभवति, अथान्यं तर्ह्यन्यस्य। शेषतदुपस्थापितविषयेऽपि च तस्येच्छा प्रमाणम्, सा च प्रागेवोपदर्शिता। स यदि

सम्यगुपशान्तः सन् स्वकमाचार्यमाश्रयते तर्हि स प्रव्राजनेन सङ्ग्रहीतव्यः। यदि पुनर्न संगृह्णाति ततः प्रायश्चित्तं मासलघु, अन्यच्च तेनासङ्ग्रहणे यदि तस्य श्रद्धाभङ्गो भवति, यदपि चान्यस्य समीपे दूरं गच्छन् पथि स्तेन-श्वापदादिभ्योऽनर्थं प्राप्नोति तन्निमित्तमपि तस्य प्रायश्चित्तम्, तस्मादवश्यं सङ्ग्रहीतव्यः ॥ १८५४ ॥

**संविग्गमुद्दिसंते, पडिसेहं तस्स संथरे गुरुगा ।**
**किं अम्हं तु परेणं, अहिकरणं जं तु तं तेसिं ॥ १८५५ ॥**

अथान्यस्य समीपे व्रजन् स पूवाचार्यमात्मीयं **संविग्नमुद्दिशति** प्रकाशयति, तस्मिन् संविग्नमुद्दिशति यस्य समीपे प्रव्रजितुमिच्छति स यदि **प्रतिषेधयति,** यथा- **किमस्माकं परेण** परकीयेन ? **यत्** येषा**मधिकरणं तत्तेषां** भवत्विति। तस्य एवं प्रतिषेधतः प्रायश्चित्तं **चत्वारो गुरुकाः**। एतच्च **संस्तरणे** सति द्रष्टव्यम्। अथाऽसंस्तरन् प्रतिषेधयति ततः शुद्धः। अथ स पूर्वाचार्यस्यैव पार्श्वे कस्माल्लिङ्गं न प्रतिपद्यते? उच्यते परुषा वा ते आचार्याः, यदि वा यत्र ते पूर्वाचार्या विहरन्ति तत्र तस्य सागारिकं किमपि तिष्ठति, अतिदूरे वा ते उपलभ्यन्ते, ग्लानो वा पूर्वाचार्यो जात इति ॥ १८५५ ॥

**एवं खलु संविग्गे, असंविग्गे वारणा न उद्दिसणा ।**
**अब्भुवगतो जं भणती, पच्छ भणंते न से इच्छा ॥ १८५६ ॥**

**एवम्** उक्तेन प्रकारेण **संविग्ने** पूर्वाचार्ये उद्दिश्यमाने **खलु** विधिरुक्तः। अथ स पूर्वाचार्य-मात्मीयमसंविग्नमुद्दिशति तर्हि तेन **असंविग्ने** पूर्वाचार्ये उद्दिश्यमाने तस्य **वारणा** प्रतिषेधः कर्तव्यः, न दातव्या तस्य प्रव्रज्या, गुरुनिन्दकत्वादिति भावः। **न** च स तं पूर्वाचार्यमसंविग्न-**मुद्देशयितव्यः**। एष भगवतां परमगुरूणामुपदेशः— **न उद्दिसणा** इत्यादि। अथ स ब्रूते- नाहं संविग्नमसंविग्नं वा पूर्वाचार्यमुद्दिशामि, किन्तु त्वमेव ममाचार्य इति; तर्हि यदि पूर्वाचार्यस्य नोद्देशना, **यं चाभ्युपगतस्तं** प्रत्येवं **भणति** ततः स प्रव्राजनीयः। अथ स प्रव्राजितः सन् पश्चाद्वदेत्, यथा- 'पूर्वाचार्यस्याहम्, न युष्माकम्' इति तत आह— **पश्चादेवं भणति** तस्मिन् **न** से तस्य इच्छा, किन्तु यमभ्युपगतस्तस्यैव सः ॥ १८५६ ॥

एतदेव स्पष्टतरमाह—

**एमेव निच्छिऊण, उट्ठेंतो पच्छ तेसिमाउट्टो ।**
**इयरेहि व रोसवितो, सच्छंद दिसं पुणो न लभे ॥ १८५७॥**

**उपतिष्ठन्** प्रव्रज्यां जिघृक्षुः **एवमेव** 'त्वमेव ममाचार्यः' इति **निश्चित्य** प्रव्रजितः सन् यः **पश्चात्तेषां** पूर्वाचार्याणां आत्मीयाना**मावृत्तो** जायते। **इतरैर्वा** येषां समीपे प्रव्रजितस्तैर्वा **रोषितः** सन् 'अहं पूर्वाचार्यस्यैव, न युष्माकम्' इति स एवं ब्रुवाणोऽपि **पुनः स्वच्छन्ददिशं** स्वेच्छया दिशं **न लभते,** किन्तु यमभ्युपगतस्तस्यैव स इति ॥ १८५७ ॥

यस्तु पश्चात्कृतत्वेनाऽज्ञातः, यस्य तु ज्ञातस्यापि पूर्वदिक्सङ्ग्रहणे भावो न ज्ञायते, तस्य लिङ्गदाने विधिमाह—

**अण्णातो परियाए, पुण्णे न कहेज्ज जो समुट्ठेंतो ।**
**लज्जाए मा व घेच्छति, मा व न दिक्खिज्ज मे भयणा ॥ १८५८ ॥**

**अज्ञातः** सन् **यः पर्याये पूर्णे**ऽपि **समुपतिष्ठन्** आत्मानं **न कथयति,** यथा— अहममुकस्याचार्यस्य पश्चात्कृत इति, कस्मान्न कथयति ? इति चेत् अत आह- **लज्जया,** यदि वा '**मा** तत्पाक्षिकेण केनाप्यहं **ग्रहीष्ये,**' अथवा '**मा** अमी **मां** पश्चात्कृतं ज्ञात्वा **न दीक्षयेयुः** इति **भजनाद्** विकल्पनान्न कथयति॥ १८५८ ॥

**णाते व जस्स भावो, न नज्जए तस्स दिज्जए लिंगं ।**
**दिण्णम्मि दिसं नाहिति, कालेण वि सो सुणंतो वा ॥ १८५९ ॥**

**ज्ञाते वा** पश्चात्कृततया तस्मिन् प्रव्रज्यार्थमुपस्थिते **यस्य भावो न ज्ञायते** 'केनापि कारणेन पूर्वाचार्यसमीपं न गत?' इति तस्य ज्ञातस्याज्ञातस्य वा **लिङ्गं दीयते। दत्ते** च लिङ्गे स आत्मीयां **दिशं** कालेन पूर्वाचार्यलक्षणां **ज्ञास्यति, स** च पूर्वाचार्यः **कालेन** परम्परया **शृण्वन्** तं ज्ञास्यति, ततो यस्य समीपे तस्य प्रतिभासते तस्य समीपमुपगच्छतु ॥ १८५९ ॥

साम्प्रतमन्यं व्यवहारमुपदर्शयति—

**अहवा अण्णण्णकुला, पडिभज्जिउकाम समणो समणी य ।**
**अणुसट्ठा परं ण ठिया, करेंति वायंतिववहारं ॥ १८६० ॥**

**अथवे**ति व्यवहारस्य प्रकारान्तरो(रतो)पदर्शने। **श्रमणः श्रमणी** चेत्ति द्वावपि **अन्यान्यकुलौ** अन्यकुलः श्रमणोऽन्यकुला श्रमणी **प्रतिभङ्क्तुकामौ** प्रतिपतितुकामौ स्वस्वाचार्येण च तौ प्रभूत**मनुशिष्टौ परं न स्थितौ,** तौ स्वस्वकुलममत्वेन **वागन्तिकव्यवहारं** वागेव

अन्तः- परिसमाप्तिर्वागन्तः, तत्र भवो **वागन्तिकः**, स चासौ व्यवहारश्च **तं कुरुतः**। तद्यथा- यान्यस्माकमपत्यानि जनिष्यन्ते तेषां मध्ये ये पुरुषास्ते सर्वे मम, याः स्त्रियस्ताः सर्वाः तव; अथवा श्रमणी ब्रूते- ये पुरुषास्ते सर्वे मम, स्त्रियः सर्वास्तव; यदि वेदं भणति- सर्वाण्यपत्यानि तव; अथवा सर्वाण्यपत्यानि ममेति, तयोः संसारे स्थित्वा पुनः प्रव्रज्यां प्रत्युभ्युत्थितयोर्यदेव वागन्तिकेन व्यवहारेण निश्चितं तदेव तयोराभवति ॥ १८६० ॥

**अह न कतो तो पच्छा, तेसिं अब्भुट्ठियाण ववहारो ।**
**गोणी१ आसू२ भामिग३, कुडुंबि४ खरए य खरिया य५ ॥ १८६१ ॥**

**अथ न कृतः** पूर्वं वागन्तिको व्यवहारः, **पश्चात्तयोः** प्रवज्यायाम**भ्युत्थितयोः** स्वस्वकुलममत्वेन **व्यवहारः** भण्डनमभूत्, तत्र संयतीकुलसत्का **गौ**दृष्टान्तम् **उद्भ्रामिका**दृष्टान्तं **खर-खरिका**दृष्टान्तं **चा**न्तराऽन्तरोपन्यस्यन्ति, संयतकुलसत्का **अश्व**दृष्टान्तं **कौडुम्बिक**दृष्टान्तं च ॥ १८७० ॥

अथवेयमन्या दृष्टान्तपरिपाटी—

**गोणीणं संगिल्लं१ उब्भामइला य नीये परदेसं२।**
**तत्तो खेत्ते देवी३, रण्णो अभिसेचणे चेव४ ॥ १८६२ ॥** दारगाहा।

संयतीसमानकुलका **गवां संगिल्लं** समुदायं दृष्टान्तीकुर्वन्ति । तदनन्तरं संयतसकुलका या **उद्भ्रामिका परदेशं नीता** तां दृष्टान्तीकुर्वन्ति **ततः** पुनरपि संयतीसकुलका **क्षेत्रे** बीजम्, ततः संयतकुलका **देवीं राज्ञोऽभिषेचनं चैवेति**॥ १८६२ ॥

तत्र भण्डने जाते यथा संयतीसकुलका गोदृष्टान्तं कुर्वन्ति तथा प्रतिपादयति—

**संजइइत्त भणंती, संडेणऽण्णस्स जं तु गोणीए ।**
**जायति तं गोणिवइस्स, होति एवऽम्ह एयाइं ॥ १८६३॥** दारं १॥

**संजइइत्ता** संयतीसत्काः समानकुलका **ब्रुवते-अन्यस्य** सत्केन **षण्डेन यद् गोर्जायते**-ऽपत्यं **तत्सर्वं** गोपतेः गोस्वामिनो **भवति,** न षण्डस्वामिनः । एवमनेनैव दृष्टान्तेनास्माकमपि एतानि अपत्यान्याभवन्ति, न युष्माकमिति १ ॥ १८६३ ॥

एवमुक्ते—

**बेंतियरे अम्हं तु, जह वडवाए उ अण्णआसेणं ।**
**जं जायति मुल्लम्मी, अदिण्णे तं आसियस्सेव ॥ १८६४॥** दारं २ ॥

**इतरे** संयतसमानकुलका— **ब्रुवते-अस्माक**मेतान्यपत्यान्याभवन्ति **यथा मूल्ये अदत्ते यदन्येन** अन्यसत्के**नाऽश्वेन वडवाया जायते**ऽपत्यं **तदाश्विकस्यैव** अश्वस्वामिन एव, कारणिकैरेवमेव व्यवहारनिश्चयाद्, एवमेतान्यप्यस्माकमिति २॥ १८६४ ॥

एवमुक्ते—

**जस्स महिलाय जायति, उब्भामइलाय तस्स तं होइ ।**
**संजइइत्त भणंती ।दारं३। इयरे बेंती इमं सुणसु ॥ १८६५ ॥**

**यस्य महेलायाः** भार्याया **उद्भ्रामिलायाः** स्वैरिण्या **जायते** स्वतः परतश्च **तस्य तत्सर्वमाभवति,** एवमस्माकमपि, इति **संजइइत्ता** संयतीसमानकुलका **भणन्ति** ३ । **इतरे ब्रुवते— इदं** वक्ष्यमाणं उद्भ्रामककौडुम्बिककृतं तत् **शृणुत** ॥ १८६५ ॥

**तेणं कुडुंबिएणं, उब्भामइलेण दोण्हवी दंडो ।**
**दिन्नो सावि य तस्सा, जाया एवऽम्ह एयाइं ॥ १८६६ ॥** दारं ४॥

येन स्वैरिण्या अपत्यानि जनितानि **तेन कुटुम्बिकेन उद्भ्रामिलेन** राजकुले गत्वा कथितम्, यथा— अहं देव! तस्याः सर्वं भोगभरं वहामि स्म, सोपि च तत्पतिर्मदीयेन भोगभरेण निर्यूढवान्, तस्मात्प्रसादं कृत्वा मदीयान्यपत्यानि दापयतेति। तत एवमुक्ते राजा कुपितः, तथा भोगभरसंवाददर्शनत एवमिमावपन्यायकारिणौ इति द्वावपि सर्वस्वापहरणतो दण्डितवान्। तथा चाह— **द्वयोरपि दण्डो दत्तः**, दापित इत्यर्थः। **साऽपि** चापत्याऽपहरणतोऽनन्यगतिका सती **तस्य जाता, एवमस्माकमेतान्य**पीति ४॥ १८६६ ॥

**पुणरवि य संजइइत्त, बेंति खरियाए अण्णखरएण ।**
**जं जायति खरियाहिवतिस्स होति एवऽम्ह एयाइं ॥ १८६७ ॥**

**पुनरपि संयतीसत्का ब्रुवते— खरिकायां** गर्दभ्यां **अन्यखरकेण** अन्यसत्केन गर्दभेन **यत् जायते** तत्सर्वं **खरिकाधिपतेर्भवति, एवमस्माकमप्येतानी**ति ५॥ १८६७ ॥

तदेवं प्रथमा दृष्टान्तपरिपाटी भाविता। सम्प्रति द्वितीयां विभावयिषुः प्रथमतो गोवर्गदृष्टान्तं भावयति—

**गोणीणं संगेल्लं, नट्ठं अडवीए अण्णगोणेणं ।**

**जायाइं वच्छगाइं, गोणाहिवती उ गेण्हंति ॥ १८६८ ॥** दारं १॥

**गवां** स्त्रीगवानां **संगिल्लं** समुदायो **नष्टोऽटव्यां** पतितः, तत्र च तस्यान्यगवेन **अन्य**सत्केन **पुङ्गवेन जातानि वत्सकानि** वत्सकरूपाणि तानि गवेषणतः कथमपि गवां लाभे **गवाधिपतयः** स्त्रीगवीस्वामिनो **गृह्णन्ति** न पुंगवस्वामिनः; एवमेतान्यप्यस्माकमिति १॥ १८६८॥

एवमुक्ते संयतसत्का उद्भ्रामिकादृष्टान्तं पूर्वोक्तमुपन्यस्यन्ति। तथा चाह—

**उब्भामिय पुव्वुत्ता, अहवा नीया उ जा परविदेसं ।**

**तस्सेव उ साऽऽभवती, एवं अम्हं तु आभवती ॥ १८६९ ॥** दारं २॥

**उद्भ्रामिका पूर्वमुक्ता** यथा सापत्या तस्य जाता, **अथवा या परं विदेशं नीता सा तस्यैवाभवति,** पश्चादपि नान्यस्य; एवमेतान्यपत्यान्येषा **चास्माकमाभवतीति** २।। १८६९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमुक्ते—

**इयरे भणंति बीयं, तुब्भं तं नीयमन्नखेत्तं तु ।**

**तं होइ खेत्तियस्सा, एवं अम्हं तु एयाइं ॥ १८७० ॥** दारं ३ ॥

**इतरे** संयतीसत्का **भणन्ति— बीजं युष्मदीयम् तत्** किल क्षेत्रसादृश्यविप्रलम्भतः कथमपि वापकैरन्यत् क्षेत्रं **नीतम्, अन्यत्र क्षेत्रे** उप्तमित्यर्थः, **तत्** लोके **क्षेत्रिकस्य भवति। एवमेतान्य**पत्यान्य**स्माक**मिति ३ ॥ १८७० ॥

संयतसत्का अत्र प्रत्युत्तरमाहुः—

**रण्णो धूयातो खलु, न माउछंदाउ ताओ दिज्जंति ।**

**नवि पुत्तो अभिसिच्चइ, तासिं छंदेण एवऽम्हं ॥ १८७१ ॥** दारं ४ ॥

**न खलु या राज्ञो दुहितरस्ताः मातृच्छन्दतो** मातृणामभिप्रायेण **दीयन्ते, नापि पुत्रोऽभिषिच्यते तासां** मातृणां **छन्देन** अभिप्रायेण, किन्तु राज्ञः स्वाभिप्रायेण, ततो यथा



For Private and Personal Use Only

'राजा प्रधानम्' इति सर्वं राज्ञ आयत्तम्; एवमत्रापि पुरुषः प्रधानमिति सर्वं पुरुषस्यायत्तम्, **अतः सर्वमस्माक**माभवति ४॥ १८७१॥

एवं व्यवहारे वर्तमाने श्रुतधर आचार्यो व्यवहारं छेत्तुकाम इदमाह—

**एमादि उत्तरोत्तरदिट्ठंता बहुविहा न उ पमाणं ।**
**पुरिसोत्तरिओ धम्मो, होइ पमाणं पवयणम्मि ॥ १८७२ ॥**

**एवमादय उत्तरोत्तरदृष्टान्ता बहुविधा** अभिधीयमाना **न प्रमाणम्,** किन्तु **प्रवचने पुरुषोत्तरिको धर्म** इति पुरुषः **प्रमाणम्,** अतः सर्वं पुरुषसत्का लभन्ते, नेतरे इति॥ १८७२॥



**सूत्रम्— गामाणुगामं दुइज्जमाणे[1] भिक्खू जं पुरतो कट्टु विहरइ, से आहच्च विसुंभेज्जा[2], अत्थि [3]या इत्थ अन्ने केइ उवसंपज्जणारिहे, से उवसंपज्जियव्वे सिया, णत्थि या इत्थ अन्ने केइ उवसंपज्जणारिहे, अप्पणो कप्पाए असम्मत्ते कप्पइ से एगराइयाए पडिमाए जण्णं जण्णं दिसं अन्ने साहम्मिया विहरंति तण्णं तण्णं दिसं उवलित्तए।**

१. °णो-श्युब्रींग॥ २. विसंभेज्जा-श्युब्रींग॥ ३. या इंथ-प्रतिलिपि-श्युब्रींग संस्करणे च। एवमग्रेऽपि ॥

**नो से कप्पइ तत्थ विहारवत्तियं वत्थए, कप्पइ से तत्थ कारणवत्तियं वत्थए । तंसि च णं कारणंसि निट्ठियंसि परो वएज्जा- "वसाहि अज्जो ! एगरायं वा दुरायं वा"। एवं से कप्पइ एगरायं वा दुरायं वा वत्थए, नो से कप्पइ परं एगरायाओ वा दुरायाओ वा वत्थए । [1]जं तत्थ परं एगरायाओ वा दुरायाओ वा वसइ, से संतरा छेए वा परिहारे वा ॥ ११ ॥**

"गामाणुगामं दूइज्जमाणे भिक्खू जं पुरतो कट्टु विहरइ" इत्यादि, अथास्य सूत्रस्य कः सम्बन्धः ? तत आह—

**आयरियउवज्झाए व, अहिकिए अहिकिए य कालम्मि ।**
**निस्सोवसंपयत्ति य, एगट्ठमयं तु संबंधो ॥ १८७३ ॥**

अधस्तनेष्वनन्तरसूत्रेष्**वाचार्य उपाध्यायो वाधिकृतः**, कालो वा ऋतुबद्धो वर्षा**कालश्चा**-धिकृतः, ततस्तस्मि**न्नधिकृते** सूत्रे इदं सूत्रमापतितम्, अत्राप्याचार्यस्योपाध्यायस्य वा ऋतुबद्धे

सूत्र ११ गाथा १८७०-१८७४ उवसम्प-त्सामाचारी ८५१ (A)

१. जे-आगमप्रकाशने॥

काले मरणस्याभिधानात्। अथवानन्तरसूत्रे निश्राऽभिहिता, **निश्रा च उपसम्पच्चेत्येकार्थम्,** अत्र चोपसम्पद्वक्ष्यते, ततोऽनन्तरमिदं सूत्रमुक्तम्। **अयं** पूर्वसूत्रैः सह **सम्बन्धः** ॥ १८७३ ॥

पुनः प्रकारान्तरेण सम्बन्धमाह—

**अहवा एगयरम्मि उ, आयरियगणिम्मि वावि आहच्च ।**
**वीसुंभूते गच्छति, फड्डुगं फड्डुगा व गणं ॥ १८७४ ॥**

**अथवेति** प्रकारान्तरे। **एकतरस्मिन्नाचार्ये गणिनि वा** उपाध्याये **आहच्च** कदाचिद् **विष्वग्भूते** कालं गते गच्छसत्काः **स्पर्द्धकं गच्छन्ति स्पर्द्धका वा गणम्,** ततो भिक्षुगमन-प्रतिपादनार्थमिदं सूत्रम्॥ १८७४॥

अनेन सम्बन्धेनाऽऽपतितस्यास्य व्याख्या—

**ग्रामानुग्रामं** ग्रामं ग्रामेण **दूइज्जमाणे** गच्छन्, एतावता ऋतुबद्धः कालो दर्शितः, **यं पुरतः कृत्वा** प्रभुं कृत्वा इत्यर्थः, स नियमादाचार्य उपाध्यायो वा द्रष्टव्यः, **विहरति सः आहच्च** कदाचित् **वीसुंभेज्जा** शरीराद्विष्वग् भवेत् कालगतो भवेत् । **अत्थि या इत्थ**

इत्यादि, अस्ति चात्र समुदायेऽ**न्यः कश्चिद्** आचार्यादुपाध्यायाद् वा व्यतिरिक्तो गणी प्रवर्तकः स्थविरो वृषभो वा **उपसम्पदनार्ह**स्ततः **स उपसम्पत्तव्यः**। अथान्यो **नास्ति कश्चिदत्रोपसम्पदनार्हस्त**र्हि स **आत्मनः कल्पेनासमाप्तः** इति **से** तस्य **कल्पते एकरात्रिक्या प्रतिमया** यत्र वसति तत्रैकरात्राभिग्रहेण **जण्णं जण्णं** इत्यादि, यस्यां यस्यां **दिशि अन्ये साधर्मिका विहरन्ति तां तां दिशमुपलातुम्, न** पुनः **से** तस्य **कल्पते** तत्र अपान्तराले **विहारप्रत्ययं वस्तुम्। कल्पते से तस्य कारणप्रत्ययं** संघातादिकारणनिमित्तं **वस्तुम्। तस्मिंश्च कारणे निष्ठिते** यदि **परो वदेत्— वस आर्य ! एकरात्रं द्विरात्रं वा एवं से** तस्य **कल्पते एकरात्रं द्विरात्रं वा,** वाशब्दात् त्रिरात्रं वा वस्तुम्। **न से** तस्य **कल्पते एकरात्राद् द्विरात्राद्वा परं वस्तुम्। यत् तत्र एकरात्राद् द्विरात्राद्वा परं वसति** तत्र **से** तस्य स्वकृता**दन्तरात् च्छेदः परिहारो वे**ति ॥ अधुना **निर्युक्तिविस्तरः**-अत्रोपसम्पदनार्हः इत्युक्तम् सा चोपसम्पद्-द्विविधा— लौकिकी लोकोत्तरिकी च । तथा चाह—

**लोगे य उत्तरम्मि य, उवसंपय लोगिगी उ रायाई ।**
**राया वि होइ दुविहो, सावेक्खो चेव निरवेक्खो ॥ १८७५ ॥**

**उपसम्पद्** द्विधा— **लोके उत्तरे च** लोकोत्तरे। तत्र **लौकिकी राजादौ,** आदिशब्दाद् युवराजादिपरिग्रहः। तथा च— यदा राजा मृतो भवति तदा युवराजमुपसम्पद्यन्ते, तं राजानं स्थापयन्तीत्यर्थः, युवराजोऽन्यः स्थाप्यते। स च **राजा भवति द्विविधः- सापेक्ष निरपेक्षश्च,** सहापेक्षया प्रजानां यः स सापेक्षः, तद्विपरीतो निरपेक्षः। तथा च राजा प्रजा-राज्याद्यपेक्षः सन् जीवन्नेव युवराजं स्थापयति, निरपेक्षस्तु नैव ॥ १८७५॥

अथ किं जीवन्नेव युवराजं स्थापयति ? तत आह—

**जुवरायम्मि उ ठविए, पया उ बंधंति आयतिं तत्थ ।**
**नेव य कालगयम्मी, खुब्भंति पडिवेसियनरिंदा ॥ १८७६ ॥**

**युवराजे** राज्ञा साक्षाद्विद्यमानेन **स्थापिते प्रजास्तत्र आयतिं** आगामिकालविषयां महतीमास्थां **बध्नन्ति, नैव** च सहसा कालगते राज्ञि **प्रातिवेशिकनरेन्द्राः** सीमातटवर्तिनः प्रत्यन्तराजानः **क्षुभ्यन्ति** राज्यविलोडनाय सञ्चलन्ति ॥ १८७६॥

उक्तः सापेक्षः। सम्प्रति निरपेक्षमाह—

**पच्छन्न राय तेणे, आयपरो दुविह होइ निक्खेवो ।**
**लोइय लोगुत्तरितो, लोगुत्तर थप्पियर वोच्छं ॥ १८७७ ॥**

निरपेक्षो नाम यः प्रजानां राज्यस्य चाऽऽयतिं नापेक्षते, तस्मिन् कालगते स राजा मृतः **प्रच्छन्नो** ध्रियते, यथा— 'अतीव **राजा** शरीरबाधितो वर्तते', स च तावद् ध्रियते यावदन्यो निवेश्यते, स च कदाचित् **स्तेनो**ऽपि। तथा निक्षेपणं **निक्षेपः**, स **द्विविधः** द्विप्रकारः। तद्यथा— **आत्मनः परतश्च**। पुनरेकैको द्विविधः-**लौकिको लोकोत्तरिकश्च**। तत्र **लोकोत्तरिकः स्थाप्यः** पश्चाद्वक्ष्ये इत्यर्थः **इतरं** लौकिकं प्रथमगाथा[1]पादोपक्षिप्तं **वक्ष्ये**॥ १८७७॥

प्रतिज्ञातमेव निर्वाहयति—

**निरवेक्खे कालगते, भिन्नरहस्सा तिगिच्छऽमच्चो य।**
**अहिवास आसहिंडण, वज्झो त्ति य मूलदेवो उ ॥ १८७८ ॥**

एको राजा निरपेक्षः, तस्य राज्ये मूलदेवश्चौरिकां करोति। स कदाचिदारक्षकैः प्राप्तो राज्ञः पार्श्वे नीतः। राज्ञा च स्तेनः इति कृत्वा वध्य आज्ञप्तः । ततः स राजा तत्क्षणमेव

१. पादोत्क्षिप्तं- सं.॥

निजमावासस्थानमुपगतः, क्षणमात्रेण च सहसा कालगतः। तस्मिन्**निरपेक्षे कालगते द्वौ भिन्नरहस्यौ** राजा मृत इति रहस्यं द्वौ जानीतः, तद्यथा **चिकित्सावैद्योऽमात्यश्च,** राजा चानपत्यः, ततोऽ**श्वस्याधिवासना** कृता स सर्वत्र त्रिक-चतुष्क-चत्वरादिषु **हिण्डाप्यते**— कथं नाम राजलक्षणयुक्तं पुरुषं लभेमहि यं राजानं स्थापयाम इति। **मूलदेवश्च यो वध्य** आज्ञापितः स तेनावकाशेन नीयमानो वर्तते ॥ १८७८ ॥

**आसस्स पट्टिदाणं, आणयणं हत्थचालणं रन्नो ।**
**अभिसेग भोइपरिभव, तण जक्खऽतिवायणं आणा ॥ १८७९ ॥**

ततः **अश्वेन** तस्य मूलदेवस्य वध्यतया नीयमानस्य **पृष्ठं दत्तम्,** गाथायां स्त्रीत्वं प्राकृतत्वात्, प्राकृते हि लिङ्गं व्यभिचारि, ततो मूलदेवो यत्र राजा प्रच्छन्नो जवनिकान्तरितोऽवतिष्ठते तत्रा**नीत**स्ततो वैद्यकुमारामात्याभ्यां जवनिकाभ्यन्तरस्थिताभ्यां राज्ञो हस्त उपरिमुखो नीत्वा चालितः। एतद् **राज्ञो हस्तचालनम्**। ततो वैद्यकुमारामात्याभ्यामुक्तम्— कृता राज्ञाऽनुज्ञा, यथा— मूलदेवं राजान**मभिषिञ्चत**, न शक्नोति वाचा वक्तुमिति। ततोऽभिषिक्तो मूलदेवो राज्ये। नवरमसदृश इति कृत्वा केचिद् भोजिकाः परिभवमुत्पादयन्ति, न पुनः कुर्वन्ति

राजार्हं विनयम्। ततश्चिन्तयति मूलदेवो, ममैते मूर्खतया परिभवं कुर्वते, परं किमिदानीम्? एते मूर्खतयैव कदाचित्स्वयमेवालमालं जल्पिष्यन्ति तदानीं शासयिष्यामि। ततोऽन्यदिवसे आत्मनः शिरसि तृणशूकजातं कृत्वा आस्थानमण्डपिकायामुपविष्टः। ते च भोजिका मूर्खतया शनैः परस्परमुल्लपन्ति— अद्यापि नन्वेष चौरत्वं न मुञ्चति, अन्यथा कथमेतादृशस्य तृणशूकजातस्येदृशे भवने सम्भवः? नूनं तृणगृहादिषु चौरिकानिमित्तमतिगतस्ततः तृणशूकजातं शिरसि लग्नमिति। एतच्चाकर्ण्य मूलदेवो रोषमुपागमत्, ब्रूते च— अस्ति कोपि नाम मम चिन्ताकारी य एतान् शास्ति? इति। तत एवमुक्ते तत्पुण्यप्रभावतो राज्यदेवताधिष्ठितैर्निशिता-सिलताकैश्चित्रकर्मप्रतीहारैः केषाञ्चित् शिरांसि लूनानि। शेषाः कृतप्राञ्जलयः आज्ञामभ्युप-गतवन्तः। तथा चाह— **भोइय परिभवे**त्यादि, भोजिकाः परिभवं कृतवन्तः, अन्यदा मूलदेवः **तण**त्ति तृणानि शीर्षे कृतवान्। ततस्तत्कोपावेशं दृष्ट्वा **यक्षैरतिपातनं** विनाशनं कृतम्। शेषैः आज्ञा प्रतीच्छिता ॥ १८७९ ॥

एतदेव सविशेषमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जक्खऽतिवातियसेसा, सरणगया जेहि तोसितो पुव्वं ।**
**ते कुव्वंती रण्णो, अत्ताण परे य [1]निक्खेवं ॥ १८८० ॥**

**यक्षातिपातितशेषाः शरणगताः** मूलदेवस्य शरणं प्रतिपन्नाः, **यैश्च पूर्वं** मूलदेव**स्तोषितस्ते राज्ञ आत्मनः परस्य च निक्षेपम्** अद्यप्रभृति युष्मदीया वयमेते चेति समर्पणं **कुर्वन्ति** ॥१८८० ॥

उक्तो निरपेक्षो लौकिकः। सम्प्रति सापेक्षो निरपेक्षश्च लोकोत्तरिको वक्तव्यः। तत्र प्रथमं सापेक्षमाह—

**पुव्वं आयतिबंधं, करेइ सावेक्खो गणहरे ठविए ।**
**अट्ठविए पुव्वुत्ता, दोसा उ अणाहमादीया ॥ १८८१ ॥**

यो नामाचार्यः **सापेक्षः** स **पूर्वमेव गणधरे स्थापिते** साधूनामा**यतिबन्धं करोति,** यथा—अयं युष्माकमाचार्य इत्येतदाज्ञया वर्तितव्यमिति। अथ न पूर्वं गणधरं स्थापयति ततस्तस्मिन्न**स्थापिते दोषाः पूर्वोक्ताः** अनाथादयः "जाया मो अणाह त्ति" [गा.१५६५-६८] इत्यादिनाऽभिहिताः क्षिप्तादयो दोषा भवेयुः ॥ १८८१ ॥

उक्तो लोकोत्तरिकः सापेक्षः। सम्प्रति निरपेक्षमाह—

---

१. निक्खवणं-सं. C P B3 ॥-



For Private and Personal Use Only

**आसुक्कारोवरए, अट्ठविते गणहरे इमा मेरा ।**
**[1]चिलिमिणि हत्थाणुण्णा, परिभव सुत्त-ऽत्थहावणया ॥ १८८२ ॥**

आशुकारेण शूलादिना उपरतः कालगत **आशुकारोपरतः** तस्मिन् सत्याचार्ये **अस्थापितेऽ**न्यस्मिन् **गणधरे इयं** वक्ष्यमाणा **मर्यादा**। तामेवाऽऽह- [2]**चिलिमिणी**त्यादि। आशुकारोपरत आचार्यो जवनिकान्तरितः प्रच्छन्नः कार्यः, वक्तव्यं च, आचार्याणामतीवाशुभं शरीरं वाचापि वक्तुं न शक्नुवन्तीति, ततो यो गणधरपदार्हस्तं जवनिकाबहिः स्थापयित्वा सूरयो भण्यन्ते को गणधरः स्थाप्यतामेवं चोक्ता जवनिकाभ्यन्तरस्था गीतार्था आचार्यहस्तं उपर्युन्मुखं कृत्वा स्थाप्यमानगणधराभिमुखं दर्शयन्ति, वदन्ति च— गणधरत्वमेतस्यानुज्ञातम्, परं वाचा वक्तुं न शक्नुवन्ति, एषा **हस्तानुज्ञा**। तत एतस्योपरि वासा निक्षिप्यन्ते, स्थापित एष गणधर इति। पश्चात् 'कालगता आचार्याः' इति प्रकाश्यन्ते। **परिभव सुत्तत्थहावणया** इति, ततो येऽभिनवस्थापितस्याऽऽचार्यस्य **परिभवो**त्पादनबुद्ध्या आचार्योचितं विनयं न कुर्वन्ति तेषां **सूत्रमर्थं** वा स **हापयति,** न ददातीत्यर्थः॥ १८८२॥

---

१. चिलिमिलि- वा. मो. पु. सं. मु. ॥ २. चिलिमिलि॰ वा. मो. पु. मु. ॥

सम्प्रति "आयपरो दुविह होइ निक्खेवो, लोइय लोगुत्तरितो" [१८७७] इति व्याख्यानार्थमाह—

**दंडेण उ अणुसट्ठा, लोए लोगुत्तरे य अप्पाणं ।**
**उवनिक्खिववंति सो पुण, लोइय लोगुत्तरे दुविहो ॥ १८८३ ॥**

**लोके लोकोत्तरे च** यथार्हं विनयमकुर्वन्तो **दण्डेनानुशिष्टा आत्मानमुपनिक्षिपन्ति**। तत्र लौकिको दण्डः पूर्वमुक्तो यो **मूल**देवेन भोजिकानां केषाञ्चित् कृतः। लोकोत्तरकः सूत्रार्थापहरणम्। इह नवे राज्ञीव नवे गणधरे स्थापिते निक्षेपे रसो लोकस्य जायते। ततस्तत्फलाद्युपवर्ण्यते- निक्षेपस्य फलं लोके प्रजापरिपालनम्, लोकोत्तरे ज्ञानादीनामभिवृद्धिः। **स** चोपनिक्षेपो **द्विधा**- लौकिको लोकोत्तरिकश्च। पुनरेकैको द्विधा- आत्मोपनिक्षेपः परोपनिक्षेपश्च, तत्र लौकिक आत्मनिक्षेपो ये प्रगल्भास्ते आत्मनैवाऽऽत्मानं राज्ञ उपनिक्षिपन्ति तिष्ठन्ति च चरणोपपातकारकाः प्रपन्नशरणाः। ये पुनरप्रगल्भास्ते ये राज्ञो वल्लभास्तैरात्मानमुप-निक्षेपयन्ति, एष परोपनिक्षेपः॥ लोकोत्तरिक आत्मनिक्षेपो गच्छवर्तिनां साधूनाम्। तथाहि-ये गच्छे एव वर्तन्ते साधवस्ते आत्मानमात्मनैवाभिनवाचार्यस्योपनिक्षिपन्ति। परनिक्षेपः फड्डुकगतानाम्, ते हि समागताः स्पर्द्धकपतिना निक्षिप्यन्ते, यथा- 'एते अहं च युष्माकमिति' ॥ १८८३॥

इह "नत्थि या इत्थ अण्णे केइ उवसंपज्जणारिहे" इत्याद्युक्तम्, तत्र यद्यपि स गीतार्थस्तरुणः समर्थश्चेन्द्रियनोइन्द्रियाणां निग्रहं कर्तुं तथापि तेनान्यो गणो निश्रयितव्यः, निश्रय्य च परप्रत्ययनिमित्तं तत्रोपनिक्षेपः कर्तव्यः। अत्र लौकिको दृष्टान्तः। तमेवाह—

**जह कोइ वणितो ऊ, धूयं सेट्ठिस्स हत्थे निक्खिविउं ।**
**दिसिजत्ताए गतो तू, कालगतो सो वि सेट्ठी उ ॥ १८८४ ॥**

एको **वणिक्**। तस्य गृहे मारिरुत्थिता। सर्वं गृहमुपच्छादितम्[1]। एका दुहिता तिष्ठति। **परं स श्रेष्ठी निर्धन इति तां दुहितरं** न परिणाययितुं समर्थः, ततो दिग्यात्रां कर्तुमिच्छति, जानाति चैतस्याः कन्यकायाः स्वभावम् यथा— समर्थाऽऽत्मानमेषा संरक्षितुम्, केवलमेका[2] कन्यका महती गृहे तिष्ठन्ती दुष्टशीला लोकेन सम्भाव्येत इति मित्र**श्रेष्ठिनो हस्ते** तां **निक्षिप्य** मुक्त्वा वाणिज्येन **दिग्यात्रां गतः**। तस्यापि च मित्रश्रेष्ठिनो गृहे मारिरभूत्, ततः सोऽपि सकुटुम्बो विनाशमुपागमत्। तथा चाह— **स च श्रेष्ठी कालगतः**। केवलमेका कन्यका स्थिता, सा च मूलश्रेष्ठिदुहितुः सखी। सा च ससखीकाऽप्यात्मानं संरक्षितुं क्षमा, केवलं यशःप्रत्ययनिमित्तं राज्ञः समीपमुपस्थिता ॥ १८८४॥

१. °मुच्छादितम्-पु. प्रे.॥ २. °काकिन्येका महती- खं.॥

तथा चाह—

**सेट्ठिस्स तस्स धूया, वणियसुयं घेत्तु रण्णो समुवगया ।**
**अहयं एस सही मे, पालेयव्वाउ तुब्भेहिं ॥ १८८५ ॥**

**तस्य** मूलभूतस्य **श्रेष्ठिनो दुहिता वणिक्सुतां** पितृमित्रवणिग्दुहितरं **गृहीत्वा राज्ञः समुपगता** समीपमुपगता पादेषु निपत्य विज्ञपयति— यथा देव! युष्माभिर्निजदुहितरो रक्ष्यन्ते तथा **अहमेषा च मे सखी युष्माभिः पालयितव्या,** आवयोरपि युष्मत्कन्यकात्वात् ॥ १८८५ ॥



**इय होउत्ति य भणिउं, कण्णा अंतेउरम्मि तुट्ठेणं ।**
**रण्णा पक्खित्ताओ, भणिया वाहरिउ पाला उ ॥ १८८६ ॥**

**इति एवं भवत्विति भणित्वा तुष्टेन राज्ञा** ते द्वे अपि **कन्यान्तःपुरे प्रक्षिप्ते। भणिता च व्याहृत्य** आकार्य **पाला** पालिका महत्तरिका ॥ १८८६ ॥

किं भणिता? इत्यत आह—

जह रक्खह मज्झ सुता, तहेव एयातो दो वि पालेह ।
[1]तीए वि ते उ ( ? वि एते ) पाले, विण्णवियं विणीतकरणाए॥ १८८७॥

**यथा रक्षत मम सुताः** कन्यकास्**तथैव एते अपि द्वे** मत्कन्यकाप्रख्ये **पालयेथाः**। एवमुक्ते **तयापि** महत्तरिकया **विनीतकरणाया विज्ञप्तम्**-देव! एते **अपि पालयामि**। एवमुक्त्वा ते कन्याऽन्तःपुरं नीते ॥ १८८७॥

तत्र च मूलश्रेष्ठिदुहिता महत्तरिकां विज्ञपयति—

जह कन्ना एयातो, रक्खह एमेव रक्खह ममंपि ।
जह चेव ममं रक्खह, तह रक्खहिमं सहिं मज्झ ॥ १८८८ ॥

**यथा एताः कन्या यूयं रक्षथ एवमेव मामपि रक्षथ। यथा च मां रक्षथ, तथेमां मम सखीम**पि **रक्षथ** ॥ १८८८॥

इय होउ अब्भुवगए, अह तासिं तत्थ संवसंतीणं ।
कालगया महतरिया जा कुणती रक्खणं तासिं ॥ १८८९॥

---

१. तीए वि ते ऊ- पु. प्रे । तीय वि ते तु- ला. पाठान्तरम्॥

इति एवं भवत्विति **अभ्युपगते तासां तत्र संवसन्तीनामथ** कियत्कालातिक्रमेण **या रक्षणं तासां करोति सा महत्तरिका कालगता** ॥ १८८९ ॥

**सविकारातो दट्ठुं सेट्ठिसुया विण्णवेइ रायाणं ।**
**महयरि दाण निग्गह, वणियागम रायविण्णवणं ॥ १८९० ॥**

महत्तरिकाकालगमनानन्तरम् ताः कन्यकाः **सविकारा** अभूवन्। **ततस्ताः सविकाराः श्रेष्ठिसुता दृष्ट्वा राजानं विज्ञपयति—** अन्यां **महत्तरिकां** प्रयच्छत। **दत्ता** राज्ञा । तया च महत्तरिकया **निग्गह**त्ति कन्याः सविकारा उपलभ्य खरण्टिताः। एवं तासां तिष्ठन्तीनां **वणियागम**त्ति स देशान्तरगतो वणिक् समागतः **[ राय ] विण्णवणं** इति राज्ञो विज्ञपनमकार्षीत् यथा— 'देव! नयामि निजपुत्रिकामिति' ॥ १८९० ॥

**पूएऊण विसज्जण, सरिसकुले दाण दोण्हवी भोगो ।**
**एमेव उत्तरम्मि वि, अवत्त राइंदिएहुवमा ॥ १८९१ ॥**

ततः श्रेष्ठिकृतविज्ञप्तिकानन्तरं ते द्वे अपि **पूजयित्वा** राज्ञा **विसृष्टे। सदृशकुले दानम्** विवाहिते इत्यर्थः। ततस्तयो**र्द्वयोरपि विपुला भोगा** दत्ताः। **एवमेव** अनेनैव प्रकारेण **उत्तरेऽपि** लोकोत्तरेऽपि **अव्यक्तस्य रात्रिन्दिवैरुपमा**। इयमत्र भावना— यदि तावल्लौकिका अपि य[1]शः-संरक्षणनिमित्तमात्मानमन्यत्रोपनिक्षिपन्ति, ततः सुतरां लोकोत्तरिकैः साधुभिः संयमयशः-संरक्षणनिमित्तमात्माऽन्यगणे निक्षेप्तव्यः। स चाऽव्यक्तो वयसा, ततो यावद्भिरहोरात्रैर्वयसा व्यक्तीभवति तावन्तं कालं तत्रान्यगणनिश्रायां तिष्ठति ॥ १८९१॥

कथं पुनरात्मानं गणं चोपनिक्षिपति तत आह—

**एते अहं च तुब्भं,वत्तीभूतो सयं तु धारेइ ।**
**जसपच्चया उराला, मोक्खसुहं चेव उत्तरिए ॥ १८९२ ॥**

**एते** मदीयाः साधवो**ऽहं** च **युष्माकम्**, एवं चोपनिक्षिप्य तावत्तत्र तिष्ठति यावद् व्यक्तो जायते। ततो **व्यक्तीभूतः** सन् तस्मान्निर्गत्य स **स्वयमेव** गणं **धारयति**। एवं च कुर्वतस्तस्य फलमिह लोके **उदारा यशःप्रत्ययाः**, अवदातं यशोऽवदाताश्च लोके प्रत्ययाः संयमनैर्मल्य-

१. शीलसं° B3 ॥

विषयाः, परलोके फलं **मोक्षसुखम्, औत्तरिके** लोकोत्तरिके उपनिक्षेपे ॥ १८९२ ॥

अथवा लौकिकस्य लोकोत्तरिकस्य च सापेक्षस्य पदस्थापनायोग्यविषयेयं परीक्षा—

**सावेक्खो पुण पुव्वं, परिक्खए जह धणो उ सुण्हाओ ।**
**अणिययसहाव परिहाविय१भुत्ता२ तत्तिया३ वुड्ढा४ ॥ १८९३ ॥**

**सापेक्षः पुनः पूर्वं परीक्षते साधून्। यथा धनः श्रेष्ठी स्नुषा अनियतस्वभावाः** परीक्षितवान्। कथम्? इति चेत्, उच्यते—

**रायगिहे** नगरे **धणो** नाम सेट्ठी। तस्स चत्तारि सुण्हातो। अन्नया सो चिंतेइ— का मम सुण्हा घरं वुड्ढिं नेहिति? ततो अन्नया तासिं परिक्खणनिमित्तं सयणवग्गो णिमंतितो। भुत्तोत्तरं सयलसयणसमक्खं सुण्हातो सद्दावेऊण पत्तेयं पत्तेयं पंचसालिकणा समप्पिया— एए सुरक्खिए करेह, यदा मग्गेहामि तया दायव्वा। ततो पढमाए 'वुड्ढो एस न लज्जितो सयणसमक्खं पंचकणे समप्पेंतो, न किंपि जाणइ, जया मग्गिहिती तया अन्ने दायव्वा' इति छड्डिया। बिइयाए वुड्ढसेसत्ति भुत्ता। तइयाए आभरणकरंडियाए सुरक्खीकया । चउत्थीए भाउयखेत्तेसु

आरोविऊण वुड्ढिं नीया। जाया वरिसपणगेण मूडसहस्सा। पुणो वि सेट्ठिणा वरिसपणगानन्तरं सयणवग्गं निमंतेऊण भुत्तुत्तरं सयणसमक्खं तातो सद्दावियातो भणियातो- 'ते मे पंच सालिकणे समप्पेह'। ततो पढमाए अण्णातो ठाणातो आणेऊण समप्पिया, सेट्ठिणा सवहसाविता भणिया- 'ते चेव इमे पंच सालिकण किं वा अन्ने'? तीए कहियं- 'ते मए तया चेव छड्डिया, पुण अण्णे आणीया'। एवं बिइयाए वि, नवरं तीए भुत्ता कहिया। तइयाए ते चेव आणीया, भणियं- आभरणकरंडियाए मए सुरक्खीकया। चउत्थीए भणियं 'ताय! सगडाणि समपिज्जंतु, जेण ते पंच सालिकणा आणिज्जंते। ततो सेट्ठिणा विम्हिएण पुच्छियं। तीए कहियं जहावत्तं जाव 'जाया मूडसहस्सा'। तओ परितुट्ठेण सेट्ठिणा भणियं- 'एतीए मज्झ पंच सालिकणा अतीव वुड्ढिं नीयत्ति एसा मम घरस्स सामिणी'। तइया भंडाररक्खिया कया। जीए भुत्ता सा महाणसवावारे निजोइया। पढमा घरबहिकम्मे। तथा चाह- प्रथमया **परिहापिताः**, द्वितीयया **भुक्ताः**। तृतीयया ता**वन्मात्रा** धृताः। चतुर्थ्या **वुड्ढ**त्ति वर्धिताः ॥ १८९३ ॥

एष दृष्टान्तः॥ सम्प्रति दार्ष्टान्तिकयोजनामाह—

**ओममसिवमतरंते, उज्झिउं आगतो न खलु जोग्गो ।**
**कितिकम्म-भार-भिक्खादिएसु भुत्ताऽऽयभुत्तीए ॥ १८९४ ॥**

एवमाचार्येणापि परीक्षानिमित्तं साधून् समर्प्य देशदर्शने शिष्या नियोक्तव्याः। तत्र यः **अवमे** दुर्भिक्षेऽ**शिवे** वा साधून् त्यक्त्वाऽथवा ये **अतरन्तः** असहायास्तान् वा **त्यक्त्वा समागतः** स **खलु न योग्यः**। येनापि **कृतिकर्मसु**पात्रलेपनादिव्यापारेषु, **भारे** च उपध्युपकरणवहनेन, **भिक्षादिषु चात्मभुक्त्या भुक्ताः** उपयोगं नीताः साधवः, न च सम्यक् पालिताः सोऽपि न योग्यः ॥ १८९४॥

**न य छड्डिया न भुत्ता, नेव य परिहाविया न परिवुड्ढा ।**
**ततिएणं ते चेव उ, समीव पच्चाणिया गुरुणो ॥ १८९५॥**

तृतीयेन ये समर्पितास्साधवो गुरुणा ते **न छर्दिताः** न दुर्भिक्षा-ऽशिवादिषु परित्यक्ताः, **नापि भुक्ताः** केवलमात्मोपयोगं नीताः, **नापि** पुरुषशिक्षाप्रदानादिना **परिहापिताः** परिहानिं नीताः, नाप्यन्यान्यपरिव्राजनेन **परिवर्धिताः**। किन्तु **त एव तावन्तो गुरुसमीपं प्रत्यानीताः** ॥१८९५॥

तद्गणान्तर्वर्तिना**मात्मनिक्षेपो** भवति। **ये पुनः स्पर्धकपतयस्तेषामात्मतः परतश्च निक्षेपः**, स्पर्धकपतीनामात्मतः, तदाश्रितानां परतः, स्पर्धकपतिद्वारेण तेषामुपनिक्षेपभावात्। एवमात्मपरोपनिक्षेपो निरपेक्षेऽपि कालगते द्रष्टव्यः ॥ १८९७॥

तथा चाह—

**एवं कालगते ठविए सेसाण आयनिक्खेवो ।**
**फड्डुगवइयाणं पुण, आयपरो होति निक्खेवो ॥ १८९८ ॥**

**एवं** निरपेक्षे सहसा **कालगते** पूर्वप्रकारेणान्यस्मिन् **स्थापिते शेषाणां** गणान्तर्वर्तिना**मात्मनिक्षेपो** भवति। **स्पर्धकपतिकानां त्वात्मपरोपनिक्षेपः**, स्पर्धकपतीनामात्मतस्तदाश्रितानां परतो निक्षेप इत्यर्थः ॥ १८९८॥

**उवसंपज्जणअरिहे, अविज्जमाणम्मि होइ गंतव्वं ।**
**गमणम्मि सुद्धऽसुद्धे, चउभंगो होति नायव्वो ॥ १८९९ ॥**

અભ્યાસુઓ એ પ્રથમ પેઇજ ८६० (A) વાંચવો.

गाथा १८९६-१९०३ निर्गमने चतुर्भङ्गी ८६० (B)

चतुर्थमाह—

**उवसंपाविय पव्वाविया य अण्णे य तेसिं संगहिया ।**
**एरिसए देइ गणं, कामं तइयंपि पूएमो ॥ १८९६ ॥**

येन बहवः **उपसम्पादिता** उपसम्पदं ग्राहिताः बहवः **परिव्राजिताश्च, अन्ये च तेषामु**पसम्पादितानां परिव्राजितानां च सम्बन्धिनः **सङ्गृहीताः**, तेऽपि उपसम्पदं ग्राहयिष्यन्ते परिव्राजयिष्यन्ते चेत्यर्थः। **ईदृशे** चतुर्थे **ददाति गण**माचार्यः, एकान्तयोग्यत्वात्। न केवलमेतस्मिन्, किन्तु काममतिशयेन **तृतीयमपि** पूजयामः, चतुर्थालाभे तमपि योग्यं प्रशंसाम इत्यर्थः ॥१८९६॥

गाथा १८९६-१९०३ निर्गमने चतुर्भङ्गी ८६० (A)

अत्राऽऽत्म-परोपनिक्षेपयोजनामाह—

**तम्मि गणे अभिसित्ते, सेसगभिक्खूण अप्पनिक्खेवो ।**
**जे पुण फड्डगवतिया, आयपरे तेसि निक्खेवो ॥ १८९७ ॥**

**तस्मिन्** चतुर्थे, तदभावे तृतीये वा **गणे** गणपदे **अभिषिक्ते शेषकभिक्षूणां**

**उपसम्पदनार्हे अविद्यमाने भवत्यन्यत्र गन्तव्यम्**। तत्र च **गमने शुद्धाशुद्धपदे** संयोगत-**श्चतुर्भङ्गी भवति ज्ञातव्या**। तद्यथा-निर्गमने शुद्धो गमने च शुद्ध इति प्रथमः१, निर्गमने शुद्धो गमनेऽशुद्ध इति द्वितीयः२, निर्गमनेऽशुद्धो गमने शुद्ध इति तृतीयः३, निर्गमनेऽशुद्धो गमने चाशुद्ध इति चतुर्थः४। गाथायां 'चउभंगो' इति पुंस्त्वनिर्देशः प्राकृतत्वात् ॥ १८९९ ॥

तत्र प्रथमभङ्गव्याख्यानार्थमाह—

**असतीए वायगस्सा, जं वा तत्थऽत्थि तम्मि गहियम्मि ।**
**संघाडो दायव्वो, एगो वा असतीए एगागी ॥ १९०० ॥**

यः कालिकमुत्कालिकं दृष्टिवादं वा वाचयति स नास्ति ततस्तस्य **वाचकस्य** असति अभावे, अथवा **यत्तत्रास्ति** श्रुतं तत्सर्वं गृहीतं ततस्**तस्मिन् गृहीते**ऽन्यसूत्राद्यर्थमन्यत्र व्रजति, तस्य च व्रजत एकः **सङ्घाटको दातव्यः**। **असति** सङ्घाटकाभावे **एकाकी** व्रजेत्॥ १९०० ॥

**अह सव्वेसिं तेसिं, नत्थि उ उवसंपयारिहो अन्नो ।**
**सव्वे घेत्तुं गमणं, जत्तियमेत्ता व इच्छंति ॥ १९०१ ॥**

**अथ तेषां** गच्छवर्तिनां साधूनां **सर्वेषामन्य उपसम्पदर्हो नास्ति** ततः **सर्वान् गृहीत्वा गमनं** कर्तव्यम्। अथ सर्वे गन्तुं नेच्छन्ति, तर्हि **यावन्मात्रा इच्छन्ति** तावन्मात्रैः सह गन्तव्यम्। एष निर्गमशुद्ध उच्यते॥ १९०१॥

**एवं सुद्धे निग्गम, गच्छे वइयाइ अप्पडिबज्झंतो ।**
**संविग्गमणोण्णेहिं, तेहिं वि दायव्वो संघाडो ॥ १९०२ ॥**

**एवं शुद्धे निर्गमे व्रजिकादिषु** गोकुलादिषु **अप्रतिबध्यमानः** प्रतिबन्धमकुर्वन् **गच्छेत्**। तत्र यद्यपान्तराले **संविग्नमनोज्ञाः** सन्ति ततस्तैः सह मिलित्वा गन्तव्यम्। **तैरपि** च निर्गमनशुद्धत्वात् ज्ञानाद्युपसम्पन्निमित्तं च चलितत्वादवश्यं **सङ्घाटो दातव्यः** ॥ १९०२॥

अथ यदा एकं द्वौ वा दिवसौ सङ्घाटो न भवति व्याकुलत्वात् तदा किं कर्तव्यम्? अत आह—

**एगं व दो व दिवसे, संघाडट्ठाए सो पडिक्खेज्जा ।**
**असती एगाणीओ, जयणा उवही न उवहम्मे ॥ १९०३ ॥**

**एकं द्वौ वा दिवसौ स सङ्घाटार्थं प्रतीक्षेत**। **असति** अभावे सङ्घाटकस्य **एकाकी** व्रजेत्। तत्र च **यतना** कर्तव्या। सा च प्राक्कल्पाध्ययनेऽभिहिता, तत **उपधिर्नोपहन्यते**, यतनया प्रवृत्तत्वात् ॥ १९०३॥

उपसंहारमाह—

**एसो पढमो भंगो, एवं सेसा कमेण जोएज्जा ।**
**आसन्नुज्जयठाणं, गच्छे दाराइ तत्थ इमे ॥ १९०४ ॥**

**एषः** अनन्तरोदितः **प्रथमो भङ्गः**। **एवमुपदर्शितेन प्रकारेण शेषा अपि भङ्गकाः क्रमेण योक्तव्याः**। तद्यथा निर्गमनशुद्धः प्राग्वत्, गमनाशुद्धो व्रजिकादिषु प्रतिबन्धकरणात्। निर्गमनाशुद्धो दोषाकीर्णतया निर्गमनात्, गमनशुद्धो व्रजिकादिष्वप्रतिबन्धात्। निर्गमनाशुद्धो गमनाशुद्धश्च प्राग्वत्। अत्र प्रथमभङ्गवर्ती प्रशस्यः, कारणतो द्वितीयभङ्गवर्त्यपि। एवं च गच्छता तेन ये **आसन्ना उद्यताः**- उद्यतविहारिणस्तेषां **स्थानं गच्छेत्** (गन्तव्यम्)। **तत्र** च गतस्य परीक्षादिनिमित्तम**मानि द्वाराणि** भवन्ति ॥१९०४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तान्येवाह—

**पारिच्छहाणि१ असती२ आगमणं३ निग्गमो४ असंविग्गे५ ।**

**निवेयण६ जयणा७ निसट्ठं८ दीहखद्धं पडिच्छंति९ ॥ १९०५ ॥** दारगाहा॥

**परीक्षाहाणी**ति हानि-वृद्धिविषये[1] कर्तव्या, यत्र ज्ञानादीनां हानिस्तत्र न वस्तव्यम्, अन्यत्र वस्तव्यमिति भावः। **असति**त्ति यस्य समीपं गत्वोपसम्पन्नस्तस्मिन् सापेक्षे निरपेक्षे वा कालगतत्वेनासति योऽन्यः स्थापितस्तस्य सकाशे स्थातव्यम् । तस्मिन्नपि सीदति यावत्कुलादिस्थविराणा**मागमनं** तावत्प्रतीक्षणीयम्। तैरपि प्रतिचोदने कृते सीदति **निर्गमो** विधेयः। गच्छता च संविग्नाभावे बहिर्वस्तव्यम्। **असंविग्ने निवेदना** कर्तव्या । बहिर्वसत्यभावे तेष्वप्यसंविग्नेषु नवरं **यतना** विधेया। तथा संविग्नेषु असंविग्नेषु वा संवसनं **निसृष्ट**मनुज्ञातमेकरात्रम्, उत्कर्षतस्त्रीणि दिनानि। वर्षादिकारणतः पुनर्यतनया **दीहखद्ध**मपि प्रचुरमपि दीर्घकालं **प्रतीक्षते**। एष द्वारगाथासङ्क्षेपार्थः ॥ १९०५ ॥

---

१. °विषया क° वा. मो. पु. मु.॥



For Private and Personal Use Only

साम्प्रतमेनामेव विवरीषुः प्रथमतः 'पारिच्छहाणि' त्ति द्वारमाह—

**पासत्थादिविरहितो, काहियमाईहि वा वि दोसेहिं ।**
**संविग्गमपरितंतो, साहम्मियवच्छलो जो उ ॥ १९०६ ॥**

अपान्तराले **पार्श्वस्थादिविरहितः** पार्श्वस्थादिसंसर्गिविप्रमुक्तः। **काथिकादिभिर्वा** भावप्रधानोऽयं निर्देशः, काथिकत्वादिभिर्वा दोषैर्विप्रमुक्तः। तथा **संविग्नोऽपरित्रान्तो**ऽपरिश्रान्तः, सामाचार्यामिति गम्यते। तथा **यः साधर्मिकवत्सलः** प्रवचनलिङ्गसाधर्मिकवात्सल्यपरायणः सः॥ १९०६ ॥

**अब्भुज्जएसु ठाणं, परिच्छिउं हीयमाणए मोत्तुं ।**
**केसु पदेसुं हाणी, वुड्ढी वा? तं निसामेहि ॥ १९०७ ॥**

**अभ्युद्यतानामुद्यतविहारिणां स्थानं परीक्ष्य,** गाथायां सप्तमी षष्ठ्यर्थे, **हीयमानकान् मुक्त्वा** तिष्ठेत् । अथ **केषु पदेषु हानिर्वृद्धिर्वा? सूरिराह— तदेतत्कथ्यमानं निशामय** ॥ १९०७ ॥

तदेवाह—

**तव-नियम-संजमाणं, जहियं हाणी न कप्पते तत्थ ।**
**तिगवुड्ढी तिगसोही, पंचविसुद्धी सुसिक्खा य ॥ ११०८ ॥**

**यत्र तपो-नियम-संयमानां हानिस्तत्र न कल्पते** वस्तुम्। यत्र पुनस्त्रिकवृद्धिः ज्ञानदर्शनचारित्रवृद्धिः यत्र च **त्रिक**स्याऽऽहारोपधिशय्यारूपस्य शोधिः, यत्र च **पञ्चा**नां पार्श्वस्थादिस्थानानां **विशुद्धिः** तेष्वप्रवर्तनम्, यत्र च **सुशिक्षा** ग्रहणे आसेवने च तत्र वस्तव्यम् ॥११०८॥

साम्प्रतमेनामेव गाथां विवृणोति—

**बारसविहे तवे ऊ, इंदियनोइंदिए य नियमे उ ।**
**संजमसत्तरसविहे, हाणी जहियं तहिं न वसे ॥ ११०९ ॥**

**यत्र द्वादशविधे तपसि इन्द्रय-नोइन्द्रियविषये च नियमे, संयमे** च **सप्तदशविधे हानिस्तत्र न वसेत्** ॥ ११०९॥

**तवनियमसंजमाणं, एएसिं चेव तिण्ह तिगवुड्ढी ।**
**नाणादीण व तिण्हं, तिगसुद्धी उग्गमादीणं ॥ ११११० ॥**

**एतेषामेव त्रयाणां तपो-नियम-संयमानां** वृद्धिस्त्रिकवृद्धिः। **अथवा ज्ञानादीनां त्रयाणां** वृद्धिस्त्रिकवृद्धिः। त्रयाणा**मुद्गमादीनाम्**, उपलक्षणमेतत्, आहारादीनां वा त्रयाणां शुद्धि**स्त्रिकशुद्धिः** ॥ १११० ॥

**पासत्थे ओसण्णे, कुसील संसत्त तह अहाछंदे ।**
**एएहिं जो विरहितो, पंचविसुद्धो हवइ सो उ ॥ ११११ ॥**

**पार्श्वस्थः अवसन्नः कुशीलः संसक्तो यथाछन्द** एते पञ्चापि प्राक् सप्रपञ्चं प्ररूपिताः। **एतैः** स्थानै**र्यो विरहितः स पञ्चविशुद्धो** भवति॥ ११११ ॥

पञ्चविशुद्धावेव प्रकारान्तरमाह—

**पंच य महव्वयाइं, अहवा वी नाण-दंसण-चरित्तं ।**
**तव विणओ वि य पंच उ, पंचविहुवसंपया वावि ॥ १११२ ॥**

वाशब्दः प्रकारान्तरोपप्रदर्शने। **पञ्चमहाव्रतानि। अथवा ज्ञानं दर्शनं चारित्रं तपो विनय इति पञ्च।** यदि वा **पञ्चविधा** ज्ञान-दर्शन-चारित्र-तपो-वैयावृत्त्यभेदतः पञ्चप्रकारा **उपसम्पत्** पञ्च, तैः पञ्चभिर्विशुद्धः पञ्चविशुद्धः ॥ ११९२॥

सुशिक्षामाह—

**सोभणसिक्ख सुसिक्खा, सा पुण आसेवणे य गहणे य ।**
**दुविहाए वि न हाणी, जत्थ उ तहियं निवासो उ ॥ ११९३ ॥**

**शोभना शिक्षा सुशिक्षा। सा** द्विविधा, तद्यथा— **आसेवने ग्रहणे च।** आसेवनं प्रत्युपेक्षणादेः सामाचार्याः, ग्रहणमागमस्य। एतस्यां **द्विविधायामपि यत्र न हानिस्तत्र निवासः** कल्पते कर्तुम् ॥११९३॥

**एएसुं ठाणेसुं, सीयंते चोदयंति आयरिया ।**
**हावेंति उदासीणा, न तं पसंसंति आयरिया ॥ ११९४ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एतेषु स्थानेषु** तपःप्रभृतिषु स्वयमाचार्या हीयमाना न दृश्यन्ते, शिष्यास्तु केचित्सीदन्ति, तान् **सीदतो** यत्राऽऽ**चार्याश्चोदयन्ति** शिक्षयन्ति तं गच्छं निवासयोग्यतया आचार्याः प्रशंसन्ति। यत्र पुनराचार्या **उदासीना** मध्यस्थाः सामाचारीं **हा**[१]**पयत** उपेक्षन्ते **न तं प्रशंसन्त्याचार्याः**, नासौ गच्छ उपसम्पदनीय इत्यर्थः ॥ १११४॥

किं कारणम्? अत आह—

**आयरिय-उवज्झाया, नाणुण्णाया जिणेहिं सिप्पट्ठा ।**
**णाणे चरणे जोगा-वहा उ तो ते अणुण्णाया ॥ १११५ ॥**

**आचार्या उपाध्यायाश्च जिनैस्तीर्थकृद्भिर्न शिल्पार्थाः** शिल्पशिक्षणनिमित्तमनु**ज्ञाताः**। कैः कारणैः पुनरनुज्ञाताः? तत आह— **ज्ञाने चरणे** च ये **योगास्तेषामावहाः**- प्रापकाः यतो भविष्यन्ति **ततस्ते अनुज्ञाताः**, ज्ञान-चरणस्फातिनिमित्तमनुज्ञाता इत्यर्थः ॥१११५॥

अपि चेदृशा आचार्योपाध्याया अनुज्ञाताः—

**नाण चरणे निउत्ता, जा पुव्वपरूविया चरणसेढी ।**
**सुहसीलठाणविजढे, निच्चं सिक्खावणाकुसला ॥ १११६ ॥** दारं १॥

१. हापयति- मु.। हापयन्त- C । हापयन्ति- मु.



For Private and Personal Use Only

**ज्ञाने**, 'एकग्रहणात्तज्जातीयस्य ग्रहणम्' इति न्यायाद् दर्शने, **चारित्रे च नियुक्ताः** सततोद्यताः, तथा **सुखशीलाः** पार्श्वस्थादयस्तेषां **स्थानं** यत्ते सेवन्ते **तद्विजढे** तद्रहिते **या पूर्वं कल्पाध्ययने कृतिकर्मसूत्रे चरणश्रेणिः प्ररूपिता** तस्यां स्थिताः, तथा **नित्यं** सदा **शिक्षापनायां** ग्रहणशिक्षायामासेवनाशिक्षायां च ग्राहयितव्यायां **कुशलाः**-समर्थाः। ईदृशां समीपमुपगम्योपसम्पत्तव्यम्॥ १९१६ ॥

गतं 'पारिच्छहाणि'त्ति द्वारम्१। इदानीम् 'असति' त्ति द्वारमाह—

**जेण वि पडिच्छितो सो, कालगतो सो वि होइ आहच्च ।**
**सो वि य सावेक्खो वा, निरवेक्खो वा गुरू आसि ॥ १९१७ ॥**

**येनापि सः प्रतीच्छितः** यस्य समीपे सशिष्यपरिवार उपसम्पन्न इत्यर्थः, **सोऽपि आहच्च** कदाचित् **कालगतो भवेत्। सोऽपि च गुरुः** कालगतः **सापेक्षो वा आसीन्निरपेक्षो** वा ॥१९१७॥ तत्र यः सापेक्षः, सोऽमुं विधिं करोति—

**सावेक्खो सीसगणं, संगह कारेइ आणुपुव्वीए ।**
**पडिच्छगते बेति, एस वियाणे अह महल्लो ॥ १९१८ ॥**

**सापेक्षः शिष्यगणं** स्वदीक्षितशिष्यसमूहमभिनवस्थापितस्य **सङ्ग्रहमानुपूर्व्या** आनुपूर्वीकथनेन **कारयति**। यथा पूर्वं **सुधर्मस्वामी** गणधर आसीत्, ततस्तच्छिष्यो **जम्बूस्वामी**, तस्यापि शिष्यः **प्रभवः**। एवं तावद्यावत् सम्प्रति वयम्, अहमपि च सम्प्रति **महान्** वृद्धीभूतस्ततो मयाऽमुको गणधरः स्थापितो वर्तते तस्याऽऽज्ञां कुर्याद् वैनयिकादिकं च। तथा ज्ञानदर्शनादि-प्रतीच्छानिमित्तमागताः **प्रतीच्छागतास्तानपि ब्रूते**—एष मम स्थाने **विज्ञायेत**, ममेवैतस्य सम्प्रति वैनयिकादिकं कर्तव्यमित्यर्थः॥ १९१८ ॥

अत्रैवार्थे दृष्टान्तमाह—

**जह राया व कुमारं, रज्जे ठावेउमिच्छए जं तु ।**
**भड-जोहे बेति तगं, सेवह तुब्भे कुमारं ति ॥ १९१९ ॥**

**अहयं अती महल्लो, तेसिं वित्तीओ तेण दावेइ ।**
**सो पुण परिच्छिऊणं, इमेण विहिणा उ ठावेइ ॥ १९२० ॥**

**यथा वा राजा यं कुमारं राज्ये स्थापयितुमिच्छति तं** प्रति **भटान् योधांश्च ब्रूते** ॥ १९१९ ॥ साम्प्रत**महमतीव महान्** ततो यूयं **सेवध्वम**मुकं **कुमारमिति**। एवं तानुक्त्वा **तेषां वृत्तीस्तेन** कुमारेण **दापयति,** येन ते तदनुरक्ता जायन्ते । **स पुनः** कुमारः **अनेन** वक्ष्यमाणेन **विधिना परीक्ष्य** राज्ये **स्थाप्यते** ॥ १९२० ॥

तमेव विधिमाह—

**परमन्न भुंज सुणगा, छड्डुण दंडेण वारणं बितिए ।**
**भुंजइ देइ य तइओ तस्स उ दाणं न इयरेसिं ॥ १९२१ ॥**

राजा बहूनां कुमाराणां मध्ये कतरं युवराजं स्थापयामि? इति विचिन्तयन् परीक्षानिमित्तं तान् सर्वान् कुमारान् शब्दापयित्वा तेषां पृथक् पृथक् स्थाले **परमान्नं** पायसं परिवेषयति । परिवेष्य शृङ्खलाबद्धान् **शुनकान्** व्याघ्रकल्पान् कुमारान् प्रति मोचयति। ते च शुनका वेगेन कुमारसमीपमागताः। तत्रैको राजपुत्रः शुनकभयेन पायसं **परित्यज्य** पलायितः। **द्वितीयो**

राजपुत्रो **दण्डेन** तेषां शुनकानां **वारणं** करोति भुङ्क्ते च, न च किमपि तेभ्यो ददाति। **तृतीयः** पुनः स्वयं **भुङ्क्ते**, शुनकेभ्योऽपि च स्वस्थालात् परस्थालाच्च **ददाति**। **तस्य** तृतीयस्य राजपुत्रस्य राज्य**दानम्, नेतरयोर्द्वयो**:॥ ११२१ ॥

किं कारणम्? इति चेत्, अत आह—

**परबलपेल्लिओ नासति, बितिओ दाणं न देइ उ भडाणं ।**
**न वि जुज्झंते ते ऊ, एए दो वी अणरिहाओ ॥ ११२२ ॥**

प्रथमो यदा परबलमागच्छति तदा तेन **परबलेन प्रेरितः** सन् राज्यमपहाय **नश्यति** । **द्वितीयो न भटानां** सुभटानां किमपि **ददाति**। **न च ते** भटा दानमृते परबले समागते **युध्यन्ते** । ततः समर्थस्यापि परबलेन प्रेरणम्। अत **एतौ द्वावप्यनर्हौ** राज्यस्य॥ ११२२॥

**तइओ रक्खइ कोसं, देइ य भिच्चाण ते य जुज्झंति ।**
**पालेयव्वे अरिहो, रज्जं तो तस्स तं दिण्णं ॥ ११२३ ॥**

**तृतीयः** पुनः कुमारः **कोशं** भाण्डागारं **रक्षति** । **भृत्यानां** सुभटानां **ददाति**। ततस्ते

**भृत्याः** परबले समागते **युध्यन्ते**। ततः परं भग्नं परबलमपगच्छति। तदपगतौ च स्वराज्यस्य सौस्थ्यम्। अतः सः **पालयितव्ये राज्येऽर्ह** इति तद् **राज्यं** राज्ञा **तस्य दत्तम्**। यथा— 'भो लोकाः! एष युवराजः, युष्माभिरेष आसेवनीयः' ॥ १९२३ ॥

**अभिसित्तो सट्ठाणं, अणुजाणे भडादि अहियदाणं च ।**
**वीसुंभिय आयरिए, गच्छे वि तयाणुरूवं तु ॥ १९२४ ॥**

एवं तस्मिन् युवराजे स्थापिते यदा राजा कालगतो भवति तदा ते भटप्रभृतयस्तं युवराजं राजानमभिषिञ्चन्ति। **अभिषिक्ते** सति तस्मिन् सेवका उपस्थाप्य स्वं **स्वमायोगस्थानं** निवेदयन्ति। ततः सोऽभिषिक्तो नवको राजा यद् यस्य पूर्वमायोगस्थानं तत्तस्मै **अनुजानाति**। **अधिकं** च तेषां **भटादीनां दानं**- द्विपदादिदानं सुवर्णादिदानं च ददाति। एष दृष्टान्तः। अयमर्थोपनयः— विष्वग्भूते शरीरात् पृथग्भूते, मृते इत्यर्थः, **आचार्यो गच्छेऽपि तदनुरूपं** तृतीयराज्यार्हकुमारानुरूपमाचार्यं स्थापयति। इयमत्र भावना— आचार्येण द्रव्यापदादिषु शिष्याः परीक्षणीयाः। तत्र योऽशक्तिको भीरुः स राजप्रद्वेषादिषु समुत्पन्नेषु गणमपहाय नश्यतीति प्रथमकुमार इव गुरुपदस्यानर्हः। यः पुनरदाता सोऽदायकत्वेन सङ्ग्रहोपग्रहौ न करिष्यतीत्य-

योग्यः। यस्त्वभीरुतया शुनकस्थानीयान् प्रत्यनीकान्वारयति, दायकत्वेन च सङ्ग्रहोपग्रहौ करोति स योग्य इति गणधरपदे स्थापयितव्यः। तस्मिंश्च स्थापिते कालेन विष्वग्भूते आचार्ये साधवः कृतप्राञ्जलयस्तमुपतिष्ठन्ते, उपस्थाय च यो यस्य पूर्वं नियोग आसीत् स तं तस्मै नवकाचार्याय कथयति ॥ १९२४॥

एतदेवाह—

**दुविहेण संगहेणं, गच्छं संगिण्हए महाभागो ।**
**तो विण्णवेंति ते वी, तं चेव य ठाणयं अम्हं ॥ १९२५ ॥**

सोऽभिनवस्थापितो **महाभागो गच्छं द्विविधेन सङ्ग्रहेण** द्रव्यसङ्ग्रहेण भावसङ्ग्रहेण च, तत्र द्रव्यसङ्ग्रहेण वस्त्रपात्रादिना, भावसङ्ग्रहेण ज्ञानादिना, **सङ्गृह्णाति**। एवं सङ्गृह्णति तस्मिन् **ततस्तेऽपि** साधवः कृतप्राञ्जलयः तं **विज्ञपयन्ति,** यथा- **तदेव** स्वं स्वं **स्थानमस्माकं** प्रयच्छतेति ॥ १९२५॥

अथ किं किं तेषां स्थानम्? इति तत्स्थाननिरूपणार्थमाह—

**उवगरण बाल-वुड्ढा, खमग गिलाणे य धम्मकहि वादी।**
**गुरुचिंत वायणा पेसणासु कितिकम्मकरणे य॥ १९२६ ॥**

एको ब्रूते-अहम् **उपकरणत्ति** उपकरणोत्पादक आसम्। अन्यः—अहं **बाल-वृद्धानां** वैयावृत्त्यकरः। अपरः— **क्षपक**वैयावृत्त्यकरः। अन्यः— **ग्लाने** इति ग्लानवैयावृत्त्यकरः। परः— **धर्मकथी** धर्मकथाव्यापारनियुक्तः। अन्यः- **वादी** परवादिमथने नियुक्तः। **गुरुचिंत**त्ति अपरो ब्रूते—अहं गुरोर्यत्कर्त्तव्यं तत्र नियुक्तः। **वायण**त्ति अपरः-अहं वाचनाचार्यत्वे नियुक्तः। अन्यः— अहं **प्रेषणे** नियुक्तः। अपरो ब्रूते— अहं **कृतिकर्मकरणे** विश्रामणादौ नियुक्तः। एवं तैः स्वस्थाननिवेदने कृते तान् स्वस्मिन् स्थाने नियोजयति। स च नियोजयितुमिष्टे(मीष्यते) य एतेषु स्थानेषु पूर्वं व्यापृत आसीत् ॥१९२६॥

तथा चाह—

**एएसुं ठाणेसुं, जो आसि समुज्जओ अठविओ वि ।**
**ठविओ वि य न विसीयइ, स ठाविउमलं खलु परेसिं ॥ १९२७ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एतेषु** उपकरणादिषु कृतिकर्मकरणपर्यवसानेषु **स्थानेषु यः** पूर्व**मस्थापितोऽपि** गणधरपदे **समुद्यत आसीत्** स गणधरपदे **स्थापितोऽप्येतेषु** स्थानेषु **न विषीदति,** कृतकरणत्वात्। **स** इत्थम्भूत एतेषु स्थानेषु **परान्,** गाथायां षष्ठी द्वितीयार्थे प्राकृतत्वात् सम्बन्धे वा, यथा 'माषाणामश्नीयात्' इत्यत्र **स्थापयितुमलम्**॥ १९२७॥

**एवं ठितो ठवेइ, अप्पाण परस्स गोविसो गावो ।**
**अठितो न ठवेइ परं, न य तं ठवियं चिरं होइ ॥ १९२८ ॥**

**एवं** पूर्वं गणधरपदे अस्थापित एतेषूपकरणादिस्थानेषु **स्थितः** सन् **आत्मनः परस्य** चैतेषु स्थानेषु **स्थापयति** स्थापयिता भवति, **गोवृष** इव **गाः** स्वस्थाने। यः पुनः पूर्वमेतेषु स्थानेषु **अस्थितः** स **परम्** उपलक्षणमेतत्, आत्मानं च **न स्थापयति,** स्वयं तत्राव्यापृतत्वात् । **न च तत्स्थापितं चिरं भवति**। कस्मात्? इति चेत्, उच्यते—स यदाऽन्यानुपकरणादिष्वनुद्यच्छतः शिक्षयति, यथा— सति बले किं यूयं स्वशक्त्या नोद्यच्छथ? अनुद्यच्छन्तो हि वैयावृत्त्यफलाद् भ्रश्यथ। तदा ते चिन्तयेयुः— यदि वैयावृत्त्यफलमभविष्यत्ततस्त्वमप्येतेषु स्थानेषूद्यस्यथा इति।



For Private and Personal Use Only

अथवा वैयावृत्त्यफलं श्रद्दधाना अपि खग्गूडत्वेनैवं मन्येरन्— एवं जानन्तो यूयं किं पूर्वं नावर्तिध्वम्? इति ॥ १९२८॥

सम्प्रति 'गोवृष इव गाः' इति दृष्टान्तं भावयति—

**पउरतण-पाणियाइं, वणाइं रहियाइं खुड्डुजंतूहिं ।**
**नेइ विसो गोणीओ, जाणइ य उवट्ठुकालं च ॥ १९२९ ॥**

**वृषः** बलीवर्दो **गा वनानि प्रचुरतृण-पानीयानि** तथा **क्षुद्रजन्तुभिः** **क्षुद्रप्राणिभी रहितानि नयति, जानाति च उपस्थानकालम्** अभ्यागमनवेलाम्, ज्ञात्वा च स्वस्थानमानयति, एवमभिनवस्थापित आचार्यो गच्छं स्वस्वव्यापारे नियोजयन् परिपालयति ॥१९२९॥

अत्रैव दृष्टान्तान्तरमाह—

**जह गयकुलसंभूतो, गिरिकंदरविसमकडय-दुग्गेसु ।**
**परिवहति अपरितंतो, नियसरीरुग्गते दंते ॥ १९३० ॥**

**इय पवयणभत्तिगतो, साहम्मियवच्छलो असढभावो ।**
**परिवहइ साहुवग्गं, खेत्तविसमकालदुग्गेसु ॥ १९३१ ॥** दारं २॥

**यथा गजकुलसम्भूतः**, अनेन जात्यतामाह, **गिरिकन्दरेषु** गिरिगुहासु **विषमकटकेषु** विषमेषु गिरिपादेषु **दुर्गेषु च अपरित्रान्तो**ऽश्रान्तः सन् **निजशरीरोद्गतान् दंतान् परिवहति** ॥ १९३० ॥ **इति** अनेन गजदृष्टान्तप्रकारेण **प्रवचनभक्तिगतो** गच्छवाहकत्वं प्रवचनभक्तिं **मन्यमानः साधर्मिकवत्सलः** लिङ्ग-प्रवचनाभ्यां ये साधर्मिकास्तद्वात्सल्यपरायणः **अशठभावः** अमायावी विषमेषु **क्षेत्रेषु विषमेषु कालेषु** विषमेषु च दुर्भिक्ष-मार्याद्युपद्रवव्रातसङ्कुलेषु **दुर्गेषु** च **साधुवर्गं परिवहति** तस्य समीपे स्थातव्यम् ॥ १९३१ ॥

गतमसतीति द्वारम् इदानीमागमनद्वारमाह—

**जत्थ पविट्ठो जइ ते, सुज्जया होउ पच्छ हावेंति ।**
**सीसा आयरिओ वा, परिहाणी तत्थिमा होइ ॥ १९३२ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**यत्र** गच्छे सशिष्यपरिवारः **प्रविष्टः** सन् सूत्रार्थानामागमनं करोति तत्र **यदि ते** साधवः पूर्वं **सुष्ठु उद्यता भूत्वा पश्चात्**सामाचारीं **हापयन्ति**, आचार्यो वा पश्चात् परिहापयति। **तत्र परिहानिरियं** वक्ष्यमाणा भवति ज्ञातव्या॥ १९३२॥

तामेवाह--

**पडिलेह दियतुयट्टण, निक्खिव आयाण विणय सज्झाए ।**
**आलोग ठवण मंडलि, भासा गिहिमत्त सेज्जतरे ॥ १९३३ ॥**

**पडिलेह**त्ति उपकरणं न प्रत्युपेक्षन्ते। तथा अग्लाना मार्गपरिश्रमरहिताश्च **दिवा त्वग्वर्तनं** कुर्वन्ति, शेरते इत्यर्थः। **निक्खिव**त्ति दण्डादिकं निक्षिपन्तो न प्रत्युपक्षेन्ते, न परिमार्जयन्ति, दोषैर्वा दुष्टं प्रत्युपेक्षणं परिमार्जनं वा कुर्वते। **आयाण**त्ति दण्डादिकमाददान न प्रत्युपेक्षन्ते, न प्रमार्जयन्ति, दुष्प्रत्युपेक्षणं दुष्प्रमार्जनं वा कुर्वन्ति। **विनयं** कृतिकर्मलक्षणं वाचनादिषु न कुर्वन्ति। **सज्झाए**त्ति स्वाध्यायो वा न क्रियते, मण्डलीसामाचारीं वा न कुर्वन्ति। **आलोग**त्ति सङ्खडीं शरीरं वा प्रलोकन्ते, यदि वा **आलोचः** आलोचनां न कुर्वते, अनालोचितं भुञ्जते इत्यर्थः। **ठवण**त्ति स्थापनाकुलानि विशन्ति, स्थापितं वा गृह्णन्ति। **मंडलि**त्ति भोजनमण्डली-



For Private and Personal Use Only

सामाचारीं हापयन्ति। **भास**ति भाषायामसमिता भाषन्ते। ''एकग्रहणे तज्जातीयग्रहणम्' इति **न्यायात्** शेषास्वपि समितिष्वसमिताः। **गिहिमत्त**त्ति गृहिमात्रकेषु [1]पटलकादिष्वानीतं गृह्णन्ति। **सेज्जायरे**त्ति शय्यातरपिण्डं भुञ्जते ॥१९३३॥

**एमाई सीयंते वसभा, चोएंति चिट्ठति ठियम्मि ।**
**असती थेरागमणं, अच्छति ताहे पडिच्छंतो ॥ १९३४ ॥**

**एवमादिषु,** आदिशब्दादुद्गमादिपरिग्रहः, **सीदतः** साधून् गुरुं वा **वृषभाश्चोदयन्ति** शिक्षयन्ति। तत्र यदि चोदितः साधुवर्गो गुरुर्वा तिष्ठति ततस्तस्मिन् **स्थिते** सोऽपि सशिष्यपरिवार आगन्तुक**स्तिष्ठति**। **असती** इत्यादि, असन् शिक्षायाः पुनःप्रत्यावर्तनस्य वा अभावो यदि ततो यावत् पाक्षिके चातुर्मासिके संवत्सरे वा कुल**स्थविराणां** गणस्थविराणां सङ्घस्थविराणां वाऽऽ**गमनं** भवति **तावत्तान्प्रतीक्षमाण आस्ते**। तेषु च कुलादिस्थविरेषु समागतेषु निवेदयति तथाप्यतिष्ठत्सु ततो निर्गमनम् ॥१९३४॥

१. पटलिका० वा. पु. मु.॥

एतदेव व्याचिख्यासुः प्रथमतो वृषभचोदनं सप्रायश्चित्तमाह—

**गुरु-वसभ-गीयअगीते, अचोदेंते गुरुगमादि जा लहुओ ।**
**सारेइ सारवेइ व, खर-मउएहिं जहावत्थुं ॥ १९३५ ॥**

वृषभः प्रतिपन्नगच्छभारः स्वयं सारयति शिक्षयति, अथवा यो येनोपशाम्यति तं तेन सारापयति शिक्षापयति। कथम्? इत्याह- आचार्योपाध्याय-वृषभ-स्थविर-भिक्षुकाणां मध्ये **यथावस्तु** वस्त्वनतिक्रमेण **खरमृदुभिर्वचनैः सारयति सारापयति** वा । किमुक्तं भवति? यः खरेण साध्यस्तं खरेण खरण्टयति, मृदुसाध्यं मृदुभिर्वचनैः सारयति, अन्यथा प्रायश्चित्तम्। तदेव पूर्वार्धेन दर्शयति— **गुरु** इत्यादि, यदि वृषभः गुरुम् आचार्यमुपाध्यायं वा न प्रतिचोदयति तदा चतुर्गुरुकम्। **वृषभो** वृषभं न प्रतिचोदयति चतुर्लघु, वृषभो गीतार्थं शिष्यं न शिक्षयति मासगुरु, वृषभो भिक्षुम**गीतार्थं** न प्रतिचोदयति मासलघु । अक्षरयोजना त्वेवम्— गुरुवृषभगीतागीतान्न चोदयति। गुर्वादिचतुर्गुरुप्रभृति **यावदन्ते लघुको** मासः। अत्र पुनः सीदत्सु चत्वारो भङ्गाः॥ १९३५॥

तानेवाह—

**गच्छो गणी य सीयइ१, बिइए न गणी२ तइए न वि गच्छो३।**
**जत्थ गणी अवसीयति, सो पावतरो, न उण गच्छो ॥ १९३६ ॥**

**गच्छः सीदति गणी चे**ति प्रथमो भङ्गः१। गच्छः सीदति न गणी द्वितीयः २। न गच्छो सीदति किन्तु गणीति तृतीयः ३। न गच्छो नापि गणीति चतुर्थः ४। तथा चाऽऽह— **द्वितीये** भङ्गे **गणी न** सीदति, **तृतीये न गच्छः**। चतुर्थः सीदनमधिकृत्य शून्य इति नोपात्तः। तत्राऽऽद्येषु त्रिषु भङ्गकेषु मध्ये **यत्र** प्रथमे तृतीये वा **गणी [ अवसीदति ] स पापतरः।** यत्र **पुनर्गच्छः** सीदति न गणी **नासौ** द्वितीयः पापतरः ॥ १९३६ ॥

किं कारणम्? इति चेत्, अत आह—

**आयरिए जयमाणे, चोएउं जे सुहं हवइ गच्छो।**
**तम्मि उ विसीयमाणे, चोयणमियरे कहं गेण्हे ? ॥ १९३७ ॥**

**आचार्ये यतमाने** गच्छः **सुखेन चोदयितुं** शक्यमानो भवति, आचार्यस्य प्रतिभयात् ।

तस्मिन्नाचार्ये **पुनर्विषीदति चोदनां** शिक्षां **इतरे** साधवः **कथं गृह्णीयुः? नैव गृह्णीयु**रिति भावः, आचार्यप्रतिभयाभावात्। अतः प्रथम-तृतीयौ भङ्गौ पापतरौ, न द्वितीय इति॥ १९३७॥

**आसन्नठिएसु उ उज्जएसु जहति सहसा न तं गच्छं।**
**मा दूसेज्ज अदुट्ठे, दूरतरं वा पणासेज्जा ॥ १९३८ ॥**

यद्यपि नाम **आसन्ने** प्रत्यासन्ने प्रदेशे उद्यतविहारिणः स्थिता विद्यन्ते तथापि ते**ष्वासन्नस्थितेषू**द्यतेषु **सहसा न तं गच्छं जहाति** परित्यजति। किं कारणम्? इति चेद् अत आह— **मा अदुष्टान् दूषयेद्** गच्छः। किमुक्तं भवति ? -ये न विषीदन्ति तेऽपि सीदत्साधुसंसर्गतो मा विषीदेयुरिति, येऽपि सीदन्ति तेऽपि सीदत्साधुसंसर्गतो **दूरतरं** निर्गततरं **'प्रणश्येयुः'** विषीदेयुः ॥ १९३८॥

तदेवं वृषभचोदनं भाषितम् । इदानीं स्थविरागमनं भावयति—

**कुलथेरादी आगम, चोयणया जेसु विप्पमायंति।**
**चोदियठितेसु ठाणं, अठिएसु य निग्गमो भणितो ॥ १९३९ ॥** दारं ३

वृषभशिक्षायाः प्रत्यावर्तनस्य वा अभावे पाक्षिके चातुर्मासिके सांवत्सरिके वा यावत् **कुलस्थविराणां** गणस्थविराणां सङ्घस्थविराणां वा **आगम**स्तावत् प्रतीक्षते। **कुलस्थविरादीनां चागमे** तेषां निवेदना क्रियते। ततस्ते स्थविरा **येषु** स्थानेषु ये **विप्रमाद्यन्ति तेषु स्थानेषु** तान् प्रति**चोदयन्ति**। ते च प्रतिचोदिता यदि स्थितास्ततस्तेषु **चोदितस्थितेषु** सत्सु स सशिष्यपरिवारस्तत्रैव **स्थानं** करोति । स्थितेन च तेन द्विविधाऽपि शिक्षा शिक्षणीया। अथ ते चोदिताः सन्तो न स्थितास्ततस्ते**ष्वस्थितेषु** ततो गच्छा**न्निर्गमो भणित**स्तीर्थकर-गणधरैः ॥ १९३९ ॥

गतमागमनद्वारम्, पतितं निर्गमद्वारम्, अतस्तदेव भावयति—

**कप्पसमत्ते विहरइ, असमत्ते जत्थ हुंति आसन्ना ।**
**साहम्मि तहिं गच्छे, असतीए ताहे दूरं पि ॥ १९४० ॥**

यदि **आचारप्रकल्पः** सूत्रतोऽर्थतश्च समाप्तो भवति ततस्तस्मिन् **कल्पे** आचारप्रकल्पे **समाप्ते** स्वयं यथाविहारक्रमं **विहरति** । अथ नाद्यापि समाप्त आचारप्रकल्पस्तर्हि तस्मि**न्नसमाप्ते यत्र** यस्यां दिशि **आसन्नाः** अनन्तरक्षेत्रवर्तिनः **साधर्मिकाः** संविग्नसाम्भोगिकाः **भवन्ति**

**तत्र गच्छेत्** । अथाऽऽसन्ना न विद्यन्ते तत आसन्नाना**मसत्य**भावे **दूरमपि** गच्छेत् ॥ १९४० ॥

कथं गच्छेत्? अत आह—

**वइयादीए दोसे, असंविग्गे या वि सो परिहरंतो।**
**के उ असंविग्गा खलु?, निययादीया मुणेयव्वा ॥ १९४१ ॥**

**व्रजिकादीन् दोषान्** व्रजिका गोकुलम् आदिशब्दात् स्वमाता-पितृपूर्वपरिचित-पश्चात्परिचितकुलपरिग्रहः, तान् दोषान्। इह व्रजिकादयः प्रतिबन्धदोषहेतुत्वाद् दोषा इत्युक्ताः। तथा**ऽसंविग्नांश्चापि स परिहरन्** गच्छेत्। अथ **के ए[illegible]संविग्नाः**? सूरिराह—**नित्यादयः** नित्यवास्यादयस्ते **ज्ञातव्याः** ॥ १९४१ ॥

तेषामपरिहरणे प्रवेशादौ प्रायश्चित्तविधिमाह—

**निइयादीए अहछंदवज्जिए पविस दाणगहणे य ।**
**लहुगा भुंजण गुरुगा, संघाडे मासो जं चऽण्णं ॥ १९४२ ॥**

इह मार्गे गच्छता अपान्तराले संविग्नसुमनोज्ञानां वसतौ वस्तव्यम् । तदभावे नैत्यिकादीनां संविग्नानां वा अमनोज्ञानां निवेद्यान्यस्यां वसतौ स्थातव्यम्। यदि पुनः नैत्यिको नित्यवासी, आदिशब्दात्पार्श्वस्थादिपरिग्रहः। तस्मिन् **नैत्यादिके यथाच्छन्दवर्जिते** प्रविशति, यदि वा तेभ्यः किमपि भक्तादिकं ददाति, अथवा तेभ्यो गृह्णाति तदा **प्रवेशने**[1] **दाने ग्रहणे च** प्रत्येकं चत्वारो **लघुकाः**। **भुंजणे गुरुगा** इति, अथ तैः सह भुङ्क्ते तदा भोजने चत्वारो गुरुकाः। अथ नैत्यिकादिसङ्घाटं याचित्वा तेन सह हिण्डते ततः **सङ्घाटेन** हिण्डने लघुको **मासः**। **जं चऽण्ण**मिति, यच्च तेन सङ्घाटकेन हिण्डमानोऽकल्पिकग्रहणतस्तदास्वादनेन लाम्पट्यतः सेविष्यते तदपि च प्रायश्चित्तं प्राप्नोति ॥ १९४२॥



तदेवं यथाच्छन्दवर्जिते नैत्यिकादौ प्रवेशादिषु प्रायश्चित्तमुक्तम्। अधुना यथाच्छन्दे तदाह—

**एए चेव य गुरुगा, पच्छित्ता होंति ऊ अहाच्छंदे ।**
**अमणुण्णेसुं मासो, संभुंजणे होंति चउगुरुगा ॥ १९४३ ॥** दारं ४।

**एतान्येव प्रायश्चित्तानि यथाच्छन्दे गुरुकानि भवन्ति**। तद्यथा—प्रवेशे दाने ग्रहणे भोजने

१. °शने ग्रहणे दाने च प्र° वा. मो. पु. सं.॥

च प्रत्येकं चत्वारो गुरुकाः, सङ्घाटे गुरुको मासः, अथा**मनोज्ञेषु** [अ]संविग्नेषु प्रविशति तदा प्रवेशे दाने ग्रहणे च प्रत्येकं लघुको **मासः**। अथ तैः **सह भुङ्क्ते** तदा **चत्वारो गुरुकाः**। सङ्घाटे लघुको मासः। यत एवमसंविग्नेषु प्रायश्चित्तानि तस्मादेतान् परिहरेत्। अथ मार्गे संविग्ना न सन्ति ततः कारणवशतोऽसंविग्नेष्वपि गन्तव्यम् ॥ १९४३ ॥

पतितमिदानीमसंविग्नद्वारम्। तेषु च गत्वा यत्कर्तव्यं तदाह—

**संविग्गेगंतरिया, पडिच्छ संघाडए असति एगो ।**

**साहम्मिएसु जयणा, तिण्णिदिण पडिच्छ सज्झाए, ॥१९४४॥** दारं ५।

संविग्नेन- संविग्नगुणेनैकेनान्तरिताः- व्यवहिताः **संविग्नैकान्तरिता** असंविग्नाः, तेषु कारणवशतो गन्तव्यम्, तत्र च भिक्षां निवसनं च कुर्वतो यथा प्रथमोद्देशके पारिहारिकस्य यतनोक्ता तथाऽस्यापि द्रष्टव्या, तैरपि असंविग्नैर्यदि स एकाकी तत एकाकिनः सतस्तस्य सङ्घाटको दातव्यः। अथ योऽसौ द्वितीयको योग्यो दातव्यः सोऽन्यत्र प्रेषणेन गतो वर्तते ततस्ते ब्रूयुः-आर्य! एकरात्रं वा द्विरात्रं वा **प्रतीक्षणीयम्**। तत एतेन कारणेनोत्कर्षतः त्रिरात्रमपि प्रतीक्षते। **असति सङ्घाटके एकः** एकाकी व्रजेत्। तस्य च तथाव्रजतोऽपान्तराले

यदि साधर्मिका भवन्ति ततस्तंन्मध्ये गत्वा वस्तव्यं कारणं च निवेदनीयम्। निवेदिते कारणे तैः सङ्घाटको दातव्यः, तदभावे ततो व्रजनीयम्। अथ प्रतिपृच्छानिमित्तमेकं द्वि त्रीणि वा दिनानि यावत् प्रतीक्षापयेत्तत आह— **स्वाध्याये** स्वाध्यायनिमित्तम्, प्रतिपृच्छानिमित्तमित्यर्थः, उत्कर्षतस्**त्रीणि दिनानि प्रतीक्षेत**। एषा **साधर्मिकेषु यतना** ॥१९४४॥

तदेवमसंविग्नद्वारमुक्तम्। इदानीं निवेदनाद्वारमाह—

**बहि गाम घरे सन्नी, सो वा सागारिओ बहिं अंतो ।**
**ठाण-निसेज्ज-तुयट्टण, गहिया-ऽगहिएण जागरणा ॥ १९४५॥** दारगाहा।

**संविग्नसमनोज्ञानामभावे **ग्रामस्य बहिर्**नैत्यिकादीनां निवेद्य तिष्ठति। ग्रामस्य बहिः प्रत्यपायसम्भवे ग्रामस्यान्तः शून्य**गृहे**, तत्रापि निवेदना कर्तव्या। शून्यगृहस्याप्यभावे **संज्ञी** श्रावकस्तस्य गृहे वस्तव्यम्। **स** वा संज्ञी श्रावकः **सागारिकः** अगारीसहितः स्यात्तर्हि तस्य गृहस्य **बहिरन्त**र्वा या कुटी तत्र वस्तव्यम्। तस्या अप्यभावे अमनोज्ञेषु संविग्नेषु वस्तव्यम्। तेषामप्यभावे नैत्यिकादिष्वसंविग्नेषु वसति। तत्रेयं यतना— **स्थानम्** ऊर्ध्वस्थानं **निषद्या** उपवेशनं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**त्वग्वर्तनं** दीर्घकायप्रसारणं तेषु **गृहीतेनागृहीतेन** वा उपकरणेन **जागरणं** कर्तव्यम्। एष द्वारगाथासङ्क्षेपार्थः ॥ १९४५ ॥

**व्यासार्थं** त्वभिधित्सुः प्रथमतो बहिर्ग्रामेति व्याख्यानयति—

**वसही समणुण्णाऽसइ, गामबहिं ठाइ सो निवेदेउं ।**
**अनिवेदियम्मि लहुओ, आणाइविराहणा चेव ॥ १९४६ ॥**

**समनोग्नानां** संविग्नानां **वसतेः असति** अभावे **ग्रामबहिस्तिष्ठति**[1], न पुनर्नैत्यिकादिष्व-संविग्नेषु प्रवेष्टव्यम्, प्रागुक्तप्रायश्चित्तभावात्। **स** च बहिस्तिष्ठति तेषां नैत्यिकादीनां वा संविग्नानां वा अमनोज्ञानां **निवेद्य** कथयित्वा। यदि पुनर्न निवदयति ततो**ऽनिवेदिते** प्रायश्चित्तं **लघुको** मासः, **आज्ञादिविराधनाश्च** दोषाः आज्ञाविराधना, आदिग्रहणादात्मविराधना संयमविराधना च परिगृह्यते। तथाहीयं भगवदाज्ञा— तेषां निवेद्य बहिर्वस्तव्यमनिवेदनायामाज्ञालोपः ॥ १९४६ ॥

आत्मविराधनां संयमविराधनां चाऽऽह—

१. ग्रामाद् बहि॰ वा. मो. पु. सं. मु.॥



For Private and Personal Use Only

**गेलण्णे न काहिंती, कोहेणं जं च पाविहिती तत्थ।**
**तम्हा उ निवेएज्जा, जयणाए तेसिमाए उ ॥ १९४७ ॥**

अनिवेदने सति स कदाचित् ग्लानो जायते। **ग्लान्ये** सति 'नास्माकं किमपि तेन निवेदितम्' इति **क्रोधेन न** किमपि ग्लानकृत्यं **करिष्यन्ति** । गृहस्थाश्च तं तथाभूतं ग्लानं दृष्ट्वा तेषां नैत्यिकादीनां निवेदयेयुः यथा— युष्मदीयो ग्लानोऽसङ्ग्राहको वर्तते । ततस्ते ब्रूयुर्मन्येरन् वा— एषोऽस्मदीयो न भवति, यदि भवे[1]त्तर्ह्यस्माकमुपाश्रयेऽतिगच्छेद्, निवेदयेद्वा। एवं **यत्र** ग्लानत्वे अग्लानत्वे वा आरक्षकादिग्रहणं **तत्र यदनर्थं प्राप्स्यति** संयमविराधनात्मकमात्मविराधनात्मकं वा तत्सर्वमनिवेदनानिमित्तम्। **तस्मात्तेषामनया** वक्ष्यमाणया **यतनया निवेदयेत्**॥ १९४७॥

तामेव यतनामाह—

**तुब्भं पिहेसि दारं, उस्सूरोत्ति य जुताए एवं तु ।**
**न य नज्जइ सत्थो वी, चलिहिइं किं केत्तियं वेलं? ॥ १९४८ ॥**

---

१. ०त् तदा ह्यस्माकमुपाश्रये तिष्ठेद् निवे० वा. मो. पु. सं. ॥

यदाऽहमागतस्तदा **युष्माक**मुपाश्रयद्वारम् **पिहित**मासीत्, तत **एवं** मया विकल्पितम्— **उत्सूरं** वर्तते इति **युतायां** पृथग्भूतायां वसतावुषितः, अपि च न **ज्ञायते सार्थोऽपि किं कियतीं वेलां**, सप्तम्यर्थे व्याप्तौ द्वितीया, कस्यां वेलायां **चलिष्यति**? ततः पृथगुपाश्रये स्थितः ॥ १९४८ ॥

अथ सवेलायामागतस्तत एवं वदेत्—

**साहुसगासे वसिउं, अतिप्पियं मज्झ किं करेमि? त्ति ।**
**सत्थवसोऽहं भंते! गोसे मे वहेज्जह उदंतं ॥ १९४९ ॥**

**साधुसकाशे** साधुसमीपे च **वस्तुं ममातिप्रियम्** परं **भदन्त! सार्थवशोऽहं** ततः **किं करोमि?** तस्माद् **गोसे** प्रभाते **मे उदन्तं** वार्ता **वहत** ॥ १९४९ ॥

**एवं न उ दूर वसे, अह बाहिं होज्ज पच्चवाया उ ।**
**ताहे सुण्णघरादिसु, वसति निवेदित्तु तह चेव ॥ १९५० ॥**

**एवम्** अनया यतनया निवेद्य **न** तु नैव ग्रामाद् बहिर्दूरं **वसेत्,** किन्तु ग्रामस्य समीपे वसेद्। **अथ** च **बहिः** स्तेनादिकृताः **प्रत्यपायाः** अनर्था **भवेयुस्ततः तथैव** पूर्वोक्तप्रकारेणैव **निवेद्य शून्यगृहादिषु वसति,** आदिशब्दात् श्रावकगृहादिपरिग्रहः ॥ १९५० ॥

एतदेव भावयति—

**अहुणुव्वासिय सकवाड निब्बिले निच्चले वसति सुण्णे ।**
**तस्सासइ सण्णिघरे, इत्थीरहिते वसेज्जा वा ॥ १९५१ ॥**

अधुना- साम्प्रतमुद्वासित**मधुनोद्वासितम्। सकपाटं**- कपाटसहितम्, अन्यथा स्तेनादिप्रवेशसम्भवात्। **निर्बिलं**-बिलरहितम्, अन्यथा सर्पादिसम्भवात्। **निश्चलं**-न जराजीर्णतया पतितुं प्रवृत्तम्। अमीषां च चतुर्णां पदानां षोडशभङ्गाः, [१]तेषु प्रथमो भङ्गः शुद्धः, शेषा अशुद्धाः। तत आह- इत्थम्भूते **शून्ये** शून्यगृहे **वसति। तस्य** शून्यगृहस्य **असति** अभावे **संज्ञिगृहे** श्रावकगृहे। सोऽपि श्रावको द्विधा सम्भवति- सस्त्रीकः स्त्रीरहितो वा । तत्र **स्त्रीरहिते वसेत्** ॥१९५१ ॥

गाथा १९४७-१९५३ मार्गे यतना

---

**१. तत्र प्र॰ वा. मो. पु. मु. सं. ॥**



For Private and Personal Use Only

**सहिए वा अंतो बहि, अंतो [ वा ] वीसु घरकुडीए वा ।**
**तस्सासति निइयादिसु, वसेज्ज उ इमाए जयणाए ॥ १९५२ ॥**

स्त्रीरहितस्य श्रावकगृहस्याभावे **सहिते वा** स्त्रीसहिते वा श्रावकगृहे। तस्य गृहस्या**न्तर्बहिर्वा विविक्ते** प्रदेशे वसेत्, अन्यथा प्रायश्चित्तं चतुर्गरु। तस्याप्यभावे तस्य श्रावकगृहस्य बहिः पुरतः पृष्ठतः पार्श्वतो वा यदि वाऽन्त**र्गृह**स्य **कुटी** समस्ति[ततः]तस्यां **वसेत्**। तस्यापि कुटीरकस्यासत्यभावे **नैत्यिकादिषु,** आदिशब्दात् पार्श्वस्थादिपरिग्रहः, **अनया** वक्ष्यमाणया **यतनया वसेत्**। एतावता मूलद्वारगाथोपन्यस्तं निवेदनाद्वारमगमत्। यतनाद्वारमापतितम् ॥१९५२॥

इदानीं तामेव यतनामाह—

**निइयादि उवहि भत्ते, सेज्जा सुद्धा य उत्तरे मूले ।**
**संजइरहिए काले, अकाले सज्झायऽभिक्खं च ॥ १९५३ ॥**

ये **नैत्यिकादय उपधौ भक्ते शय्यायां च उत्तरगुणैर्मूलगुणैर्वा शुद्धाः**। किमुक्तं भवति? ये उत्तरगुणैर्मूलगुणैर्वा शुद्धां शय्यां गवेषयन्ति शुद्धं भक्तं शुद्धमुपधिं, तेषु वसेत्। तत्रापि

**संयतीरहिते,** तदभावे संयतीसहितेऽपि। ताश्च संयत्यो द्विधा— **काल**चारिण्यो**ऽकाल**चारिण्यश्च। तत्र याः पाक्षिकादिष्वागच्छन्ति ताः कालचारिण्यः, तद्व्यतिरेकेणागच्छन्त्योऽकालचारिण्यः। ता अप्यकालचारिण्यः **स्वाध्याय**निमित्तम**भीक्ष्णं** चशब्दाद् भक्तपानं दातुं ग्रहीतुं वा कन्दर्पार्थं वा। तत्राकालचारिणीषु बहवो दोषाः, कालचारिणीष्वल्पतरा इति। संयतीरहिताभावे कालचारिणीभिः संयतीभिः सहिते वस्तव्यम् ॥ १९५३॥

एतदेव सप्रपञ्चमभिधातुकाम आह—

**सिज्जुवहि-भत्तसुद्धे, संजइरहिए य भंगसोलस उ ।**
**संजइअकालचारिणी-सहिए बहुदोसला वसही ॥ १९५४ ॥**

**शय्याशुद्ध उपधिशुद्धो भक्तशुद्धः संयतीरहित** इति चतुर्षु पदेषु सप्रतिपक्षेषु **भङ्गाः षोडश**। तद्यथा शय्याशुद्धः उपधिशुद्धः भक्तशुद्धः संयतीरहित इति प्रथमः। शय्याशुद्धः उपधिशुद्धो भक्तशुद्धः संयतीसहित इति द्वितीयः इत्यादि। प्रस्तारश्च अयम्—

एतेषु च षोडशसु भङ्गेषु मध्ये यत्र यत्र संयत्यस्तत्र तत्र कालचारिणीभिः संयतीभिः सहिते संयतैः वस्तव्यम्, नाकालचारिणीभिः। यत आह- **संयतीभिरकालचारिणीभिः**

| स्थापना | | | | |
|---|---|---|---|---|
| | ।।।। | ।ऽ।। | ऽ।।। | ऽऽ।। |
| | ।।।ऽ | ।ऽ।ऽ | ऽ।।ऽ | ऽऽ।ऽ |
| | ।।ऽ। | ।ऽऽ। | ऽ।ऽ। | ऽऽऽ। |
| | ।।ऽऽ | ।ऽऽऽ | ऽ।ऽऽ | ऽऽऽऽ |

**सहिते बहुदोषला** बहुदोषा **वसतिरिति**। आह-पूर्वमुपधि-भक्त-शय्याशुद्धा इत्युक्तम्, इदानीं भङ्गचिन्तायां प्रथमतः शय्योपात्ता । तत्र किं कारणम्? अत आह—

गाथा १९५४-१९५८ मार्गे वसन-सामाचारी

**सागारि तेणा हिम-वासदोसा, दुस्सोहिया तत्थ उ होइ सेज्जा ।**
**वत्थन्नपाणाणि व तत्थ ठिच्चा, गेण्हंति जोग्गाणुवभुंजते वा॥ १९५५॥**

शय्यां विना मण्डल्यामुपविष्टायां सागारिकाः समापतन्ति, उपधिग्रहणाय **स्तेना** वा निपतन्ति, **हिम**प्रपाते वर्षप्रपाते वा संयमात्मविराधनादोषाः। तथा **तत्र** तेषु शय्योपधिभक्तेषु मध्ये **शय्या दुःशोधिता भवति,** आहारोपधयः शुद्धाः सुखेन लभ्यन्ते, महता कष्टेन पुनः



For Private and Personal Use Only

शुद्धा वसतिरिति भावः। तथा **तत्र** शय्यायां **स्थित्वा योग्यानि** कल्पनीयानि **वस्त्रान्नपानानि गृह्णन्त्युपभुञ्जते** च। एतैः कारणैर्भङ्गचिन्तायां प्रथमतः शय्या कृता ॥१९५५॥

तथा—

**आहारोवहि-सेज्जा, उत्तरमूले असुद्धसुद्धे य ।**
**अप्पतरदोसपुव्विं, असतीए महंतदोसे वि ॥ १९५६ ॥**

**आहारोपधि-शय्याभिः उत्तरगुणविषये मूलगुणविषये** वा **अशुद्धः शुद्ध** इति भङ्गचिन्तायां ये षोडशभङ्गाः प्रागुक्ताः, तेषु मध्ये **पूर्वमल्पतरदोषे** वस्तव्यम् । तस्य **असति** अभावे **महादोषेऽपि** ॥१९५६॥

अथ कस्मिन् भङ्गे अल्पतरा दोषाः? इति अत आह—

**पढमासति बिइयम्मि वि, तहियं पुण ठाइ कालचारिसु ।**
**एमेव सेसएसु वि, उक्कमकरणं पि पूएमो ॥ १९५७ ॥**

सर्वेषां भङ्गानां मध्ये प्रथमभङ्गे सर्वाल्पतरा दोषा इति तत्र वस्तव्यम्। **प्रथमस्यासति**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभावे **द्वितीयेऽपि। तत्र पुनस्तिष्ठति कालचारिणीषु** संयतीषु। **एवमेव शेषेष्वपि** भङ्गेषु वसति। किमुक्तं भवति? येष्वप्यन्येषु भङ्गेषु संयतीसहित इति पदं तेष्वपि कालचारिणीभिः संयतीभिः सहितेषु वस्तव्यम्, नाकालचारिणीभिरिति । तथा **उत्क्रमकरणमपि** अकाल-चारिणीभिः सहितत्वमपि **पूजयामः** उपादेयतया प्रशंसयामः। कथम्? इति चेत्, उच्यते, यस्मिन् भङ्गे शय्या-भक्तोपधयः समुदिता भङ्गत एक-द्विका वा[१]ऽशुद्धास्तत्र यद्यकालचारिण्यो भक्तं पानं वा दत्त्वा गृहीत्वा वा तत्क्षणमेव व्रजन्ति, न पुनरागच्छन्ति, स्वाध्यायं वा कृत्वा स्वकाले गच्छन्ति तत्र स्थातव्यम्, प्रायो दोषाभावादिति॥ १९५७ ॥

एतदेव स्पष्टतरमाह—

**सेज्जं सोहे१ उवहिं२, भत्तं सोहेइ३ संजतीरहितीं४ ।**
**पढमो बितिओ संजइ-सहिं[२]ओ पुण कालचारिणितो ॥ १९५८ ॥**

**शय्यां** शोधयति **उपधिं** शोधयति **भक्तं शोधयति संयतीरहित**श्चेति **प्रथमो** भङ्गः।

१. वा. शुद्धा- पु. प्रे.॥ २. ला.। सहितो तातो पुण-पु. प्रे.॥



For Private and Personal Use Only

**द्वितीयः संयतीसहितः, ताः पुनः** संयत्यः **कालचारिण्यो** यदि स्युस्तदा वस्तव्यम्। एवं शेषेष्वपि संयतीसहितेषु भङ्गेषु भावनीयम् ॥ १९५८॥

अथाकालचारिण्यः कथं स्युः? इत्यत आह—

**आयाणे कंदप्पे, वियाल ओरालियं वसंतीणं ।**
**निययादी छद्दसहा, संजोए मोत्तऽहाछंदे ॥ १९५९ ॥**

भक्त-पानादीना**मादाने,** उपलक्षणमेतत्, दाने च, तथा **कन्दर्पे** कन्दर्पनिमित्तम्, कन्दर्प-ग्रहणमुपलक्षणम्, स्वाध्यायनिमित्तं च **विकाले ओरालिकं** अतिशयेन स्फारप्रभूतवेलामिति यावत्, **वसन्तीनां** संयतीनामकालचारिणीत्वं द्रष्टव्यम्। एवं **नैत्यिकादी**नां यः **षड्दशधा** षोडशप्रकारः **संयोगः** तत्र वस्तव्यम्। किं सर्वत्र? न इत्याह- **मुक्त्वा यथाच्छन्दान्**। किमुक्तं भवति? तेषु सत्सु यथाच्छन्देषु न वस्तव्यम्, तदभावे तत्रापि वसेत् ॥ १९५९॥

सम्प्रत्येतेषु नैत्यिकादिषु संवासमधिकृत्य यतनामाह—



For Private and Personal Use Only

**ठिय निसिय तुयट्टे वा, गहिया-ऽगहिए य जग्ग सुवणं वा ।**
**पासत्थादीणेवं, निइए मोत्तुं अपरिभुत्ते ॥ १९६० ॥**

**पार्श्वस्थादीनाम्** उपाश्रयेषु **गहिय**त्ति गृहीतोपकरणः **स्थित** उर्ध्वं स्थितो वसेत्, यद्येवं स्थातुं न शक्नोति ततो गृहीतोपकरणः एव **निषद्यो**पगतो जाग्रत्तिष्ठेत्। तथाप्यशक्नुवन् गृहीतोपकरणः **त्वग्वृत्तो** जाग्रदवतिष्ठेत। अथ त्रिष्वप्येतेषु यदि कथमपि प्रचलाया आशङ्का, तदा 'मा पात्रादिभङ्गः स्याद्' इत्युपकरणं पार्श्वे निक्षिप्यागृहीतोपकरणो यथासमाधि स्थितो निषण्णस्त्वग्वृत्तो वा **जाग्रत्तिष्ठेत्**। अथ जागरणं कर्तुं न शक्नोति तत आह— **स्वपन् वा गृहीतो**पकरणो**ऽगृहीतो**पकरणो वा यथासमाधि कुर्यात्। **एवं** यतना **पार्श्वस्थादीना**मुपाश्रयेषु द्रष्टव्या। **नैत्यिके** नित्यवास्युपाश्रये नित्यवासिपरिभुक्तान् प्रदेशान् **मुक्त्वा अपरिभुक्ते** प्रदेशे उपकरणं निक्षिप्य यथासमाधि जाग्रत् स्वपन् वा वसेत् ॥१९६०॥

**एमेव अहाछंदे, पडिहणणा झाण अज्झयण कण्णा ।**
**ठाणठितो वि निसामे, सुण आहरणं च गहिएणं ॥ १९६१ ॥**

**एवमेव** पार्श्वस्थादिगतेनैव प्रकारेण **यथाच्छन्दे**ऽपि यतना कर्तव्या। नवरम्— यदि

शक्तिरस्ति तर्हि तस्य **प्रतिहननं** कर्तव्यं यथा स स्वग्राहं मुञ्चति। अथ न विद्यते तादृशी शक्तिस्तर्हि **ध्यानं** तथा ध्यायति यथा तद्वचो न शृणोति। यदि वा **अज्झयणत्ति** यथाच्छन्दप्रज्ञापनाप्रवणमध्ययनं परावर्तयति यथा स ब्रूते-मा मां नाशयेति। **कण्णत्ति** तस्य यथास्वच्छन्दं देशनां कुर्वतः कर्णौ निजौ स्थगयति येन देशनां न शृणोति, दूरतरं वा तिष्ठति। अथ दूरतर**स्थानस्थितोऽपि** तद्देशनां **निशमयति,** न च निद्रा समागच्छति, ततः स यथाच्छन्दो वक्तव्यः, यथा- **शृणु** किमपि **आहरणम्**। ततो यत्तस्यापूर्वं तदाहरणं कथनीयम्। **गहिएणंति** गृहीतेनाऽऽत्मीयोपकरणेन ॥ १९६१॥

एतदेव युक्त्या द्रढयति—

**जह कारणेऽतिगमणं, दिट्ठं एमेव सेसगा चउरो ।**
**ओमे असंथरंते, आयारे वइयमादीहिं ॥ १९६२॥**

**यथा कारणे** कारणवशतः **अतिगमनं** निर्गमनं **दृष्टम्, एवमेव** तथा कारणवशतः **शेषाणि** अपि **चत्वारि** द्वाराण्यसंविग्ने निवेदना यतना इत्येवमादीनि दृष्टानि तथा च **आचारे**

आचारप्रकल्पे **अवमे** दुर्भिक्षे **व्रजिकादिभि**रपि, आदिशब्दात्स्वज्ञात्यमनोज्ञासंविग्नपरिग्रहः, व्रजेदित्युक्तम्, अतः सोपपत्तिकेयं यतनेति सम्यक् श्रद्धेया ॥ १९६२ ॥

गतं यतनाद्वारम् ७। अधुना निसृष्टद्वारमाह—

**समणुण्णेसु वि वासो, एगनिसिं किमुत अण्णमोसण्णे ?।** दारं ८।
**असढो पुण जयणाए, अच्छेज्ज चिरंपि उ इमेहिं ॥ १९६३ ॥**

**समनोज्ञेष्वपि** अपान्तराले वास उत्सर्गत **एकां निशां** एकां रात्रिं कल्पते, **किमुत किं पुनः अन्येषु** असाम्भोगिकेषु **अवसन्नेषु** ?। उपलक्षणमेतत्, पार्श्वस्थादिषु वा? तत्र सुतरामेकरात्र्यधिकं न कल्पते। कारणवशतः पुनरुत्कर्षतस्त्रीणि दिनानि **वसेत्** ८। गतं निसृष्टद्वारम्, इदानीं 'दीहखद्धं पडिच्छंति'[गा.१९०५] इत्येतद्व्याख्यानार्थमाह— **असढो** इत्यादि, अशठः **पुनः** न केवलमुत्कर्षतस्त्रीणि दिनानि किन्तु **चिरमपि** प्रभूतकालमपि **एभिः** वक्ष्यमाणैः कारणै**र्यतनया तिष्ठेत्** ॥ १९६३ ॥

तान्येव कारणान्याह·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वासं खंधार नदी, तेणा सावय वसेण सत्थस्स ।**
**एएहिं कारणेहिं, अजयण जयणा य नायव्वा ॥ १९६४ ॥** दारं ९।

**वर्षं** पतति१ **स्कन्धावारः** कटकं तद्वा चलति २ **नदी** गिरिणदी पूर्णा वर्तते ३ **स्तेना** वा अपान्तराले द्विविधाः शरीरापहारिण उपकरणापहारिणश्च[1] ४ **श्वापदाः** सिंहादयः ५ **सार्थस्य** वा **वशेन** गच्छति सार्थश्च चिरमपि तिष्ठन् वर्तते, **एतैः कारणैः** चिरमप्यपान्तराले तिष्ठति। तत्र[2] **अयतना यतना च ज्ञातव्या**। तत्र यदि यतना कृता तदा न प्रायश्चित्तविषयः अथायतनामाचरितवान् तदा प्रायश्चित्ते लगति ९॥ १९६४॥

उक्तः शुद्धस्याशुद्धगमनमिति द्वितीयो भङ्गः। सम्प्रति तृतीय-चतुर्थभङ्गावाह—

**दोसा उ ततियभंगे, गाणंगणिया य गच्छभेदो य ।**
**सुयहाणी कायवहो, दोण्णि वि दोसा भवे चरिमे ॥ १९६५॥**

१. वा. मो. पु. सं.। उपध्यप० पु. प्रे.॥ २. तत्रायतना कर्तव्या- मो.॥ तत्रायतना यतना च कर्तव्या- सं.॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**दोषौ** द्वौ **तृतीयभङ्गे**, अशुद्धस्य शुद्धगमनमित्येवंलक्षणे, तद्यथा-**गाणङ्गणिकता** गणे गणे प्रविशतीत्येवं प्रवादलक्षणा। तथा **गच्छभेद**श्च। तथाहि— तस्मिन् निर्गच्छत्यन्येऽप्येवमेव निर्गच्छन्ति, ततो जायते गणविनाशः। चरमेऽपि 'अशुद्धस्याशुद्धगमन' मित्येवंरूपे भङ्गे **द्वौ दोषौ**। अपिशब्दः भिन्नक्रमः, स च यथास्थानं योजितः। **श्रुतहानिः कायवध**श्च निष्कारणं दोषबहुलतया वा निर्गमने ह्यन्यत्रापि नावकाश इति श्रुतहानिः, मार्गे च गमनतो ग्लानत्वादि-भावतो वा कायवधः ॥१९६५॥

तदेवं भावितमृतुबद्धविषयं सूत्रम्। सम्प्रति वर्षावासविषयं सूत्रमाह—

सूत्र १२ गाथा १९६४-१९६७ चातुर्मासे उपसम्प-दनविधिः

**सूत्रम्— वासावासे पज्जोसविए भिक्खू जं पुरओ कट्टु विहरइ आहच्च वीसुंभेज्जा, [१]अत्थि या इत्थ अन्ने केइ उवसंपज्जणारिहे, से उवसंपज्जियव्वे, नत्थि या इत्थ अन्ने केइ उवसंपज्जणारिहे, तस्स अप्पणो कप्पाए असमत्ते कप्पइ से एगराइयाण पडिमाए जण्णं जण्णं दिसं अन्ने साहम्मिया विहरन्ति तण्णं तण्णं दिसं उवलित्तए । नो से कप्पइ तत्थ विहारवत्तियं वत्थए, कप्पइ से तत्थ कारणवत्तियं वत्थए । तंसि च णं**

१. अत्थि या इंथ सेसं तं चेव जाव छेए वा परिहारे वा- इति प्रतिलिपि पाठः॥



For Private and Personal Use Only

**कारणंसि निट्ठियंसि परो वएज्जा वसाहि अज्जो! एगरायं वा दुरायं वा एवं से कप्पइ एगरायं वा दुरायं वा वत्थए, नो से कप्पइ परं एगरायाओ वा दुरायाओ वा वत्थए। जं तत्थ परं एगरायाओ वा दुरायाओ वसइ, से सन्तरा छेए वा परिहारे वा ॥१२॥**

"वासावासे पज्जोसविए भिक्खू जं पुरतो कट्टु विहरति" इत्यादि, **वर्षावासे पर्युषिते भिक्षुर्यं पुरतः कृत्वा विहरति** आस्ते स कदाचिद् **विष्वग् भवेत्** शरीरात्पृथग्भवेत्, म्रियेत इत्यर्थः। **अस्ति चात्रान्यः कश्चिदुपसम्पदनार्हः स उपसम्पत्तव्यः। नास्ति** वा तत्रान्यः **कश्चिदुपसम्पदनार्हः** तर्हि स **आत्मनः कल्पेनाऽसमाप्त** इति **से** तस्य **कल्पते एकरात्रिक्या प्रतिमया** यत्र वसति तत्र एकरात्राभिग्रहेण **जण्णं जण्णं** इत्यादि, यस्यां यस्यां **दिशि अन्ये साधर्मिका विहरन्ति तां तां दिशमुपलातुम्। न** पुनः **से** तस्य **कल्पते, तत्रा**पान्तराले **विहारप्रत्ययं वस्तुम्। कल्पते से** तस्य **तत्र कारणप्रत्ययं** सङ्घाटादिकारणनिमित्तं **वस्तुम्। तस्मिंश्च कारणे निष्ठिते** यदि **परो वदेत्— वस आर्य ! एकरात्रं द्विरात्रं वा,** वाशब्दात् त्रिरात्रं वा, **एवं से** तस्य **कल्पते एकरात्रं वा द्विरात्रं** वा, वाशब्दात् त्रिरात्रं **वा वस्तुम्। नो से** तस्य **कल्पते एकरात्राद्** द्विरात्राद्वा **परं वस्तुम्** । **यत्तत्र एकरात्राद् वा द्विरात्राद्वा**

**परं वसति** तत्र **से** तस्य **स्वकृतादन्तरात् छेदः परिहारो वा** । अत्र **भाष्यप्रपञ्चः**-

**एमेव य वासासुं१ भिक्खे२ वसहीए३ संक४ नाणत्तं ।**
**एगाह चउत्थादी५ असती अण्णत्थ तत्थेव६ ॥ १९६६ ॥**

**एवमेव ऋतुबद्ध**विषयसूत्रगतेनैव प्रकारेण **वर्षा**सूत्रं भावनीयम् । नवरम्— **भिक्षायां वसतौ शङ्कायां** च **नानात्वम्**। तत्रान्यत्र गन्तव्यम् **एकाहेन चतुर्थेन, आदि**शब्दात् षष्ठेनाष्टमेन वा। असति **अन्यत्र** गमने **तत्रैव** वर्षारात्रः कर्तव्यः। एष द्वारगाथासङ्क्षेपार्थः ॥१९६६॥

साम्प्रतमेनामेव विवरीषुः प्रथमत एवं शब्दं व्याख्यानयति—

**अपरीमाणे पिहब्भावे, एगत्ते अवधारणे ।**
**एवंसद्दो उ एएसिं, एगत्ते उ इहं भवे ॥ १९६७ ॥**

एवं शब्दः **अपरीमाणे पृथग्भावे एकत्वेऽवधारणे**। तत्रापरीमाणे यथा— एवमन्येऽपीत्यादौ। पृथग्भावे- घटात् यथा पटः पृथग्, एवमाकाशास्तिकायाद्धर्मास्तिकायोऽपीति। एकत्वे— यथाऽयमेतद्गुण एवमेषोऽपि, अत्र ह्येवंशब्दस्तयोरेकरूपतामभिद्योतयति। अवधारणे

यथा— केनापि पृष्टम्—इदमित्थं भवति? इतरः प्राह— एवम् इत्थमेवेति भावः। एवम् **एवंशब्द एतेष्वर्थेषु** वर्तते। **इह पुनरेकत्वे भवति** वर्तते ॥१९६७॥

एकत्ववृत्तिमेव भावयति—

**एगत्तं उउबद्धे, जहेव गमणं तु भंगचउरो य ।**

**तह चेव य वासासुं, नवरि इमं तत्थ नाणत्तं ॥ १९६८ ॥** दारं १।

तथा **एकत्वम्** एवंशब्दप्रकाश्यमित्थम्— **यथा** ऋतुबद्धेऽन्यत्र गच्छान्तरे **गमनम्,** यथा च तत्र **भङ्गाश्चत्वारः** शुद्धस्य शुद्धगमनमित्येवमादयः **तथा चैव** तेनैव प्रकारेण [वर्षासु] गमनं भङ्गचतुष्टयं च ज्ञातव्यम् नवरं केवल**मिदं तत्र वर्षासु** भिक्षायां वसतौ शङ्कायां च **नानात्वम्** ॥१९६८॥

तत्र भिक्षामधिकृत्याह—

**पउरण्ण-पाण-गमणं, इहरा परिताव एसणाघातो ।**

**खेत्तस्स य संकमणे, गुरुगा लहुगा य आरुवणा ॥ १९६९ ॥** दारं २

यो गच्छः **प्रचुरान्न-पाने** स्थितः तत्र **गन्तव्यम्**। **इतरथा** यदि पुनरप्रचुरान्नपाने गच्छे प्रविशति ततस्ते असंस्तरन्तः क्षुधा **परिताप्यन्ते**। परितापनां चाऽसहमानैः **एषणाघातः** क्रियेत, अनेषणीयमपि गृह्णीयुरित्यर्थः। अथासंस्तरन्तः **क्षेत्रसङ्क्रमणं** कुर्वन्ति तदा प्रावृषि **क्षेत्रस्य संक्रमणे आरोपणा** प्रायश्चित्तं चत्वारो **गुरुकाः** । वर्षारात्रे भाद्रपदाऽश्वयुग्मासद्वयलक्षणे चत्वारो लघुकाः ॥ १९६९ ॥

गतं भिक्षाद्वारम्। अधुना वसतिद्वारमाह—

**वारगजग्गण दोसा, सागारादी हवंति अण्णासु** । दारं ३।
**तेणादि संक लोए, भाविणमत्थं च पासंति ॥ १९७० ॥** दारं ४।

यस्मिन् गच्छे वसतिः सङ्कटा तत्र नोपसम्पत्तव्यम्। यदि पुनरुपसम्पद्यते तत इमे दोषाः- सङ्कटायां हि वसतावमान्तस्ते **वारकेण**- क्रमेण **जागरणं** कुर्युः, एके जाग्रत्यन्ये स्वपन्ति, तदनन्तरं ते जाग्रत्यन्ये स्वपन्ति, एवं क्रमेण जागरणेऽजीर्णत्वादयो **दोषाः**। अथ **अन्यासु**

वसतिषु केचित्स्वपनाय व्रजन्ति तर्हि ये प्राग् अभिशय्यायां **सागारिकादयो** दोषास्ते अत्रापि **भवन्ति**। गतं वसतिद्वारम्। इदानीं शङ्काद्वारमाह—भिक्षाया अभावतो वसतिसङ्कटत्वदोषतो वा ते क्षेत्रसङ्क्रमणं कुर्युः। तांश्च गच्छतो दृष्ट्वा **लोकस्य स्तेनादिशङ्का** उपजायते, यथा—न कल्पते साधूनां वर्षासु गमनम् तन्नूनमेते हेरिकाः स्तेना वा साधुवेषेणाऽऽहिण्डन्ते, अथवा **भाविणमत्थं च पासंति**त्ति एते भाविनमर्थं उत्पातरूपम्, यदि वा 'न निष्पत्स्यते सस्यम्' इत्येवं लक्षणं पश्यन्ति, ततोऽनागतं नश्यन्ति। तस्माद्वयमपि यत्नं कुर्मः। तदेवमप्रचुरान्नपाने सङ्कटवसतिस्थिते च गच्छे प्रवेशे इमे दोषाः, तस्माद्ये प्रचुरान्नपानग्रामे स्थिताः ये च सावकाशायां वसतौ तत्रोपसम्पत्तव्यम् ४॥ १९७०॥

तत्र चानया यतनया गन्तव्यम्, तामेवाह—

**आसण्णखेत्त भाविय भिक्खादपरोप्परं मिलंतेसु ।**
**जा अट्ठमं अभाविय, मा णं अडंतं बहू पासे ॥ १९७१ ॥**

ये **आसन्ने** अनन्तरे **क्षेत्रे** स्थिताः गच्छास्तत्र गन्तव्यम्। असत्यनन्तरे क्षेत्रे ये परक्षेत्रे

स्थिता यै**र्भिक्षादि**निमित्तमागच्छद्भिर्गच्छद्भिश्च **परस्परं मिलद्भिः**, गाथायां सप्तमी तृतीयार्थे, अपान्तराले पथि **भाविता** ग्रामास्तत्र गन्तव्यम्। तेषामप्यभावे दूरेऽपि गम्यते। तत्र पुनर्भिक्षामहिण्डमानो गच्छति। किं कारणम्? अत आह— **मा णं अडंतं बहू पासे**, मा णमिति वाक्यालङ्कारे, भिक्षामन्टतं बहुर्लोको**ऽभावितः** पश्यत्विति कृत्वा। ततोऽभक्तार्थेन **यावत्** प्राप्यते षष्ठेन वा **अष्टमेन** वा तत्र गन्तव्यम् ॥ १९७१ ॥

आह यद्यपि चतुर्थादिना गच्छति तथापि लोकः पश्यति? तत आह—

**पायं न रीयइ जणो, वासे पडिवत्तिकोविदो जो य ।** दारं ५

**असतो( ?त )ऽवबद्धे दूरे य अच्छए जा पभायंति ॥ १९७२ ॥** दारं ६

**प्रायः** कर्षकजनः क्षेत्राणां जल-कर्दमाकुलतया शेष**जनो** मार्गस्य जलाविलत्वादिना दुर्गमतया **वर्षे** वर्षाकाले **न रीयते** न गच्छति। **यश्चात्र प्रतिपत्तिकोविदः** परप्रतिपादनकुशलस्तेन एवमादिषु विषयेऽनेकान्युत्तराणि जल्पितव्यानि । एतावता "एगाह चउत्थादी" [१९६६] इति व्याख्यातम्। इदानीम् "असती अण्णत्थ तत्थेव" इति व्याख्यानार्थमाह— **असतोवबद्धे** इत्यादि, पूर्वोक्तो विधिः सान्तरे वर्षेऽभिहितः, यदि पुनरसकृत् अवबद्धं वा सततं वर्षं

पतति, यदि वाऽतिदूरं गन्तव्यम् नाष्टमेन प्राप्यते, ततोऽसकृदवबद्धे वा वर्षे पतति दूरे गन्तव्ये तत्रैव वर्षारात्रं कृत्वा **प्रभाते** मेघकृतान्धकारापगमतः प्रभातकल्पे संवत्सरे याति ६ ॥१९७२॥



**सूत्रम्— आयरियउवज्झाए गिलायमाणे[1] अन्नयरं वएज्जा अज्जो! ममंसि णं कालगयंसि[2] समाणंसि अयं समुक्कसियव्वे । से य समुक्कसणारिहे समुक्कसियव्वे से य नो समुक्कसणारिहे, नो समुक्कसियव्वे अत्थि याइं व अन्ने केइ समुक्कसणारिहे, से समुक्कसियव्वे, नत्थि याइं थ अन्ने केइ समुक्कसणारिहे, से चेव समुक्कसियव्वे । तंसि च णं समुक्किट्ठंसि परो वएज्जा 'दुस्समुक्किट्ठं ते अज्जो? निक्खिववाहि' तस्स णं निक्खिवमाणस्स नत्थि केइ छेए वा परिहारे वा। जे साहम्मिया अहाकप्पेणं नो उट्ठाएट्ठाए विहरन्ति, सव्वेसिं तेसिं तप्पत्तियं छेए वा परिहारे वा॥१३ ॥**

"आयरिय-उवज्झाए गिलायमाणे" इत्यादि, अथास्य सूत्रस्य कः सम्बन्ध? इत्यत आह—

---

**१. ओहयमाणे-श्युब्रींग॥ २. ओहावियंसि-श्युब्रींग॥**



For Private and Personal Use Only

**आयरियत्ते पगते, अणुयत्तंते य कालकरणम्मि ।**
**अत्थे सावेक्खो वा, वुत्तो इमतो वि सावेक्खो ॥ ११७३ ॥**

आचार्यत्वं प्रकृतं पूर्वसूत्रेषु अनुवर्तमानं च कालकरणम्, तत आचार्यत्वे **प्रकृतेऽनुवर्तमाने च कालकरणे** इदमपि सूत्रमापतितम्, अत्राप्याचार्यत्वस्य कालकरणस्य चाभिधास्यमानत्वात्। यदि **वा पूर्वमर्थतः** सापेक्ष **उक्तः, अयमपि** चाधिकृतसूत्रेणाभिधीयमानः **सापेक्ष** इति सापेक्षत्वप्रकरणादनन्तरसूत्रादनन्तरमस्य सूत्रस्योपनिपातः ॥११७३॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**आचार्य उपाध्यायो वा** धातुक्षोभादिना **ग्लायन् अन्यतरमु**पाध्याय-प्रवर्ति-गणाच्छेदक-गीतार्थ-भिक्षूणामन्यतमं सापेक्षः सन् वदेत्- '**आर्य ! मयि कालगते** सति अयं समुत्कर्षयितव्यः आचार्यपदे स्थापयितव्यः'। **स** चेत्परीक्षया **समुत्कर्षणार्हो** भवति ततः **समुत्कर्षयितव्यः**, नो चेत्समुत्कर्षणार्हस्तर्हि नो समुत्कर्षयितव्यः। अथ योऽसौ पूर्वमाचार्येण समीक्षितः सोऽभ्युद्यतविहारमभ्युद्यतमरणं वा अध्यवसितस्तत्राह-**अस्ति चात्र गच्छेऽन्यः कश्चित्समुत्कर्षणार्हः स**

**समुत्कर्षयितव्यः**। अथ **नास्ति कश्चिदन्यः समुत्कर्षणार्हस्**तर्हि **स एव** अभ्यर्थ्य **समुत्कर्षयितव्यः। तस्मिंश्च समुत्कर्षिते परो** गच्छे **वदेत् दुःसमुत्कृष्टं ते** तव हे **आर्य !** तस्मान्निक्षिप। एवं **तस्य निक्षिपतो नास्ति कश्चित् च्छेदः परिहारो वा,** उपलक्षणमेतद् अन्यत्तपो वा सप्तरात्रादिकम्। **ये** पुनः **साधर्मिका** गच्छसाधवः **यथाकल्पेन** आवश्यकादिषु यथोक्तविनयकरणलक्षणेन **नोत्थाय विहरन्ति तेषां सर्वेषां** प्रत्येकं **तत्प्रत्ययं** यथाकल्पानभ्युत्थानप्रत्ययं **छेदः परिहारः** सप्तरात्रं **वा** तपः प्रायश्चित्तमिति सूत्रसङ्क्षेपार्थः ॥१९८१॥

एवमेव **भाष्यकृत्** प्रपञ्चयन् प्रथमतो 'गिलायमाणे' इत्यस्यार्थं भावयति—

**अतिसयमरिट्ठतो वा, धातुक्खोभेण वा धुवं मरणं ।**
**नाउं सावेक्खगणी, भणंति सुत्तंम्मि जं वुत्तं ॥ १९७४ ॥**

**अतिशयेन** श्रुतज्ञानातिशयादिना **अरिष्टतो वा** अरिष्टदर्शनतो वा **धातुक्षोभेण वा ध्रुवं मरणं ज्ञात्वा सापेक्षाः** गच्छापेक्षोपेता **गणिनो यत्सूत्रे उक्तम्** "अज्जो! [ममंसि णं]

कालगयंसी'' त्यादि **तद्भणन्ति** ॥१९७४॥

साम्प्रतम् 'अण्णतरं वएज्जा' इत्यस्यार्थमाह—

**अन्नयर उवज्झायादिगा उ गीयत्थपंचमा पुरिसा ।**
**उक्कसण माणण त्ति य, एगट्ठं ठावणा चेव ॥ १९७५ ॥**

**उपाध्यायादिकाः** उपाध्यायः प्रवर्ती गणावच्छेदको गणी गीतार्थश्च भिक्षुरित्येवंरूपा **गीतार्थपञ्चमाः** पुरुषास्तेषाम् अन्यतमः **अन्यतरः**। समुत्कर्षशब्दार्थमाह—**उत्कर्षणं माननं स्थापना**-आचार्यत्वस्थापनमित्यर्थः, **इत्येकार्थाः** ॥ १९७५॥

**पुव्वं ठावेति गणे, जीवंतो गणहरं जहा राया ।**
**कुमरे उ परिच्छित्ता, रज्जरिहं ठावए रज्जे ॥ १९७६ ॥**

**पूर्व**मेव जीवन्नाचार्यो यः शक्तिमान् तं **गणधरं गणे स्थापयति**। **यथा राजा कुमारान् परीक्ष्य** यः शक्तिमत्तया **राज्यार्हस्तं राज्ये स्थापयति**॥ १९७६॥

कथं परीक्ष्य? इत्यतः परीक्षाविधिमाह—

**दहिकुड अमच्च आणत्ती, कुमारा आणयणे तहिं एक्को ।**
**पासे निरिक्खिऊणं असि मंति पवेसणे रज्जं ॥ १९७७ ॥**

एगो राया बहुपुत्तो। सो चिंतेइ— जो सत्तिमंतो तं रज्जे ठावेहामि। ततो कुमारे परिच्छिउमाढत्तो। आणत्ता पुरिसा— 'दहिघडगे एगत्थ ओगासे ठवेह'। तेहिं ठवित्ता रण्णो निवेदियं। अमच्चो भणितो— 'वच्च, तुमं दहिघडाणं पासे अच्छाहि'। गतो अमच्चो। रन्ना ते कुमारा सद्दावित्ता भणिया— 'वच्चह, दहिघडमेक्केक्कं आणेह'। ते गया। अण्णं वहंतयं न पासंति। ततो ते अपासेंता सयं चेव दहिघडमेक्केक्कं घेत्तुं संपट्ठिया। एक्को कुमारो पासाणि निरिक्खित्ता अण्णं वहंतयमपासंतो अमच्चं भणति गेण्ह दहिघडं। अमच्चो नेच्छइ। कुमारेण असिं उग्गिरिऊण भण्णइ— 'जइ नेच्छसि सीसं ते पाडेमि'। अमच्चेण गहितो दहिघडो। कुमारो तं घेत्तुं गतो रायसमीवं। रण्णा 'एस सत्तिमंतो' त्ति परिक्खेत्ता रज्जे ठवितो।

अक्षरयोजना त्वियम्— दधिकुटा एकत्र राज्ञा पुरुषैः स्थापिताः। तदनन्तरम**मात्यस्याज्ञप्तिः** प्रदत्ता। यथा— घटानां पार्श्वे तिष्ठ। ततः कुमारा दधिघटानामा**नयने** निरोपिताः, **तत्रैकः**



For Private and Personal Use Only

कुमारः पार्श्वान् **निरीक्ष्यान्यमपश्यन्** अमात्यस्योपरि **असिमुद्गीरितवान्** ततो **मन्त्रिणा** दधिघटो गृहीतः। तेन दधिघटस्य **प्रवेशने** कुमारेण कारिते दृष्टे तस्य कुमारस्य **राज्यं** दत्तवान् ॥१९७७॥

अत्रोपनयमाह—

**दसविह वेयावच्चे, नियोग कुसलुज्जयाणमेवं तु ।**
**ठावेति सत्तिमंतं, असत्तिमंते बहू दोसा ॥ १९७८ ॥**

**एवमाचार्योऽपि दशविधे वैयावृत्त्ये उद्यतानाम्** उद्यतमतीनां साधूनां मध्ये **कुसलत्ति** यो यत्र कुशलस्तस्य तत्र **नियोगं** करोति तं तत्र नियोजयति यः, तं **शक्तिमन्तं** गणधरं **स्थापयति** । **अशक्तिमति** तु स्थाप्यमाने **बहवो दोषाः**। के ते? इति चेत्, उच्यते— सोऽशक्तिमत्त्वेन न शक्नोति साधून् यथायोग्यं नियोक्तुम्, तत आहारोपधिपरिहानिर्निर्जरातश्च ते परिभ्रश्यन्ति । अथाऽऽशुकारेण मरणतः पूर्वं न स्थापितः स्यात्ततोऽस्थापिते गणधरे स कालगतो न प्रकाशयितव्य इत्यादि पूर्वोक्तं सर्वमवसातव्यम् ॥१९७८॥

अत्रैव [१]विधिशेषमाह—

**दोमादी गीयत्थे, पुव्वुत्तगमेण सति गणं विभए ।**
**मीसे व अणरिहे वा, अगीयत्थे वा भएज्जाहि ॥ १९७९ ॥**

आचार्येण शिष्या निर्मापिताः, ते द्वौ त्रयश्चत्वारो वा भवेयुः। तेषु **द्व्यादिषु गीतार्थेषु सति** प्रभवति परिवारे **पूर्वोक्तगमेन** तृतीयोद्देशकोक्तेन प्रकारेण **गणं विभजेत्**। तेषु सर्वेष्वपि विभज्य पृथक्पृथग्गणो दातव्य इत्यर्थः। तथा मिश्रा नाम-तेषामाचार्यशिष्याणां मध्ये केचिद् गीतार्थाः केचिदगीतार्थास्तानपि विभजेत्। किमुक्तं भवति ? ये गीतार्थास्तान् गणधरपदस्थाप्यतया पृथक्कुर्याद्, इतरांस्त्वगीतार्थाननर्हतया। अथवा यैरर्थो देशतो गृहीतो देशतो न गृहीतस्ते **मिश्रास्तान्विभजेत्,** एते मिश्रा अपि योग्या एते त्वयोग्या इति विभागेन स्थापयेत्। तथा ये शरीरेण जुङ्गिकतया सर्वथा गणधरप**दानर्हा**स्तानपि **विभजेत्**। वाशब्दः अपिशब्दार्थः, एकान्तेनायोग्यतया पृथक् स्थापयेत्। **अगीतार्थान् वा भजेद्** विभजेत्। इयमत्र भावना— येऽगीतार्था नाचार्यलक्षणोपेतास्ताननर्हतया स्थापयति। ये पुनरगीतार्था अपि सम्भाव्यश्रुतसम्पद आचार्यलक्षणोपेतान् तान् योग्यतया पृथक् स्थापयति ॥१९७९॥

---

१. विशेष० मो. सं.॥

सम्प्रति मिश्रपदव्याख्यानार्थमाह—

**गीयाऽगीया मिस्सा, अहवा अत्थस्स देसो गहितो उ ।**
**तत्थ अगीय अणरिहा, आयरियत्तस्स होंती उ ॥ १९८० ॥**

केचिद् **गीता** गीतार्थाः, केचिद् **अगीताः** अगीतार्थाः, एते **मिश्राः। अथवा अर्थस्य देशो यैर्गृहीतस्ते** मिश्राः। तत्र ये **अगीता** आचार्यलक्षणपरिभ्रष्टाश्च ते **आचार्यत्वस्यानर्हा भवन्ति** ॥१९८०॥

सम्प्रति 'से य समुक्कसणारिहे समुक्कसियव्वे, से य नो समुक्कसणारिहे नो समुक्कसियव्वे' इत्यस्य भावार्थमभिधित्सुः प्रथमतः पूर्वपक्षमुत्थापयति—

**कहमरिहो वि अणरिहो?, किं नु हु असमिक्खकारिणो थेरा? ।**
**ठावेंति जं अणरिहं, चोयग! सुण कारणमिणं तु ॥ १९८१ ॥**

परो ब्रूते—कथं पूर्वमाचार्यविद्यमानवेलाया**मर्होऽपि** सन् पश्चा**दनर्हो** जातः? येनोच्यते—

स चेत्समुत्कर्षणार्हस्तर्हि समुत्कर्षयितव्यः, नो चेत् समुत्कर्षणार्हस्तर्हि न समुत्कर्षयितव्यः, **किंनु** वितर्के, वितर्कयामि— **हुः** निश्चितम**समीक्षितकारिणः स्थविरा** आसीरन् यदनर्हं **स्थापयन्ति** यथा 'अयं समुत्कर्षयितव्य' इति। अत्र सूरिः प्राह—**चोदक! शृणु कारणमिदं** येन पूर्वमर्होऽपि पश्चादनर्हो जातः ॥ १९८१ ॥

तदेव कारणमभिधित्सुर्द्वारगाथामाह—

**उप्पियण१ भीतसंदिसण२, अदेसिए चेव३ फरुस४ संगहिए५ ।**
**वायंतगनिप्फायग६, अण्णसीस७ इच्छा८ अहाकप्पो९ ॥ १९८२ ॥**

**उप्पियणं** मुहुर्मुहुः श्वसनं तद् द्वारम्१, **भीतसन्देशनद्वारम्२**, **अदेशिकद्वारं** ३, **परुषद्वारम्** ४, एतानि चत्वार्यपि प्रस्तुतार्थविषयाणि। **सङ्ग्रहद्वारं** १ **वाचकनिष्पादकद्वारम्** २ **अन्यशिष्यद्वारम्** ३, **इच्छाद्वारं** ४ **यथाकल्पद्वारम्** ५ इत्येतानि सङ्ग्रहादीनि द्वाराणि "अत्थि या इत्थ अण्णे समुक्कसणारिहे" इत्यादिसूत्रविषयाणि इति द्वारगाथासङ्क्षेपार्थः ॥ १९८२ ॥

सम्प्रति उप्पियणद्वारं विभावयिषुराह—

सन्निसेज्जागयं दिस्सा, सिस्सेहिं परिवारियं ।
कोमुदीजोगजुत्तं व, तारापरिवुडं ससिं ॥ १९८३ ॥

गिहत्थ-परतित्थाहिं, संसयत्थीहि निच्चसो ।
सेविज्जंतं विहंगेहिं, सरं वा कमलुज्जलं ॥ १९८४ ॥

खग्गूडे अणुसासंतं, सब्भावेंतं समुज्जए ।
गणस्स अगिला कुव्वंतं, संगहं विसए सए ॥ १९८५

इंगियागारदक्खेहिं, सया छंदाणुवत्तिहिं ।
अविकूडियनिद्देसं, रायाणं व अनायगं ॥ १९८६ ॥

सती नाम— शोभना स्वकीया वा निषद्या **सन्निषद्या** स्वनिषद्या वा, तस्यां गतमुपविष्टम्। **शिष्यैः परिवारितम्**। इत्थम्भूतमुपमयति—**कौमुदी** कार्तिकी पौर्णमासी **तद्योगयुक्तम् तारापरिवृतं शशिनमिव** ॥१९८३॥ तथा—**गृहस्थैः परतीर्थिभिः संशयार्थिभिश्च** साधुभिः

**नित्यशः** सर्वकालं **सेव्यमानम्**। किमिव? इत्यत आह—**कमलोज्जलं** कमलपरिमण्डितं **सर** इव **विहगैः** पक्षिभिः ॥ १९८४॥ तथा **खग्गूडान्** कुस्वभावान् अनुशासन्तम्, सम्यग् उद्यताः **समुद्यतास्तान् श्रद्धापयन्तं** तेषां महतीं श्रद्धामुत्पादयन्तं, तथा **गणस्य** गच्छस्य **अगिलया** निर्जरार्थमात्मोत्साहेन **स्वके विषये** आत्मीयया शक्त्या इत्यर्थः, **सङ्ग्रहं कुर्वन्तम्** ॥१९८५॥ तथा **इङ्गिताकारदक्षैः छन्दोनुवर्तिभिः सदा** सर्वकालम् **अविकूटितनिर्देश**-मखण्डिताज्ञं **राजानमिव अनायकं** न विद्यते नायको यस्य स तथा तम्, चक्रवर्तिनमित्यर्थः, **दृष्ट्वा** कश्चिदगीतार्थ उत्पन्नगौरवो भवति ॥ १९८६ ॥

तथा चाह—

**उत्पन्नगारवे एवं, गणित्ति परिकंखिओ ।**
**उप्पियंतं गणिं दिस्सा अगीतो भासते इमं ॥ १९८७ ॥**

**उत्पन्नम्** अभिलषणीयतया जातं **गौरवम्** ऋद्धिगौरवं यस्य स तथा, **एव**महमपि **गणी** भवामि, गणिपदमवाप्य परिपालयामि ततः शोभनं भवतीत्येवं **परिकाङ्क्षितः** परिकाङ्क्षावान् **गणिनमाचार्यमुप्पियन्तं** मुहुर्मुहुः श्वसन्तं मर्तुकामलिङ्गं **दृष्ट्वा कश्चिदगीतो**ऽगीतार्थः 'कथमहं

गणधरो भविष्यामि?' इति विचिन्त्य यथा गच्छवर्तिनः साधवः शृण्वन्ति तथा मातृस्थानतः **इदं** वक्ष्यमाणं **भाषते** ॥ १९८७॥

तदेवाह—

**अलं मज्झ गणेणं ति, तुब्भे जीवह मे चिरं ।**
**किमेयं? तेहि पुट्ठो उ, दिज्जए मे गणो किल ॥ १९८८ ॥**

**अलं** पर्याप्तं **मम गणेन, यूयं मम** पुण्योदयेन **चिरं** प्रभूतं कालं **जीवथ** । ततस्ते गच्छवर्तिनः साधवस्तस्यागीतार्थस्य वचनमाकर्ण्य तमगीतार्थं ब्रुवते— **किमेतत्** त्वं ब्रूषे? यथा— अलं मम गणेन, एवं तैः पृष्टः सन् सोऽगीतार्थो वक्ति क्षमाश्रमणैः **किल मे गणो दीयते**। तत एवमुक्तं मयेति ॥१९८८॥

अथवा उप्पियणद्वारस्यायमर्थः—

**अट्ठाविए व पुव्वं तु, गीयत्था उप्पियंतए ।**
**आम दाहामो एयस्स, सम्मतो एस अम्ह वि, ॥ १९८९ ॥**

**गीयत्थो य वयत्थो य, संपुण्णसुहलक्खणो ।**
**सम्मतो एस सव्वेसिं साहू ते ठावितो गणे ॥ १९९० ॥** दारं १

**वाशब्दः** प्रकारान्तरद्योतने । **पूर्वमस्थापिते** गणधरे म्रियमाण आचार्यः किल **उप्पियतित्ति** मुहुर्मुहुः श्वसिति। तं च तथाभूतं दृष्ट्वा **गीतार्था**श्चिन्तयन्ति आचार्यस्य सा वाग् नास्ति यया ब्रूते, यथा— अमुकं साधुं गणधरं स्थापयथ । मा भूत्सा वाणी, वयमेव गच्छवर्तिनः साधुन् भणामः, यथा— **गणधरपदे** सन्दिष्ट इति, तथा चोपायं करिष्यामो यथा गच्छसाधूनामकम्पनीयो भवति। एवं चिन्तयित्वा यथा गच्छसाधवः शृण्वन्ति तथा ब्रुवते—**आम दाहामो एयस्स**त्ति इच्छामः क्षमाश्रमणाश्च (णाः!) तस्यामुकस्य दास्यामो गणधरपदं **अस्माकमप्येष** एव **सम्मतः**, यत एष **गीतार्थो वयस्थः** सम्पूर्णानि शुभानि लक्षणानि यस्यासौ **सम्पूर्णशुभलक्षणः**, तथा **एष सर्वेषां साधूनां सम्मतः**, ततस्ते त्वया **गणे स्थापितः**। एवमेतौ द्वौ प्रकारावुप्पियणद्वारे व्याख्यातौ। एतौ द्वावपि जनौ यदि पूर्वमाचार्येण समीक्षितौ यथाऽनर्हाविति तदा न कश्चिदाचार्याणामसमीक्षितदोषः॥ १९८॥ १९९०॥

गतमुप्पियणद्वारम्। अधुना भीतसन्देशद्वारमाह—

**असमाहियमरणं ते, करेमि जइ मे गणं न देसि इति।**
**भीतो गीतो य तओ, गीते संदिसए [उ] गुरू ॥ १९९१॥**

कश्चिदगीतार्थः पापीयान् प्रत्यासन्नमरणमाचार्यमवगम्य ब्रूते—**यदि मे मह्यं गणं न ददासि, ततस्तेऽसमाहितमरणं** तथा करोमि "**वर्तमानसामीप्ये वर्तमानवद् वा**" [मलय० कृ० ४-८८] इति वचनात् प्राकृतत्वाद्भविष्यति वर्तमाना। ततोऽयमर्थः— करिष्यामि, यथा दीर्घकालं संसारे भ्रमसि। **तत** एवमुक्ते तस्य **भीत** आचार्यो **गीतः** गीतार्थो देश-काल-पुरुषौचित्यवेदनाद् **गीतार्थान् सन्दिशति,** यथा— एतस्मै मया गणो दत्त इति ॥ १९९१॥

गीतार्थाश्च विदितकारणा ब्रुवते—

**आमं ति वोत्तुं गीयत्था, जाणंता तं च कारणं ।**
**कयट्ठे तं तु निज्जूहे अतिसेसी य संवसे ॥ १९९२॥** दारं २।

**आमं** इच्छाम **इति उक्त्वा गीतार्थास्तत्कारणं जानन्तः कृतार्थे** निर्यापिते आचार्ये तं

दुष्टाभिप्रायं **निर्यूहन्ति** निष्काशयन्ति, एवमेषोऽनर्हो भवति। अथ **अतिशेषी** अतिशयज्ञानी जानाति, यथा-साम्प्रतमेष निर्दोषीभूतः, स वा तस्मात् स्थानात् गुरुजनसमक्षं प्रतिक्रान्तस्ततः **संवास्यते** ॥ १९९२॥

गतं भीतसन्देशद्वारम् २। इदानीमदेशिकद्वारमाह—

**अरिहो वऽणरिहो होइ, जो उ तेसिमदेसितो** । दारं ३।
**तुल्लदेसी व फरुसो, दा ४ महुरो व असंगहो ॥ १९९३ ॥**

एक आचार्यः। तस्य पर्षद् कुडुक्का। तस्य मध्ये एक आचार्येण गणधरपदे समीहितः,अन्ये चाऽऽचार्यस्य शिष्याः **सिन्धु**देशादिषु विहरन्ति। ते सिन्ध्वादिषु विहृत्याचार्यसमीपमागताः। एकं कुडुक्कमाचार्यसमीहितं मुक्त्वा अन्ये सर्वे कुडुक्काः केचित्कालगताः, केचित् प्रतिभग्नाः, एवं स कुडुक्कदेशोद्भवस्तेषां सैन्धवादीनामनर्हो जातः, येन ते तस्य भिन्नदेशिकत्वादुल्लापं न परियच्छन्ति।

अक्षरयोजना त्वेवम् **अर्होऽप्यनर्हो भवति, यस्तेषां** तत्कालभाविनां साधूनाम् **अदेशिकः**

भिन्नदेशिकः, यथा सैन्धवादीनां कुडुक्क इति। गतमदेशिकद्वारम्। अधुना परुषद्वारमाह-**तुल्लदेसी व फरुसो** तुल्यदेशी यः पूर्वं समीहितो गणधरपदे स पश्चात् परुषभावो जातः, परुषत्वाच्च प्रतिचोद्यमान आक्रोशति। आक्रोशांश्चासहमानानामुत्सङ्खडादिकं कुर्वन्गच्छभेदं करोति। एवमेष पश्चादनर्हः। सम्प्रति 'अत्थि याइं थ अण्णे समुक्कसणारिहे' इत्यस्यार्थं विभावयिषुः सङ्ग्रह-द्वारमाह- **महुरो च असंगहो** यः पूर्वं समीहितः स सत्यपि मधुरत्वे असङ्ग्रहो न सङ्ग्रह-शीलः। अन्यस्तु सङ्ग्रहशीलो मधुरश्च, ततो यः सङ्ग्रहशीलः स समुत्कर्ष्यते नेतर इति ५ ॥ १९९३॥ साम्प्रतमस्मिन्नेवार्थे वाचकनिष्पादकद्वारमाह—

**वायंतगनिप्फायग, चउरो भंगा उ पढमगो गज्झो ।**
**तइओ उ होइ सुण्णो, अण्णेण व सो पवाएइ ॥ १९९४ ॥** दारं ६।

**वाचकः निष्पादक** इति पदद्वयसंयोगत**श्चत्वारो** भङ्गाः। तद्यथा-वाचयत्यपि निष्पादय-त्यपीति प्रथमः १ वाचयति न निष्पादयति द्वितीयः २ न वाचयति निष्पादयति तृतीयः ३। न वाचयति न निष्पादयति चतुर्थः४। अत्र सत्यपि पूर्वसमीहिते यः प्रथमभङ्गवर्ती स स्थाप्यते, नेतरो द्वितीयादिभङ्गवर्ती। तथा चाह—**प्रथमको ग्राह्यः**। द्वितीयभङ्गको न स्थाप्यः,

अनिष्पादकत्वात्। **तृतीयस्तु शून्यः**, वाचनाया अभावे निष्पादकत्वायोगात्। यदि वा आत्मना न वाचयति **अन्येन वाचयति** तदा **सो**ऽपि योग्यः। चतुर्थभङ्गिकस्तु सर्वथानर्ह एव ६ ॥१९९४॥

साम्प्रतमधिकृत एवार्थेऽन्यशिष्यद्वारमाह—

**असतीव अन्नसीसं, ठावेंति गणम्मि जाव निम्मातो ।**
**एसो चेव अणरिहो, अहवावि इमो ससिस्सो वि ॥ १९९५ ॥**



आचार्याः कालं कर्तुकामाः आत्मीयाः शिष्याः सर्वेऽप्यनिर्माताः इति तेषां मध्ये गणधरपदयोग्ये एकस्मिन्न**प्यसति** अन्यस्य **शिष्यं** प्रातीच्छिकं **गणे स्थापयन्ति**, भणन्ति च— यावन्मम शिष्यो **निर्मातः** निष्पन्नो भवति तावत्त्वं गणधरः, [गणधरे] निर्माते सति त्वया गणधरपदं निक्षेप्तव्यम्। यदि न निक्षिपति ततश्छेदः परिहारः सप्तरात्रं वा तपः प्रायश्चित्तम् । **एष** समीक्षितो**ऽप्यनर्हो** जातः। **अथवायं** स्वशिष्योऽप्यनर्हः ॥ १९९५॥

तमेवाह—

**जो अणुमतो बहूणं, गणहर अचियत्तो दुस्समुक्कुट्ठो ।**
**दोसा अणिक्खिवंते, सेसा दोसं च पावंति ॥ १९९६ ॥** दारं ७।

आचार्यैः कालं कुर्वद्भिर्ज्ञातः य एष मम शिष्यः सूत्रतोऽर्थतश्च निर्मात एतस्मादयं बहुभिर्भागैर्गणधरगुणैरभ्यधिको भविष्यति, केवलमिदानीमनिर्मातः, ततो योऽसौ निर्मातः स आचार्यैरुच्यते— यावदेनं त्वं निर्मापयसि तावत्त्वं गणधरः, एतस्मिंश्च[1] निर्मापिते त्वया गणधरपदं निक्षेप्तव्यम्, यत एष तव पार्श्वाद्बहुभिर्भागैर्गच्छस्य[2] प्रवचनस्य चोपग्रहकारी भविष्यति। तेन तथा प्रतिपन्नम्, आचार्याः कालगताः, स च यदि तेन निर्मापितो जातः समस्तस्यापि सङ्घस्य प्रीतिकरः; ततो **यस्तेन** निर्मापितो जातो**ऽनुमतो बहूनां** स **गणधरः** स्थापनीयः। यस्तु **अचियत्तो**ऽप्रीतिकरः पूर्वं स्थापितः स **दुस्समुत्कृष्ट** इति वक्तव्यः— 'निक्षिप गणधरपदम्। एवमुक्तो यदि न निक्षिपति ततस्तस्मि**न्ननिक्षिपति दोषाः**, छेदं परिहारं सप्तरात्रं वा तपः प्राप्नोतीति भावः। येऽपि **च शेषास्तं** भजन्ते तेऽपि **दोषं प्राप्नुवन्ति**, छेदं परिहारं सप्तरात्रं वा तेऽपि प्राप्नुवन्तीत्यर्थः ७॥१९९६॥



---

१. °तस्मिंस्तु - वा. मो. पु. मु. ॥ २. गणधरगुणैरभ्याधिको भवि° वा. पु. ॥

यदेतद्भणितमेतत्प्रसङ्गागतम्। अयं पुनः स्फुटसूत्रनिपातः—

**अब्भुज्जयमेगयरं, ववसिउकामम्मि होइ सुत्तं तु ।**
**ते बेंति कुणसु एक्कं, गीयं पच्छा जदिच्छा भे ॥ ११९७ ॥**

आचार्येण कोऽपि स्वशिष्यः समीहितः, यथा—अयमाचार्यपदयोग्य इति, ततो गीतार्थाः सन्दिष्टाः— एष समुत्कर्षयितव्यः। स च कालगते आचार्ये ब्रूते—अहमभ्युद्यतविहारं-जिनकल्पादिकमभ्युद्यतमरणं वा प्रतिपत्स्ये तस्मिन्न**भ्युद्यतमेकतरं** विहारं मरणं **वा व्यवसितुमनसि भवति** निपतति **सूत्रम्**— "अत्थि या इत्थ केइ अण्णे समुक्कसणारिहे से समुक्कसियव्वे नत्थि या इत्थ केइ अन्ने समुक्कसणारिहे से चेव समुक्कसियव्वे"

तस्मिन्नभ्युद्यतस्यैकतरं व्यवसितुकामे अस्ति चेदत्र गच्छेऽन्यः कश्चित्समुत्कर्षणार्हस्तर्हि स समुत्कर्षयितव्यः। नास्ति चेदत्र कश्चिदन्यः समुत्कर्षणार्हस्ततः स एव समुत्कर्षयितव्यः। कथम्? इति चेत्, उच्यते, **ते** गीतार्था अभ्यर्थनापुरस्सरं तं **ब्रुवते**— यूयं गणधरपदं परिपालयन्त **एक**मस्माकं कञ्चन **गीतं** गीतार्थं **कुरुत** निर्मापयत, ततः **पश्चात्त**स्मिन्निर्मापिते

**भे** भवतां **यदृच्छा** यत् प्रतिभासते तत्कुरुतेति भावः। अत्रेच्छाद्वारावसरः— एवमुक्ते तेन गणधरपदं प्रतिपद्य कश्चनाप्येको निर्मापितः, पश्चात्तस्य चित्तमजायत, यथा— अभ्युद्यतविहाराद् गच्छपरिपालनं विपुलतरनिर्जराद्वारम् तस्मात्परिपालयाम्यहमेव गच्छमिति ॥ १९९७॥

तथा चाऽऽह—

**निम्माणेऊणेगं, इमंपि मे निज्जराए दारं तु ।**
**निक्खिव न निक्खेवामी, इत्थं इतरे उ खुब्भंति ॥ १९९८ ॥**

स गणधरपदे स्थापितः **एकं** कञ्चनापि **निर्माप्यैवं**[1] चित्तमकार्षीत्— **इदमपि** गच्छपरिपालनं महद् **निर्जराया द्वारम्** । एवं व्यवसिते तस्मिन् गच्छे गीतार्था ब्रुवते- **निक्षिप** गणधरपदम्, स प्राह— **न निक्षिपामि,** किन्तु इच्छामि गच्छं परिपालयितुम्। एवमुक्ते **इतरे** गच्छगीतार्थाः **क्षुभ्यन्ति** ॥१९९८॥

ते च क्षुभ्यन्तो यद् ब्रुवते तदाह—

१. निर्माप्येदं- सं. ॥

**दुस्समुक्कट्ठं निक्खिव, भणंते गुरुगा अणुट्ठिहंते य।**
**एमेव अण्णसीसे, निक्खिवणा गाहिते नवरं ॥ १९९९ ॥**

'पूर्वं तव नेप्सितं गणधारणम् पश्चादिदानीं यद्यपि रुचितं तथापि न त्वमस्माकं रोचसे, **दुस्समुत्कृष्टं** खलु तव गणधरपदम्, तस्मा**न्निक्षिप,** इति एवं **भणति** गच्छसाधुवर्गे प्रायश्चित्तं चत्वारो **गुरुकाः**। **अणुट्ठिहंते च एमेवे**त्यादि, योऽसौ प्रातीच्छिकः स्थापितः स चेद् यावदद्यापि न निर्मापयति कमपि शिष्यं तावद् यदि गच्छसाधवो भाषन्ते— निक्षिप त्वं गणधरपदमिति, तदा तेषां तथा भाषमाणानां प्रायश्चित्तं चत्वारो गुरुकाः । अथ त[1]स्मि**न्नित्यशिष्ये** निर्मापयितुमिष्यमाणे **अनुत्तिष्ठति** अनिर्मापिते गणधरपदनिक्षेपणं करोति तदा तस्मि**न्नन्यशिष्ये** अनुत्तिष्ठति गणधरत्वं निक्षिपतः प्रातीच्छिकस्य प्रायश्चित्तमेवमेव, चत्वारो गुरुका इत्यर्थः। यच्चागीतार्थत्वेन गच्छसाधवः सेविष्यन्ते तन्निमित्तमपि तस्य प्रायश्चित्तम्, **नवरं** केवलं तस्मिन्नन्यशिष्ये **ग्राहिते** निर्मापिते गणधरपद**निक्षेपणा** कर्त्तव्या, न च तत्र तां कुर्वतस्तस्य छेदः परिहारः सप्तरात्रं वा तपः ८ ॥१९९९॥

१. तस्मिन्नन्यशि° वा. मो. पु. सं.॥

गतमिच्छाद्वारम् । सम्प्रति यथाकल्पद्वारावसरः-तत्र ये गच्छसाधवस्तं स्वगच्छसाधुं प्रातीच्छिकं च पूर्वस्थापितं यथाकल्पेन नाभ्युत्तिष्ठन्ति। यथाकल्पानभ्युत्थानमेवाह—

**आवस्सग सुत्तत्थे, भत्ते आलोयणा उवट्ठाणे ।**
**पडिलेहा कितिकम्मं, मत्तग-संथारगतिगं च ॥ २००० ॥**

**आवश्यके** क्रियमाणे यो विनयस्तस्य आचार्यस्य कर्तव्यस्तं न कुर्वन्ति। **सूत्रमर्थं** वा तस्य समीपे न गृह्णन्ति। **भत्ते**त्ति, आचार्यप्रायोग्यं तस्य भक्तं न प्रयच्छन्ति । **आलोयण**त्ति, तस्य पुरतो नालोचयन्ति। **उवट्ठाण**त्ति आचार्यवस्त्र[१]-कम्बल-पात्रादिप्रत्युपेक्षणाय नोपतिष्ठन्ति। नापि **कृतिकर्म** वन्दनकमन्यद्वा कुर्वन्ति। नापि **मात्रक**द्विकं तस्य ढौकयन्ति। **तिस्रः संस्तारक**भूमयस्ता अपि न प्रयच्छन्ति। तेषामपि यथाकल्पमनभ्युत्तिष्ठतां प्रायश्चित्तं छेदः परिहारः ससरात्रं वा तप इति ९ ॥२००० ॥

**सूत्रम्— आयरिय उवज्झाए ओहायमाणे अन्नयरं वएज्जा, जाव सव्वेसिं तप्पतियं छेए वा परिहारे वा ॥ १४ ॥**

---

१. **वस्त्रपात्रादिकम्बल प्र° सं.॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"आयरिय-उवज्झाए ओहायमाणे" इत्यादि, अत्र सम्बन्धमाह—

**गेलण्णम्मि अहिगए, अठायमाणे सिया उ ओहाणं ।**
**भवजीवियमरणा वा, संजमजीया इमं होति ॥ २००१ ॥**

पूर्वमनन्तरसूत्रे ग्लानत्व**मधिकृतम्**। तस्मिंश्च **ग्लानत्वे अतिष्ठति** अनिवर्तमाने **स्यात्**कस्यचित् पीडामसहिष्णोरवधावनम्, अतो**ऽवधावन**प्रतिपादनार्थमधिकृतसूत्रम्। अथवा पूर्वसूत्रे **भवजीवितमरणं** "ममंसि णं कालगयंसी"त्यनेनोक्तम्। भवजीवितमरणाच्चावश्यं **संयमजीवितमरण**मपि भवति, संयमस्य जीविताविधिकत्वात्। ततो भवजीवितमरणात्प्राक्तन-सूत्राभिहितात्तदनन्तरमिदं संयमजीवितान्मरणं प्रतिपाद्यं भवतीति तदर्थ**मिदं** सूत्रम्॥२००१॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**आचार्य उपाध्यायो** वा मोहेन रोगेण वा **अवधावन् अन्यतरम्** उपाध्यायादिकानां गीतार्थपञ्चमानां पुरुषाणामन्यतमं **वदेत् याव**त्करणादेवं परिपूर्णः पाठो द्रष्टव्यः—

*"अज्जो! ममंसि णं ओहावियंसि समाणंसि अयं समुक्कसियव्वे। से य समुक्कसणारिहे*



For Private and Personal Use Only

*समुक्कसियव्वे सिया। से य नो समुक्कसणारिहे नो समुक्कसियव्वे सिया। अत्थि या इत्थ अण्णे केइ समुक्कसणारिहे से समुक्कसियव्वे, नत्थि या इत्थ अन्ने केइ समुक्कसणारिहे से चेव समुक्कसियव्वे, तस्सिं च णं समुक्किट्ठंसि परो वएज्जा— दुस्समुक्किट्ठं ते अज्जो! निक्खिवाहि, तस्स णं निक्खिवमाणस्स नत्थि केइ छेदे परिहारे वा। जे साहम्मिया अहाकप्पेणं नो अट्ठाए विहरंति सव्वेसिं तेसिं तप्पत्तियं छेदे वा परिहारे वा''*। अस्य व्याख्या प्राग्वत्।

अधुना **निर्युक्तिविस्तरः**। केन पुनः कारणेनासाववधावति? इति चेत्, अत आह—

**मोहेण व रोगेण व, ओहाणं भेसयं पयत्तेण ।**
**धम्मकहाए निमित्ते, अणाहशाला गवेसणया ॥ २००२॥**

अवधावनं **मोहेन वा** कामोद्रेकरूपेण रोगेण वा। तत्र मोहविषया यतना प्राक् तृतीयोद्देशकेऽभिहिता। यदि **रोगेण** ततो नावधावितव्यम्, किन्तु **प्रयत्नेन भैषजं** दातव्यम्। तच्च **धर्मकथया निमित्तेन** चोत्पादनीयम्। तथाप्यलाभे **अनाथशालातः** आरोग्यशालातो **गवेषणा भैषजस्य** कर्तव्येति निर्युक्तिगाथासङ्क्षेपार्थः ॥ २००२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एनामेव सम्प्रति **भाष्यकृद्** विवरीषुराह—

**मोहेण पुव्व भणियं, रोगेण करेंतिमाए जयणाए ।**
**आयरिय कुल गणे वा, संघे व कमेण पुव्वुत्तं ॥ २००३ ॥**

यदि **मोहेना**वधावनं कर्तुमीहते तदा यत्**पूर्वं** तृतीयोद्देशके मोहचिकित्साविषयं **भणितं** तत्कर्तव्यम्। अथ **रोगेण** तदा **अनया** वक्ष्यमाणया 'प्रथमतः प्रासुकेन, तदलाभे चाप्रासुकेनापि' इत्येवंरूपया **यतनया पूर्वोक्तं** भैषजं प्रयत्नेन सम्पादनीयमित्यादिरूपं **कुर्वन्ति**। के ते कुर्वन्ति? इति अत आह— **आचार्यः कुलं गणः सङ्घो** वा। कथम्? इत्याह—**क्रमेण** परिपाट्या ॥२००३॥



तामेव परिपाटीं कालनियमनपूर्विकामाह—

**छम्मासे आयरिओ, कुलं तु संवच्छराणि तिन्नि भवे ।**
**संवच्छरं गणो खलु, जावज्जीवं भवे संघो ॥ २००४ ॥**

For Private and Personal Use Only

प्रथमत **आचार्यः षण्मासान्** यावत् चिकित्सां कारयति, तथाप्यप्रगुणीभूतं तं कुलस्य समर्पयति। ततः **कुलं त्रीन् संवत्सरान्** यावच्चिकि[१]त्सकं **भवति**, तथाप्यप्रगुणीभवने कुलं गणस्य तं समर्पयति। तदनन्तरं **संवत्सरं** यावद् **गणः खलु** चिकित्सां कारयति, तथाप्यनिवर्तिते रोगे तं गणः सङ्घस्य समर्पयति, ततः **सङ्घो यावज्जीवं** प्रासुकप्रत्यवतारेण तदभावे चाप्रासुकेनापि यावज्जीवं चिकित्सको **भवति**। एतच्चोक्तं यो भक्तविवेकं कर्तुं न शक्नोति तमधिकृत्य। यः पुनर्भक्तविवेकं कर्तुं शक्नोति तेन प्रथमतोऽष्टादशमासान् चिकित्सा कारयितव्या, विरतिसहितस्य जीवितस्य पुनः संसारे दुष्प्रापत्वात्; तदनन्तरं चेत्प्रगुणीभवति ततः सुन्दरम्, अथ न भवति तर्हि भक्तविवेकः कर्तव्यः ॥२००४॥

अत्रैवाऽऽदेशान्तरमाह—

**अहवा बिइयादेसो, गुरु वसभे भिक्खुमादि तेगिच्छं ।**
**जज्जिय बारसवासा, तिछक्कमासा असुद्धेण ॥ २००५ ॥**

१. °कित्सां कारयति तथा° खं. ॥

**अथवा द्वितीय आदेशः— गुरौ वृषभे भिक्ष्वादौ** च यथाक्रमं **चिकित्सां** कारयन्ति **यावज्जीवं द्वादशवर्षाणि त्रिषट्कम्** अष्टादश**मासान्**। कथम्? इत्याह— **अशुद्धेन,**[1] अपि-शब्दोऽत्र लुप्तो द्रष्टव्यः। प्रथमतः शुद्धेन, तदभावे चाशुद्धेनापि, तदनन्तरं भिक्ष्वादिना भक्तविवेकः कर्तव्यः। 'गुरुस्तु गच्छप्रवर्तकः' इति तस्य यावज्जीवं चिकित्सा॥२००५॥ तत्र प्रथमादेशेन भक्तविवेकं कर्तुं शक्नुवन्तं प्रत्यष्टादशमासान् [यः] कश्चिच्चिकित्साविधिः तमभिधित्सुराह—

**पयत्तेण ओसहं से, करेंति सुद्धेण उग्गमादीहिं ।**
**पणहाणीए अलंभे, धम्मकहाहिं निमित्तेहिं ॥ २००६ ॥**

**तहवि न लभे असुद्धं बहि ठिय सालाहिवाऽणुसट्ठादी ।**
**नेच्छंते बहि दाणं, सलिंगविसणेण उड्डाहो ॥ २००७ ॥**

गाथा २००३-२००८ ग्लान्ये चिकित्सा-विधिः

प्रथमतः **प्रयत्नेनोद्गमादिभिः शुद्धेन** वस्तुजातेन से तस्यौषधं कुर्वन्ति। तदलाभे **पञ्चकपरिहाण्या** यावच्चतुर्गुरुकेनाप्यशुद्धेनापि। तथाप्य**लाभे धर्मकथाभि**स्तदौषधमुत्पादयन्ति। तथाप्यलाभे **निमित्तैरपि** ॥२००६॥

---

१. अशुद्धेनापि, अपिशब्दो- पु. प्रे.॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तथापि** निमित्तैरपि **चेदशुद्धं न लभेत**, ततोऽनाथशालायाः— आरोग्यशाला तस्यां मध्ये न प्रविशन्ति, किन्तु **बहिः स्थिता**स्तत आरोग्य**शालात** औषधं गवेषयित्वा समानयन्ति। अथ ते शालानिवासिनो न प्रयच्छन्ति तर्हि यस्तस्या आरोग्यशालायाः प्रभुरधिपस्त**मनुशास्य** याचन्ते। तथाप्यलाभे स धर्मकथया आवर्जनीयः। तथाप्यनावर्जने निमित्तेनाप्यावर्जयितव्यः। तथापि **बहिःस्थिता**नामौषधप्रदान**मनिच्छति** यद् यस्यार्चितं लिङ्गं तेन लिङ्गेन प्रविशन्ति, प्रविश्यौषधमानयन्ति। अथ स्वलिङ्गेनापि तत्र कस्मान्न प्रविशन्ति? तत आह— स्वलिङ्गवेशनेन **स्वलिङ्गप्रवेशेन** प्रवचनस्य **उड्डाहः**— नाऽमी किमपि जानते, न चामीषां धर्मः श्रेयान्, ततः क्वचिदपि किञ्चिदप्यलभमाना अनाथा इवात्र समागताः इति प्रवचनस्योपघातः ॥ २००७॥

एतदेव "पणहाणीए अलंभे" इत्यादिकं विवरीषुरिदमाह—

**पणगादी जा गुरुगा, अलब्भमाणे बहिं तु पाउग्गे ।**
**बहिठिय साल गवेसण, तत्थ पभुस्साणुसट्ठादी ॥ २००८ ॥**



For Private and Personal Use Only

**पञ्चक**परिहाण्या-पञ्चकादिप्रायश्चित्तमौषधोत्पादनाय तावदासेवनीयं **यावच्चत्वारो गुरुकाः**। तथापि **बहिः प्रायोग्ये** औषधे **अलभ्यमाने** आरोग्य**शालाया बहिःस्थिता औषधस्य गवेषणं** कुर्वते। **तत्र** तद्वास्तव्यानामदाने यः प्रभुः—आरोग्यशालाया अधिपति-स्तस्या**नुशास्तिम्, आदि**शब्दाद्धर्मकथां निमित्तं च प्रयुञ्जते॥ २००८॥

**असती अच्चियलिंगे, पविसण पतिभाणवंत वसभा उ ।**
**जइ पडिवत्तियकुसला, भाविंति नियल्लगत्तं से ॥ २००९ ॥**

निमित्तैरप्य**लाभे अर्चितलिङ्गेन** यत्तस्य पूजितं लिङ्गं तेन लिङ्गेन रक्तपटादिरूपेण **प्रवेशनं** कुर्वन्ति। तेषु च प्रविष्टेषु ये **प्रतिभानवन्तः** प्रतिवचनदानसमर्था **वृषभा**स्ते स्वलिङ्गेन गत्वा प्रभुं भाषन्ते, यथा-को युष्माकं सिद्धान्तः? एवमाभाष्य तत्र सिद्धान्तविषये प्रभुणा गृहीतलिङ्गैश्च सह परस्परमुल्लापं तथा कुर्वन्ति यथा उत्तरवादिनो वृषभा भवन्ति। अथवा **यदि प्रतिपत्तिकुशलाः** परप्रतिपादनदक्षा वृषभास्ततस्ते गत्वा **से** तस्य प्रभोः निजकत्वम् **आत्मीयत्वं** भावयन्ति । तत्रापि सिद्धान्तविषये तैः गृहीतलिङ्गैः सह परस्परमुल्लापं तथा कुर्वन्ति यथा स आवर्ज्यत इति ॥२००९॥

**अहव पडिवत्तिकुसला, तो तेण समं करेंति उल्लावं ।**
**पभवंतो वि य सो वी, वसभे ऊ उत्तरीकुणती ॥ २०१० ॥**

**अथवा** ये **प्रतिपत्तिकुशलाः** परप्रतिवचनदानसमर्थास्ततस्ते गत्वा **तेन** प्रभुणा **सह** परस्पर**मुल्लापं** तथा **कुर्वन्ति** गृहीतलिङ्गाश्च तथा तं भावयन्ति, यथा **सोऽपि,** आसतां गृहीतलिङ्गा इत्यपिशब्दार्थः, **प्रभवन्नपि वृषभानुत्तरीकरोति** उत्तरवादिनः करोति॥२०१०॥

ततः स निरुत्तरीकृतः सन् यद् ब्रूते तदाह—

**तो भणइ कलहमित्ता, तुब्भे मे वहेज्जह उदंतं ति ।**
**ते वि य पडिस्सुणंती, एवं एगाए छम्मासा ॥ २०११ ॥**

**ततः** सिद्धान्तोल्लापे पराजितः सन् **भणति— यूयं** मम **कलहमित्राणि** कलहानन्तरं यानि जातानि मित्राणि तानि कलहमित्राणि। ततो **मे ममोदन्तं वहत।** एवमुक्ते **तेऽपि** वृषभाः **प्रतिशृण्वन्ति** अभ्युपगच्छन्ति। तत **एवं** गत्यागतिभिस्तमतीवाऽऽवर्ज्य षण्मासान् यावत् तत्र चिकित्सां कारयन्ति। एव**मेकस्याम**नाथशालायां **षण्मासाः**, एवं द्वितीयस्यां तृतीयस्यामपि च ॥ २०११॥

तथा चाह—

**छम्मासा छम्मासा, बिइय तइयाए एव सालाए ।**
**काऊ अट्ठारस ऊ, अपउणे ताहे विवेगो उ ॥ २०१२ ॥**

एवमुक्तप्रकारेण **द्वितीयस्यामनाथशालायां षण्मासाः एवं तृतीयस्या**मपीति सर्व-सङ्कलनया **अष्टादश**मासान् चिकित्सां **कारयित्वा** प्रगुणीक्रियते। अथ प्रगुणो न भवति **ततस्तस्य अप्रगुणस्य भक्तविवेकः** कर्तुमुचितः॥ २०१२॥

सम्प्रति प्रागुक्तं द्वितीयमादेशं स्पष्टयति—

**अहवा गुरुणो जावज्जीवं, फासुयमप्फासुएण तेगिच्छं ।**
**वसभे बारस वासा, अट्ठारस भिक्खुणो मासा ॥ २०१३ ॥**

**गुरोः** आचार्यस्य **यावज्जीवं चिकित्सां प्रासुकेनाऽप्रासुकेन** वा कुर्वन्ति, सर्वस्यापि गच्छस्य तदधीनत्वात्, यथाशक्ति निरन्तरं सूत्रार्थनिर्णयप्रवृत्तेश्च। **वृषभे द्वादशवर्षाणि** चिकित्सा, ततः परं शक्तौ भक्तविवेकः, एतावता कालेनान्यस्यापि समस्तगच्छभारोद्वहनसमर्थस्य वृषभस्यो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्थानात्। **अष्टादशमासा भिक्षोश्चि**कित्सायाम्, ततः परमसाध्यतया शक्तौ सत्यां भक्तविवेकस्यैव कर्तुमुचितत्वात् ॥२०१३॥

**सूत्रम्— आयरिय-उवज्झाए सरेमाणे परं चउराय-पंचरायाओ कप्पागं भिक्खुं णो उवट्ठावेइ कप्पाए अत्थि याइं से केइ माणणिज्जे कप्पागे, णत्थि याइं से केइ छेए वा परिहारे वा, नत्थि याइं से केइ माणणिज्जे कप्पाए, से संतरा छेए वा परिहारे वा ॥ १५ ॥**

"आयरिय-उवज्झाए सरेमाणे" इत्यादि । अस्य सूत्रस्य सम्बन्धमाह—

**ओहाविय भग्गवते, होइ उवट्ठा पुणो उवट्ठंते ।**
**उक्कसणा वा पगया, इमा वि अण्णा समुक्कसणा ॥ २०१४ ॥**



पूर्वमवधावित उक्तः। स चेद**वधावितो भग्नव्रतो जायेत**, भग्नव्रतश्च भूत्वा **पुनरुपतिष्ठति** ततस्तस्मिन्नवधावितभग्नव्रते पुनरुपतिष्ठति भवत्यु**पस्थापना** कर्तव्या। तत उपस्थापना-प्रतिपादनार्थमधिकृतं सूत्रम्। **अथवा** पूर्वसूत्रे **समुत्कर्षणा प्रकृता**, इयमप्यधिकृत-

For Private and Personal Use Only

सूत्रेणाभिधीयमानाऽन्या **समुत्कर्षणा** स्थापनेत्यधिकृतसूत्रसम्बन्धः ॥२०१४॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**आचार्य उपाध्यायो वा स्मरन्** अयमुपस्थापनार्ह इति जानानः **परं चतूरात्रात् पञ्चरात्राद्वा कल्पाकं** सूत्रतोऽर्थतश्च प्राप्तं **भिक्षुं नोपस्थापयति**। तत्र यदि तस्मिन् **कल्पाके** सत्य**स्ति से** तस्य कल्पाकस्य **कश्चिद् माननीयः** पिता भ्राता वा ज्येष्ठः स्वामी वा **कल्पाको** भावी पञ्चदशरात्रेण वा ततो **नास्ति से** तस्य **कश्चित् च्छेदः परिहारो वा,** उपलक्षणमेतत्, अन्यदपि तपःप्रायश्चित्तम्, माननीयेऽनुपस्थापिते तस्योत्थापनाया अयोगात्। अथ **नास्ति से** तस्य **कश्चिद् माननीयः कल्पाको** भावी ततः से तस्याचार्यस्योपाध्यायस्य वा स्वकृतादन्तरात् **छेदः परिहारो वा।** इयमत्र भावना—अत्रादेशद्वयम्; एके प्राहुः-चतूरात्रात् परं यदि अन्यानि चत्वारि दिनानि नोपस्थापयति तत आचार्यस्योपाध्यायस्य च प्रत्येकं प्रत्येकं प्रायश्चित्तं चतुर्गुरुकं चतुर्गुरुकम्, अथ ततोप्यन्यानि चत्वारि दिनानि लङ्घयति ततः षड्लघुकं षड्लघुकम्, ततोऽन्यानि चत्वारि दिनानि ततः षड्गुरुकं षड्गुरुकं प्रायश्चित्तम्, ततोऽप्यन्यानि यदि चत्वारि दिनानि नोपस्थापयति ततश्चतुर्गुरुकश्चतुर्गुरुकश्छेदः ततोऽप्यन्यानि चत्वारि दिनानि यदि तर्हि षट् लघुकः षट् लघुकश्छेदः, ततोऽपि चेदन्यानि चत्वारि दिनानि ततः षड्गुरुकः

षड्गुरुकश्छेदः, ततः परमेकैकदिवसातिक्रमे मूला-ऽनवस्थाप्य-पाराञ्चितानि।

द्वितीयादेशवादिनः प्राहुः— पञ्चरात्रात् परं यदि नोपस्थापयति ततश्चतुर्गुरुकं चतुर्गुरुकं प्रायश्चित्तम्, ततोऽपि परं यदि पञ्चदिनानि लङ्घयति ततः षड्लघुकं षड्लघुकम्, ततः परमपि पञ्चरात्रातिक्रमे षड् गुरुकं षड्गुरुकम्, ततोऽपि परं यदि पञ्च दिनानि वाहयति ततश्चतुर्गुरुकश्चतुर्गुरुश्छेदः, ततः परमन्यानि चेद्दिनानि पञ्च ततः षड्लघुकः षड्लघुकश्छेदः, ततोऽपि पञ्चरात्रातिवाहने षड्गुरुकः षड्गुरुकश्छेदः। ततः परमेकैकदिवसातिवाहने मूला-ऽनवस्थाप्य-पाराञ्चितानि। एष सूत्रसङ्क्षेपार्थः॥ अधुना **भाष्य-निर्युक्तिविस्तरः**। तत्र भाष्यकारः प्राह—

**संभरण उवट्ठावण, तिण्णि उ पणगा हवंति उक्कोसा ।**
**माणणिज्जो पितादी तु, तेसऽसती छेद परिहारो ॥ २०१५ ॥**

गाथा २०१५-२०१८ दीक्षाविधिः ९०२ (B)

**संस्मरणमुपस्थापना**विषये यथा— एष उपस्थापयितव्यो वर्तते इति। तत्र माननीये पित्रादौ सति कल्पाकस्यातिवाहने **त्रयः पञ्चका भवन्त्युत्कर्षतः**। किमुक्तं भवति? विवक्षिते

भिक्षौ कल्पाके जाते सति यदि तस्य **माननीयः पित्रादि**रुपस्थाप्योऽस्ति, परमद्यापि कल्पाको नोपजायते, तर्हि स जघन्यतः पञ्चरात्रं प्रतीक्षाप्यते, मध्यमतो दशरात्रम्, उत्कर्षतः पञ्चदशरात्रं, तथापि चेन्माननीयः कल्पाको नोपजायते, तर्हि स कल्पाको भिक्षुरुपस्थापनीयः, नो चेदुत्थापयति तर्हि छेदः परिहारो वा प्रायश्चित्तम्। अथ तस्य माननीयाः पित्रादयो न सन्ति, ततस्**तेषामसत्य**भावे यदि तं चतूरात्रमध्ये पञ्चरात्रमध्ये वा नोपस्थापयति तथापि तस्य प्रायश्चित्तं **छेदः परिहारो वा**। छेद-परिहारग्रहणं सूचामात्रम्, तेनाऽऽदेशद्वयेन प्रागुक्तः प्रायश्चित्तविधिः द्रष्टव्यः ॥ २०१५॥

**अच्छउ ता उवठवणा, पुव्विं पव्वायणादि वत्तव्वा ।**
**अडयालपुच्छसुद्धे, भन्नति दुक्खं खु सामन्नं ॥ २०१६ ॥**

**तिष्ठतु तावदुपस्थापना पूर्वं प्रव्राजनादि**वक्तव्यता **वक्तव्या**। तत्र यथा **पञ्चकल्पे निशीथे** वा **अष्टाचत्वारिंशत्पृच्छाशुद्धो**ऽभिहितस्तथा अष्टाचत्वारिंशत्पृच्छाशुद्धे कृते तत्सम्मुखमिदं भण्यते— **दुःखं खु श्रामण्यं** परिपालयितुम् ॥ २०१६॥

तथाहि—

**गोयर अचित्तभोयण, सज्झायमण्हाण भूमिसेज्जाती ।**
**अब्भुवगयम्मि दिक्खा, दव्वादीसुं पसत्थेसुं ॥ २०१७॥**

यावज्जीवं **गोचर**चर्यया भिक्षामटित्वा **अचित्त**स्यैषणादिशुद्धस्य **भोजनं** कर्तव्यम्। तदपि बाल-वृद्ध-शैक्षकादिसंविभागेन। तथा चतुष्कालं **स्वाध्यायो** विधातव्यः। यावज्जीवं देशतः सर्वतश्चा**स्नानम्**। ऋतुबद्धे काले भूमौ शय्या। आदिशब्दाद्वर्षारात्रे फलकादिषु शयनम्, दिवसे न स्वप्तव्यम्, रात्रौ तृतीये यामे निद्रामोक्षः। एवमुक्ते य**द्यभ्युपगच्छति** तत एतस्मिन्नभ्युपगते तस्य **दीक्षा प्रशस्तेषु द्रव्यादिषु** प्रशस्ते द्रव्ये शाल्यादिसञ्चयादौ, प्रशस्ते क्षेत्रे गम्भीरसानुनादादौ, प्रशस्ते काले शुभतिथ्यादौ, प्रशस्ते भावे प्रवर्धमानपरिणामादौ दातव्या ॥ २०१७॥

**लग्गादी च तुरंते, अणुकूले दिज्जए उ अहजायं ।**
**सयमेव तु थिरहत्थो, गुरू जहण्णेण तिण्णऽट्ठा ॥ २०१८ ॥**

इहोत्सर्गतो लोचे कृते यथाजाते च रजोहरणादिके समर्पिते पश्चात् त्रिःकृत्वः सामायिक-मुच्चार्यते, इत्येष विधिः। यदि पुन**र्लग्नादिकं त्वरमाणं** स्यात्ततो**ऽनुकूले** लग्नादौ च,

आदिशब्दाद् मुहूर्त्तादिपरिग्रहः, त्वरमाणे शीघ्रं समापतति **यथाजातं** सनिषद्य-रजोहरण-मुखवस्त्रिकाऽग्रपूररूपं **दीयते** । उक्तं च— '**जहाजायं नाम सनिसेज्जं रयहरणं मुहपोत्तिया चोलपट्टो य**' इति। ततो यदि **गुरुः स्थिरहस्तः** न कम्पते अट्टा गृह्णानस्य हस्तः, तर्हि स **स्वयमेव जघन्येन तिस्त्रोऽट्टा** अव्यवच्छिन्ना गृह्णाति, समर्थः सर्वं वा लोचं करोति॥ २०१८॥

**अण्णो वा थिरहत्थो, सामाइय तिगुण अट्टगहणं च ।**
**तिगुणं पादक्खिण्णं, नित्थारग गुरुगणविवड्ढी ॥ २०१९ ॥**

आचार्यस्य स्थिरहस्तत्वाभावे **अन्यो वा स्थिरहस्तः** प्रव्राजयति समस्तं लोचं करोतीति भावः। तदनन्तरं गुरुः शोभने लग्नादौ प्राप्ते **त्रिगुणं** त्रीन् वारान् **सामायिक**मुच्चारयति। इयमत्र भावना —प्रथमतः प्रव्राजनीयमात्मनो वामपार्श्वे स्थापयित्वा चैत्यानि तेन सह वन्दन्ते, ततः परिहितचोलपट्टस्य रजोहरणं मुखवस्त्रिकां च ददाति। तदनन्तर**मट्टाग्रहणं** लोचं वा कृत्वा सामायिकारोपणनिमित्तं कायोत्सर्गं करोति, तत्र चतुर्विंशतिस्तवं चिन्तयित्वा नमस्कारेण पारयित्वा चतुर्विंशतिस्तवमाकृष्य त्रिःकृत्वः सामायिकमुच्चारयति। तदनन्तरमर्थग्रहणं स कारयितव्यः। सामायिकार्थस्तस्य व्याख्यायते इति भावः। ततः सूत्रतोऽर्थतश्च गृहीतं

सामायिकमिति तदनुज्ञानिमित्तं विधिना **त्रिगुणं प्रादक्षिण्यं** कार्यते। तत्र तृतीयस्यां प्रदक्षिणायामनुज्ञा क्रियते, यथा **निस्तारको भव, गुरुगुणैर्विवृद्धि**र्भवतु, वर्धस्वेत्यर्थः ॥ २०१९ ॥

एवं प्रवाजनायां कृतायां यत्कर्तव्यं तदाह—

**फासुय आहारो से, अणहिंडंतो य गाहए सिक्खं ।**
**ताहे उ उवट्ठावण, छज्जीवणियं तु पत्तस्स ॥ २०२० ॥**

प्रव्रज्याप्रदानानन्तरं **से** तस्य **प्रासुक आहारो** दीयते। स च भिक्षां न हिण्डाप्यते, किन्त्व**हिण्डमान** एव **शिक्षां** ग्रहणशिक्षामासेवनाशिक्षां च **ग्राह्यते। ततः षड्जीवनिकां च प्राप्तस्या**धीतषड्जीवनिकाध्ययनस्य **उपस्थापना** क्रियते॥ २०२० ॥

विपक्षे प्रायश्चित्तविधिमाह—

**अप्पत्ते अकहेत्ता, अणहिगय अपरिच्छ अतिक्कमे वा से ।**
**एक्केक्के चउगुरुगा, चोयग! सुत्तं तु कारणियं ॥ २०२१ ॥**

**अप्राप्ते** षड्जीवनिकायां पर्यायं वा जघन्यतः षण्मासानुत्कर्षतो द्वादशसंवत्सराणि, तथा **अकथयित्वा** जीवाजीवादीन्, तथा **अनधिगते** जीवाजीवादौ, तथा **अपरीक्षायां** परीक्षाया अभावे, तथा **से** तस्य उपस्थापयतोऽ**तिक्रमे,** एकैकस्य व्रतस्य वारत्रयमनुच्चारणे, एतेषु सर्वेषु प्रत्येक**मेकैकस्मिन्** प्रायश्चित्तं **चत्वारो गुरुकाः** । अथ सूत्रे पर्यायादिकं नोपात्तमिति तत्कथने कथं न सूत्रविरोधः[१] ? सूरिराह— हे **चोदक! सूत्रमिदं कारणिकं** पुरुषविशेषपात्रापेक्षम्, **अतः** पर्यायाद्यनभिधानेऽपि न दोषः ॥ २०२१ ॥

एनामेव गाथां वैतत्येन **भाष्यकृद्विवृणोति—**

**अपत्ते उ सुएणं, परियागमुवट्ठवेंते चउगुरुगा ।**
**आणादिणो य दोसा, विराहणा छण्ह कायाणं ॥ २०२२ ॥**

**श्रुतेन** षड्जीवनिकापर्यन्तेनाऽ**प्राप्ते, पर्यायं** वा जघन्यादिभेदभिन्नमप्राप्ते **उपस्थाप्यमाने** उपस्थापयितुः प्रायश्चित्तं **चत्वारो गुरुका**स्तपसा कालेन च गुरवः। न केवलमेतत्, किन्तु



---

१. °धः ? तत्राऽऽह – वा. मो. पु. सं. मु. ॥

**आज्ञादयः** आज्ञा-ऽनवस्था-मिथ्यात्व-विराधना**दोषाः** । तथा स उपस्थापितो भिक्षादौ किल कल्पिको भवति, ततस्तस्य भिक्षादिप्रेरणे **षण्णां कायानां विराधना,** अपरिज्ञानात् ॥ २०२२ ॥

तथा—

**सुत्तत्थमकहइत्ता, जीवा-ऽजीवे य बंध-मोक्खं च ।**
**उवठावणे चउगुरुगा, विराहणा जा भणियपुव्वं ॥ २०२३ ॥**

**सूत्रार्थं** षड्जीवनिकापर्यन्तम् **अकथयित्वा,** तथा **जीवा-ऽजीवान् बन्ध-मोक्षं** चाकथयित्वा एवमेवो**पस्थापने** क्रियमाणे उपस्थापयितु**श्चत्वारो गुरुका**स्तपोगुरवः प्रायश्चित्तम्। तथा **या विराधना पूर्वम्** अप्राप्तद्वारे षण्णां जीवनिकायाना**मुक्ता** साऽत्रापि द्रष्टव्या, ततस्तन्निष्पन्नमपि तस्य प्रायश्चित्तमुपढौकते ॥२०२३॥

**अणहिगयपुण्णपावं, उवठावंतस्स चउगुरू होंति ।**
**आणादिणो य दोसा, मालाए होति दिट्ठंतो ॥ २०२४ ॥**

**अनधिगतपुण्य-पापं** सूत्रार्थकथनेऽप्यविज्ञातपुण्यपाप**मुपस्थापयतः** प्रायश्चित्तं **चत्वारो गुरवः** कालगुरुका मासा **भवन्ति, आज्ञादयश्चा**नन्तराभिहिता **दोषाः**। अत्र **मालाया दृष्टान्तः**। यथा— स्थाणौ शूलाप्रख्ये पञ्चवर्णसुगन्धपुष्पमालामारोपयतो वचनीयतादयो दोषाः, एवमत्राप्यनधिगतपुण्यपापे व्रतान्यारोपयत आज्ञादय इति ॥२०२४॥

**उदउल्लादि परिच्छा, अहिगय नाऊण तो वए देंति ।**
**एक्केक्कं तिखुत्तो, जो न कुणइ तस्स चउगुरुगा ॥ २०२५ ॥**

गोचरादिगतेन **उदकार्द्रादिना** तस्य **परीक्षा** कर्तव्या। वृषभेण तत्परीक्षानिमित्तं तेन सह गोचरगतेन उदाकार्द्रेण हस्तेन मात्रकेण वा भिक्षा ग्राह्या, तत्र यदि स वारयति 'निषिद्धमेतत्, कथं यूयमेवं भिक्षाम[1]ग्राहिषत?' ततो ज्ञायते एष परिणतसूत्रार्थो**ऽधिगत**पुण्य-पापः। एवं शेषपरीक्षास्वपि भावनीयम्। तत उदकार्द्रादिपरीक्षाभिरधिगतपुण्यपापं **ज्ञात्वा ततो**ऽनन्तरं **व्रतानि** गुरवो **ददति**। कथम्? इत्याह—**एकैकं** व्रतं **त्रिःकृत्व**स्त्रीन् वारान् । यः **एवं न करोति तस्य चत्वारो गुरुका** द्वाभ्यां लघवस्तपसा कालेन च प्रायश्चित्तम् ॥२०२५॥

१. °मभिगृह्णीथ ? ततो - वा. मो. पु. मु. ॥

अथ परीक्षामेव वैतत्येनाह—

**उच्चारादि अथंडिल, वोसिर ठाणाइ वा वि पुढवीए ।**
**नदिमादिदगसमीवे, सागणि निक्खित्त तेउम्मि ॥ २०२६ ॥**

**वियणऽभिधारण वाए, हरिए जह पुढवीए तसेसुं च ।**
**एमेव गोयरगए, होइ परिच्छा उ काएहिं ॥ २०२७ ॥**

**उच्चारादेः आदिशब्दात्प्रश्रवणादिपरिग्रहः, अस्थण्डिले** सचित्तपृथिवीकायात्मिके **व्युत्सर्जनं** यदि वा **स्थानादि** स्थानमूर्ध्वस्थानम्, आदिशब्दान्निषदनादिपरिग्रहः, तत् **पृथिव्यां** पुथिवीकायस्योपरि कुरुते। तथाऽप्कायविषये **नद्याद्युदकसमीपे** अत्राऽऽदिशब्दात्तडागादि-परिग्रहः। तथा **तेजसि** तेजस्कायविषये **सनिक्षिप्ताग्नौ** प्रदेशे, गाथायां तु निक्षिप्तशब्द-स्यान्यथापाठः प्राकृतत्वात्, उच्चारादेर्व्युत्सर्जनमिति सर्वत्र सम्बध्यते ॥२०२६॥ तथा

**वाते** वातविषये **व्यजनस्य**- तालवृन्तस्या**भिधारणं** वातोदीरणायाऽऽभिमुख्येन धारणं करोति। **हरिते यथा पृथिव्यां** तथा वक्तव्यम् हरितकायस्योपरि स्थानादि करोति, यदि

वोच्चारादि व्युत्सर्जनमिति। **त्रसेष्वपि च** पृथिव्यामिव वक्तव्यम् । कीटिकानगराद्यतिप्रत्यासन्नमुच्चारादि स्थानादि वा करोतीति भावः। तत्र यदि वारयति तदा ज्ञायते 'सम्यक् परिणतोऽस्य धर्मः' इति योग्य उपस्थापनायाः। **एवमेव गोचरगते**ऽपि तस्मिन् **कायैः** पृथिव्यादिभि**र्भवति परीक्षा** कर्तव्या। तद्यथा— सरजस्केनोदकार्द्रेण हस्तेन वा मात्रकेण वा भिक्षा ग्राह्यते इत्यादि, परीक्षितस्य च व्रतारोपणं कर्तव्यम् ॥२०२७॥

तथा चाह—

**दव्वादि पसत्थ वया, एक्केक्क तिगं तु उवरिमं हेट्ठा ।**
**दुविहा तिविहा व दिसा, आयंबिल निव्विगइगा वा ॥ २०२८ ॥**

**द्रव्यादौ प्रशस्ते व्रता**न्यारोपणीयानि, **एकैकं** व्रतं **त्रिकं** त्रिःकृत्वः उच्चारयन्ति कथम्? इत्याह—**उवरिमं हेट्ठा** अधस्तान्मूलादारभ्य यावदुपरितनं पर्यन्तवर्तिसूत्रम्, इदमेकमुच्चारणम्, एवं त्रिन्वारान्। **दिग्** निबध्यते **द्विविधा त्रिविधा वा,** तत्र साधोर्द्विविधा, तद्यथा— आचार्यस्योपाध्यायस्य च; व्रतिन्यास्त्रिविधा, तद्यथा—आचार्यस्योपाध्यायस्य प्रवर्तिन्याश्च। तथा उपस्थापनानन्तरं तपः कार्यते, तच्च अभक्तार्थमाचाम्लं व्रतोच्चारणानन्तर**माचाम्लिका**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निर्विकृतिका वा** भवन्ति। येषामावलिकायामाचाम्लं ते आचाम्लं कुर्वन्ति, येषां तु निर्विकृतिकं ते निर्विकृतिकमित्यर्थः। उक्तं च– "**जद्दिवसं उवठावितो तद्दिवसं केसिंचि अभत्तट्ठो भवति केसिंचि आयंबिलं केसिंचि निव्विगइयं**' इत्यादि ॥२०२८॥

सम्प्रति माननीयपित्रादिविषये विधिशेषमाह–

**पियपुत्तखुड्डुथेरे, खुड्डुगथेरे अपावमाणम्मि ।**
**सिक्खावणपन्नवणा, दिट्ठंतो दंडियाईहिं ॥ २०२९ ॥**

द्वौ **पितापुत्रौ** प्रव्रजितौ । तौ यदि द्वावपि युगपत् प्राप्तौ तर्हि युगपदुपस्थाप्येते । अथ **खुड्डु**त्ति क्षुल्लकः पुत्रः सूत्रादिभिरप्राप्तः, **थेर**त्ति स्थविरः सूत्रादिभिः प्राप्तस्तर्हि स्थविरस्योपस्थापना विधेया। **खुड्डु**त्ति यदि पुनः क्षुल्लकः सूत्रादिभिः प्राप्तः, **स्थविरो** नाद्यापि प्राप्तो भवति, तर्हि तस्मिन् स्थविरे सूत्रादिक**मप्राप्नुवति** यावदुपस्थापनादिवसः शुद्धः समागच्छति तावत्स्थविरस्य प्रयत्नेन **शिक्षापना** क्रियते, आदरेण शिक्ष्यत इत्यर्थः, तत्र यदि उपस्थापनादिवसमर्यादया प्राप्तो भवति ततो द्वावपि युगपदुपस्थाप्येते । अथादरेण शिक्ष्यमाणेऽपि न



For Private and Personal Use Only

प्राप्तस्तदा स्थविरेणानुज्ञाते सति क्षुल्लक उपस्थाप्यते। अथ स्थविरो न मन्यते तदा **प्रज्ञापना** कर्तव्या, तस्यां च प्रज्ञापनायां क्रियमाणायां **दृष्टान्तो दण्डकादिभि**रभिधातव्यः। दण्डिको राजा, आदिशब्दादमात्यादिपरिग्रहः । स चैवम्—

एगो राया रज्जपरिब्भट्ठो सपुत्तोऽन्नरायाणमोलग्गिउमाढत्तो। सो राया पुत्तस्स तुट्ठो तं से पुत्तं रज्जे ठविउमिच्छइ, किं सो पिया नाणुजाणाइ? एवं तव जइ पुत्तो महव्वयरज्जं पावति किं न मन्नेसि? ॥२०२९॥

एतदेव सविशेषमाह—

**थेरेण अणुन्नाए, उवट्ठवणिज्जे ठवेंति पंचाहं ।**
**तिपणमणिच्छे उवरिं, वत्थुसहावेण जाऽहीयं ॥ २०३० ॥**

**स्थविरेणानुज्ञाते उपस्थापना** क्षुल्लकस्य कर्तव्या । अथ स दण्डिकादिभिर्दृष्टान्तैः प्रज्ञाप्यमानोपि नेच्छति तदा **पञ्चाहं** पञ्चदिवसान् यावत् तिष्ठन्ति, ततः पुनरपि प्रज्ञाप्यते तथाप्यनिच्छायां पुनरपि पञ्चाहं तिष्ठन्ति, पुनः प्रज्ञाप्यते तथाप्यनिष्टौ भूयः पञ्चाहमवतिष्ठन्ते,

एवं यदि त्रिपञ्चाहकालेन स्थविरः प्राप्तो भवति तदा युगपदुपस्थापना। अतः परं स्थविरेऽनिच्छत्यपि क्षुल्लक उपस्थाप्यते। **वत्थुसहावेण जाऽहीयं** इति वस्तुनः स्वभावो वस्तुस्वभावः, अहङ्कारी सन् 'अहं पुत्रस्यावमतरः करिष्ये' इति विचिन्त्य कदाचित् उन्निष्क्रामेत्, गुरोः क्षुल्लकस्य चोपरि प्रद्वेषं गच्छेत्, एवं स्वरूपे **वस्तुस्वभावे** ज्ञाते **त्रयाणां पञ्चाहानामुपर्यपि** स क्षुल्लकः प्रतीक्षाप्यते **यावत्तेनाधीत**मिति ॥ २०३० ॥

अथ द्वे अपि पिता-पुत्रयुगले तदाऽयं विधिः—

**दो थेर खुड्ड थेरे खुड्डग वोच्चत्थ मग्गणा होइ ।**
**रण्णो य अमच्चादी, संजइमज्झे महादेवी ॥ २०३१ ॥**

**द्वौ स्थविरौ** सपुत्रौ समकं प्रव्रजितौ, तत्र यदि द्वौ स्थविरौ प्राप्तौ न क्षुल्लकौ ततः स्थविरावुपस्थाप्येते। **खुड्डुत्ति** अथ द्वावपि क्षुल्लकौ प्राप्तौ, न स्थविरौ तदा पूर्ववत् प्रज्ञापनोत्कर्षतः पञ्चदशदिवसान्यावत्कर्तव्या। तथाप्यनिच्छायामुपेक्षा, वस्तुस्वभावं वा ज्ञात्वा प्रतीक्षापणम्। '**थेरे खुड्डुत्ति**' द्वौ स्थविरावेकश्च क्षुल्लकः सूत्रादिभिः प्राप्ताः अत्रोपस्थापना **वोच्चत्थ** इत्यादि

स्थविरक्षुल्लकस्य च विपर्ययस्ततो **मार्गणा भवति** कर्तव्या। सा चैवम्— द्वौ क्षुल्लकौ प्राप्तौ एकश्च स्थविरः प्राप्तः एको न प्राप्तः। तत्र यो न प्राप्तः स आचार्येण वृषभैर्वा प्रज्ञाप्यते, प्रज्ञापितः सन् यद्यनुजानाति तदा तत्क्षुल्लक उपस्थाप्यते। तथाप्यनिच्छायां **राजदृष्टान्तेन** तथैव प्रज्ञापना । अयं चात्र विशेषः— सोऽप्राप्तः स्थविरो भण्यते— एष तव पुत्रः परममेधावी सूत्रादिभिः प्राप्त इत्युपस्थाप्यताम्, यदि पुनस्त्वं न मुत्कलयसि तदेतौ द्वावपि पितापुत्रौ रत्नाधिकौ भविष्यतः तस्माद्विसर्जय एनमात्मीयं पुत्रम्, एषोऽपि तावद्भवतु रत्नाधिक इति। अतोऽपि परमनिच्छायामुपेक्षा वस्तुस्वभावं वा ज्ञात्वा तत् क्षुल्लकस्य प्रतीक्षापणमिति। **रन्नो य अमच्चाई** इत्यादि पश्चार्धम्, राजा अमात्यश्च समकं प्रव्रजितौ, समकमेव च सूत्रादिभिः प्राप्तौ, ततो युगपत् तौ द्वाप्युपस्थाप्येते। अथ राजा सूत्रादिभिः प्राप्तो न अमात्यः, राज्ञ उपस्थापना। अथामात्यः सूत्रादिभिः प्राप्तो न राजा ततो यावदुपस्थापनादिनमागच्छति तावदादरेण राजा शिक्ष्यते, ततो यदि प्राप्तो भवति ततो युगपदुपस्थापना। अथ तथापि राजा न प्राप्तस्तदा तेनानुज्ञाते अमात्य उपस्थाप्यते। अथ नेच्छति तदा पूर्ववद् दण्डिकदृष्टान्तेन राज्ञः प्रज्ञापना, तथापि चेन्नेच्छति ततः पञ्च दिवसान्यावदमात्यस्य प्रतीक्षापणम्। तथापि चेद् न प्राप्तो भूयः प्रज्ञापना। तथाऽप्यनिच्छायां पुनः पञ्चाहं प्रतीक्षणम्। एवं तृतीयपञ्चाहमपि। तथाप्यनिच्छायामुपेक्षा,

वस्तुस्वभावं वा ज्ञात्वाऽमात्यस्य प्रतीक्षापणम्। यदि वा वक्ष्यमाणोऽत्र विशेषः। यथा चामात्यस्य राज्ञा सहोक्तमेवमादिग्रहणसूचितयोः श्रेष्ठि-सार्थवाहयोरपि वक्तव्यमिति। **संजइमज्झे महादेवी** इति, द्वयोर्मातादुहित्रोर्द्वयोर्मातादुहितृयुगलयोर्महादेव्यमात्ययोश्च सर्वमेवं निरवशेषं वक्तव्यम् ॥ २०३१ ॥

सम्प्रति यदुक्तं 'वोच्चत्थ मग्गणा होइ' इति तद् व्याख्यानार्थमाह—

**दो पत्त पिया-पुत्ता, एगस्स तु पुत्त पत्त न उ थेरो ।**
**गहितो व सयं वियरइ, राइणितो होउ एस वि य ॥ २०३२ ॥**

**द्वौ पितापुत्रौ प्राप्तौ एकस्य तु** पितापुत्रस्य युगलस्य **पुत्रः प्राप्तो न तु स्थविरः**, स आचार्येण वृषभेण **वा** प्रज्ञापनां **ग्राहितः स्वयं वितरति** अनुजानाति तदा तत्क्षुल्लक उपस्थाप्यते। अथ नेच्छति तदा पूर्ववद्राजदृष्टान्तेन प्रज्ञापना । अन्यच्चैतौ पितापुत्रौ रत्नाधिकौ भविष्यतः **एषोऽपि च** तव पुत्रो यदि **रात्निकः** रत्नाधिको भवति **भवतु** नाम तव लाभ **एष** इति। तथाऽप्यनिच्छायां पूर्ववदुपेक्षादि ॥ २०३२॥

**राया रायाणो वा दोण्णि, वि सम पत्त दोसु पासेसु ।**
**ईसर सेट्ठि अमच्चे, निगम घडा कुल दुए खुड्डे ॥ २०३३ ॥**

**समगं तु अणेगेसुं, पत्तेसुं अणभिजोगमावलिया ।**
**एगतो दुहतो व ठिया, समराइणिया जहाऽऽसन्नं ॥ २०३४ ॥**

एको राजा, द्वितीयो राजराजः, तौ समकं प्रव्रजितौ । अत्रापि यथा पितापुत्रयोः राजाऽमात्ययोर्वा प्रागुक्तं तथा निरवशेषं वक्तव्यम्, केवलममात्यादिके सूत्रादिभिः प्राप्ते उपस्थाप्यमाने यदि राजादिरप्रीतिं करोति, दारुणस्वभावतया ब्रूते वा किमपि परुषम्, तदा सोऽप्राप्तोऽपीतरैरमात्यादिभिः सममुपस्थाप्यते। अथवा **रायत्ति** यत्र एको राजा तत्र सोऽमात्यादीनां सर्वेषां रत्नाधिकः कर्तव्यः। **रायाणोत्ति** यत्र पुन**र्द्वि**प्रभृतयो राजानः समकं प्रव्रजिताः **समकं** च सूत्रादिभिः **प्राप्ताः** ते समरत्नाधिकाः कर्तव्या इत्युपस्थाप्यमाना **द्वयोः पार्श्वयोः** स्थाप्यन्ते अत्रैवार्थे विशेषमाह—

पूर्वं पितापुत्रादिसम्बन्धेनासम्बद्धे**ष्वनेकेषु** राजसु **समकं** सूत्रादिभिः **प्राप्ते**ष्वत एव

एककालमुपस्थाप्यमानेषु **अणभिजोग**त्ति गुरुणा अन्येन वाभियोगो न कर्तव्यः, यथा इतस्तिष्ठथ इतस्तिष्ठथेति। किन्त्वे**वेकतः** पार्श्वे **द्विधातो वा** द्वयोर्वा पार्श्वयोर्यथैव **स्थिताः** स्वस्वभावेन तेषामा**वलिका** तथैव तिष्ठतु । तत्र यो **यथा** गुरोः **प्रत्यासन्नः** स तथा ज्येष्ठः, ये तूभयोः समश्रेण्या स्थितास्ते **समरत्नाधिकाः**।

इदानीं पूर्वगाथापश्चार्धव्याख्या– **ईसर** इत्यादि, यथा द्विप्रभृतयो राजान उक्ता एवं द्विप्रभृतयः ईश्वराः, द्विप्रभृतयः **श्रेष्ठिनः** द्विप्रभृतयो**ऽमात्याः**, द्विप्रभृतयः **निगमाः** वणिजः, **घड**त्ति गोष्ठी द्विप्रभृतयो गोष्ठ्य, यदि वा द्विप्रभृतयो गोष्ठिकाः, यदि वा **कुल**त्ति द्विप्रभृतयो महाकुलाः, द्विकग्रहणमुपलक्षणं, तेन त्रिप्रभृतय इति (इत्याद्यपि) द्रष्टव्यं, तथैव च व्याख्यानम्। **खुड्डु**त्ति क्षुल्लकाः समकं प्रव्राजिता इत्यर्थः, समकं सूत्रादिभिः प्राप्ताः समकं रत्नाधिकाः कर्तव्याः। एतेषामेव मध्ये यः पूर्वं प्राप्तः स पूर्वमुपस्थाप्यते इति **वृद्धसम्प्रदायः** ॥२०३३॥२०३४॥

**ईसिं अण्णोअत्ता, वामे पासम्मि होइ आवलिया।**
**अभिसरणम्मि य वड्ढी, ओसरणे सो व अण्णो वा ॥ २०३५ ॥**



For Private and Personal Use Only

तेषामुपस्थाप्यमानानामा**मावलिका** गुरो**र्वामपार्श्वे** गजदन्तवत् **ईषदवनम्य** अवनतीभूय स्थिताः। तत्र यदि ते गुरुसमीपमग्रतो**ऽभिसरन्ति** तदा गच्छस्य **वृद्धि**र्ज्ञातव्या, यथान्येऽपि बहवः प्रव्रजिष्यन्तीति। अथ पश्चात् बहि**रपसरन्ति** तदा **स** उपस्थाप्यमानो**ऽन्यो** वा उन्निष्क्रमिष्यति अपद्रविष्यति चेति ज्ञातव्यमेतद् निमित्तकथनम् ॥२०३५॥

**सूत्रम्— आयरिय-उवज्झाए असरमाणे परं चउरायपंचरायातो कप्पागं भिक्खुं नो उवट्ठावेइ तं चेव भाणियव्वं ॥ सू. १६ ॥**

अस्य व्याख्या प्राग्वत् । नवरं तं चेव भाणियव्वं इति वचनादेवं परिपूर्णः पाठो द्रष्टव्यः— ***कप्पाए अत्थि याइं से केइ माणणिज्जे कप्पागे, नत्थि याइं से केइ छेए वा परिहारे वा, नत्थि याइं से केइ माणणिज्जे कप्पाए, से संतरा छेदे वा परिहारे वा ॥***

अस्यापि व्याख्या प्राग्वत् । तत्र यैः कारणैर्न स्मरति तान्युपदर्शयन्नाह—

**दप्पेण१ पमाएण व२, विक्खेवेण व३ गिलाणतो वावि४ ।**
**एएहि असरमाणे, चउव्विहं होइ पच्छित्तं ॥ २०३६ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**दर्पो** निष्कारणोऽनादरस्तेन १ **प्रमादः** विकथादीनां पञ्चानां प्रमादानामन्यतमस्तेन २ **व्याक्षेपेण** सीवनादिना ३ **ग्लान्यतो वा** ४ **एतैः** कारणै**रस्मरति प्रायश्चित्त**मस्मरणनिमित्तं **चतुर्विधम्,** अस्मरणकारणस्य दर्पादेश्चतुःप्रकारत्वात् ॥२०३६॥ तदेवाभिधित्सुः प्रथमतो दर्पतः प्रमादेन चाह—

**वायाम-वग्गणादिसु, दप्पेण अणुट्ठवेंति चउ गुरुगा१ ।**
**विकहादिपमाएण व, चउ लहुगा होंति बोधव्वा२ ॥ २०३७ ॥**

**व्यायाम-वल्गनादिषु** व्यापृततया यो निष्कारणोऽनादर उपस्थापनायाः स दर्प उच्यते, तेन **दर्पेणानुपस्थापयति** प्रायश्चित्तं **चत्वारो गुरुकाः** १। **विकथादिना** अन्यतमेन **प्रमादेना-नुपस्थापयति चत्वारो लघुका भवन्ति बोद्धव्याः** ॥ २०३७॥

**सिव्वण-तुण्ण-सज्झाय-ज्झाण-लेवादिदाणकज्जेसु ।**
**विक्खेवे होइ गुरुगो३ गेलन्नेणं तु मास लहू ४ ॥२०३८॥**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सीवन-तूर्णन-स्वाध्याय-ध्यान-पात्रलेपादिदानकार्यैः**, गाथायां सप्तमी तृतीयार्थे, यो **व्याक्षेपस्तस्मिन्** व्याक्षेपेऽनुपस्थापयति प्रायश्चित्तं **भवति गुरुको** मासः ३। **ग्लान्येन** त्वनुपस्थापयति **मासलघु** ४॥ २०३८॥

सम्प्रति यैः कारणैः स्मरतोऽस्मरतश्चानुस्थापयतः प्रायश्चित्तं न भवति तान्यभिधित्सुराह—

**धम्मकहा इड्ढिमतो, वादे अच्चुक्कडे व गेलण्णे ।**
**बिइय पदं चरमपएसु, दोसु पुरिमेसु तं नत्थि ॥ २०३९ ॥**

**ऋद्धिमतः** राज्ञो युवराजस्यामात्यादेर्वा प्रतिदिवसमागच्छतो **धर्मकथा** कथ्यते। परप्रवादी वा कश्चनाप्युपस्थितः स **वादे** निग्रहीतव्यः इति तन्निग्रहणाय विशेषतः शास्त्राभ्यासे तेन सह वादे वा दीयमाने, यदि वा आचार्यस्यान्यस्य वा साधोर्यो वा उपस्थाप्यस्तस्य वा **अत्युत्कटे ग्लानत्वे** जाते व्याकु[1]लीभवनतः स्मरन्नस्मरन् वा यद्यपि नोपस्थापयति तथापि न तस्य प्रायश्चित्तं, कारणतो व्याकुली[2]भूतत्वात्। एतच्च प्रायश्चित्ताभावलक्षणं, **द्वितीय-**

१. °लीभूतः स्म° मो. मु.॥ २. °लीभवनात् ए° वा. मो. पु. सं.॥



For Private and Personal Use Only

**पदम**पवादपदं **चरमपदयोर्द्वयो**र्व्याक्षेपग्लानत्वलक्षणयोरवगन्तव्यम् । तथाहि—धर्मकथा-वादाभ्यां व्याक्षेप उक्तः, ग्लानत्वपदेन च ग्लानत्वमिति। **पूर्वयोस्तु द्वयोः** पदयोः **तद्** अपवादपदं **नास्ति**। एतच्च चतुर्विधं प्रायश्चित्तमस्मरणनिमित्तमुक्तम्। अस्मरणतस्तु चतूरात्रपञ्चरात्राद्यतिक्रमे यत् प्रायश्चित्तं तत् पूर्वसूत्रे इवात्रापि निरवशेषं द्रष्टव्यम् ॥२०३९॥

**सूत्रम्— आयरिय उवज्झाए सरमाणे वा असरमाणे वा परं दसरायकप्पातो कप्पागं भिक्खुं नो उवट्ठावेति, कप्पाए अत्थि याइं से केइ माणणिज्जे कप्पाए, नत्थि याइं से केइ छेदे वा परिहारे वा, नत्थि याइं से केइ माणणिज्जे कप्पाए, संवच्छरं तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा ॥१७॥**

"आयरियउवज्झाए" इत्यादि सूत्रम्, **आचार्य उपाध्यायो वा स्मरन् अस्मरन् वा** यदा स्मरति तदा न साधकं नक्षत्रादिकं, यदा तु साधकं नक्षत्रादिकं तदा बहु व्याक्षेपतो न स्मरति, तत उक्तं स्मरन्वा अस्मरन्वा **परं दशरात्रकल्पात्** दशरात्रात्कालात्**कल्पाकं भिक्षुं नोपस्थायति,** तत्र यदि तस्मिन् **कल्पाके** सति **अस्ति से** तस्य कल्पाकस्य **कश्चिद्**

**माननीयः** पित्रादिर्भावी **कल्पाक**स्ततो नोपस्थापयति तर्हि **नास्ति से** तस्यानुपस्थापयतः **कश्चित् छेदः परिहारो वा,** अथ **नास्ति से** तस्य कल्पाकस्य **कश्चिन्माननीयः** पित्रादिर्भावी **कल्पाक**स्तर्हि तस्यानुपस्थायतः छेदः परिहारो वा, प्रथमादेशत इति वाक्यशेषः। द्वितीयादेशेन पुनः छेदेन परिहारतपसा वा अदम्यमानस्य **तत्प्रत्ययम**नुपस्थापनाप्रत्ययं **तस्य संवत्सरं** यावन्न **कल्पते आचार्यत्वमुद्देष्टुम**नुज्ञातुं, संवत्सरं यावत् गणो ह्रियते इति भावः। एष सूत्रसंक्षेपार्थः। व्यासार्थं तु **भाष्यकृ**दभिधित्सुः प्रथमतो दशरात्रनिबन्धनमाह—

**सरमाणे पंच दिणा, असरणमाणे वि तत्तिया चेव ।**
**कालोत्ति व समओत्ति वा, अद्धा कप्पो त्ति एगट्ठं ॥ २०४० ॥**

**स्मरत्यपि** 'चउराय पंचरायातो' इत्यनेन **पञ्चदिनान्युक्तानि, अस्मरत्यपि तावन्ति चैव** पञ्च दिनानि चैवोक्तानि। इदं च स्मरणाऽस्मरणमिश्रकसूत्रम्, अतो दशरात्रकल्पादित्युक्तम्। अत्रैव यः कल्पशब्दस्तद्व्याख्यानमाह–**काल इति वा समय इति वा अद्धा इति वा कल्प इति वा एकार्थम्**। ततो दशरात्रकल्पादिति दशरात्रकालादिति द्रष्टव्यम् ॥२०४० ॥

सम्प्रति स्मरणाऽस्मरणं भावयति—

**जाहे सुमरइ ताहे, असाहगं रिक्ख-लग्ग-दिणमादी ।**
**बहुविक्खेवंम्मि य गणे, सरियंपि पुणो वि विस्सरति ॥ २०४१ ॥**

**यदा स्मरति तदा असाधकमप्रयोजकमृक्ष-लग्न-दिनादि,** आदिशब्दात् मुहूर्तादि-परिग्रहः। **बहुव्याक्षेपे च गणे** गच्छे **स्मृतमपि पुनरपि विस्मरति,** तत एवं स्मरणा-स्मरणसम्भवः॥ २०४१ ॥

अत्रैव प्रायश्चित्तविधिं सविशेषमाह—

**दसदिवसे चउगुरुगा, दसेव छल्लहुग छग्गुरू चेव ।**
**तत्तो छेदो मूलं, अणवट्ठप्पो य पारंची ॥ २०४२ ॥**

तस्मिन्नधिकृते कल्पाके जाते सति यदि स्मरणास्मरणतो **दश दिवसान**तिक्रामति, ततस्तस्यानुपस्थापयतः प्रायश्चित्तं चत्वारो **गुरुकाः,** ततः परमप्यन्यानि **दशैव** चेत् दिनान्यतिवाहयति ततः **षड्लघुकम्**। ततः परतोऽपि दिनदशकातिक्रमे **षड्गुरुकम्**। **तत्तो**

श्री व्यवहार-सूत्रम् चतुर्थ उद्देशकः ११४ (A)

**छेदोत्ति** ततः परमेवं छेदस्त्रिधा वक्तव्यः, स चैवं- ततोऽपि परतो यद्यन्यानि दश दिनानि लङ्घयति तर्हि चतुर्गुरुकश्छेदः। ततोऽपि परतो दिनदशकातिक्रमे षड्लघुकश्छेदः, ततोऽन्य-दशदिवसातिक्रमे षड्गुरुकश्छेदः। **मूलं अणवट्ठप्पो य पारंची** इति, तत एकदिवसातिक्रमे मूलं, ततोऽपि परमेकदिनातिक्रमे अनवस्थाप्यो भवति, ततोऽपि परमेकस्य दिवसस्यातिवाहने पाराञ्चिको जायते॥ २०४२॥

**एसादेसो पढमो, बितिए तवसा अदम्ममाणम्मि ।**
**उभयबलदुब्बले वा, संवच्छरमा दिसा हरणं ॥ २०४३ ॥**

**एषः** अनन्तरोदित **आदेशः** प्रथमः। **द्वितीये** आदेशे पुनस्**तपसा,** उपलक्षणमेतत्, छेदेन वा **अदम्यमाने,** यदि वा **उभयबलेन** धृतिबलेन कायबलेन च, उपलक्षणमेतदन्यतरैकबलेन वा **दुर्बले** तपसः छेदस्य वा दातुमशक्यतया **संवत्सरं** यावत् **दिशः** आचार्यत्वस्य **हरणम्** ॥ २०४३॥

**एते दो आदेसा, मीसगसुत्ते हवंति नायव्वा ।**
**पढम-बिईएसुं पुण, सुत्ते इमं तु नाणत्तं ॥ २०४४ ॥**

सूत्र १८ गाथा २०४३-२०४७ गीतार्थ-निश्रया विहरणम् ११४ (A)

**एतौ**-अनन्तरोदितौ **द्वावप्यादेशौ मिश्रकसूत्रे भवतो ज्ञातव्यौ। प्रथमद्वितीययोः पुनः सूत्रयोरिद**मादेशविषयं प्रत्येकं **नानात्वम्** ॥ २०४४॥

तदेवाह—

**चउरो य पंच दिवसा, चउग्गुरुं एव होति छेदो वि ।**
**तत्तो मूलं नवमं, चरमंपि य एगसरगं तु ॥ २०४५ ॥**

प्रथमे द्वितीये च सूत्रे प्रत्येकमिमावादेशौ । प्रथम आदेशः— तस्मिन् विवक्षिते कल्पाके जाते सति यदि **चतुरो दिवसा**नतिवाहयति तदा **चतुर्गुरु** ततो भूयो भूयश्चतुश्चतुर्दिनातिक्रमे षड्लघु, षड्गुरुकम्, **एवं छेदोऽपि** त्रिधा वक्तव्यः, तदनन्तरं **मूलं नवम**मनवस्थाप्यम्, **चरमं** पाराञ्चित**मेकसरकम्** एकैकदिनातिक्रमे वक्तव्यम् । द्वितीय आदेशः- **पञ्चदिवसा**तिक्रमे **चतुर्गुरु,** एवं पञ्च पञ्चातिक्रमे, भावार्थः प्रागेव सप्रपञ्चं भावितः । एतच्चादेशद्वयं प्रथमसूत्रे द्वितीयसूत्रे च स्वस्थानेऽपि नोक्तं, लाघवात् ॥ २०४५ ॥

**सूत्रम्— भिक्खू य गणाओ अवक्कम्म अन्नं गणं उवसंपज्जित्ता णं विहरेज्जा, तं च केइ साहम्मिए पासित्ता वएज्जा, कं अज्जो! उवसंपज्जित्ता णं विहरसि ? जे तत्थ सव्वराइणीए तं वएज्जा । अह भंते ! कस्स कप्पाए ? जे तत्थ सव्वबहुसुए तं वएज्जा। जं वा से भगवं वक्खति, तस्स आणा-उववाय-वयणनिद्देसे चिट्ठिस्सामि ॥ १८ ॥**

''भिक्खू य गणातो अवक्कम्मे''त्यादि, अस्य सूत्रस्य सम्बन्धमाह—

**कीस गणो मे गुरुणो, हितो त्ति इय भिक्खु अन्नहि गच्छे ।**
**गणहरणेण कलुसितो, स एव भिक्खू वए अण्णं ॥ २०४६ ॥**

पूर्वसूत्रे गणापहरणमुक्तं ततः **कीस** किमिति **गणः मे** मम **गुरोर्हृत इति** विचिन्त्य **इति** अस्मादेव गुर्वपमानलक्षणात्कारणाद् **भिक्षुः अन्यत्र** गणान्तरे **गच्छेत्**। यदि वा यस्य गणोऽपहृतः **स एव गणहरणेन कलुषितः** सन् **अन्यं** गणं **व्रजेत्**। ततोऽन्यगणोपसम्पत् प्रतिपादनार्थमधिकृतं सूत्रमिति सूत्रसम्बन्धः ॥२०४६॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**भिक्षुर्गणादपक्रम्य** विशिष्टसूत्रार्थनिमित्त**मन्यगणमुपसम्पद्य विहरेत्** । **तं चोद्**भ्रामक-

भिक्षाचरप्रचुरे ग्रामे भिक्षार्थमटन्तं **दृष्ट्वा कश्चित्साधर्मिको वदेत्**- **कमाचार्यमुपसम्पद्य** त्वं **विहरसि**? एवं पृष्टः सन् **यस्तत्र सर्वरत्नाधिको** गीतार्थ आचार्यस्तं **वदेत्** । तस्मिन्नुक्ते स परिकल्पयति— यमेष व्यपदिशति सोऽगीतार्थः, न चायमगीतार्थनिश्रया विहरति। ततो भूयः पृच्छति— **अथ भदन्त** कस्य **कल्पेन,** सूत्रे स्त्रीत्वं प्राकृतत्वात्, कस्य निश्रया त्वं विहरसि? एवमुक्ते **यस्तत्र** सर्व**बहुश्रुतस्तं वदेत्** यथा तस्य सर्वरत्नाधिकस्याचार्यस्यागीतार्थस्य यः शिष्यो गीतार्थः सूत्रार्थनिष्णातः समस्तस्यापि गच्छस्य तप्तिकारी तन्निश्रयाहं विहरामीत्यादि वदेत्। **यं च स भगवानाख्याति,** यथैतस्याज्ञा त्वया कर्तव्या। **तस्याज्ञायामुपपाते**- समीपे **वचन-निर्देशे** च, आदेशप्रतीच्छायां **स्थास्यामी**ति सूत्रसंक्षेपार्थः। अधुना **भाष्यकृ**त्सूत्रं व्याख्यातुकामः प्रथमतः सूत्रविषयमुपदर्शयति—

**पव्वावितो अगीतेहिं, अन्नहिं गंतूण उभयनिम्मातो ।**
**आगम्म सेस साहण, ततो य साहू गओ अण्णत्थ ॥ २०४७ ॥**

कश्चिदगीतैरगीतार्थैराचार्यैः **प्रव्राजितः सोऽन्यत्र गणे गत्वा उभयतः**— सूत्रतोऽर्थतश्च **निर्मातो**ऽभवत् । ततः स स्वगणे **आगम्य शेषाणां** गीतार्थानां **साधूनां** साधनं करोति

सर्वानपि गीतार्थान् सूत्रार्थनिमित्तमितस्ततो विप्रसृतानाचार्यस्य समीपमानयति । समानीय च तेषां सूत्रार्थान् पूरयति । अन्यदा ततो गच्छात्कोऽपि **साधुरन्यत्र** गणान्तरे केनापि कार्येण **गतः** ॥२०४७॥

**तत्थवि य अण्णसाहुं, अट्टेत्ति अहिज्जमाण सोऊणं ।**
**बिंती मा पढ एवं, किं ति य अत्थो न हो एवं ॥ २०४८ ॥**

**तत्रापि च** गणान्तरेऽन्यं **साधु**माचाराङ्गे "**अट्टे लोए परिजुण्णे**" इति सूत्रे **अट्टे इति अधीयानं** पठन्तं **श्रुत्वा ब्रूते-मा पठ एवम्**। स प्राह-**किमिति** ? इतरो ब्रूते-**अर्थो न भवति**[1] न संवदत्येवं यथा त्वं पठसि, तस्मात् अट्टे इति द्विटकारको निर्देशोऽध्येतव्यः ॥२०४८॥

**अत्थो वि अत्थि एवं, आमं नमोक्कारमादि सव्वस्स ।**
**केरिस पुण अत्थो ती, बेति सुण सुत्तमट्टत्ति ॥ २०४९ ॥**

गाथा २०४८-२०५४ सूत्राऽर्था-ऽध्ययनादिः ११६ (A)

---

१. °वति विसंव° वा. मो. पु. मु. ॥

अधीयानः पृच्छति **अर्थोऽपि** ननु सूत्र**स्यास्ति ?**। इतरः प्राह-**आम**मेवं, न केवलमस्य सूत्रस्यार्थोऽस्ति, किन्तु **सर्वस्यापि नमस्कारादि**कस्य सूत्रस्यास्ति । एवमुक्तेऽध्येता पृच्छति **कीदृशः पुनरस्य** सूत्रस्या**र्थ ?** इति । इतरो **ब्रूते-शृणु,** प्रथमतो यथावस्थितं **सूत्रं** ततः पठति ''**अट्टे लोए परिजुण्णे**'' इति ॥ २०४९ ॥

एवं पठित्वा अस्य व्याख्यानमाह—

**अट्टे चउव्विहे खलु, दव्वे नदिमादि जत्थ तण-कट्ठा ।**
**आवत्तंते पडिया, अहव सुवन्नादि आवट्टे ॥२०५०॥**

**आर्त्तः** खलु **चतुर्विधः**, तद्यथा नामार्त्तः स्थापनार्त्तो द्रव्यार्त्तो भावार्त्तश्च। तत्र नामस्थापने सुप्रतीते । **द्रव्यार्त्तो**ऽपि नोआगमतो ज्ञशरीर-भव्यशरीर व्यतिरिक्तो यत्र **नद्यादेः** प्रदेशे **तृणकाष्ठानि पतितानि** आवर्तन्ते यत्र वा **सुवर्णाद्यावर्तते** स द्रष्टव्यः, आ सर्वतः परिभ्रमणेन ऋतानिगतानि यत्र यो वा स आर्त्त इति व्युत्पत्तेः ॥ २०५० ॥

**अहवा अत्तीभूतो, सचित्तादीहिं होइ दव्वम्मि ।**
**भावे कोहादीहिं, अभिभूतो होति अट्टो उ ॥ २०५१ ॥**

**अथवा सचित्तादिभि**र्द्रव्यैरसंप्राप्तैः प्राप्तवियुक्तैर्वा य **आर्त्तः** स **द्रव्यार्त्तः**, द्रव्यैरार्तो द्रव्यार्त्त इति व्युत्पत्तेः। **क्रोधादिभिरभिभूतो** नोआगमतो **भावार्त्तः** ॥ २०५१ ॥

तदेवमार्त्तशब्दार्थ उक्तः। सम्प्रति परिजीर्णशब्दार्थमाह—

**परिजुण्णो उ दरिद्दो, दव्वे धण-रयणसारपरिहीणो ।**
**भावे नाणादीहिं, परिजुण्णो एस लोगो उ ॥ २०५२ ॥**

**परिजीर्णोऽपि** चतुर्विधः। तद्यथा-नामपरिजीर्णः, द्रव्यपरिजीर्णः, स्थापनापरिजीर्णो, भावपरिजीर्णश्च। तत्र नामस्थापने प्रतीते। **द्रव्ये** द्रव्यतः परिजीर्णो नोआगमतो ज्ञशरीर-भव्यशरीरव्यतिरिक्तो **धन-रत्नसारपरिहीणो दरिद्रः। भावे** भावतः **परिजीर्णो ज्ञानादिभिः** परिहीण **एष** समस्तोऽपि **लोकः** ॥२०५२॥

**एवं सिट्ठे अट्ठे, सो बेती कत्थ भे अहीयं ति ।**
**अमुगस्स सति सगासे, अहगंपी तत्थ वच्चामि ॥ २०५३ ॥**

**एवमा**चाराङ्गगतसूत्रस्या**र्थे शिष्टे** कथिते सति **स ब्रूते-कुत्र भे** भवता त्वया**धीत**म्? इति स प्राह— **अमुकस्य सकाशे** समीपे। ततः सोऽध्येता चिन्तयति-**अहमपि तत्र व्रजामि** ॥२०५३॥

एवं चिन्तयित्वा—

**सो तत्थ गतोऽधिज्जति, मिलितो सज्झंतिएहिं उब्भामे ।**
**पुट्ठो सुत्तत्था ते, सरंति निस्साए कं विहरे ॥ २०५४ ॥**

स तत्र **गतः**, गत्वा च **अध्येति,** एतद्विषयमधिकृतं सूत्रम्, अधुना सूत्रव्याख्यानमाह— सोऽधीयानोऽन्यदा **उद्भ्रामे** उद्भ्रामकभिक्षानिमित्तं गतः, तत्र केचित्साधर्मिकाः केचिदन्य-गच्छवर्तिनः साधवः सहाध्यायिनो **मिलिताः** । तैः **सज्झंतिएहिं** ति सहाध्यायिभिः **पृष्टः**— **ते** तव **सूत्रार्थाः सरन्ति** निर्वहन्ति ? तथा **कं निश्राय** आश्रित्य भवान् **विहरति**? ॥२०५४॥

**अमुगं ति सो अगीतो, विहरइ कप्पेण गीयसिस्सस्स ।**
**अहमवि य तस्स कप्पा, जं वा भयवं उवदिसंति ॥ २०५५ ॥**

एवं पृष्टः सन् यस्तत्र सर्वरत्नाधिकोऽगीतोऽगीतार्थ आचार्यस्तं कथयति, यथा **अमुकं**[१] निश्रायाहं विहरामि। एतावता 'जे तत्थ सव्वराइणिए तं वएज्जा' इति व्याख्यातम्। एवमुक्ते ते चिन्तयन्ति— यमेष प्राह **सोऽगीतो**ऽगीतार्थस्ततो भूयः पृच्छन्ति, कस्य कल्पेन कस्य गीतार्थस्य निश्रया भवान् विहरति? एतेन 'अहं भंते कस्स कप्पाए' इति व्याख्यातम्, स प्राह यस्तत्रबहुश्रुततया **गीतार्थ**स्तस्य **शिष्यस्य कल्पेन** समस्तो गणो **विहरति, अहमपि** च **तस्य कल्पाद्** विहरामि। **यं वा भगवन्त उपदिशन्ति** यथा—अस्याज्ञा कर्तव्या तस्याज्ञोपपातवचननिर्देशेषु स्थास्यामि ।एतेन 'जं वा से भयवं अक्खाति' इत्यादि व्याख्यातम् ॥२०६३॥

इदमेव स्पष्टं भावयति—

**रायणियस्स उ गणो, गीयत्थोमस्स विहरई निस्सा ।**
**जो जेण होति महितो, तस्साणादी न हावेमि ॥ २०५६ ॥**

१. अमुकनि॰ वा. मो. पु. सं. ॥

**रात्निकस्य** रत्नाधिकस्य **गणो अवमस्य गीतार्थस्य निश्रया विहरति**। अहमपि तन्निश्रया विहरामि। अपि च तस्मिन् गणे **यो येन** गुणेन तपःप्रभृतिना **महितस्तस्याज्ञादि** आज्ञां समीपभवनं वचननिर्देशं च **न हापयामि,** सम्यक्करोमीति भावः ॥२०५६॥

**सूत्रम्— बहवे साहम्मिया इच्छेज्जा एगयओ अभिनिचारियं चारए, कप्पइ, णो ण्हं थेरे अणापुच्छित्ता एगयतो अभिनिचारियं चारए, जाव [परिहारे वा] ॥१९॥**

"बहवे साहम्मिया इच्छेज्जा" इत्यादि । अथास्य सूत्रस्य सम्बन्धमाह—

**इति खलु आणा बलिया, आणासारो य गच्छवासो उ ।**
**मोत्तुं आणापाणुं, सा कज्जा सव्वहिं जोगे ॥ २०५७ ॥**



अनन्तरसूत्रे इदमुक्तम्— 'आणा-उववाय-वयणनिद्देसे चिट्ठिस्सामि' इति तत **इति** एवमुक्तेन प्रकारेण **खल्वाज्ञा** गुरूणां **बलिका** बलवती, **आज्ञासारश्च** गुर्वाज्ञाकरणप्रतिपत्तिसारश्च **गच्छवास** इत्यावेदितम्। तत **आनप्राणौ** प्राणाऽपानौ **मुक्त्वा सा** गुर्वाज्ञा **सर्वत्र योगे** व्यापारे **कर्तव्येति**। एतदर्थप्रतिप्रादनार्थं चाधिकृतं सूत्रमिति सूत्रसम्बन्धः ॥२०५७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकारान्तरेण सम्बन्धमाह—

**अहवा तदुभयहेउं, आइण्णो सो बहुस्सुयगणो उ ।**
**उस्सूर भिक्खं खेत्ते, चइयाणं चारियाजोगो ॥ २०५८ ॥**

**अथवेति** प्रकारान्तरोपदर्शने। **स बहुश्रुतस्य गणस्तदुभयहेतोः** सूत्रार्थतदुभयनिमित्तं बहुभिः प्रातीच्छिकै**राकीर्णः** समाकुलः। तथा तस्मिन् क्षेत्रे **उत्सूरे** भिक्षावेला चिरं च परिभ्रम्यते, लभ्यते च रूक्षं **भैक्षं,** ततः केचित् रूक्षेण दुर्बलीभूताः क्षपका वा दुर्बला अभवन्, ग्लानोत्थिता वा सीदन्ति। एवं तेन **क्षेत्रेण त्याजितानां** केषांचित् **चरिकायोगो** भवति, ततश्चरिकायोगप्रतिपादनार्थमधिकृतं सूत्रम्॥ २०५८॥ एवमनेन सम्बन्धेनायातस्यास्य व्याख्या—

**बहवस्त्रिप्रभृतिकाः साधर्मिकाः** सांभोगिका **इच्छेयुः, एकतः** सहिता इत्यर्थः, **अभिनिचारिकाम्** अभिमुख्येन नियता चरिका सूत्रोपदेशेन बहिर्व्रजिकादिषु दुर्बलानामाप्यायननिमित्तं पूर्वाह्णे काले समुत्कृष्टं समुदानं लब्धुं गमनं अभिनिचारिका, तां **चरितुं** समाचरितुं, कर्तुमित्यर्थः एवमेतेषामिच्छतां **कल्पते, नो ण्ह**मिति वाक्यालङ्कारे, **स्थविराना**चार्यान**नापृच्छ्य एकतः** संहताना**मभिनिचारिकां चरितुम्**। यदि पुनः स्थविरान् अनापृच्छ्य व्रजन्ति ततः प्रायश्चित्तं



For Private and Personal Use Only

मासलघु, स्वच्छन्दचारित्वात्। **यावद्** ग्रहणादेवं परिपूर्णः पाठो द्रष्टव्यः।

***"कप्पति ण्हं थेरे आपुच्छित्ता एगयतो अभिनिचारियं चारए । थेरा य से वियरेज्जा एवं ण्हं कप्पइ एगयतो अभिनिचारियं चारए; थेरा य से नो वियरेज्जा एवं ण्हं नो कप्पइ एगयतो अभिनिचारियं चारए। जं तत्थ थेरेहिं अवितिण्णे एगयतो अभिनिचारियं चरंति से संतरा छेदे वा परिहारे वा।"***

अस्य व्याख्या— यत एवं स्वच्छन्दचारितायां मासलघु तस्मात् **कल्पते ण्ह**मिति पूर्ववत् **स्थविरानापृच्छ्य एकतः अभिनिचारिकां चरितुम्**। आपृच्छायामपि कृतायां यदि **स्थविरा वितरेयुरनुजानीयुरेवं ण्ह**मिति प्राग्वत् **कल्पते अभिनिचारिकां चरितुम्। स्थविराश्च न वितरेयुः** नानुजानीयुः प्रत्यपायं पश्यन्तः प्रयोजनाभावतो वा, ततो **न कल्पते एकतः अभिनिचारिकां चरितुम्। यत्**पुनस्तत्र **स्थविरैरवितीर्णे**ऽननुज्ञाते **एकतोऽभिनिचारिकां चरन्ति** तन्निमित्तं **से** तेषां प्रत्येक**मन्तरात्** अन्तरं नाम तस्मात्स्थानादप्रतिक्रमणं त[1]स्मात् **छेदः परिहारो वा**। उपलक्षणमेतदन्यद्वा तपः प्रायश्चित्तमिति॥

१. °त् स्थानात् छे° मो. ॥

**सूत्रम्— चरियापविट्ठे भिक्खू जाव चउराय-पंचरायाओ थेरे पासेज्जा, सच्चेव आलोयणा सच्चेव पडिक्कमणा सच्चेव ओग्गहस्स पुव्वाणुण्णवणा चिट्ठइ अहालंदमवि ओग्गहे ॥२०॥**

**चरियापविट्ठे भिक्खू** इत्यादि। चरिकानिमित्तं ये व्रजिकादिषु प्रविष्टास्तेषामेकतमं परिगृह्येदमुच्यते- **चरिकाप्रविष्टो भिक्षुः 'यावत्'** परिमाणावधारणे, ततोऽयमर्थः— एकरात्रं द्विरात्रं त्रिरात्रं **चतूरात्रं पञ्चरात्रं** यावत्, "व्याख्यानतो विशेषप्रतिपत्तिः" इति द्वितीयं तृतीयमपि च पञ्चाहं यावदिति द्रष्टव्यम्, **स्थविरान् पश्येत्,** कुत्र पश्येत् ? इति चेत्, उच्यते- अभिनिचारिकां गन्तुं मुत्कलापितेनाऽऽचार्येण यत्र सन्देशको दत्तस्तत्र स्थविरैः सह **सैवाऽऽलोचना** तिष्ठति या अन्यस्माद् गणादागतेनोपसम्पद्यमानेन वितीर्णा । **तदेव च प्रतिक्रमणं** यदवसन्नादागत्य तस्मिन् गच्छे उपसम्पद्यमानेन तस्मात् स्थानात् प्रतिक्रान्तम् । **सैव चावग्रहस्य पूर्वानुज्ञापना** तिष्ठति या अन्यस्माद् गणादागतेनोपसम्पद्यमानेन साधर्मिकावग्रहस्यानुज्ञापना कृता। **'यथालन्दमपि'** यथाकालमपि, 'अपिशब्दः' अत्र सम्भावने, न केवलं यथाकालं किन्तु चिरमपि[१] कालं यावत् ततो गच्छात् तस्य भावो न विपरिणमति तावद् **'अवग्रहे'**

**१. °पि यथाकालं वा. मो. पु. सं.॥**

अवग्रहस्य सैव पूर्वा अनुज्ञापना **तिष्ठति**। एतच्चान्तर्दीपकम्, अतो यथालन्दमप्यालोचना प्रतिक्रमणं च द्रष्टव्यम् ॥

सूत्रम्— **चरियापविट्ठे भिक्खू परं चउरायपंचरायाओ थेरे पासेज्जा पुणो आलोएज्जा, पुणो पडिक्कमेज्जा, पुणो छेयपरिहारस्स उवट्ठाएज्जा। भिक्खुभावस्स( उववायस्स ) अट्ठाए दोच्चंपि ओग्गहे अणुन्नवेयव्वे सिया। कप्पति से एवं वदित्तए-अणुजाणह भंते! मिओग्गहं अहालंदं धुवं नितियं[1] निच्छइयं[2] वेउट्टियं तओ पच्छा कायसंफासं ॥२१॥**

"चरियापविट्ठे भिक्खू परं चउरायपंचरायातो थेरे पासेज्जा पुणो आलोएज्जा" इत्यादि। **चरिकाप्रविष्टो भिक्षुः परं चतूरात्रात्पञ्चरात्राद्वा,** अत्रापि 'व्याख्यानतो विशेषप्रतिपत्तिः' तत इदं द्रष्टव्यं— यदि तस्य भावो विपरिणतो यथा— कोऽत्र स्थास्यति? इति ततश्चतूरात्रात् पञ्चरात्राद्वा आरतः **परतो** वा **स्थविरान्पश्येत्,** पुनरपि च तस्य भावो जातः, यथा— तिष्ठाम्यत्र, न चैवोपसम्पदा, तदा प्रथमोपसम्पदीव **पुनरालोचयेत्, पुनः प्रतिक्रामेत्, पुनः**

१. इदं तु ध्येयं-टीकायां 'नित्यम्' इति पाठः दृश्यते। २३ तम सूत्रे 'निययं' इति पाठः वर्तते॥ २. निच्छइयं-श्युब्रींगसंस्करणे आगमप्रकाशने च नास्ति। प्रतिलिपिमध्ये-'निच्छइयं' स्थाने 'सासयं' इति पाठः। एवमग्रेऽपि। अत्र२०६६ तमा गाथा सटीका द्रष्टव्या॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**छेदस्य परिहारस्य वा उपतिष्ठेत्**। किमुक्तं भवति ? विपरिणते अविपरिणते वा भावे यत् किञ्चिदापन्नः प्रायश्चित्तस्थानं तस्मिन् आलोचिते य आचार्येण च्छेदः परिहारो वा विनिर्दिष्टस्तं सम्यक् श्रद्धाय तस्य करणार्थमभ्युत्तिष्ठेत् भिक्षुरुपपातस्य आज्ञाया **अर्थाय,** पाठान्तरम्— **भिक्षुभावस्य** भिक्षुत्वस्यार्थाय मे यथावस्थितं भिक्षुत्वं भूयादित्येवमर्थः **द्वितीयमपि वारमवग्रहोऽनुज्ञातव्यः स्यात्**। कथम्? इत्याह-**अनुजानीत भदन्त** परमकल्याणयोगिन्! **मितमवग्रहं** गमनादीनाम्, उपलक्षणमेतत् मितं गमनं मितमवस्थानं मितं स्थान-निषीदन-त्वग्वर्तनादि अनुजानीत **यथालन्दं** यथाकालं **ध्रुवं** यदवश्यं कर्तव्यनियतं यावन्नावधावामि तावदवश्यमहापनीयम्। **नित्यं** यावत्सहायान् न लभे तावदावसनं यावदवश्यमनुष्ठेयम्। तथा **व्यावृत्तम्**। किमुक्तं भवति ? **व्यावृत्त्य** व्यावृत्त्य यद्बहुधा उपपातप्रतीच्छनं तद् अनुजानीत ततो गुरुणा अभ्युपगते **कायस्य** क्रमयुगलक्षणस्य शिरसा **संस्पर्शं** करोति। अथवा कृतिकर्मादिष्वागमने निर्गमने च यः कायसंस्पर्शस्तमप्यनुजानीत ।

एवं च नियट्टेवि दो गमा इति, एवममुना प्रकारेण यथा चरिकाप्रविष्टे द्वौ गमावुक्तौ द्वे सूत्रे अभिहिते, तथा चरिकानिवृत्तेपि द्वौ गमौ वक्तव्यौ। तौ चैवम्—



For Private and Personal Use Only

**सूत्रम्— चरियानियट्टे भिक्खू जाव चउरायपंचरायातो थेरे पासेज्जा, सच्चेव आलोयणा, सच्चेव पडिक्कमणा, सच्चेव उग्गहस्स पुव्वाणुण्णवणा चिट्ठति, अहालंदमवि उग्गहे ॥२२॥**

**चरियानियट्टे भिक्खू परं चउरायपचंरायातो थेरे पासेज्जा, पुणो आलोएज्जा, पुणो पडिक्कमेज्जा, पुणो [1]छेयस्स परिहारस्स वा उवट्ठाएज्जा, भिक्खुभावस्स अट्ठाए दोच्चंपि उग्गहे अणुण्णवेयव्वे सिया। कप्पइ से एवं वदित्तए- अणुजाणह भंते ! मितोग्गहं अहालंदं धुवं [2]नियं निच्छइयं वेउट्टियं ततो पच्छा कायसंफासमिति ॥ २३ ॥**

अस्य च सूत्रद्वयस्याप्यर्थः स एव यश्चरिकाप्रविष्टसूत्रद्वयस्य। यद्येवं किमर्थमनयोरुपादानं? चरिकाप्रविष्टसूत्राभ्यामेव गतार्थत्वात्; तथाहि- सैव चरिकाप्रविष्टानां सामाचारी सैव चरिकातो निवृत्तानामपीति। सत्यमेतत्, केवलमनुच्चारिते निवृत्तसूत्रद्वये यैव चरिकाप्रविष्टानां सामाचारी सैव चरिकातो निवृत्तानामपीति न लभ्यते, सूत्रेऽनुपात्तत्वात्; किन्त्वन्यत् किमपि कल्प्येत, ततः कल्पनान्तरं मा भूदिति निवृत्तसूत्रद्वयमिति सूत्रपञ्चकसंक्षेपार्थः।

---

**१. छेयपरिहारस्स उव° श्युब्रींग संस्करणे आगमप्रकाशने च॥ २. नितियं वेउट्टियं-श्युब्रींग. आगमप्रकाशने च॥**

सम्प्रति भाष्यकृद्विषमपदविवरणं चिकीर्षुः प्रथमतो यच्चरिकाप्रविष्टाद्यसूत्रेऽभिहितं 'जाव चउरायपंचरायातो थेरे पासेज्जा' इति तद्व्याख्यानार्थमाह—

**पंचाहग्गहणं पुण, बलकरणं होइ पंचहिं दिणेहिं ।**
**एगदुगतिण्णिपणगा, आसज्ज बलं विभासाए ॥ २०५९ ॥**

सूत्रे 'जाव चउराय पंचरायातो', इत्यत्र यत्**पञ्चाहग्रहणं पुन**र्विशेषतः कृतमाचार्येण, पुनःशब्दो विशेषे। तत् **पञ्चभिर्दिनैः बलकरणं** भवतीति ज्ञापनार्थम्। उक्तं च '**एगपणगद्धमासं, सट्ठी सुण मणुयगोणहत्थीणं** [**कल्पभाष्ये** गा. १५३०] इति। अथ पञ्चभिर्दिनैः कथमपि बलं न भवति ततो द्वितीयमपि पञ्चाहं यावत्। तथा चाह-**एकद्वित्रिपञ्चका**दिदिवसानां **बलमाश्रित्य विभाषया** विकल्पेन एकं वा द्वौ वा त्रीन्वा यावदित्येवंरूपेण सूत्रे चैकपञ्चरात्र-ग्रहणमुपलक्षणं व्याख्यानतो विशेषप्रतिपत्तिरिति अतो न भाष्य-सूत्रयोर्विरोधः ॥ २०५९ ॥

सम्प्रति 'सच्चेव आलोयणा' इत्यादि पदव्याख्यानार्थमाह—

**उवसंपज्जमाणेण, जा दत्ताऽऽलोयणा पुरा ।**
**अवसन्नेहिं आगम्म, पडिक्कंतो उ भावतो ॥ २०६० ॥**

**जा याऽणुण्णवणा पुव्वं, कया साहम्मि उग्गहे ।**
**[१]संभावणा एसा लंदं, जा भावो ताऽणुयत्तती ॥ २०६१ ॥**

या अन्यस्माद् गणादागते**नोपसम्पद्यमानेनालोचना पुरा दत्ता** सैव तिष्ठति। यश्च पूर्वम**वसन्नेभ्य आगत्य भावतः प्रतिक्रान्त**स्तदेव प्रतिक्रमणं तिष्ठति ॥ २०६० ॥

**या च पूर्व**मन्यस्माद् गणादागतेन **साधर्मिकावग्रहस्यानुज्ञापना कृता** सैव तिष्ठति। 'अहालन्दमवि' इत्यत्र योऽपिशब्दस्तस्यार्थः— सा च **एषा** न केवलं यावान्काल उक्तस्तावन्तं, किन्तु चिरमपि कालं **यावद्भावो**ऽधिकृतगच्छस्थायितया**ऽनुवर्तते ताव**त्सैवावग्रहस्यानुज्ञापना तिष्ठति। यथालन्दमपि इत्यन्तर्दीपकं, ततो यथालन्दमपि सैवालोचना तदेव च प्रतिक्रमण-मित्यपि द्रष्टव्यम् ॥२०६१॥

अधुना द्वितीये चरिकाप्रविष्टसूत्रे यदुक्तं 'परं चउराय-पंचरायातो' इत्यादि तद्व्याख्यानार्थमाह—

---

**१. संभावणाया सालंदं-लाडनू। संलवणाए सालंदं-पु. प्रे.॥**

**परं ति परिणते भावे, परब्भूतो उ सो पुणो ।**
**नवोवसंपयाए व, तत्थाऽऽलोए पडिक्कमे ॥ २०६२ ॥**

'परं चउराय पंचरायातो' इत्यत्र **परमिति** "व्याख्यानतो विशेषप्रतिपत्ति" स्ततोऽयमर्थः— परिणते गच्छान्मया निष्क्रमितव्यमित्येवं **परिणते भावे** अत एव गच्छात्**पराभूतः** सन् चतूरात्रात्पञ्चरात्राद्वा परत आरतो वा स्थविरान् पश्येत्। भावतश्च पुनर्गच्छावस्थायितया यदि प्रत्यावृत्तोऽजायत, ततः स पुनर्भूयो **नवोपसम्पदीव** तत्प्रथमतयोपसम्पदीव **तत्र** तेषु स्थविरेषु पार्श्वे **आलोचयेत् प्रतिक्रामेच्च** ॥ २०६२॥

**जइ पुण किंचाऽऽवण्णो, तत्थ उ आलोइउं उवट्ठाति ।**
**विप्परिणयम्मि भावे, एमेव अविप्परिणयम्मि ॥ २०६३ ॥**

**विपरिणते भावे यदि किञ्चित्** प्रायश्चित्तस्थान**मापन्नः**, **तत्र** प्रथमतः **आलोचयितु**-मालोचनां दातुमाचार्याणा**मुपतिष्ठति**, **एवमेव अविपरिणते**ऽपि द्रष्टव्यम् । किमुक्तं भवति? अविपरिणतेऽपि भावे यदि किञ्चिदापन्नः प्रायश्चित्तस्थानं ततस्तत्राप्यालोचयितुमालोचनां

दातुमाचार्याणामुपतिष्ठति, ततो विपरिणते भावे प्रायश्चित्तस्थानापत्तावालोचितायामाचार्या छेदं परिहारं वा प्रयच्छन्ति, तस्य श्रद्धापूर्वकं करणायाभ्युत्तिष्ठति ॥ २०६३ ॥

'भिक्खुभावस्स अट्ठाए' इत्यत्र पाठान्तरं 'भिक्खू उववायस्स अट्ठाए' इति तत्रोपपातशब्द-व्याख्यानार्थमाह—

**उववाओ निद्देसो, आणा विणओ य होंति एगट्ठा।**
**तस्सऽट्ठाए पुणरवि, मितोग्गहो वासगाणुण्णा ॥ २०६४ ॥**

**उपपातो निर्देश आज्ञा विनय** इत्येतानि **भवन्त्येकार्थानि**। ततोऽयमर्थो- भिक्षुः उपपातस्य— आज्ञाया **अर्थाय** करणाय **द्वितीयमपि** वारं **मितावग्रहा**नुज्ञापितेन मितावग्रहानुज्ञः। किमुक्तं भवति ? मिता **वासानुज्ञा**, एतेन मितावग्रहपदव्याख्यानं कृतम् ॥ २०६४॥

मितावग्रहणं सूत्रे मितगमनादीनामुपलक्षणम्, अतस्तदुपदर्शयति—

**मितगमण चिट्ठणातो, मियभासि मियं च भोयणं भंते! ।**
**मज्झ धुवं अणुजाणह, जा य धुवा गच्छमज्जाया ॥ २०६५ ॥**

**मितं गमनं** प्रयोजनवशतस्तस्य करणात्। मितं **चिट्ठणं**त्ति अवस्थानं, सततस्वाध्यायादि प्रवृत्ततया विश्रामनिमित्तं तस्य [१]किञ्चित्कालं भावात्। **मितं भाषितं,** कार्ये समापतिते तस्यावसरभावात् । मितं च **भोजनम्,** एककुक्षिपूरणमात्रस्य तस्य भगवतानुज्ञानात्। **भदन्त!** परमकल्याणयोगिन्! **मम ध्रुवमनुजानीत। या च ध्रुवा गच्छमर्यादा** तामप्यनुजानीत। इह ध्रुवं नियतं नैत्यिकमिति ते त्रयोऽप्येकार्थास्तथाप्यर्थभेदोऽस्ति। तत्र या ध्रुवा गच्छमर्यादा इत्यनेन ध्रुवशब्दार्थो व्याख्यातः, ध्रुवमवश्यकरणीयमिति ॥ २०६५॥

सम्प्रति नियत-नैत्यिकशब्दव्याख्यानार्थमाह—

**निययं च न हाविस्सं, अहमवि ओहायमादि जा मेरा ।**
**निच्चं जाव सहाए, न लभामि इहाऽऽवसे ताव ॥ २०६६ ॥**

**यावद**वधावनादिका **मर्यादा** तावद**हमपि नियतं न हापयिष्याम्य**वश्यकरणीयम्। किमुक्तं भवति? नियतमवधावनमर्यादातोऽवश्यमहापनीयमिति। तथा **नित्य**मिति कोऽर्थः?

१. कियत्का० वा. मो. पु. सं. मु. ॥

**यावत्सहायान्न लभे तावदिहाऽऽवसामी**ति, सहायलाभमर्यादाकमावसनं यावदवश्यमनुष्ठेयं नित्यमित्यर्थः ॥ २०६६ ॥

अधुना 'वेउव्विय'मित्यस्य भावार्थं कथयति—

**दिवसे दिवसे वेउव्विया, उ पक्खे य वंदणादीसु ।**
**पट्ठवणमादिएसु, उववायपडिच्छणा बहुधा ॥ २०६७ ॥**

**दिवसे दिवसे** प्रतिदिनमित्यर्थः। **पक्षे** पाक्षिकदिने, चशब्दाच्चातुर्मासिकदिने सांवत्सरिकदिने च **वन्दनादिषु**। आदिशब्दात् क्षामणकादिपरिग्रहः। तथा प्रस्थापनादिषु स्वाध्यायप्रस्थापनादिषु, अत्रादिशब्दादुद्देशसमुद्देशादिपरिग्रहः, यद् बहुधा अनेकप्रकार**मुपपातप्रतीच्छनं** तदनुजानीत ॥ २०६७॥

सम्प्रति 'कायसंफासं' इति व्याख्यानार्थमाह—

**अब्भुवगए उ गुरुणा, सिरेण संफुसति तस्स कमजुयलं ।**
**कितिकम्ममादिएसु व, निंतमनिंते य जे फासा ॥ २०६८ ॥**



For Private and Personal Use Only

अनुज्ञापनायां[१] **गुरुणाऽभ्युपगते** हृष्टः सन् **तस्य** गुरोः **क्रमयुगल**मात्मीयेन **शिरसा संस्पृशति** प्रणमतीत्यर्थः। तदेवं ततः पश्चात्कायसंस्पर्शं कुरुते इति व्याख्यातम्। अथवायमर्थः— ततः पश्चात्कायस्पर्शमनुज्ञापयति। तथा चाह–**कृतिकर्मादिषु** कृतिकर्म वन्दनकं विश्रामणादिकं **वा, आदि**शब्दात् क्षामणादिपरिग्रहः, तेषु कर्तव्येष्वा**गच्छति गच्छति च ये स्पर्शाः** कायसंस्पर्शाः, तान् अनुजानीतेति वाक्यशेषः॥ २०६८॥

सम्प्रति यत्पाठान्तरं भिक्षुभावस्येति तद्व्याख्यानार्थमाह—

**भिक्खूभावो सारण, वारण पडिचोयणा जहा पुव्विं ।**
**तह चेव इयाणिं पी, निज्जुत्ती सुत्तफासेसा ॥ २०६९ ॥**

**भिक्षुभावो** नाम **स्मारणा वारणा प्रतिचोदना,** अत्र प्रतिचोदनाग्रहणं चोदनाया उपलक्षणम्। तत्र विस्मृतेऽर्थे स्मारणा अनाचारस्य प्रतिषेधनं वारणा। स्खलितस्य पुनः शिक्षणं चोदना। पुनः पुनः स्खलितस्य निष्ठुरं शिक्षापणं प्रतिचोदना। एताभिर्यथावस्थितो भिक्षुभाव

१. °नायां कृतायां गुरु° वा. मो. पु. सं. मु. ॥

उपजायते, ततः कारणे कार्योपचाराद् एता एव भिक्षुभाव इत्युक्तम्। तदर्थायेति, किमुक्तं भवति? **यथा पूर्व**मेताः स्मारणादय आसीरन् तथा **इदानीमपि** स्युरित्येवमर्थम्। तदेवं कृता विषमपदव्याख्या **भाष्यकृता**। साम्प्रत**मेषा** वक्ष्यमाणा सूत्रस्पर्शा **सूत्रस्पर्शिका निर्युक्तिः** ॥२०६९॥

तामेव प्रथमसाधर्मिकसूत्रविषयामाह—

**आकिण्णो सो गच्छो, सुहदुक्खपडिच्छिएहिं सीसेहिं ।**
**दुब्बल खमग गिलाणे, निग्गम संदेसकहणे य ॥ २०७० ॥**

'बहवः साधर्मिका इच्छेयुरेकतो अभिनिचारिकां चरितु'मित्युक्तम् । तत्र पर आह— केन कारणेन तेषां निर्गमेच्छा? निर्युक्तिकृदाह— **सुखदुःखप्रतीच्छिकैः** सुखदुःखार्थमुपसम्पन्नैः प्रातीच्छिकैः **शिष्यैश्च स गच्छ आकीर्णः** समाकुलः, आकीर्णत्वेन च स नगरे स्थितः, अन्यत्र स्थितानामेषणीयभक्तपानासंभवात् । तत्र च तृतीयस्यां पौरुष्यां भिक्षावेला, चिरं च हिण्डितव्यम्, धान्याम्लकूरादिकं च तत्र भैक्षं, ततः केचित्साधवो **दुर्बला** जाताः, **क्षपका**

अपि पारणके प्रायोग्यालाभतो दुर्बला अभवन्, **ग्लाना** अप्यधुनोत्थिताः सीदन्ति। एतैः कारणैः **निर्गन्तु**मिच्छन्ति, इष्ट्वा चाचार्यं पृच्छन्ति। तेन चाचार्येण तान् दुर्बलान् ज्ञात्वा मुत्कलनीयाः। एतेन वितरणं व्याख्यातम्। ये पुनः निष्कारणं गन्तुकामा आपृच्छन्ति ते न मुत्कलनीयाः। ये चानुज्ञाता व्रजन्ति तेषामाचार्यः **सन्देशं कथयति** ॥ २०७० ॥

कथम्? इत्याह—

**अहमवि एहामेत्तो[१], अण्णत्थ इहेव मं मिलिज्जाह ।**

**अतिदुब्बले य नाउं, विसज्जणा नत्थि इतरेसिं ॥ २०७१ ॥**

यत्र यूयं गमिष्यथ **अहमपि इतः** स्थानात् तत्र एष्यामि **आगमिष्यामि**। अथवा **अन्यत्र** मम सकाशे आगन्तव्यम्। यदि **वात्रैव मम** यूयं **मिलेयुः**, यथाचार्यैः सन्दश्यिते तथा तैः कर्तव्यम्। आचार्येणा**प्यतिदुर्बलान्** तान् **ज्ञात्वा** तेषां **विसर्जना** मुत्कलना कर्तव्या। **इतरेषां** निष्कारणं गन्तुमनसां विसर्जना **नास्ति**। एतेन वितरणमवितरणं च सूत्रोपात्तं व्याख्यातम् ॥२०७१ ॥

**१. एहामोत्ता-मु.। एहामोता-लाडनू। एहामोत्त- ला. पाठान्तरम्॥ अत्र एहामि+एत्तो इति पाठस्य 'एहामेत्तो' जातमस्ति॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तं चेव पुव्वभणियं, आपुच्छण मास दोच्चऽणापुच्छा ।**
**उवओग बहिं सुणणा, साहू-सण्णी-गिहत्थेसु ॥ २०७२ ॥**

यदि निर्गन्तुमनसोऽनापृच्छया व्रजन्ति तदा प्रायश्चित्तं मासलघु। पृच्छायामपि कृतायां यदेव **पूर्वभणितं** तदेवाधिकृत्य गमनकाले द्वितीयवार**मापृच्छा** कर्तव्या। यदि पुन**र्द्वितीय**मपि वारं **नापृच्छन्ति** तदापि प्रायश्चित्तं मासलघु। किं कारणं द्वितीयमपि वारमापृच्छा कर्तव्या? इति चेद्, अत आह-**उवओगे**त्यादि, यदा पूर्वमापृष्टं तदाचार्योऽनुपयुक्त आसीत्, पश्चादुपयुक्तो जात उपयुक्तेन च तत्राशिवादयो दोषा ज्ञाताः। अथवा **बहिं सुणण**त्ति पश्चादाचार्येण विचारादिनिमित्तं बहिर्गतेन श्रुतम्, यथा— तत्र बहवो दोषा इति। यदि वा **साधुना** केनापि **संज्ञिना** श्रावकेण **गृहस्थेन** वा केनापि मिथ्यादृष्टिना भद्रकेण कथितमाचार्याणाम्, यथा तत्र बहवो दोषा इति। तस्मात् द्वितीयवारमवश्यं प्रष्टव्यम् ॥ २०७२॥

पृच्छायां च कृतायां यद्यपि तत्र न केचनापि दोषा आचार्येण निर्ज्ञातास्तथापि तत्र क्षेत्रप्रत्युपेक्षकाः पूर्वं प्रेषणीयाः । तथा चाह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नाऊण य निग्गमणं, पडिलेहण सुलभदुल्लभं भिक्खं ।**
**जे य गुणा आपुच्छा, जे वि य दोसा अणापुच्छा ॥ २०७३ ॥**

तेषां साधूनां **निर्गमनं ज्ञात्वा**ऽऽचार्येण साधुभिस्तस्य क्षेत्रस्य **प्रतिलेखनं** कारयितव्यम्, येन **सुलभं दुर्लभं** वा **भैक्षं** ज्ञायते। किं **च ये गुणा** द्वितीयवार**मापृच्छायां** भवन्ति ते प्रतिलेखनेऽपि द्रष्टव्याः। **येऽपि च दोषा** द्वितीयवार**मनापृच्छायां** ते दोषा अप्रत्युपेक्षणेऽपि ॥ २०७३ ॥

के ते? इत्याह—

**पच्चंत-सावयाई, तेणा दुभिक्ख तावसीतो य ।**
**नियग पदुद्दुट्ठाणं[1], फेडणा च हरियपण्णी य ॥ २०७४ ॥**

**प्रत्यन्ताः** प्रत्यन्तसीमावर्तिनो म्लेच्छा लोकानामुपप्लवोत्पादनायोत्थिता वर्तन्ते। **श्वापदानि** वा दुष्टानि व्याघ्रादीन्यपान्तराले सन्ति। **स्तेना** वा शरीरापहारिण उपध्यपहारिणो वा समन्तत उत्थिताः **दुर्भिक्षं** वा तत्र जातम्। **तापस्यो वा** प्रचुरमोहास्तत्र भूयस्यो ब्रह्मचर्योपद्रवाय

१. पदुद्दुद्धाणं - मु. लाडनू. । पदुद्दुद्धाणे - लाडनूपाठा° ॥



For Private and Personal Use Only

प्रभवन्ति। **निजका** वा अभिनवप्रव्रजितं साधुमुत्प्रव्राजयेयुः । **प्रद्विष्टो** वा तत्र कश्चिदुपस्थितः। **उद्दाण**त्ति उद्वसितो वा स कदाचित् देशो भवेत्। **फेडण**त्ति तत्र या वसतिः प्रागासीत् सा केनचिदपनीता स्यात्। **हरितपर्णी** इति तत्र दुर्भिक्षप्रायम्, अतः शाकादि हरितं बाहुल्येन भक्ष्यते, तच्च साधूनामकारकम्। अथवा हरितपर्णी इति नाम तत्र देशे केषुचित् गृहेषु राज्ञो दण्डं दत्त्वा देवतायै बल्यर्थं [आगन्तुकः] पुरुषो मार्यते । स च प्रव्रजितादिर्भिक्षाप्रविष्टः सन् तत्र गृहस्योपरि आर्द्रा वृक्षशाखा चिह्नं क्रियते, तत्र गृहीतसङ्केतो दूरत एव परिहरति, अगृहीतसङ्केतो विनश्यतीति ॥२०७४॥

सम्प्रति **चरिकाप्रविष्टादिसूत्राणां** चतुर्णामपि सामान्यतो **निर्युक्तिमाह—**

**अण्णत्थ तत्थ विपरिणते य गेलण्णे तत्थ होइ चउभंगो ।**
**फिडिया गयागतेसु य, अपुण्ण पुण्णेसु वा दोच्चं ॥ २०७५॥**

गाथा २०७१-२०७५ चरिकायां विधिः

**अन्यत्र** चरिकाप्रवेशे **तत्र** चरिकातो निवृत्तौ **विपरिणते** विपरिणामे जाते यद् आभवति यच्च नाऽऽभवति तेषां तद्वक्तव्यमिति शेषः । तथा **ग्लान्ये** ग्लानत्वे सति **भवति चतुर्भङ्गी**। तस्यां च चतुर्भङ्ग्यामगवेषणादौ यद् आभवति प्रायश्चित्तं तद्वाच्यमित्युपस्कारः। [तथा **स्फटिता**

विपरिणताः, तेषां **गतागतेषु** आचार्यस्तेषां समीपं गतस्ते वाऽऽचार्यस्य समीपमागता इत्येवंरूपेषु यावन्तं कालमधिकृतः] तस्मिन् **अपूर्णे पूर्णे वा** यदि **द्वितीय**मपि वारमवग्रहमनुज्ञापयन्ति ततो यद्विपरिणतैर्लब्धं तदाचार्यो न लभते, किन्तु यदा तेषां तथारूपं चित्तमजायत यथा द्वितीयमपि वारमवग्रहमनुज्ञापयामस्ततः प्रभृति यद् लब्धं तदाचार्यस्याऽऽभवति एष गाथार्थः ॥ २०७५ ॥

साम्प्रतमन्यत्र तत्र वा विपरिणते यत् आभाव्यं तदुपदर्शयति—

**अवरो परस्स निस्सं, जइ खलु सुहदुक्खिया करेज्जाहि ।**
**ओहब्भंतर सेहं, लभंति गुरु पुण्णे न लभइ य ॥ २०७६ ॥**



**यदि** चरिकाप्रविष्टा यदि वा चरिकातो निवृत्ता विपरिणामे किमस्माकमाचार्येण? वयमेव परस्परं सुखदुःखनिश्रां कुर्म इत्येवंरूपे जाते **अपरः** परस्य **परस्परं सुखदुःखिताः खलु निश्रां कुर्युः**। तदा यावान्[कालो]ऽवधिकृतस्तस्या**भ्यन्तरे** तस्मिन्नपूर्णे **पूर्णे** वा यत् **शैक्षं**, शैक्षग्रहणमुपलक्षणं, शैक्षप्रभृतिकं सचित्तादि ते **उत्पादयन्ति** तत्तेषामेव भवति, **गुरु**राचार्यः पुनर्न **लभते**। **च**शब्दसूचितमर्थम् "[१]हट्ठेण" [गा.२०८०] इत्यादिना व्याख्यास्यति ॥ २०७६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदेवं 'तत्रान्यत्र विपरिणते' इति [गा. २०७५] भावितम्। इदानीं 'गेलण्णे होइ चउभंगो' [गा. २०७५] इति भावयति—

**गेलण्णे चउभंगो, तेसिं१ अहवावि होज्ज आयरिए२ ।**
**दोण्हं पी होज्जाही३, अहव ण होज्जाहि दोण्हं पि ४॥ २०७७ ॥**

**ग्लान्ये** ग्लानत्वे **चतुर्भङ्गी** भवति। तद्यथा— **तेषां** विपरिणतानां ग्लानो नाचार्यस्य इति प्रथमो भङ्गः १। **अथवा आचार्ये** आचार्यस्य **भवति** ग्लानो न तेषामिति द्वितीयः २। **दोण्हंपि होज्जाही** इति द्वयानां विपरिणतानामाचार्यस्य च भवति ग्लान इति तृतीयः ३। **अथवा द्वयानामपि न भवति** ग्लान इति चतुर्थः ४॥२०७७॥ अत्र प्रायश्चित्तविधिमाह—

**आयरिए अपेसंते, लहुओ अकरंते चउ गुरू होंति।**
**परितावणादि दोसा, तेसिं अप्पेसणे एवं ॥ २०७८ ॥**

प्रथमभङ्गे तेषां ग्लानो नाचार्यस्येत्येवंरूपे यद्याचार्यो गवेषणाय न कमपि साधुसंघाटं प्रेषयति तदा तस्मिन्नप्रेषयति प्रायश्चित्तं **लघुको** मासः। अथ प्रेषणे कृते तैर्वा कथिते यदि



---

१. अहव ण [ गा. २०७७ ] पु. प्रे. ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्लानकृत्यं **न** किमपि करोति तदा तस्मिन्न**कुर्वति चत्वारो गुरुका भवन्ति**, येऽपि चानागाढाऽऽगाढ**परितापनादयो दोषा**स्तन्निमित्तमपि चतुर्लघ्वादि चरमपर्यन्तं तस्य प्रायश्चित्तमापद्यते । द्वितीये भङ्गे आचार्यस्य ग्लानः, न तेषामित्येवंरूपे तैरपि ग्लानस्य गवेषणाय साधुप्रेषणादि कर्तव्यम् । यदि पुनर्न कुर्वन्ति तदा **तेषामप्यप्रेषणे**, उपलक्षणमेतद्, अकरणे च **एव**मुक्तप्रकारेण प्रायश्चित्तमवसातव्यम्। तथाहि-यदि ते गवेषणाय साधुसंघाटं न प्रेषयन्ति तदा मासलघु। अथ कृतेऽपि प्रेषणे आचार्येण वा ज्ञापिते यदि ग्लानकृत्यं न कुर्वन्ति तदा चत्वारो गुरुकाः प्रायश्चित्तम् ॥ २०७८॥

**अहवा दोण्ह वि होज्जा, संथरमाणेहिं तह गवेसणाया ।**
**तं चेव य पच्छित्तं, असंथरंता भवे शुद्धा ॥ २०७९॥**



अथवा द्वयानामपि आचार्यस्य तेषां च प्रत्येकं ग्लानो भवेत् ततोऽपि यदि संस्तरन्ति ततः संस्तरद्भिः परस्परं ग्लानस्य गवेषणा कर्तव्या। अथ न कुर्वन्ति तदा तदेव प्रायश्चित्तं यदनन्तरमुक्तम् । तथाहि— परस्परमप्रेषणे मासलघु, ग्लानकृत्याकरणे चतुर्गुरुकम् । अथ

For Private and Personal Use Only

द्वयेऽपि प्रत्येकं न संस्तरन्ति द्वयानामपि च प्रत्येकं ग्लानस्तत आह- असंस्तरन्तो गवेषणाद्यकुर्वन्तोऽपि भवन्ति शुद्धाः, न प्रायश्चित्तविषयाः ॥ २०७९ ॥

सम्प्रति "गुरु पुण्णे न लभति य" [गा. २०७६] इत्यत्र चशब्दसूचितमर्थमुपदर्शयति—

**हट्ठेणं न गविट्ठा, अतरंत ण ते य विप्परिणया उ ।**
**तत्थवि न लहइ सेहे, लभइ कज्जे विपरिणया वी ॥ २०८० ॥**

ते सुखदुःखोपसम्पन्नकाश्चरिकां गता अतरन्तो यदि कथमप्याचार्येण **हृष्टेन** नीरोगेण प्रयोजनान्तराव्याकुलितेन च सता **न गवेषिता, अतरन्तो न च ते विपरिणता** यथा वयमतरन्तो वर्त्तामहे तथाप्याचार्येण न गवेषिताः, ततः किमस्माकमाचार्येणेति ? **तत्रापि** हृष्टेनागवेषणेऽपि, आस्तां परस्परनिश्रायामित्यपिशब्दार्थः, **न लभते** गुरुः **शैक्षान्,** किमुक्तं भवति ? -ते तथाऽविपरिणताः सन्तो यत्सचित्तादिकमुत्पादयन्ति तदाचार्यो न लभते। अथ **कार्ये** कस्मिन्नपि व्याकुलीभवनत आचार्येण तेऽतरन्तो न गवेषितास्तर्हि यद्यपि ते **विपरिणता अपि** यत्सचित्तादिकमुत्पादयन्ति तत्ते न लभन्ते, किन्तु **लभते** आचार्यः ॥ २०८० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**लद्धुं अविप्परिणते, कहिंति भावम्मि विप्परिणयम्मि ।**
**इति मायाए गुरुओ, तु सचित्ताऽऽदे सगुरुया वा ॥ २०८१ ॥**

यदि **अविपरिणते** भावे सचित्तादि **लब्ध्वा** विपरिणम्य **कथयन्ति,** इदं **विपरिणते भावे**ऽस्माभिर्लब्धम् **इति** तदा **मायया** ते उपसम्पदं लोपयन्तीति मायानिष्पन्नं प्रायश्चित्तं **गुरुको** मासः। अचित्ते समुत्पादिते तत्प्रत्ययमुपधिनिष्पन्नं प्रायश्चित्तं, **सचित्ते** समुत्पादिते तत्प्रत्ययं **चतुर्गुरुकम्, आदेशान्तरेण** प्रायश्चित्तमनवस्थाप्यम्। तत आचार्यो निष्कारणं यदि तान्न गवेषयति तदा तस्य प्रायश्चित्तं मासलघु ॥ २०८१॥



**सुहदुक्खिया गविट्ठा, सो चेव उ उग्गहो य सीसा य ।**
**विप्परिणमंतु मा वा, अगविट्ठेसुं तु सो न लभे ॥ २०८२॥**

ते **सुखदुःखिताः** सुखदुःखोपसम्पन्नका आचार्येण **गवेषिताः। स एव चावग्रहो** वर्तते, अद्यापि विपरिणामाकथनात्। ते **शिष्या** यदि विपरिणमन्ति यदि वा **मा विपरिणमन्तु** तथापि यत्तैरुत्पादितं सचित्तादि तदाचार्यो लभते, न पुनस्तत्तेषामिति। अथ **न गवेषिता** आचार्येण, विपरिणताश्च ते जातास्ततस्तैरगवेषितैर्विपरिणतैश्च यल्लब्धं सचित्तादि **तत्स** आचार्यो

For Private and Personal Use Only

**न लभते,** किन्तु तत्तेषामेव ॥ २०८२॥

**विप्परिणयम्मि भावे, लद्धं अम्हेहि बेंति जइ पुट्ठा ।**
**पच्छा पुणो वि जातो, लभंति[1] दोच्चं अणुण्णवणा ॥ २०८३ ॥**

**यदि** पुनस्ते **पृष्टाः** सन्तो ब्रुवते— एतद्विपरिणते **भावेऽस्माभिर्लब्धं** तत्तेषामेव, नाचार्यस्य। अथ **पश्चात् पुनरपि** भावो **जातो द्वितीय**मपि वारमवग्रहस्या**नुज्ञापना** कर्तव्या, तदा तथारूपाद्भावात् जातादारतो यत्ते **लभन्ते** तदाचार्यस्य भवति, न तेषामिति॥ २०८३॥

**आगयमणागयाणं, उउबद्धे सो विही उ जो भणितो ।**
**अद्धाण सीसगम्मि वि, एस विही पट्ठिए विदेसं ॥ २०८४ ॥**

**य एष** अनन्तर**मुक्तो** विधिः स **ऋतुबद्धे** ऋतुबद्धे काले **आगतानां** चरिकातो निवृत्ताम**नागतानां** चरिकाप्रविष्टानामवसेयः। **एष** पुनर्वक्ष्यमाणो **विधिर्विदेशं** प्रस्थिते, उपलक्षणमेतत्, स्वदेशेऽपि दूरं गन्तुकामे **अध्वशीर्षके** ग्रामे स्थिते वेदितव्यः ॥२०८४॥

१. सं. मु.। न लभंति पु. प्रे. ॥

तमेवाह—

**सत्थेणं सालंबं, गया-ऽऽगयाणमिह मग्गणा होइ ।**
**तत्थऽन्नत्थ गिलाणे, लहु-गुरु-लहुगा चरिम जाव ॥ २०८५ ॥**

**सार्थेन** सह विदेशं स्वदेशमपि वा दूरं गन्तुकामाः **सालम्बं** गतास्तदा 'यदि अध्वशीर्षके ग्रामे परतो गमनाय सार्थं लप्स्यामहे ततो यास्यामः, अथ न लप्स्यामहे तर्हि प्रत्येष्यामः, उदन्तं च परस्परं वक्ष्यामः' एवं ये सार्थेन सहाध्वशीर्षके ग्रामे **गताः** ये च न गतास्तेषा**मिह** आभवत्यनाभवति सचित्तादौ विषये **मार्गणा** वक्ष्यमाणा भवति। तथा **तत्रान्यत्र** च **ग्लाने** तद्यथा- अन्यत्राध्वशीर्षकेग्रामे स्थितानां ग्लानो न तत्राऽऽचार्यपार्श्वे इति प्रथमः १, आचार्यपार्श्वे न तेषामिति द्वितीयः२, द्वयानामपि पार्श्वे इति तृतीयः३, न द्वयानामपि इति चतुर्थः ४, तत्र यद्याचार्यस्तेषां गवेषणं न करोति मासलघु। अथ ज्ञातेऽपि ग्लाने तस्य कृत्यकरणाय न यत्नमाधत्ते, ततश्चतु**र्गुरुकम्** । यच्चाऽऽगाढानागाढपरितापनादिनिमित्तं चतु**र्लघ्वादि यावच्चरमं** पाराञ्चितं तदपि प्राप्नोति। तदेवं प्रथमभङ्गे प्रागभिहितमपि प्रायश्चित्तं विनेयजनानुग्रहाय भूय उक्तम्। एवं द्वितीये तृतीयेऽपि भङ्गे वाच्यम् ॥ २०८५॥

सम्प्रत्याभवत्यनाभवति च सचित्तादौ विषये मार्गणां चिकीर्षुराह—

**पुण्णे व अपुण्णे वा, विपरिणएसु जा होअणुण्णवणा ।**
**गुरुणावि न कायव्वा, संका लद्धे विपरिणते उ ॥ २०८६ ॥**

ये ते विदेशे स्वदेशेऽपि वा दूरं गन्तुकामाः सङ्केतं कृतवन्तः 'यदि वयमेतावद्भिर्दिवसैर्न प्रत्यागच्छामस्तदा ज्ञातव्यं गता इति, अन्यथा न' इति। तस्मिन्नवधौ **पूर्णे अपूर्णे वा** यदि ते विपरिणता जातास्ततः पुनरपि तैरवग्रहस्य द्वितीयं वारमनुज्ञापना कर्तव्या। गुरुणापि **या** तेषु तथा**विपरिणतेष्वनुज्ञापना भवति,** सा प्रतिपत्तव्या। यदि पुनरपूर्णेऽवधौ तेषां शैक्षः प्रत्युत्पन्नस्ततो जाताऽऽशङ्का यद्यपूर्णेऽवधावेष समुत्पन्न इति कथयिष्यते तत आचार्यस्य भविष्यति, तस्मादाचार्यस्य मा भूदिति प्रत्यागतास्ते आलोचयन्ति— पूर्णे सङ्केतकाले लब्धोऽयमस्माभिः शैक्ष इति तदा तेषां प्रायश्चित्तं मासगुरु। तस्मात्सत्यभूतेन भावेना-लोचयितव्यम्। तथा पूर्णेऽवधौ शैक्षे **लब्धे** प्रत्यागत्य तथैवालोचयति, **गुरुणापि शङ्का न कर्तव्या** यथा अपरिपूर्णेऽप्यवधौ **लब्धे** शैक्षे शैक्षलोभेन **विपरिणत** इति, सत्यभावेना-लोचनात्। तच्च परभावोपलक्षकैरक्लेशेन ज्ञातव्यमिति ॥२०८६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदेवमुपसम्पन्नानां यद्वक्तव्यं तदुक्तम्। इदानीमुपसंपद्यमानानधिकृत्याह—

**परिच्छणिमित्तं वा, सब्भावेणं च बिंति उ पडिच्छे ।**
**उवसंपज्जितुकामे, मज्झं तु अकारकं इहइं ॥ २०८७ ॥**

**अण्णं गवेसह खेत्तं, पाउग्गं जं च होइ सव्वेसिं ।**
**बालगिलाणादीणं, सुहसंथरणं महागणस्स ॥ २०८८ ॥**

**परीक्षानिमित्तं वा सद्भावेन वा प्रतीच्छिकानुपसम्पत्तुकामान्** गुरुर्ब्रूते- आर्याः इहास्मिन् क्षेत्रे **मम अकारकं** भक्तपानादि। तस्मादन्यत् **क्षेत्रं** मम प्रायोग्यं **यच्च भवति सर्वेषां बालग्लानादीनां प्रायोग्यं,** यच्च **महतो गणस्य सुखसंस्तरणं** सुखेन निस्तारहेतुस्तत् **गवेषयथ** प्रतिलेखयथ ॥२०८७-८८॥

**कयसज्झाया एते, पुव्वं गहियंपि णासते अम्हं ।**
**खेत्तस्स अपडिलेहा, अकारगा तो विसज्जेइ ॥ २०८९ ॥**

एवं सन्दिष्टाः सन्तो यदि ते भाषन्ते— 'एते युष्माकं शिष्याः **कृतस्वाध्यायास्तस्मादेतान्**



For Private and Personal Use Only

प्रेषयथ, **अस्माकं** पुनः क्षेत्रप्रत्युपेक्षणार्थं गतानां **पूर्वगृहीतमपि नश्यति** । एवमुक्त्वा यदि ते **क्षेत्रस्य अप्रत्युपेक्षकाः**। विनयवैयावृत्त्यादे**रकारकाश्च ततस्तान्** **विसर्जयति** ॥ २०८९ ॥

**सव्वं करिस्सामो ससत्तिजुत्तं, इच्चेवमिच्छंते पडिच्छिऊणं ।**
**निव्वेसबुद्धीए न यावि भुंजे, तं चागिला पूरति तेसि इच्छं ॥ २०९० ॥**

ये पुनः सन्दिष्टाः सन्तः एवं ब्रुवते यथा- **सर्वं स्वशक्तियुक्तं** स्वशक्त्युचितं **करिष्यामः**, तान् **एवमिच्छतः** प्रतीच्छेत्। **प्रतीष्य** च तान् **न चापि** नैव **निर्वेशबुद्ध्या** 'कर्म मया पुराकृतमेवं वेदयितव्य'मिति बुद्ध्या **भुङ्क्ते** परिभोगं नयति, किन्तु स्वपरयोर्निर्जराबुद्ध्या। यया चेच्छया ते उपसम्पद्यन्ते **तां चेच्छां तेषामगिलया** निर्जराबुद्ध्या **पूरयति**, न परोपरोधाच्चित्तनिरोधेन ॥२०९०॥

अथ तेषां प्रातीच्छिकानां कियन्तं कालं प्रातीच्छको भवति? तत्राह—

**निद्विय महल्ल भिक्खे, कारण उवसग्गऽगारिपडिबंधो ।**
**पढमचरिमाइं मोत्तुं, निग्गम सेसेसु ववहारो ॥ २०९१ ॥**

श्री व्यवहार-सूत्रम् चतुर्थ उद्देशकः ९३३ (A)

**निष्ठितं** नाम येन कारणेनोपसम्पन्नस्तत्सूत्रार्थलक्षणं कारणं निष्ठितं समाप्तं ततो निर्गच्छति। **महल्ल**त्ति महती सूत्रमण्डली भक्तमण्डली वा। तत्र सूत्रमण्डल्यां चिरेणालापक आगच्छति, भक्तमण्डल्यां महत्यां भागागतं, तत्र यथान्ये साधवोऽध्यासते तथा तेनाप्यध्यासितव्यम्, अनध्यासीनश्च निर्गच्छति। तथा दुलर्भं तत्र क्षेत्रे **भैक्षं,** तत्र यथान्ये साधवो यापयन्ति तथा तेनापि प्रतीच्छितेन यापनीयम्, यापनां चासहमानः कोऽपि निर्गच्छति। **कारण**मशिवादिकं, तस्मिन् समुत्पन्ने सर्वैर्निर्गन्तव्यम्। **उपसर्गा** द्विविधाः— दंशमशकादयः स्वजनादयश्च। तत्र दंशमशकादिषूपसर्गेषु सर्वैर्निर्गन्तव्यम्, स्वजनादिकृतेषु तूपसर्गेषु गच्छसाधवो निर्गच्छन्ति वा न वा, प्रतीच्छितेन पुनरवश्यं निर्गन्तव्यम्। **अगारीप्रतिबन्धो** नाम यत्रागार्या विषये आत्मपरोभयसमुत्था दोषास्तत्रावश्यं तेन निर्गन्तव्यम्। अत्र **प्रथमं चरमं** च कारणं **मुक्त्वा शेषेषु** कारणेषु **निर्गमे** आभवद्**व्यवहारः** प्रायश्चित्तव्यवहारश्च। स यथा भवति तथा वक्ष्ये ॥ २०९१ ॥ एतदेव व्याचिख्यासुराह—

गाथा २०८७-२०९४ निर्गमन-कारणानि

**सम्मत्तम्मि सुए तम्मि, निग्गमो तस्स होति इच्छाए ।**
**मंडलि महल्ल भिक्खे, जह अण्णे तह सो वि जावए ॥ २०९२ ॥**

९३३ (A)

यस्य श्रुतस्यार्थेनोपसम्पन्नस्तस्मिन् **समाप्ते** श्रुते **तस्य निर्गम इच्छया भवति**, यदि प्रतिभासते तर्हि तिष्ठति, नो चेन्निर्गच्छति। तथा **महत्यां** भक्त**मण्डल्यां** दुर्लभे च **भैक्षे यथान्ये** साधवो यापयन्ति **तथा सोऽपि यापयेत्**, यापनां चासहमानः कोऽपि निर्गच्छेत्। सूत्रमण्डल्यामपि चिरेणालापकमागच्छन्तमवेक्षमाणस्त्वरया कोऽपि निर्गच्छति॥ २०९२॥

**कारणे असिवादिम्मि, सव्वेसिं होइ निग्गमो ।**
**दंसमादी उवसग्गे, सव्वेसिं एवमेव उ ॥ २०९३ ॥**

**अशिवादौ कारणे** समुपस्थिते **सर्वेषां भवति निर्गमः । एमेव** अनेनैव प्रकारेण **दंशादिके** दंश-मशकादिके **उपसर्गे** समुपस्थिते एवमेव **सर्वेषां** भवति निर्गमः ॥ २०९३॥

**नीयल्लएहि उसग्गे, जइ गच्छंति नेतरे ।**
**निग्गच्छति ततो एगो, पडिबंधो वा वि भावतो ॥ २०९४ ॥**

**निजकैरपि** स्वजनैरप्यु**पसर्गे** क्रियमाणे **यदि इतरे** गच्छसाधवो **न गच्छन्ति, ततः** स **एक** एकाकी प्रातीच्छिको **निर्गच्छति** । यदि वा भावतः स्वजनेषु महान् प्रतिबन्धस्ततो निर्गच्छति ॥२०९४॥

**आयपरोभयदोसेहिं, जत्थऽगारीए होज्ज पडिबंधो ।**
**तत्थ न संचिट्ठेज्जा, नियमेण उ निग्गमो तत्थ ॥ २०९५ ॥**

**यत्रात्मपरोभयदोषैरगार्या** उपरि **भवेत् प्रतिबन्धस्तत्र न सन्तिष्ठेत्,** किन्तु **नियमत-स्तत्थे**ति प्राकृतत्वात् तस्मादित्यर्थे तस्मात्स्थाना**न्निर्गमः** ॥२०९५॥

**पढमचरिमेसऽणुण्णा, निग्गम सेसेसु होइ ववहारो ।**
**पढम-चरिमाण निग्गमे, इमा उ जयणा तहिं होइ ॥ २०९६ ॥**

**प्रथमे चरमे** च कारणे नियमेन निर्गमे **अनुज्ञा** भवति । **शेषेषु** तु कारणेष्वनाभोगतो **निर्गमे भवत्याभवद्व्यवहारः** प्रायश्चित्तव्यवहारश्च। तत्र **प्रथमचरमाणां** प्रथमचरमकारणोपेतानां **निर्गमे इयं** वक्ष्यमाणा **तत्र यतना भवति** ॥ २०९६॥

तामेवाह—

**सरमाणे उभए वी, काउस्सग्गं तु काउ वच्चेज्जा ।**
**पम्हुट्ठे दोण्हवि ऊ, आसन्नातो नियट्टेज्जा ॥ २०९७ ॥**

प्रथमे चरमे च कारणे समुपजाते **उभयस्मिन्न**प्याचार्ये प्रतीच्छके च विधिं **स्मरति** छिन्ना संप्रति उपसंपदिति ज्ञापनार्थं **कायोत्सर्गं कृत्वा** स प्रतीच्छको **व्रजेत्**। अथ प्रातीच्छिकस्य विस्मृतं तत आचार्येण स्मारयितव्यं यथा— कुरु छिन्नोपसंपन्निमित्तं कायोत्सर्गमिति। अथानाभोगतो **द्वयोरपि पम्हुट्ठ**मिति एकान्तेन विस्मृतं, ततो द्वयोरप्येकान्तेन विस्मृतावकृते कायोत्सर्गे सम्प्रस्थितो यद्यासन्ने प्रदेशे स्मरति, तदा**सन्नात्** प्रदेशात् **निवर्तेत,** निवृत्त्य च कायोत्सर्गो विधेयः ॥ २०९७॥

**दूरगएण उ सरिए, साहम्मिं दट्ठु तस्सगासम्मि ।**
**काउस्सग्गं काउं, जं लद्धं तं च पेसेइ ॥ २०९८ ॥**

अथ **दूरं गत्वा स्मृतवान्,** ततो दूरगतेन स्मृते **साधर्मिकं दृष्ट्वा तस्य सकाशे** समीपे कायोत्सर्गः करणीयः, सन्देशश्च प्रेषणीयः आचार्यस्य यथा- तदानीं युष्मत्समीपे कायोत्सर्गकरणं विस्मृतम्, इदानीममुकस्य साधर्मिकस्य समीपे कृतः कायोत्सर्ग इति। **कायोत्सर्गं च कृत्वा यद**कृते कायोत्सर्गे सचित्तादिक**मुत्पन्नं तत्प्रेषयति**॥ २०९८॥

**पढमचरमाण एसो, निग्गमणविही समासतो भणितो ।**
**एत्तो मज्झिल्लाणं, ववहारविहिं तु वोच्छामि ॥ २०९९ ॥**

**प्रथमचरमाणां** प्रथमचरमकारणोपेतानां **एष निर्गमनविधिः समासतो भणितः।** **इत** ऊर्ध्वं **मध्यमानां** मध्यमकारणोपेतानां **व्यवहारविधिम्** आभवद्व्यवहारविधिं प्रायश्चित्त-व्यवहारविधिं **च वक्ष्यामि** ॥२०९९॥

प्रतिज्ञातमेव निर्वाहयति—

**सज्झायभूमिं वोलेंते, जोए छम्मास पाहुडे ।**
**सज्झायभूमिदुविहा, आगाढा चेवऽणागाढा ॥ २१०० ॥**

**स्वाध्यायभूमिं** प्रतिपन्नः सन् तामनिक्षिप्य यो **व्यतिक्रामति** तस्मिन् आभवद्व्यवहार उच्यते। अथ स्वाध्यायभूमिरिति किमभिधीयते ? उच्यते– **प्राभृतं** नाम य उद्दिष्टः श्रुतस्कन्ध-स्तस्मिन् यो **योगः** स स्वाध्यायभूमिः। स चागाढयोगमधिकृत्योत्सर्गतः **षण्मासाः**। एतदेव वैतत्येनाह— **स्वाध्यायभूमिर्द्विविधा** योगो द्विविध इत्यर्थः। **आगाढा अनागाढा च**॥ २१००॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जहण्णेण तिण्णि दिवसा, अणागाढुक्कोस होइ बारस उ ।**
**एसा दिट्ठीवाए, महकप्पसुयम्मि बारसमा[1] ॥ २१०१ ॥**

**अनागाढा** स्वाध्यायभूमिर्ज**घन्येन त्रयो दिवसा**। यथा **नन्द्या**दिकस्याध्ययनस्य। **उत्कर्षतो भवति द्वादश**वर्षाणि । एषा द्वादशवर्षप्रमाणा उत्कृष्टा स्वाध्यायभूमिर्**दृष्टिवादे**, सापि दुर्मेधसः प्रतिपत्तव्या, प्राज्ञस्य तु वर्षम्। उक्तं च—

*''अणागाढा जहण्णेणं तिण्णि दिवसा, उक्कोसेण वरिसं । जहा दिट्ठिवायस्स, बारस वरिसाणि दुम्मेहस्सत्ति''*

**महाकल्पश्रुते** वा **द्वादश**वर्षाण्युत्कृष्टा स्वाध्यायभूमिः ॥२१०१॥

अत्राभवद्व्यवहारमाह—

**संकंतो य वहंतो, काउस्सग्गं तु छिन्न उवसंपा ।**
**अकयम्मी उस्सग्गे, जा पढती तं सुयक्खंधं ॥ २१०२ ॥**

---

१. बारस वा - पु. प्रे. । बारसगं लाडनू. ॥



For Private and Personal Use Only

**ता लाभो उद्दिसणायरियस्स जइ वहइ वट्टमाणिं से ।**
**अवहंतम्मि उ लहुगा, एस विही होइ अणागाढे ॥ २१०३ ॥**

योगं **वहन्** गणान्तरमन्यत्र **संक्रामन् छिन्ना उपसम्पदि**दानीम् इति प्रतिपत्त्यर्थं कायोत्सर्गं कृत्वा व्रजेत्। अथ कथमपि तस्य विस्मृतं भवति तत आचार्येण स्मारयितव्यः, यथा— कुरु कायोत्सर्गम्। अथ द्वयोरपि विस्मृतम्, विस्मरणतः **सोऽकृते कायोत्सर्गे** याति तर्हि **याव**त्सोऽन्यत्र गतोपि तं **श्रुतस्कन्धं पठति** ॥२१०२॥

**तावत्** यत्किमपि स **लभते** सचित्तादिकं स समस्तोऽपि लाभ **उद्देशनाचार्यस्य** येनोद्दिष्टः स श्रुतस्कन्धस्तस्य पूर्वाचार्यस्याऽऽभवति; केवलं **यदि** स पूर्वतन उद्देशनाचार्यः से तस्यान्यत्र गतस्य सतो **वर्तमानां** सारां **वहति**। अथ से तस्याकृतकायोत्सर्गस्य सतोऽन्यत्र गतस्य सारां **न वहति** ततस्तस्मिन् सारामवहत्युद्देशनाचार्ये प्रायश्चित्तं चत्वारो **लघुकाः** यच्च सचित्तादिकं स प्रातीच्छिको लभते, तदपि न तस्याऽऽभवति, एषः अनन्तरोदितो **विधिर्भवत्यनागाढे** योगे ॥ २१०३॥

सम्प्रत्यागाढे विधिमभिधित्सुरिदमाह—

**आगाढो वि जहन्नो, कप्पियकप्पादि तिण्णऽहोरत्ता ।**
**उक्कोसो छम्मासे, विवाहपण्णत्ति आगाढो ॥ २१०४ ॥**

**आगाढोऽपि** योगो **जघन्यस्त्रयोऽहोरात्राः** यथा **कल्पिकाकल्पिकादेः। उत्कर्षत आगाढः** आगाढयोगः **षण्मासान्,** यथा **व्याख्याप्रज्ञप्तेः** पञ्चमाङ्गस्य ॥२१०४॥

अत्राभवद्व्यवहारमाह—

**तत्थवि काउस्सग्गं, आयरियविसज्जियम्मि छिण्णा ऊ ।**
**संसरमसंसरं वा, अकए लभंतो उ भूमीए ॥ २१०५ ॥**

**तत्राप्यागाढयोगे** पूर्णेऽपूर्णे वा **आचार्येण** यस्य सकाशे योगः प्रतिपन्नस्तेन सूरिणा विसर्जिते विसर्जने कृते **छिन्ना** उपसम्पदिति ज्ञापनार्थं **संस्मरन्** कार्योत्सर्गं कुर्यात् । **असंस्मरन् वा** आचार्येण स्मारयितव्यः । तत्र **भूमौ** स्वाध्यायभूमावागाढे योगेऽपरिपूर्णे आचार्येण विसर्जिते, कृते कायोत्सर्गे यदि व्रजति तर्हि स व्रजन् यत्किमपि **लभते** सचित्तादिकं तत्तस्यैवाभवति,

नोद्देशनाचार्यस्य। अथा**कृते कायोत्सर्गे** व्रजति तर्हि यावदन्यत्र गतोऽपि तं श्रुतस्कन्धं पठति, सारां चोद्देशनाचार्यस्तस्य करोति, तावद्यत् किमपि स सचित्तादिकमुत्पादयति, तत्सर्वमुद्देशनाचार्यो लभते, न पुनरितरः ॥२१०५॥

**तीरिय अकए उ गते, जा अण्णं न पढए उ ता पुरिमे ।**
**आसण्णाओ नियत्तइ, दूरगतो वावि अप्पाहे ॥ २१०६ ॥**

**तीरिते** समाप्तिं नीते आगाढे योगे श्रुतस्कन्धे च, भक्तिपुरस्सरमाचार्यादि क्षमणया तोषिते, यदि गमनवेलायामनाभोगतोऽ**कृते** कायोत्सर्गे **याति,** तर्हि स गतः सन् **यावदन्यन्न पठति** न पठितुमारभते, **तावद्यत्**किमपि लभते, तत्**पूर्वस्या**चार्यस्याभवति, न तस्य। तस्य चास्मरणतोऽकृते कायोत्सर्गे गतस्येयं सामाचारी— यदि आसन्ने प्रदेशे गत्वा स्मृतं तत **आसन्नाद् निवर्तते**। अथ **दूरं गतेन** स्मृतं तर्हि तत्र यं साधर्मिकं पश्यति, तस्य समीपे कायोत्सर्गं कृत्वा **अप्पाहे** इति सन्देशं कथयति, यथा मया कृतोऽमुकस्य समीपे कायोत्सर्ग इति॥ २१०६॥

**अवितोसविते पाहुडे, निंते च्छेदो पडिच्छे चउगुरुया ।**
**जोवि य तस्स उ लाभो, तंपि य न लभे, पडिच्छंतो ॥ २१०७ ॥**

**प्राभृते** श्रुतस्कन्धे **अतोषिते** समाप्त्यनन्तरं भक्तिबहुमानादिपुरस्सरमाचार्यादिक्षमणया तोषमनीते यदि **निर्गच्छति** तर्हि तस्मिन् प्रायश्चित्तं छेदः। यश्च तं पाठयितुं प्रतीच्छति तस्मिन् प्रतीच्छके प्रायश्चित्तं चत्वारो गुरुकाः। योऽपि च तस्य निर्गतस्यान्यत्र प्रविष्टस्य **लाभस्तमपि न लभते प्रतीच्छन्**। किमुक्तं भवति? स तथानिर्गतो यत्किमप्युत्पादयति सचित्तादिकं तत्पूर्वतनस्याचार्यस्याभवति, न तु तस्य, नापि यस्तं पाठयति तस्य प्रतीच्छत इति॥२१०७॥

तदेवं गच्छान्निर्गतानां विधिरुक्तः। सम्प्रत्यनिर्गतानां तमभिधित्सुराह—

**तत्थवि य अच्छमाणे, गुरु-लहुया सव्वभंगे जोगस्स ।**
**आगाढमणागाढे, देसे भंगे उ गुरुलहुओ ॥ २१०८॥**



**तत्रापि** गच्छे **तिष्ठन्** यदि योगं वक्ष्यमाणप्रकारेण भनक्ति देशतः सर्वतो वा तदा तस्मिन् **योगस्यागाढस्य सर्वतो भङ्गे** प्रायश्चित्तं चत्वारो **गुरुकाः**, अनागाढस्य सर्वतो भङ्गे चत्वारो **लघुकाः**। तथा **आगाढे** आगाढस्य **देशतो भङ्गे गुरुको** मासः, **अनागाढस्य देशतो भङ्गे लघुकः** ॥ २१०८॥

अथ कथं देशतः सर्वतो वा योगस्य भङ्गः? तत आह—

**आयंबिलं न कुव्वइ, भुंजति विगतीओ सव्वभंगो उ ।**
**चत्तारि पगारा पुण, होंति इमे देसभंगम्मि ॥ २१०९ ॥**

**आयामाम्लं** परिपाट्या समापतितं **न करोति, विकृतीर्वा भुङ्क्ते,** एष योगस्य **सर्वभङ्गः। देशभङ्गे पुनः इमे** वक्ष्यमाणाश्चत्वारः **प्रकाराः** ॥ २१०९ ॥

तानेवाह—

**न करेति१ भुंजिऊणं करेइ२ काउं सयं व भुंजति य३ ।**
**वीसज्जेह ममं ति य ४, गुरुलहुमासो विसिट्ठो उ ॥ २११० ॥**



आचार्येण संदिष्टो विकृतिग्रहणाय कायोत्सर्गं कृत्वा विकृतीर्भुङ्क्ष्व । तत्रैकोऽकृते कार्योत्सर्गे विकृतीर्भुङ्क्ते, **न** च भुक्त्वाऽपि **करोति** कायोत्सर्गम्, तस्य प्रायश्चित्तं मासलघु तपसा कालेन च गुरुकम्। तत्र तपसा अष्टमादिना, कालेन ग्रीष्मादिना। अन्यस्तथासन्दिष्टः सन् विकृतीर्**भुक्त्वा** विकृतिग्रहणाय कायोत्सर्गं **करोति** तस्य प्रायश्चित्तं मासलघु तपसा गुरुकं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालतो लघु २। **काउं सयं व भुंजति**, तृतीयस्तथासन्दिष्टः सन् स्वयं कार्योत्सर्गं कृत्वा विकृतीर्भुङ्क्ते तस्य प्रायश्चित्तं मासलघु, तच्च तपसा लघु, चतुर्थादिना तस्य करणात्, कालतो गुरु, वसन्तादौ तस्य वहनाभ्यनुज्ञानात् ३। चतुर्थो विकृतिं लब्ध्वा सूरीन् ब्रूते- 'सन्दिशत कायोत्सर्गं कृत्वा विकृतिं भुञ्जेऽहमिति' तस्य मासलघु तपःकालाभ्यां लघु ४। तथा चाह- चतुर्ष्वपि **लघुमासो गुरु** पुनर्यथायोगं तपःकालाभ्यां **विशिष्टः** सन्। एवमनागाढे योगे देशभङ्गः। आगाढे पुनर्नास्त्यपरिपूर्णेऽनुज्ञा विसर्जनस्य। न केवलमेतेषु चतुर्षु प्रकारेषु यथोक्तं प्रायश्चित्तं किंत्वाज्ञादयोऽपि दोषाः॥ २११०॥

तथा चाह—

**एक्केक्के आणादी, विराहणा होइ संजमाऽऽयाए ।**
**अहवा कज्जे य इमे, दट्ठुं जोगं विसज्जेज्जा ॥ २१११ ॥**

**एकैकस्मिन्** प्रकारे **आज्ञादय** आज्ञा-ऽनवस्था-मिथ्यात्व-विराधनारूपा दोषाः। तथा ग्लानत्वभावतो देवताछलनतो वा **संयमस्यात्मनश्च विराधना भवति** ।**अथवा इमानि** वक्ष्य-



For Private and Personal Use Only

माणानि ग्लानत्वादीनि **कार्याणि दृष्ट्वा योगं विसर्जयेत्**, नास्ति तत्र देशतः सर्वतो वा भङ्गः ॥ २१११ ॥

तान्येव कारणान्याह—

**दट्ठु विसज्जण जोगे, गेलण्ण१ वए२ महामह३ ऽद्धाणे४ ।**
**आगाढे नवगवज्जण, निक्कारण कारणे विगती ॥ २११२ ॥**

**दृष्ट्वा ग्लान**मतरन्तं, **वए**त्ति व्रजिकायां विकृतिलाभं, तथा **महामहा**निन्द्रमहादीन्, **अध्वानं** छिन्नाध्वानम्, उपलक्षणमेतत्, अवमौदर्यं राजप्रद्विष्टं च दृष्ट्वा योगो **योगस्य विसर्जनं** कर्तव्यं, तथा **आगाढे** विकृति**नवकस्य वर्जनं**, दशमायाः पक्वरूपाया भजना। तथा **निष्कारणे** योगं निक्षिप्य **विकृतयो** न कल्पन्ते, **कारणे** तु कल्पन्ते। एष द्वारगाथासंक्षेपार्थः ॥ २११२ ॥

सम्प्रत्येषा विवरीतव्या। तत्र प्रथमं ग्लानपदमधिकृत्याह—

**जोगे गेलण्णम्मि य, आगाढियरे य होति चउभंगो ।**
**पढमो उभयागाढो, बितिओ तइओ य एक्केणं ॥ २११३ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**योगे ग्लानत्वे च** प्रत्येक**मागाढे इतरस्मिन्** अनागाढे **भवति चतुर्भङ्गी**। गाथायां पुंस्त्वनिर्देशः प्राकृतत्वात्। सा चैवम्—आगाढो योग आगाढं ग्लानत्वम् १, आगाढो योगोऽनागाढं ग्लानत्वम् २, अनागाढो योग आगाढं ग्लानत्वम् ३, अनागाढो योगोऽनागाढं ग्लानत्वं ४। तथा चाह- **प्रथमो** भङ्गो **उभयागाढः** उभयमागाढं यस्मिन् स तथा। **द्वितीय-स्तृतीयश्च एकेना**गाढेन, द्वितीय आगाढयोगेन, तृतीय आगाढग्लानत्वेनेत्यर्थः। चतुर्थ उभयस्याप्यागाढस्याभावे ॥ २११३॥

तत्र प्रथमभङ्गमधिकृत्य विधिमाह—

**उभयम्मि वि आगाढे, दड्ढेल्ल-पक्कएहि तिण्णि दिणे ।**
**मक्खंति अठायंते, पज्जंत धरे दिणा तिन्नि ॥ २११४ ॥**

**उभयस्मिन्नपि** योगे ग्लानत्वे **चागाढे** तं प्रतिपन्नाऽऽगाढयोगमागाढग्लानत्वं **दग्धेन**—पक्वपक्वान्नोद्धरितेन घृतेन तैलेन वा, यदि वा **पक्वेन** शतपाकादिना तैलेन **त्रीणि दिनानि**



For Private and Personal Use Only

**प्रक्षयन्ति**। तथाप्य**तिष्ठति** ग्लानत्वे यत्र पच्यते पक्वान्नं तत्र **त्रीणि दिनानि** यावत् नीत्वा **पर्यन्ते ध्रियते** येन तद्गन्धपुद्गलाघ्राणत आप्यायना[१] भवन्ति ।

**जत्तियमेत्ते दिवसे, विगइं सेवइ न उद्दिसे तेसु ।**
**तहवि य अठायमाणे, निक्खिवणं सव्वहा जोगे ॥ २११५ ॥**

**यावन्मात्रान् दिवसान् विकृति**मुक्तप्रकारेण **सेवते तेषु** तावन्मात्रेषु दिवसेषु सूत्रं **नोद्दिशेत्**। **तथापि च** दिनत्रये पर्यन्तधरणेनापि **अतिष्ठति** अनिवर्तमाने ग्लानत्वे **सर्वथा योगो** योगस्य **निक्षेपणं** कर्तव्यम् ॥ २११५॥

**जइ[२] निक्खिप्पइ दिवसे, भूमीए तत्तिए उवरि वड्ढे ।**
**अपरिमियं तुद्देसो, भूमीए ततो परं कमसो ॥ २११६ ॥**

**यति** यावत्प्रमाणान् गत्वा योगो **निक्षिप्यते तावन्मात्रान्दिवसान् भूमेः** स्वाध्यायभूमे**रुपरि**

---

१. मो. सं. । °यका- पु. प्रे. ॥ २. एषा २११६ गाथा प्रतौ नास्ति । अन्यासु अपि भाष्यप्रतिषु न दृश्यते। किन्तु प्रासङ्गिका इति लाडनू टिप्पने ।

**वर्धयेत्**। किमुक्तं भवति?— यावति यावति पठिते स्थितः स्वाध्यायः स्वाध्यायभूमिस्तत्र यावतो दिवसान् वोढ्वा योगो निक्षिप्यते तावतो दिवसान् भूयोऽपि योगमुत्क्षिप्य योगोद्वहनेन स्वाध्यायभूमेरुपर्येवमेवातिवाहयेत्। अथ यस्मिन् दिने योगः प्रथममुत्क्षिप्तस्तस्य विस्मृतेर्दिवस-परिमाणं प्रतिनियतं कर्तुं न शक्यते तत आह— **अपरिमितं** यदि दिवसपरिमाणं **तत उद्देशो** ग्राह्यः, स स्वाध्याय**भूमे**रुपर्येवमेव योगोद्वहनेनातिवाह्यते, **तत**स्तावन्मात्रदिवसातिवाहनात् **परं क्रमशः** सूत्रपाठानुसारेण वहेत् ॥ २११६॥

गतः प्रथमभङ्गः । सम्प्रति द्वितीयभङ्गमधिकृत्याह—

**गेलण्णमणागाढे, रसवति नेहोव्वरे असति पक्का ।**
**तह वि य अठायमाणे, आगाढतरं तु निक्खिवणा ॥ २११७ ॥**

**ग्लानत्वेऽनागाढे रसवत्यां** शालनकादौ यः **स्नेह** उद्धरितः स म्रक्षणाय प्रदीयते तथापि **असति** अतिष्ठति ग्लानत्वे यानि शतपाकादिना **पक्वानि** घृत-तैलानि तानि म्रक्षणाय दातव्यानि। **तथाप्यतिष्ठति** ग्लानत्वे ग्लानमा**गाढतरं** ज्ञात्वा योगस्य सर्वथा **निक्षेपणं** कर्तव्यम् ॥ २११७॥

गतो द्वितीयो भङ्गः। सम्प्रति तृतीयमाह—

**तिण्णितिगेगंतरिए, गेलण्णाऽऽगाढ निक्खिव परेणं ।**
**तिण्णि तिगा अंतरिया, चउत्थऽठंते व निक्खिवणा ॥ २११८॥**

अनागाढे योगे **आगाढे ग्लानत्वे त्रीन्** दिवसानां **त्रिकान् एकान्तरिकान् कारयेत्** । तथाप्यतिष्ठति ततः **परेण** योगस्य **निक्षेपः** कर्तव्यः। इयमत्र भावना- एकस्मिन् दिवसे विकृतिग्रहणाय कायोत्सर्गः कृतः, द्वितीये दिवसे पुनः कृतः कायोत्सर्ग, एवं तृतीयेपि, चतुर्थे दिवसे कृतं निर्विकृतिकं, पुनः पंचम-षष्ठ-सप्तमेषु कायोत्सर्गः, ततो भूयः अष्टमे दिवसे निर्विकृतिकं, नवमे दिवसे कायोत्सर्गः। एवं कृतेऽपि यदि न स्थितं ग्लानत्वं ततो दशमे दिवसे योगनिक्षेपः। गतस्तृतीयोऽपि भङ्गः। सम्प्रति चतुर्थमाह- **तिण्णि तिगा** इत्यादि, त्रयस्त्रिकाः, नवदिवसा इत्यर्थः, अन्तरिता एकान्तरिताश्च**तुर्थे** भङ्गे कर्तव्याः। तथाप्य**तिष्ठति** ग्लानत्वे योगस्य **निक्षेपणम्**। अत्रापीयं भावना— एकस्मिन् दिवसे कायोत्सर्गः, द्वितीये दिवसे निर्विकृतिकम्, तृतीये दिवसे कायोत्सर्गः, चतुर्थे निर्विकृतिकम्, एवमेकान्तरिते कायोत्सर्ग-निर्विकृतिके नव दिवसान् कारयेत् तथाप्यतिष्ठति ग्लानत्वे दशमे दिवसे योगो

निक्षिप्यते। यत्रापि प्रतिदिवसं ग्लानप्रायोग्यस्यालाभे तत्परिवासयितव्यं भवति तत्रापि योगो निक्षिप्यते। अथ कदाचित् क्षीरादिभिर्ग्लानस्य प्रयोजनमजायत तदा स्वग्रामे तन्मार्गयितव्यम्। असति स्वक्षेत्रे परग्रामादप्यानेतव्यम्। तत्राप्यसति क्षेत्राद्बहिरपि गत्वा समानेतव्यम्। अथ कदाचित्तत्राप्यलाभस्तर्हि व्रजिकामपि ग्लानं नयेत् ॥ २११८॥

पतितं द्वितीयं व्रजिकाद्वारम्, तत्रेयं यतना—

**वइया अजोगि जोगी व, अदढ अतरंतगस्स दिज्जंते ।**
**निव्विइयगकमाहारे , अंतरविगतीए निक्खिवणं ॥ २११९ ॥**

**व्रजिकायां** गोकुले गन्तुकामस्य **अतरंतगस्स**त्ति ग्लानस्य **अद्दढस्य** वा ग्लानत्वेन विना दुर्बलस्य द्वितीया दीयन्ते अयोगवाहिनः। तदभावे **योगवाहिनो वा**। तत्राहारो निर्विकृतिक-मन्तरा च कायोत्सर्गः। अथ लभ्यते प्रतिदिवसं विकृतिस्तदा योगस्य निक्षेपणम्। अत्रेयं भावना— ग्लानस्य अद्दढस्य वा व्रजिकां गन्तुकामस्य द्वितीया दीयन्ते अयोगवाहिनः, अथ ते न सन्ति तदा अनागाढयोगवाहिनो दातव्याः। तत्र गता विकृतीः परिहरन्ति **निर्विकृति-**

**कमाहार**माहारयन्ति। अथ न लभ्यते दिने दिने निर्विकृतिकं **तदाऽन्तरा**न्तरा **विकृति**ग्रहणाय कायोत्सर्गं कुर्वन्ति । अथ दिने दिने विकृतिरेव प्रायो लभ्यते नान्यत्तदा योगस्तेषां **निक्षिप्यते** ॥ २११९ ॥

सम्प्रति निर्विकृतिकमाहारमाहारयतां विधिमाह—

**आयंबिलस्स अलंभे, चउत्थमेगंगियं च तक्कादी ।**
**असतेयरमागाढे, निक्खिवणुद्देस तह चेव ॥ २१२० ॥**

यद्याचाम्लवारके **आचाम्ल**प्रायोग्यं **न लभ्यते** तदा तद्वारकेऽ**भक्तार्थं** कुर्वन्ति। अथ न शक्नुवन्त्यभक्तार्थं कर्तुं तदा **एकाङ्गिकं तक्र**माहारयन्ति, तक्रायामाम्लं कुर्वन्तीत्यर्थ:। आदिशब्दात् एकाङ्गिकं→[1]काष्टमूलमाहारयन्तीति द्रष्टव्यम्। अथ **न सन्त्य**नागाढयोगवाहिनो द्वितीयास्तत **इतरे आगाढ**योगवाहिनो द्वितीया दीयन्ते। तत्र यदि तेषां प्रायोग्यं लभ्यते तत: सुन्दरम्[अथ]न लभ्यते, केवलं←तत्र क्षीरादीनि लभ्यन्ते तदा योगो निक्षिप्यते। **निक्षेपानन्तरं** च **पुनरुद्देशस्तथैव** यथाऽधस्ताद्भणितम्।



---

१. →← चिह्नद्वय मध्यवर्ती पाठ: खं. नास्ति ॥

जति निक्खिप्पइ दिवसे, भूमीए तत्तिए उवरि वड्ढे।
अपरिमियं तुद्देसो, भूमीए तओ परं उ कमसो [गा. २११६]॥

गतं व्रजिकाद्वारम् ॥२१२०॥ इदानीं महामहद्वारमाह—

**सक्कमहादीएसु व पमत्तं, मा[1] णं सुरा छले ठवणा ।**
**पीणिज्जंतु व अदढा, इतरे उ वहंति न पढंति ॥ २१२१ ॥**

**महामहः शक्रमहादयः**। आदिशब्दात् सुग्रीष्मकमहादिपरिग्रहः। **तेषु ठवण**त्ति ये अनागाढयोगप्रतिपन्नास्तेषां योगो निक्षिप्यते, किं कारणम्? इति चेद्, अत आह **मा तं प्रमत्तं** सन्तं काचित् मिथ्यादृष्टि**र्देवता छलयेत्** । अन्यच्च तेषु दिवसेषु विकृतयो लभ्यन्ते, ततो ये **अद्दढा** दुर्बलाः सन्ति ते विकृतिपरिभोगत **आप्यायन्ता**मिति योगनिक्षेपणम्। ये पुनः **इतरे** आगाढयोगवाहिनस्तेषां योगो न निक्षिप्यते, ते केवलमन्यन्नोद्दिशन्ति, **नापि पठन्ति** ॥२१२१॥

१. गाणं- लाडनू. पाठा. । मातं- मु. लाडनू. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतं महामहद्वारम् ३। इदानीमध्वा-ऽवम-राजद्विष्टलक्षणं द्वारत्रयमाह—

**अद्धाणेमे जोगीणं एसियं सेसगाण पणगादी ।**

**असतीए अणागाढे, निक्खिव सव्वासती इयरे ॥ २१२२ ॥**

**अध्वनि** ग्रामानुग्रामिके योगं वहन्ति । अथ छिन्नाध्वकं तदा यत् **एषितं** प्रासुकमित्यर्थः, तत् **योगिनां** योगवाहिनां दीयते, **शेषाणां पञ्चकादि** दातव्यम्। किमुक्तं भवति? शेषाः पञ्चकपरिहाण्या पञ्चकादिषु यतन्ते। अथ सर्वे योगवाहिनो न संस्तरन्ति प्रासुकेन, तत आह— **असति** सर्वेषां तेषां योगवाहिनां प्रासुके **अनागाढे** अनागाढयोगवाहिनां योगस्य **निक्षेपः** करणीयः । अथ **सर्वथा** तत्र प्रासुकं न लभ्यते तत आह— सर्वेषां प्रासुकस्या**सत्य**भावे **इतरे**ऽप्यागाढयोगवाहिनो निक्षिप्यन्ते। एव**मवमौदर्ये** राजद्विष्टेऽपि च भावनीयम् ॥ २१२२॥

साम्प्रतमागाढे नवकवर्जनमिति व्याख्यानार्थमाह—

**आगाढम्मि उ जोगे, विगतीओ नव विवज्जणीयाओ ।**

**दसमाए होइ भयणा, सेसगभयणा वि इयरम्मि ॥ २१२३ ॥**



For Private and Personal Use Only

**आगाढयोगे** पक्वविकृतिव्यतिरेकेण शेषा **नवापि विकृतयो विवर्जनीया। दशम्याः** पुनः पक्वविकृते**र्भवति भजना** विकल्पना, आगाढं ग्लानत्वमधिकृत्य पूर्वप्रकारेण तस्याः सेवना भवति, शेषकालं नेति भावः। **इतरस्मिन्** अनागाढयोगे **शेषकाणामपि** क्षीरादीनां विकृतीनां **भजना** विकल्पना, आगाढग्लानस्यानागाढग्लानस्य चान्तरान्तरा विकृतिग्रहणाय कायोत्सर्गस्यापि करणाभ्यनुज्ञानात्॥ २१२३॥ सम्प्रति ''निक्कारणकारणे विगती'' [गा.२११२] इति व्याख्यानयति—

**निक्कारणे न कप्पंति, विगतीतो जोगवाहिणो ।**
**कप्पंति कारणे भोत्तुं, अणुण्णाया गुरुहि उ ॥ २१२४ ॥**

**योगवाहिन** आगाढयोगवाहिनो अनागाढयोगवाहिनो वा **निष्कारणे** ग्लानत्वादि-कारणाभावे **विकृतयः** पूर्वप्रकारेण भोक्तुं न **कल्पन्ते। कारणे** पुनरनुज्ञाता **गुरुभिर्भोक्तुं कल्पन्ते**, न च कारणे योगनिक्षेपेऽपि दोषः ॥२१२४॥

तथा चाह—

**विगतीकएण जोगं, निक्खिवए दढदुब्बले ।**
**से भावतो अनिक्खित्ते, निक्खित्ते वि य तम्मि उ ॥ २१२५ ॥**

यः संहननेन **दृढोपि** सन् शरीरेण **दुर्बल** इति कृत्वा **विकृतिकृतेन** विकृतिपरिभोगाय **योगं** निक्षिपति, से तस्य निक्षिप्तेऽपि **तस्मिन्** योगे **भावतः** स योगो**ऽनिक्षिप्त** एव, गुर्वाज्ञया निक्षेपणात् ॥२१२५॥

**विगतिकएण जो जोगं, निक्खिवे अदढे बले ।**
**स भावतो अनिक्खित्ते, उववाएण गुरूण उ ॥ २१२६ ॥**

**यः** बली बलवानपि संहननेनादृढ इति कृत्वा **विकृतिकृतेन योगं निक्षिपति स** योगस्तस्य **भावतोऽनिक्षिप्त** एव। कुतः? इत्याह-**गुरुणामुपपातेन** आज्ञया "उववातो निद्देसो आणा विणओ य होंति एगट्ठा"[गा.२०७२] इति वचनात्, निक्षेपणादिति वाक्यशेषः। न च तथा योगनिक्षेपणे योगस्य सर्वथा भङ्गः॥ २१२६॥

यत आह—

**सालंबो विगतिं जो उ, आपुच्छित्ताण सेवए ।**
**स जोगे देसभंगो उ, सव्वभंगो विवज्जए ॥ २१२७ ॥**

**सालम्बो** विकृतिभिः प्रीणितः सन् क्षिप्रं ज्ञानादि ग्रहीष्यामीत्यालम्बनसहितो यो गुरुमा-**पृच्छ्य विकृतीः सेवते** परिभुङ्क्ते, **स योगे** योगस्य **देशभङ्गो** भवति, न सर्वभङ्गो, विपर्यये आलम्बनाभावे गुर्वनापृच्छायां च सर्वभङ्गः ॥ २१२७॥

अथ 'साक्षाद्योगं निक्षिपति, न च सर्वभङ्ग' इति का वाचो युक्तिरत आह—

**जह कारणे असुद्धं, भुंजंतो न उ असंजतो होइ ।**
**तह कारणम्मि जोगं, न खलु अजोगी ठवेंतो वि ॥ २१२८ ॥**

**यथा कारणे** छिन्नाध्वकादावशुद्धमपि **भुञ्जानो न तु** नैवा**संयतो भवति, तथा कारणे** दुर्बलत्वादिलक्षणे सति **योगं स्थापयन्नपि खलु नैवायोगी** भवति, ततो न सर्वभङ्गः ॥२१२८॥

**अण्णो इमो पगारो, सो पडिच्छयस्स उ अहिज्जमाणस्स ।**
**माया-नियडिजुत्ते, ववहारो सचित्तमादिम्मि ॥ २१२९ ॥**

**प्रतीच्छकस्याधीयमानस्यायं वक्ष्यमाणः प्रकारः**। तमेवोपदर्शयति— **सचित्तादिके** सचित्तविषये यो **मायानिकृतियुक्ते** माया वञ्चनाभिप्रायो निकृतिः-तदनुरूपबहिराकाराच्छादनं, ताभ्यां युक्तस्तस्मिन् **व्यवहार** आभवद्व्यवहारः प्रायश्चित्तव्यवहारश्च भणनीयः॥ २१२९॥

तमेवाभिधित्सुराह—

**उप्पण्णे उप्पण्णे, सचित्ते जो उ निक्खिवे जोगं ।**
**सव्वेसि गुरुकुलाणं, उवसंपय लोपिया तेण१ ॥ २१३० ॥**
**बहिया य अणापुच्छा२, विहीए आपुच्छणाए मायाए३ ।**
**गुरुवयणे पच्छकडो, अब्भुवगमे तस्स इच्छाए ॥ २१३१ ॥**

**उत्पन्ने उत्पन्ने सचित्ते,** उपलक्षणमेतद्, अचित्ते वा **यो योगं निक्षिपति**। किमुक्तं भवति? यदा यदा तस्य सचित्तादिकमुत्पन्नं भवति तदा तदा गुरुं विज्ञपयति— अस्ति किञ्चित्प्रयोजनं

साधयितव्यमतो निक्षिपामि योगमिति। एवं मायाबहुलतया यो योगं निक्षिपति **तेन** पापीयसा **सर्वेषां गुरुकुलानां श्रुतोपसम्पद् लोपिता १**॥ २१३०॥

[१]**बहिः** उद्भ्रामकभिक्षाचर्यायां गतो यः सचित्तादिकमुत्पन्नं यस्य सकाशे समीपेऽधीते तम**नापृच्छ्य** निजाचार्याणां प्रेषयति, तेनापि सर्वगुरुकुलानां श्रुतोपसम्पल्लोपिता २। **विहीए आपुच्छणाए मायाए** इति, यदा सचित्तादिकमुत्पन्नं तदैतत् चिन्तयति मा मम एतद् गुरवो हरिष्यन्ति ततो मायया विधिना गुरुनापृच्छति— स्वजनवर्गं [२]वन्दापयितुं व्रजामि; तेनापि सर्वगुरुकुलानां श्रुतोपसम्पल्लोपिता ३ अमीषां च त्रयाणामपि मायानिष्पन्नम् प्रायश्चित्तं मासगुरु, सचित्तनिष्पन्नं चतुर्गुरु, अचित्तविषयं जघन्यमध्यमोत्कृष्टोपधिनिष्पन्नम्। **गुरुवयणे पच्छकडो**त्ति ये ते त्रिभिः प्रकारैरपहृताः शिष्यास्ते कदाचित्स्नानादिषु समवसरणादौ मिलन्ति, गुरुणा च पृष्टाः सन्तो यथावन्निवेदयन्ति, ततो व्यवहारे जाते स आचार्यवचनेन पश्चात् क्रियते पराजीयते, तस्य सत्कं सर्वमाचार्यस्याऽऽभवतीत्यर्थः। **अब्भुवगमे तस्स इच्छाए** इति पुनस्तेन पराजितेनाभ्युपगमः क्रियते, यथा 'न सर्वं मया सुन्दरं कृतं, मिथ्यादुष्कृतं मम' इति तदा तस्यैवमभ्युपगमे इच्छया करोतु, मा वा तदुत्पादितसचित्ताद्यपहरणमिति ॥२१३१॥



**१. बहिरुद्गमे सति भिक्षा° खं.॥ २. B3 मु.। वन्दापितुं -पु. प्रे.॥**

साम्प्रतमेतदेव गाथाद्वयोक्तं व्याख्यानयति—

**अहिज्जमाणे उ सचित्तं, उप्पण्णं तु जया भवे ।**
**जोगो निक्खिप्पंत[1] भंते, कज्जं मे किंचि बेति उ ॥ २१३२ ॥**

**अधीयाने** अधीयानस्य सतो **यदा** यदा **सचित्तमुत्पन्नं भवति** तदा तदा गुरुसमीपं गत्वा ब्रूते— **भदन्त मम किञ्चित्कार्यं** प्रयोजनमस्ति भो **निक्षिप्यतां योग** इति ॥ २१३२ ॥

अधुना 'बहिया य अणापुच्छा' इति व्याख्यानायाह—

**बहिया य अणापुच्छा, उब्भामे लभिय सेहमादिं तु ।**
**नेइ सयं पेसति वा, आसन्नट्ठियाण उ गुरुणं ॥ २१३३ ॥**

**बहिः उद्भ्रामे** उद्भ्रामकभिक्षाचर्यायां गतः **शैक्षकादि लब्ध्वा** यस्य सकाशेऽधीते तमनापृच्छ्य **आसन्नस्थितानाम**नन्तरक्षेत्रस्थितानां **गुरूणां** निजाचार्याणां **स्वयं नयति**, अन्यैर्वा स्वगुरुकुलसत्कैः **प्रेषयति** ॥ २१३३ ॥

---

१. C P B 3 मु.। निक्खिपतू -पु. प्रे. ॥

'विहीए आपुच्छणाए मायाए' इति व्याख्यानार्थमाह—

**अहवुप्पण्णे सचित्तमादिए मा मे ऐतेोहंच्छित्ती ।**
**मायाए आपुच्छति, नायविहिं गंतुमिच्छामि ॥ २१३४ ॥**

**अथवेति** मायायाः प्रकारान्तरो(रतो)पदर्शने। **उत्पन्ने सचित्तादिके** चिन्तयति— **मा मे** ममेदं सचित्तादिकमुत्पन्न**मेतैः** गुरुभिः **अंछिति** इति अपह्रियतामिति **मायया आपृच्छति— ज्ञातिविधिं** स्वजनवर्गे वन्दापयितुं **गन्तुमिच्छामि** ॥२१३४॥

**पव्वावेउं तहियं, नालमनाले य पत्थवे गुरुणो ।**
**आगंतुं च निवेयइ, लद्धा मे नालबद्धत्ति ॥ २१३५ ॥**

**तत्र** गत्वा **नालबद्धान्** नालसम्बद्धान् **अनालबद्धान्वा प्रव्राज्य गुरोः** स्वाचार्यस्य **प्रेषयति**। प्रेष्य च पुनरध्यापयितुः समीपे समागच्छति। **समागत्य च निवेदयति,** यथा— **मया लब्धा नालबद्धा इति** तत्र प्रेषिताः, नेहानीताः ॥ २१३५॥

**ण्हाणादिसु इहरा वा, दट्ठुं पुच्छा कयाऽऽ सि पव्वइया ।**
**अमुएण अमुयकाले, इह पेसविया नीया वा वि ॥ २१३६ ॥**

ये ते त्रिभिः प्रकारैः अपहृताः शिष्यास्तान् जिन**स्नानादिषु** समवसरणे **इतरथा वा** अन्यत्र वा मिलितान् **दृष्ट्वा** आचार्येण **पृच्छा कृता**। यथा **कदा** कथं वा **प्रव्राजिता** अभवन्? ततस्ते तत्क्षेत्रं तं च कालं तं च पुरुषं कथयन्ति, यथा— **अमुकेनामुके काले** इह अस्मिन् क्षेत्रे प्रव्राजिताः, तथा एवमन्यैः सह **प्रेषिताः** स्वयं **वा** तत्र **नीताः** ॥२१३६॥

एवं निवेदिते व्यवहारो जातः, तस्मिंश्च व्यवहारे स पराजितस्तत आचार्येण यत्कर्तव्यं तदाह—

**सो उ पसंगऽणवत्थानिवारणट्ठाए मा हु अण्णो वि।**
**काहिति एवं होउं, गुरुयं आरोवणं देंति ॥ २१३७ ॥**

स आचार्यो **मा एवं भूत्वाऽन्योऽप्येवं कार्षीदिति प्रसङ्गानवस्थानिवारणार्थं गुरुकमारोपणं** मासगुरुप्रभृतिकं पूर्वोक्तं **ददाति** ॥ २१३७॥

अधुना 'अब्भुवगमे तस्स इच्छाए' इति व्याख्यानयति—

**अब्भुवगयस्स सम्मं, तस्स उ पणिवइय वच्छलो कोइ ।**
**वियरति तेच्चिय सेहे, एमेव य वत्थपत्तादी ॥ २१३८ ॥**

सत्यं, मया न सुन्दरं कृतं, तस्मान्मिथ्या मे दुष्कृतमिति **सम्यगभ्युपगतस्य** प्रतिपन्नस्य कोऽप्याचार्यः **प्रणिपतितवत्सलो** ये **शैक्षा**स्तेन दीक्षितास्**तानेव** च **वितरति** प्रयच्छति। **एवमेव वस्त्र-पात्रादिक**मपि तदुत्पादितं तस्यैव प्रयच्छति ॥ २१३८॥

उपसंहारमाह—

**एवं तु अहिज्जंते, ववहारो अभिहितो समासेण ।**
**अभिधारेंते इणमो, ववहारविहिं पवक्खामि ॥ २१३९ ॥**

**एव**मनेन प्रकारेण **तुः** भिन्नक्रमः, स चाग्रे योक्ष्यते, **अधीयाने व्यवहारः** समासेन संक्षेपेणाभिहितः। **इमं पुनर्व्यवहारविधिमभिधारयति प्रवक्ष्यामि** ॥२१३९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिज्ञातमेव निर्वाहयति—

**जं होति नालबद्धं, घाडियनाती व जो तहिं लंभो ।**
**मोएहिंति विमग्गंता, चिंधं सेसेसु आयरितो ॥ २१४० ॥**

**यद्भवति नालबद्धं** वल्लीबद्धमित्यर्थः । सा च वल्ली द्विधा-अनन्तरा सान्तरा च । तत्रानन्तरा इमे षड् जनास्तद्यथा -माता पिता भ्राता भगिनी पुत्रो दुहिता च। उक्तं च—

*वल्ली[1] संतरऽणंतर, अणंतरा छज्जणा इमे हुंति।*
*मायापिया य भाया, भगिणी पुत्तो य धूया य ॥१॥ [पञ्चकल्पभाष्ये]*

सान्तरा पुनरियं-मातुर्माता १ पिता २ भ्राता ३ भगिनी च ४ तथा पितुः पिता १ माता २ भ्राता ३ भगिनी च ४। तथा भ्रातुरपत्यं भ्रात्रीयो भ्रात्रीया वा, भगिन्या वा अपत्यं भागिनेयो भागिनेयी वा, पुत्रस्यापत्यं पौत्रः पौत्री वा, दुहितुरपत्यं दौहित्रो दौहित्री वा । उक्तं च—



१. **वल्लीअणंतर संतर-पु. प्रे.। वल्ली अंतर संतर-** PC ॥

For Private and Personal Use Only

*माउम्माया य पिया, भाया भगिणी य एव पिउणोवि ।*
*भाउ-भगिणीणऽवच्चा, धूया पुत्ताण वि तहेव ॥ २ ॥ [पञ्चक०]*

परंपरवल्लिया वा एसा । अन्ये त्वाहुः- प्रपौत्रप्रपौत्री इत्यादिरपि परम्परवल्ली यावत्स्वाजन्यस्वीकारः। **घाडियनाती व**त्ति यो वा घटितज्ञातिः दृष्टाऽऽभाषित इत्यर्थः, **यो** वा **तत्र** नालबद्धे घटितज्ञातौ वा **लाभः**। ते एते अनन्तरोदिता**श्चिह्नं विमार्गयन्तः** सन्तोऽभिधारयन्ति अभिधारयत आभाव्या भवन्ति, **शेषेषु** पुनरनभिधारयत्सु **स्वाचार्यः** श्रुतगुरुः स्वामी भवति, शेषा अनभिधारयन्तः श्रुतगुरोराभाव्या भवन्तीत्यर्थः । उक्तं च—

*जइ ते अभिधारेंती, पडिच्छगं ते पडिच्छगस्सेव।*
*अह नो अभिधारन्ती, सुयगुरुणो तो उ आभव्वा ॥ ३ ॥ [पञ्चक०]*

इयमत्र भावना- ये नालबद्धा ये च घटितज्ञातयो ये वा तैर्दीक्षितास्तैः सह सङ्केतः पूर्वं कृतः, यथा- यूयममुकस्याचार्यस्य पार्श्वे व्रजत, अहं पुनः पश्चादागमिष्यामि; एवं सङ्केतं कृत्वा ते पूर्वमुपस्थिता; ते चाभिधारयन्तो वर्तन्ते, यथा—अमुकोऽमुककाले समागमिष्यति, सोऽपि च पश्चादागतः सन् तथैव यदि निवेदयति, चिह्नान्यपि च सर्वाण्यपि मिलन्ति तदा पूर्वमुपस्थितास्तस्य सर्वे । उक्तं च—

*संगारो पुव्वकतो, पच्छा पडिच्छओ उ सो जातो।*

*तेणं निवेदियव्वं, उवट्ठिया पुव्व सेहा से॥ ४ ॥*

यदि पुनः कालतश्चिह्नैश्च विसंवादस्तदा गुरोराभाव्य इति ॥ २१४०॥ एतदेव वैतत्येन व्याख्यानयन्नाह—

**उवसंपज्जते[1] जत्थ उ, तत्थ पुट्ठो भणाति[2] तू ।**

**वयचिंधेहिं संगारं, वण्ण सीए यऽणंतगं ॥ २१४१ ॥**

**यत्रोपसम्पद्यते** स पश्चात्तत्र तैः पृच्छ्यते— केन कारणेन त्वमागतोऽसि ? स **प्राह**– सूत्रार्थानामर्थायोपसम्पत्तुम् । एवमुक्त्वा तेन सद्भावः कथनीयो यथा उपसम्पद्यते इति । परिणामात् पूर्वकालमपि युष्माकं पार्श्वे ये नालबद्धा घटितज्ञातयस्तैर्दीक्षिता वा पूर्वमुपस्थितास्तेषां मया सङ्केतः कृतो यथाहं पश्चात् **शीते** शीतकाले चशब्दादन्यस्मिन् वा काले उपसम्पत्स्ये। तेषां चैतावद्वयः, एवंभूतश्च शरीरस्य **वर्णः**, इत्थंभूतं च शीतकालप्रायोग्यम् **अनन्तकं** वस्त्रम्। एवं **वयसा चिह्नैश्च सङ्केतं** स्पष्टयति । उक्तं च—

गाथा २१४०-२१४२ अभिधारयतः व्यवहारविधिः

---

१. उवसंपज्जे जत्थ-पु. प्रे.। उवसंपज्जंते-लाडनू पाठान्तरम्॥ २. भणेतित्ते CP। भणातित्ते-B३ मु.। भणाति-पु. पे.॥



For Private and Personal Use Only

*एवइएहिं दिणेहिं, तुज्झसगासं अवस्स एहामो।*
*संगारो एव कतो, चिंधाणि य तेसि चिंधेइ [पञ्चक०] ॥२४४१॥*

अत्राभाव्यविधिमाह—

**नालबद्धा उ लब्भंते, जया तमभिधारए ।**
**जे यावि चिंधकालेहिं, संवयंति उवट्ठिया ॥ २१४२ ॥**

**यदा** तमुपसम्पत्स्यमानम**भिधारयन्ति** नालबद्धाः पूर्वोपस्थिताः, यथा सोऽत्र सत्वरमुपसम्पत्स्यते तदा ते नालबद्धास्तेन **लभ्यन्ते, ये चापि** घटितज्ञातयो नालबद्धादिदीक्षिता वा पूर्वमुपस्थिता**श्चिह्नैः कालेन** च तेऽपि तस्याऽऽभवन्ति, विसंवदन्तस्तु गुरोः। अथ चिह्नैः **संवादो**ऽस्ति न कालतः, तथाहि— यस्मिन् काले पूर्व**मुपस्थिताः** कथिता न ते तस्मिन् काले आयाताः किन्तु कालान्तरे, सोऽपि च सङ्केतदिवसैर्नायातः, ततः स ते वा पृच्छ्यन्ते। तत्र यदि केनापि कारणेन ग्लानत्वादिना स ते वा नायातास्तदा अस्ति तत्त्वतः कालसंवाद इति ते तस्याऽऽभाव्याः ॥ २१४२॥

श्री व्यवहार-सूत्रम् चतुर्थ उद्देशकः ९५० (A)

एतदेवाह—

**अण्णकाले वि आयाया, कारणेण उ केणवि ।**

**ते वि तस्साऽऽभवंति उ विवरीयाऽऽयरियस्स उ ॥ २१४३ ॥**

ये **कारणेन** ग्लानत्वादिना **केनचित्पूर्वमुपस्थिता अन्यकाले**ऽपि यस्तेनोपसम्पद्यमानेन कालो निर्दिष्टस्तस्मादन्यस्मिन्नपि काले **आयातास्तेऽपि तस्याऽऽभवन्ति, विपरीतास्तु** कारणमन्तरेण कालविसंवादिन आचार्यस्याऽऽभाव्याः, उपलक्षणमेतत् सोऽपि यदि कारणेन केनचिन्निर्दिष्टकालादन्यस्मिन् काले समायातस्तथापि तस्याभवन्ति **विपरीतास्तु** कारणमन्तरेणोपसम्पद्यमानकालविसंवादभाज **आचार्यस्य** आभाव्याः ॥ २१४३ ॥

गाथा २१४३-२१४९ संविज्ञानां दानविधिः ९५० (A)

**विप्परिणयंमि भावे, जइ भावो सिं पुण वि उप्पण्णो ।**

**ते होंताऽऽयरियस्स उ, अहिज्जमाणे य जो लाभो ॥ २१४४ ॥**

सङ्केतकरणादनन्तरं **यदि तेषां** पूर्वमुपस्थितानां भावो विपरिणतो यथा नाऽमुकस्य पार्श्वे उपसम्पत्तव्यं; तस्मिन् **विपरिणते भावे** पश्चात्**पुनरपि** केनापि कारणेन उपसम्पदनाभिप्राय

**उत्पन्नस्तदा ते** पूर्वमुपस्थिता **भवन्त्याचार्यस्य अधीयानेषु** तेषु, गाथायामेकवचनं प्राकृतत्वात्, प्राकृते हि वचनव्यत्ययोऽप्यस्ति, **यो लाभः** सोऽप्याचार्यस्य। उपलक्षणव्याख्यानादेतदपि द्रष्टव्यं, सङ्केतकरणादूर्ध्वं यदि तस्य पश्चादुपसम्पद्यमानस्य भावो विपरिणतः, पश्चात्पुनरपि कालान्तरेण जातः, तदा ते पूर्वोपस्थिता गुरोराभाव्या, यश्च तेषां लाभः सोऽपि गुरोः। तथा च पश्चादुपसम्पद्यमानमधिकृत्य **पञ्चकल्पे**ऽभिहितम्—

*कालेण य चिंधेहिं य, अविसंवादीहिं तस्स गुरुणिहरा।*
*कालम्मि विसंवदिए, पुच्छिज्जइ किन्नु आतोसि? ॥ १ ॥*
*संगारय दिवसेहिं, जइ गेलण्णादि दीवए तो उ ।*
*तस्सेव उ अहभावो, विपरिणतो पच्छ पुण जातो ॥ २ ॥*
*तो होइ गुरुस्सेव उ, एवं सुयसंपदाए भणितं उ ॥ ३॥ ॥२१४४॥*

**जे यावि वत्थपायादी चिंधेहिं संवयंति उ ॥ ३॥**
**आभवंती उ ते तस्सा विवरीयायरियस्स उ ॥२१४५॥**

**यान्यपि च वस्त्रपात्रादीनि चिह्नैः संवदन्ति** यथाऽमुकस्य पार्श्वेऽमुकमीदृशाकृति वस्त्रं

पात्रं वा यत्तद् मदीयमित्यादि तान्यपि, गाथायां पुस्त्वं प्राकृतत्वात्, **तस्याऽऽभवन्ति। विपरीतानि तु** चिह्नविसंवादभाञ्जि **आचार्यस्य** ॥ २१४५॥

**आभवंताहिगारे उ, वट्टंते तप्पसंगया।**
**आभवंता इमे अण्णे, सुहसीलादि आहिया ॥ २१४६ ॥**

**आभवदधिकारे वर्तमाने** तत्प्रसङ्गाद् आभवदधिकारप्रसङ्गाद् **इमे** वक्ष्यमाणा **अन्ये आभवन्तः सुखशीलादयः** सुखशीलादिप्रयुक्ता आख्याताः॥ २१४६॥

तानेव द्वारगाथया संगृह्णान आह—

**सुहसील१ऽणुकंपा२ऽऽयट्ठिए य३ संबंधि ४ खमग५गेलस्स६ ।**
**सच्चित्तेसऽसिहाओ, पकड्ढए धारए दिसाओ ॥ २१४७ ॥**

**सुखशीलेन** भावप्रधानोऽयं निर्देशः सुखशीलतया१ **अनुकम्पया** २ **आत्मस्थितस्य** ३ **सम्बन्धिनः** स्वज्ञातेः४ **क्षपकस्य** ५ **ग्लानस्य** वा ये प्रेषिता ६ यश्च **सचित्तेषु अशिखाको**-ऽन्यस्य प्रेषितः एतान् स्वकुलसम्बन्धी स्वगणसम्बन्धी वा **प्रकर्षयति,** आकर्षयतीत्यर्थः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**धारयति** च **दिशा**वात्मीये इत्येष द्वारगाथासंक्षेपार्थः ॥ २१४७॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः सुखशीलद्वारमाह—

**सुहसीलयाए पेसेइ, कोइ दुक्खं खु सारवेउं जे।**
**देइ व आयट्ठीणं, सुहसीलो दुट्ठसीलोत्ति ॥ २१४८॥**

**दुःखं खलु** साधून् **सारयितुमिति** मन्यमानः **कोऽपि सुखशीलतया** कमपि साधुमन्यस्य **प्रेषयति** । यदि वा कोऽपि **सुखशील आत्मार्थितानाम्** आत्माश्रितानाम् **दुष्टशीलो**ऽयमिति प्रकाश्य **ददाति** ॥ २१४८॥

**तणुगं पि नेच्छए दुक्खं सुहमाकंखए सया ।**
**सुहसीलतए वा वी, सायागारवनिस्सितो ॥ २१४९ ॥** दारं १।

**तनुकमपि** स्तोकमपि **नेच्छत्या**त्मनो **दुःखं,** किन्तु केवलं **सदा सुखमाकाङ्क्षति** । ततः **सुखशीलतया सातगौरवनिश्रितः** स्वयं साधून् आदत्ते सर्वे ते भवन्त्याचार्यस्या-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽऽभाव्याः। गतं सुखशीलद्वारम् ॥२१४९॥ साम्प्रतमनुकम्पाद्वारमाह—

**एमेव य असहायस्स, देति कोइ अणुकंपयाए उ** । दारं २।
**नेच्छइ परमायट्ठी, गच्छा निग्गंतुकामो वा ॥ २१५० ॥**

**[1]पेसे वेसो उ अन्नत्थ,** (दारं ३) **सिणेहा नयगस्स वा** । दारं ४।
**खमए वेज्जवच्चट्ठा, देज्ज वा तहिं कोइ तु ॥ २१५१॥** दारं ५ ।

**एवमेव** स्वसम्बन्धित्वादिकारणव्यतिरेकेणापि **असहायस्य** सतः **कोऽप्यनुकम्पया ददाति** । गतमनुकम्पाद्वारम्। आत्मस्थितद्वारमाह— **आत्मार्थी** आत्माश्रितार्थी सन् **परं नेच्छति,** ततः कमप्यात्मस्थितं न करोति यदि **बा गच्छान्निर्गन्तुकामः** स आत्मार्थी अन्यत्र यस्य(त्र)यास्यति तत्र कमपि साधुं प्रेषयति । गतमात्मस्थितद्वारम्। सम्बन्धिद्वारमाह- **स्नेहात् ज्ञातस्य** वा स्वजनस्य वा **सोऽन्यत्र प्रेषयति** । क्षपकद्वारमाह **तत्रान्यत्र** वा प्रसिद्धे **क्षपके कोऽपि वैयावृत्त्यार्थं** कमपि साधुं **दद्यात्** ॥ २१५०-५१॥

---

१. पेसवे सो-ला.॥



For Private and Personal Use Only

सम्प्रति ग्लानद्वारं सशिखाकद्वारं चाह—

**पेसेति गिलाणस्स वा, अहव गिलाणो सयं अचाएतो ।**
**पेसंतस्सा असिहो, ससिहो पुण पेसितो जस्स ॥ २१५२॥**

**ग्लानस्य** वा कोऽपि वैयावृत्त्यकरणाय **प्रेषयति** साधुम्, **अथवा स्वयं ग्लानः सन्नशक्नुवन्** कमपि शिष्यं करोति; सर्वेऽप्येते आचार्यस्याऽऽभाव्याः ६ । तथा यदि वा सशिखाकः परस्मै प्रेष्यते तर्हि स **यस्य प्रेषित**स्तस्यैवाऽऽभवति । अथा**शिखाकः** परस्मै प्रेषितस्तर्हि स **प्रेषयितु**रेवाऽऽभाव्यः, न परस्य। तथा चाह— **पेसंतस्स असिहो, ससिहो पुण पेसितो जस्स** ॥ २१५२॥

अत्र परः प्रश्नमाह—

**चोदेती कप्पम्मी, पुव्वं भणियं तु पेसितो जस्स ।**
**ससिहो वा असिहो वा, असंथरे सो उ तस्सेव ॥ २१५३ ॥**

**चोदयति** प्रश्नं करोति ननु **पूर्वं कल्पे भणितं यस्य सशिखोऽशिखो वा प्रेषितः स तस्यैव असंस्तरे** असंस्तरणे सति भवति । ततः कथमत्राशिखाकः प्रेषयितुराभाव्योऽभिहित? इति ॥२१५३॥

अत्रोत्तरमाह—

**भण्णइ पुव्वुत्तातो, पच्छा वुत्तो विही भवे बलवं ।**
**कामं कप्पेऽभिहियं, इह असिहं दाउ न लभति उ ॥ २१५४ ॥**

**भण्यते** अत्रोत्तरं दीयते- **पूर्वोक्ताद्विधेः पश्चादुक्तो विधिर्बलवान् भवति** ततो यद्यपि **कामं** कल्पेऽभिहितं तथापीहाशिखं तु **दातुं न लभते** ॥ २१५४॥

अन्यच्च—

**संविग्गाण विही एसो, असंविग्गे न दिज्जए ।**
**कुलिच्चो वा गणिच्चो वा, दिण्णं पी तं तु कड्ढए ॥ २१५५ ॥**

**एष** दानविधिः **संविग्नानां** भणितः। **असंविज्ञे** असंविग्नस्य पुनः सर्वथा **न दीयते** न

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दातव्यः। अथ कथमपि केनापि दत्तो भवति तर्हि तं **दत्तमपि कुलसत्को वा गणसत्को वा कर्षयति**॥२१५५॥

**खित्ताती आउरे भीते, अदिसत्थी व जं दए ।**
**सचित्तादि कुलादीओ, भुज्जो तं परिकड्ढए ॥ २१५६ ॥**

**क्षिप्तादिः**, आदिशब्दात् दृसयक्षाविष्टादिपरिग्रहः, **आतुरो** मरणचिह्नान्युपलभ्यात्याकुलः, **भीतः** किमपि मे राजप्रद्विष्टादिकं करिष्यति, न[१] वेद्मि इति भयाकुलः, **अदिगर्थी** वाधिकृतां दिशं मोक्तुकामो **यद्ददाति** परस्मै **सचित्तादिकं तद् भूयः कुलादिः**, आदिशब्दात् गणपरिग्रहः **परिकर्षयति**॥२१५६॥

तदेतत् प्रतीच्छकानधिकृत्योक्तमधुना शिष्यानधिकृत्याह—

**नालबद्धे अनाले वा, सीसम्मि उ नत्थि मग्गणा ।**
**दोक्खरक्खरदिट्ठंता, सव्वं आयरियस्स उ ॥ २१५७ ॥**

---

१. न विद्धः इति - खं. वा. पु. ॥



For Private and Personal Use Only

**शिष्ये** स्वदीक्षितेऽयं **नालबद्धोऽयमनालबद्ध** इति विषयविभागेन **नास्ति मार्गणा,** किन्तु यत्ते शिष्या लभन्ते सचित्तादि तत्**सर्वमाचार्यस्या**ऽऽभवति, केन दृष्टान्तेनेत्याह- **द्व्यक्षरखरदृष्टान्तात्** द्व्यक्षरो दासः खरो गर्दभस्तद्दृष्टान्तात्, 'दासेन मे खरः क्रीतः, दासोऽपि मे खरोऽपि मे,' इत्येवंलक्षणात् ॥२१५७॥

**सूत्रम्— दो साहम्मिया एगयतो विहरंति, तं जहा-सेहे राइणिए य, तत्थ सेहतराए पलिच्छन्ने, राइणीए अपलिच्छन्ने, सेहतराएणं राइणीए उवसंपज्जियव्वे, भिक्खोववायं च दलयइ कप्पागं ॥ २४ ॥**

"दो साहम्मिया एगतो विहरंति, तं जहा-सेहे रायणिए य" इत्यादि। अस्य सूत्रस्य सम्बन्धमाह—

**चारियसुत्ते भिक्खू, थेरो वि य अहिकतो इहं तेसिं ।**
**दोण्ह वि विहरंताणं, का मेरा? लेसतो जोगो ॥ २१५८ ॥**

**चरिकासूत्रे** प्राक् **भिक्षुः स्थविरश्चाधिकृत**स्तत **इहास्मिन्** सूत्रे **तयोर्द्वयोर्विहरतोः** का **मर्यादा** व्यवस्थितेत्यभिधीयते, एष **लेशतः** पूर्वसूत्रेण सहास्य सूत्रस्य **योगः** सम्बन्धः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥२१५८॥

पुनः प्रकारान्तरेण सम्बन्धमाह—

**साहम्मियत्तणं वा, अणुयत्तति होतिमेवि साहम्मी ।**
**उवसंपया व पगया, इहइंपुवसंपया[1] तेसिं ॥ २१५९ ॥**

बहवे साहम्मिया इत्यतः सूत्रात्**साधर्मिकत्वमनुवर्तते**। **वा**शब्दः सम्बन्धस्य प्रकारान्तरो-(रतो)पदर्शनार्थः। **इमावपि** चाधिकृतसूत्रोपात्तौ शैक्षरत्नाधिकौ **साधर्मिकौ**। ततः साधर्मिकप्रस्तावादधिकृतसूत्रोपनिपातः। तृतीयप्रकारः "भिक्खू गणातो अवकम्म अण्णं गणं उवसंपज्जित्ता णं विहरेज्जा" [सूत्रम्] इत्यत **उपसम्पत्प्रकृता,** वाशब्दः प्राग्वद् **इहाप्यस्मिन्नपि** सूत्रे **तयोः** शैक्षरत्नाधिकयो**रुपसम्पद**भिधीयते इत्यधिकृतसूत्रारम्भ इत्येष सूत्रसम्बन्धः।

अस्य व्याख्या— **द्वौ साधर्मिकौ** समानगुरुकुला**वेकतः** सहितौ **विहरतस्तद्यथा-शैक्षो रात्निकश्च**। तत्र यः **शैक्षः सपरिच्छन्नः** परिवारोपेतः, **रात्निको** रत्नाधिको**ऽपरिच्छन्नः**,

१. अत्र- "पि +उवसंपया=पुवसंपया" इति ज्ञेयम् ॥



For Private and Personal Use Only

परिवाररहित इत्यर्थः। तत्र **शैक्षतरकेण रात्निको** रत्नाधिक **उपसम्पत्तव्यः**, तथा शैक्षतरको रत्नाधिकस्य **भिक्षामुपपातं च** विनयादिकं च **कल्प्यकं** कल्पनीयं **ददाति** एष सूत्रसंक्षेपार्थः ॥ २१५९ ॥

अधुना **भाष्यविस्तरः**—

**सेहम्मि पलिच्छन्ने, उवसंपय दोण्हवी पलिच्छातो ।**
**वोच्चत्थे मासलहुओ, कारण असई सभावो वा ॥ २१६० ॥**

तौ द्वावपि जनौ सहाध्यायिनौ सब्रह्मचारिणौ च । तत्र यः शैक्षतरकः सपरिच्छन्नो द्रव्यपरिच्छदोपेतः परिवारसहित इत्यर्थः। भावपरिच्छदेन पुन**र्द्वयोरपि परिच्छदो**ऽस्ति। तत्र **शैक्षे** द्रव्यतः **परिच्छन्ने** सति तेन रत्नाधिकस्यो**पसम्पत्** दातव्या। ततो जघन्यतः संघाटो रत्नाधिकस्य देयः, उत्कर्षतो बहवोऽपि दातव्याः। तथा शैक्षकेण रत्नाधिकस्य पुरत आलोचनीयं, रत्नाधिकेन शैक्षकस्य पुरतः, अन्यथा **वोच्चत्थे** विपर्यासे उभयोरपि प्रायश्चित्तं **मासलघु**। तथा**कारणे** ग्लानादिलक्षणे व्यापृततया तथा द्वावेव तौ जनाविति **असति** सहायस्याभावे न दद्यादपि सहायं, **स्वभावो वा** तस्यात्मीयकरणादिलक्षणस्ततो न ददाति

सहायं, किन्त्वौचित्येन तस्य कृत्यं कारयति। एष द्वारगाथासंक्षेपार्थः ॥ २१६० ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः पूर्वार्धं विवृणोति—

**संज्झंतिवासिणो दो वि, दो वि भावेण नियमसो छण्णा ।**
**रायणिए उवसंपय, सेहतरगेण कायव्वा ॥ २१६१ ॥**

तौ **द्वावपि सहाध्यायिना**वेकस्य गुरोरन्ते**वासिनौ** च **द्वावपि भावेन** ज्ञानादिना **नियमशो** नियमेन **छन्नौ,** ज्ञानादिरूपभावपरिवारोपेतावित्यर्थः । द्रव्यपरिच्छदेन पुनः शैक्षतरक एवोपेतः। तत्र **शैक्षतरकेण रात्निके** रत्नाधिक**स्योपसम्पत्कर्त्तव्या** ॥ २१६१ ॥

"वोच्चत्थे मासलहुतो" इत्यस्य व्याख्यानमाह—

**आलोइयम्मि सेहेण, तस्स वियडेइ पच्छ राइणितो ।**
**इति अकरणम्मि लहुगो, अवरोप्परगव्वतो लहुगा ॥ २१६२ ॥**

प्रथमतः **शैक्षतरकेण** रत्नाधिकस्य पुरत आलोचनीयं, तेना**लोचिते पश्चाद्**

**रत्नाधिकस्तस्य** शैक्षतरस्य पुरतो **विकटयति** आलोचयति। एतच्चेत् तौ न कुरुतस्तत **इति** एतस्या**करणे** द्वयोरपि प्रत्येकं **लघुको** मासः प्रायश्चित्तम्। **अवरोप्परगव्वतो लहुगा** इति यदि शैक्षतरको द्रव्यपरिच्छेदेनाहं परिच्छन्न इति गर्वतो रत्नाधिकस्य पुरतो नाऽऽलोचयति तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः। रत्नाधिको यदि 'रत्नाधिकोऽहं' इति गर्वेण शैक्षतरकस्य पुरतो नाऽऽलोचयति तदा तस्यापि प्रायश्चित्तं चत्वारो लघुकाः॥ २१६२॥

एतदेवोपदेशद्वारेण स्पष्टयति—

**एगस्स उ परिवारो, बिइए रायणियत्तवादो य ।**
**इय गव्वो न कायव्वो, दायव्वो चेव संघाडो॥ २१६३ ॥**

**एकस्य परिवारो**ऽस्ति, **द्वितीये रात्निकत्ववादः**, रत्नाधिको[१]ऽहमिति प्रवाद **इति एवं**रूपो **गर्वो** द्वाभ्यामपि न **कर्तव्यः**. किन्तु परस्परमालोचयितव्यमन्यथा चतुर्लघुकप्रायश्चित्तापत्तेः। **दातव्यश्च** शैक्षतरकेण जघन्यतोऽपि रत्नाधिकस्य **सङ्घाटः** ॥ २१६३॥

---

१. ०कोऽयमिति-पु. प्रे.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्प्रति ''भिक्खोववायं च दलाति कप्पागं'' इत्यस्यार्थमाह—

**पेहा-भिक्ख-कितीओ, करेंति सो आवि ते पवाएति ।**
**न पहुप्पंते दोण्ह वि, गिलाणमादीसु न च देज्जा ॥ २१६४ ॥**

शैक्षतरस्य शिष्या रत्नाधिकस्य सम्बन्धिनो वस्त्रादेः **प्रेक्षां** प्रतिलेखनां कुर्वन्ति, तथा तद्योग्यां भिक्षामानयन्ति, **कृतिकर्म** विनयो विश्रामणा च तत् **कुर्वन्ति,** किमुक्तं भवति? यदाज्ञापयति तत् कुर्वन्ति, वाचनादिपरिश्रान्तस्य च विश्रमणामिति, **स चापि** रत्नाधिकस्तान् **प्रवाचयति** सूत्रं पाठयत्यर्थं च श्रावयतीत्यर्थः। कारणे असतीत्यस्य व्याख्यानमाह-**न पहुप्पंते** इत्यादि, ते शैक्षतरशिष्या **ग्लाना( नत्वा )दिषु** प्रयोजनेषु व्यापृतास्ततो न प्रभवन्ति न प्रपारयन्ति साधव इति सहायं न दद्यात्[1]। यदि वा द्वावेव तौ जनौ ततः किं दीयतामिति **न दद्यात्** ॥ २१६४॥

अधुना ''सभावो वा'' [गा. २०६०] इत्यस्य व्याख्यानमाह—

**अत्तीकरेज्जा खलु जो विदिण्णे, एसोवि मज्झं ति महंतमाणी ।**
**न तस्स ते देइ बहिं तु नेउं, तत्थेव किच्चं पकरेंति जं से ॥ २१६५ ॥**

१. °त्, अथवा तौ-खं.॥



For Private and Personal Use Only

**यो वितीर्णान्** साधूनात्मीकुर्यात्, यश्च **एषोऽपि** शैक्षाधिपतिः शैक्षतरको **ममेति महामानी, तस्य तान्** साधून् **बहिस्तस्मात्** स्थानादन्यत्र विहारक्रमेण **नेतुं न ददाति,** किन्तु **यत्से** तस्य **कृत्यं** करणीयं **तत् तत्रैव** स्थितस्य सतः **कुर्वन्ति** ॥ २१६५ ॥

अथवा—

**वारएण से देइ, न य दावेइ वायणं ।**
**तहवि भेदमिच्छंते, अविकारी उ कारए ॥ २१६६ ॥**

**वारेण** वारेण **तस्य** शुश्रूषकमेकैकं साधुं **नियुङ्क्ते, न च** तस्मात्साधूनां **वाचनां दापयति,** मा स गणभेदं कार्षीदिति हेतोः । अथैवमपि दुःस्वभावतया गणभेदं करोति तत आह-**तथापि** एवमपि क्रियमाणे गण**भेदं** कर्तु**मिच्छति** यः **अविकारी** दुर्भेदः साधुस्तेन तस्य कृत्यं **कारयति** ॥२१६६ ॥—

**सूत्रम्—दोसाहम्मिया एगयओ विहरंति, तं जहा-सेहे य, राइणीए य । तत्थ राइणीए पलिच्छन्ने, सेहतराए अपलिच्छन्ने, इच्छा रायणीए सेहतरागं उवसंपज्जेज्जा,**[1]

१. °यज्जइ-श्युब्रींग ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**इच्छा नो उवसंपज्जेज्जा[1], इच्छा भिक्खोववायं [2]दलयइ कप्पागं, इच्छा नो [3]दलयइ कप्पागं ॥ २५ ॥**

"दो साहम्मिया" इत्यादि। **द्वौ साधर्मिकावेकतः** संहतौ **विहरतः, तद्यथा- शैक्षो रत्नाधिकश्च। तत्र रात्निकः परिच्छन्नः** परिवारोपेत इत्यर्थः, **शैक्षतरकः अपरिच्छन्नः** परिवाररहितः तत्र **रात्निके रत्नाधिकस्य इच्छा** यदि प्रतिभासते **शैक्षतरकमुपसम्पद्यते।** अथ **नेच्छा** न प्रतिभासते तर्हि **नोपसम्पद्यते। भिक्षामुपपातं** च कल्प्यं **यदीच्छा** तर्हि **ददाति।** अथ दातुं **नेच्छा** तर्हि **न ददाति।** एष सूत्रसंक्षेपार्थः। अधुना **भाष्यविस्तरः—**

**रायणिय परिच्छन्ने, उवसंप-पलिच्छिओ य इच्छाए ।**
**सुत्तत्थ कारणा पुण, पलिच्छयं देंति आयरिया ॥ २१६७ ॥**

**रात्निके** रत्नाधिके द्रव्यतः **परिच्छन्ने** परिवारोपेते सति तेन शैक्षतरकस्य **उपसम्पत् परिच्छदश्च इच्छया** दातव्याः । इयमत्र भावना-स यदि शैक्षतरकोऽवमरत्नाधिकस्तुल्यश्रुतो

सूत्र २५ गाथा २१६२-२१६७ रात्निक-शैक्षतरयोः उपसम्पद्विधिः ९५७ (B)

१. 'यज्जइ-श्युब्रींग ॥ २-३. दलेज्जा- आगमप्रकाशने ॥

For Private and Personal Use Only

गुरुरत्नाधिकेन सह ततः स रत्नाधिकश्चिन्तयति, मा नूनमेतस्य भिक्षाहिण्डनव्याक्षेपेण प्रतिलेखनाव्याक्षेपेण च सूत्रार्था नश्येयुस्ततः संघाटं ददाति, अथवा एष मा समानगुरुकुलवासी सहाध्यायी द्रव्यपरिच्छदेनापरिच्छदो भूयात् [इति] सहाध्याय्यन्तेवासिस्नेहतः सङ्घाटं ददात्यालोचनां प्रयच्छति। अल्पश्रुतस्य तु परिच्छदमुपसम्पदं वा न ददातीति। अथ स शैक्षतरको रत्नाधिकाद्बहुश्रुतस्तदा नियमत उपसम्पत्तव्यः परिच्छदश्च तस्य दातव्यः। तथा चाह- **सूत्रार्थकारणात्**सूत्रार्थं गृहीतुकामाः **पुनराचार्या** उपसम्पद्यन्ते **परिच्छदं** च **ददति** ॥ २१६७॥

एतदेव स्पष्टयति—

**सुत्तत्थं जइ गेण्हइ, तो से देइ परिच्छदं ।**
**गहिए वि देइ संघाडं, मा से नासेज्ज तं सुयं ॥ २१६८ ॥**

**यदि** स रत्नाधिकस्ततः **सूत्रार्थं गृह्णाति, ततः से** तस्य **ददाति परिच्छदं** परिवारम् **गृहीतेऽपि** सूत्रार्थे **ददाति संघाटम्।** कस्माद्? इत्याह- **मा से** तस्य भिक्षाटनव्याक्षेपतः प्रतिलेखनाव्याक्षेपतश्च **तत् श्रुतं नश्ये**दिति हेतोः ॥ २१६८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अबहुश्रुतादौ तु न ददाति इत्येद्भावयति—

**अबहुस्सुते न देंती, निरुवहते तरुणए य संघाडं।**
**घेत्तूण जो व वच्चइ, तत्थ य गोणीए दिट्ठंतो ॥ २१६९ ॥**

**अबहुश्रुतः** अल्पश्रुतः, **निरुपहतः** निरुपहतपञ्चेन्द्रियस्**तरुणकश्च**, तस्मिन् सत्स्वपि साधुषु **संघाटं न ददाति**, सहायान्न ददातीति भावः। **यो वा** गीतार्थोऽपि सन् प्रदत्तान् सहायान्विपरिणम्य **गृहीत्वा व्रजति**, तस्यापि सत्स्वपि साधुषु सहायान्न ददाति तथा च **तत्र** दुष्टशीलया **गवा दृष्टान्तः** ॥ २१६९ ॥

तमेव भावयति—

**साडगबद्धा गोणी, जह तं घेत्तुं पलाति दुस्सीला ।**
**इय विप्परिणामंते, न देज्ज संते वि हु सहाए ॥ २१७० ॥**

यथा कस्यापि गौः पलायिता। ततः कथमपि लब्धा सती तेन शाटकेन बद्धा, यथा सा **शाटकबद्धा दुःशीला गौस्तं** शाटकं **गृहीत्वा पलायते। इति एवममुना** प्रकारेण यो **विपरिणामयति** सहायान् तस्मिन् विपरिणामयति **सतोऽपि सहायान्न दद्यात्** ॥ २१७० ॥



For Private and Personal Use Only

सूत्रम्— दो भिक्खुणो एगयओ विहरंति, नो ण्हं कप्पइ अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए, कप्पइ ण्हं अहाराइणियाए अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए ॥ २६ ॥

दो गणावच्छेइया एगयओ विहरंति, नो ण्हं कप्पइ अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए, कप्पइ ण्हं अहाराइणियाए अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए॥ २७ ॥

[१]दो आयरिय-उवज्झाया एगयओ विहरंति, नो ण्हं कप्पइ अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए, कप्पइ ण्हं अहाराइणियाए अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए ॥ २८ ॥

बहवे भिक्खुणो एगयओ विहरंति, नो ण्हं कप्पइ अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए, कप्पइ ण्हं अहाराइणियाए अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए ॥ २९ ॥

बहवे गणावेच्छेइया एगयओ विहरंति, नो ण्हं कप्पइ अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए, कप्पइ ण्हं अहाराइणियाए अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए ॥ ३० ॥

---

१. "एवं आयरिय उवज्झाया, एवं बहवे साहम्मिया, गणावच्छेइया, आयरिय-उवज्झाया जाव विहरित्तए"। इति प्रतिलिपि मध्ये सूत्र २८, ३२ स्थाने पाठ।।

बहवे आयरिय-उवज्झाया एगयओ विहरंति, नो ण्हं कप्पइ अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए, कप्पइ ण्हं अहाराइणियाए अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए ॥ ३१ ॥

बहवे भिक्खुणो, बहवे गणावच्छेइया, बहवे आयरिय-उवज्झाया एगयओ विहरंति, नो ण्हं कप्पइ अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए, कप्पइ ण्हं अहाराइणियाए अन्नमन्नं उवसंपज्जित्ताणं विहरित्तए त्तिबेमि ॥३२॥

"दो भिक्खुणो एगतो विहरंति" इत्यादिसूत्रसप्तकम् । अस्य सम्बन्धमाह—

**संखहिगारा तुल्लाधिगारिया एस लेसतो जोगो ।**
**आयरियस्स व सिस्सो, भिक्खु अभिक्खू अह तु भिक्खू ॥ २१७१ ॥**

अनन्तरसूत्रे 'दो साहम्मिया' इत्यादिलक्षणे द्विकलक्षणा सङ्ख्याधिकृता, अत्रापि सैव, 'दो भिक्खुणो' इत्यादि वचनात्। ततः **सङ्ख्याधिकारात्तुल्याधिकारिता** पूर्वसूत्रेण सहास्य सूत्रस्येत्येष **लेशतः** आद्यसूत्रस्य **योगः** सम्बन्धः। अथवा पूर्वसूत्रे रत्नाधिकपदेनाचार्य उपात्तः।

**आचार्यस्य** च **शिष्यो** द्विधा **भिक्षुरभिक्षुश्च** । तत्र भिक्षुः प्रतीतः। अभिक्षुः गणावच्छेदक उपाध्याय आचार्यो वा। तत **आचार्यसूत्रात्प्रागुक्ताद**थानन्तरं **भिक्षुसूत्रमुक्तम्**॥ २१७१ ॥

शेषसूत्रसम्बन्धप्रतिपादनार्थमाह—

**एमेव सेसएसु वि, गुणपरिवड्ढीए ठाणलंभो व।**
**दुप्पभिइ खलु संखा, बहुआ पिंडो उ तेण परं ॥ २१७२ ॥**

**एवमेव** पूर्वोक्तप्रकारेणैव **शेषयोरपि** गणावच्छेदका-ऽऽचार्यसूत्रयोः सम्बन्धः । तथाहि-आचार्यस्य शिष्यो भिक्षुरभिक्षुश्च। तत्र भिक्षुसूत्रमुक्तम्। तदनन्तरमभिक्षोर्गणावच्छेदकस्या-चार्यस्य च सूत्रे। अथ **गुणपरिवृद्ध्या स्थानलाभो** भवति। तथाहि— भिक्षुर्गुणाधिकत्वेन गणावच्छेदकस्थानं लभते। गणावच्छेदको गुणाधिकतया आचार्योपाध्यायस्थानम् अतो। भिक्षुसूत्रानन्तरं क्रमेण **गणावच्छेदका-ऽऽचार्योपाध्यायसूत्रे**। तथा **द्विप्रभृतिका खलु संख्या बहुका** भवति, ततो द्विसंख्यासूत्रत्रयानन्तरं बहुसंख्यासूत्रत्रयम्। बहूनां च परस्परमुपसम्पन्नानां पिण्डो भवति, **तेन** बहुसंख्यासूत्रत्रयात्परं **पिण्डः** पिण्डसूत्रमुक्तमिति॥ २१७२॥



For Private and Personal Use Only

एवमनेन सम्बन्धजातेनायातस्यास्य सूत्रसप्तकस्य व्याख्या— **द्वौ भिक्षू एकतः** संहतो **विहरतः, नो ण्ह**मिति वाक्यालङ्कारे, **कल्पते, अन्योन्यमुपसम्पद्य विहर्तुं न कल्पते। ण्ह**मिति पूर्ववत्, **यथारत्नाधिकतयाऽन्योन्यमुपसम्पद्य विहर्तुम्।** एवं गणावच्छेदकसूत्रमाचार्योपाध्यायसूत्रं च भावनीयमेवं बहुसंख्यासूत्रत्रयं पिण्डसूत्रं चेति सूत्रसप्तकसंक्षेपार्थः॥

सम्प्रत्याद्यभिक्षुसूत्रव्याख्यानार्थमाह—

**संभोइयाण दोण्हं, खेत्तादिप्पेहकारणगयाणं ।**<br>**पंथे समागयाणं, भिक्खूण इमा भवे मेरा ॥ २१७३ ॥**

द्वावाचार्यावन्यस्मिन् अन्यस्मिन् क्षेत्रे स्थितौ, तौ च परस्परं साम्भोगिकौ, तयोः **साम्भोगिकयोः द्वयो**राचार्ययोर्भिक्षवस्ताभ्यां प्रेषिताः **क्षेत्रादिप्रेक्षाकारणगताः** क्षेत्रप्रत्युपेक्षणार्थम्, आदिशब्दादुपधेर्मार्गणार्थं गताः। ते च तथागच्छन्तः पथि समागताः परस्परं मिलिताः। तेषां चैकेन पथा गन्तव्यम्, अतस्तेषां क्षेत्रादिप्रेक्षाकारणगतानां **पथि समागतानां भिक्षूणां** या **मर्यादा** सामाचारी सा **इयं** वक्ष्यमाणा **भवति** ॥ २१७३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तामेवाह—

**भिक्खुस्स मासियं खलु, पलिछण्णाणं च सेसगाणं तु ।**
**चउलहुग अपलिछन्ने, तम्हा उवसंपया तेसिं ॥ २१७४॥**

यौ द्वौ भिक्षू स्पर्धकपती तयोः शैक्षतरकेण रत्नाधिकस्य पुरतः आलोचयितव्यम्। तेनाऽऽलोचिते पश्चात् रत्नाधिकेन शैक्षतरकस्य पुरतः एवमकरणे **भिक्षोः** शैक्षस्य रत्नाधिकस्य च प्रायश्चित्तं **खलु मासिकं** मासलघु, **पलिच्छन्नाणं चे**त्यादि,, एतद्बहुसंख्याविशिष्टस्य भिक्षुसूत्रस्य व्याख्यानम्। परिच्छन्नानां जघन्यतोऽप्यात्मतृतीयानां **शेषकाणां** चाऽऽत्मद्वितीयानां यथोक्तविध्यकरणे प्रायश्चित्तं मासलघु। तत्र यद्येकोऽपरिच्छन्नस्तर्हि तेनान्य आत्मद्वितीय आत्मतृतीयो वा उपसम्पत्तव्यः, नो चेदुपसम्पद्यते तर्हि तस्मि**न्नपरिच्छन्ने**ऽनुपसम्पद्यमाने प्रायश्चित्तं **चत्वारो लघुकाः**। तं चोपसम्पद्यमानं यो नोपसम्पदं प्रतीच्छति तस्य मासलघु। यत एवं **तस्मात्परस्परमुपसम्पत्तेषां भवति** कर्तव्या॥ २१७४॥

एनामेव **निर्युक्तिगाथां भाष्यकृत्** व्याचिख्यासुः प्रथमतो "भिक्खुस्स मासियं खलु" इत्येतद् व्याख्यानयति —



For Private and Personal Use Only

**दो भिक्खू अगीयत्था, गीया एक्को व होज्ज उ अगीतो ।**
**राइणिय पलिच्छन्ने, पुव्वं इयरेसु, लहु लहुगा ॥ २१७५ ॥**

**द्वौ भिक्षू अगीतार्थौ** यदि वा द्वावपि **गीतौ** गीतार्थौ, तयोः परस्परस्याऽऽलोचनम्, अन्यथा प्रायश्चित्तं मासलघु। अथवा **एको** गीतार्थ एकश्च **भवत्यगीतार्थः**, तत्र **रत्नाधिके परिच्छन्ने** भावपरिच्छदोपेते गीतार्थे इत्यर्थः, **पूर्व**मालोचयितव्यं, पश्चा**दितरेष्वगी**तार्थेषु रत्नाधिकेन, एवं चेत् ते न कुर्वते तर्हि रत्नाधिके प्रायश्चित्तं मास**लघु**, इतरेषां चत्वारो **लघुकाः** ॥ २१७५ ॥

एनामेव गाथां विवरीषुः प्रथमतो "दो भिक्खू अगीयत्था गीया" इत्येतद्विवृणोति—

**दोसु अगीयत्थेसुं, अहवा गीतेसु सेहतरो पुव्विं ।**
**जइ नालोयइ लहुओ, न विगडे इयरो वि जइ पच्छा ॥ २१७६ ॥**

**द्वयोर्भिक्ष्वोरगीतार्थयोः, अथवा गीतार्थयोर्मध्ये यदि शैक्षतरः पूर्वं** रत्नाधिकस्य पुरतो **नाऽऽलोचयति** तदा तस्य प्रायश्चित्तं **लघुको** मासः । **इतरोऽपि** रत्नाधिकोऽपि **यदि**

**पश्चात्तस्य** शैक्षतरस्य पुरतो **न विकटयति** तदा तस्यापि प्रायश्चित्तं मासलघु। अथ यदि द्वावप्यगीतार्थौ तदा परस्परस्य विहाराऽऽलोचनैव केवला, नापराधालोचना। अथ द्वावपि गीतार्थौ तदा परस्परस्य विहाराऽऽलोचना अपराधालोचना च ॥ २१७६॥

अथैको गीतार्थोऽपरश्चागीतार्थस्तत्रालोचनाविधिमाह—

**राइणिए गीयत्थे, राइणिए चेव वियडणा पुव्विं ।**
**देइ विहारवियडणं, पच्छा रायाणितो सेहे ॥ २१७७ ॥**

यदि रत्नाधिको गीतार्थ इतरोऽगीतार्थस्तर्हि **गीतार्थे रत्नाधिके** सति **रत्नाधिके एव पूर्वं** शैक्षतरेण विहार**विकटना** अपराधविकटना च दातव्या । ततः **पश्चात् रत्नाधिकः शैक्षे** शैक्षतरकस्य **विहारविकटनां ददाति** ॥ २१७७॥

अथ शैक्षतरको गीतार्थो रत्नाधिकस्त्वगीतार्थस्तत्राह—

**सेहतरगे वि पुव्वं, गीयत्थे दिज्जए पगासणया ।**
**पच्छा गीयत्थो वि हु, ददाति आलोयणमगीते ॥ २१७८ ॥**

यदि गीतार्थः शैक्षतरकस्तर्हि तस्मिन् **गीतार्थे शैक्षतरकेऽपि पूर्वं** रत्नाधिकेन **प्रकाशना** विहारविकटना अपराधविकटना चेत्यर्थः **दीयते। पश्चात् गीतार्थोऽपि** सन् स शैक्षतरकः **हु** निश्चित**मगीते** रत्नाधिके **आलोचनां** विहारालोचनां **ददाति,** न त्वपराधालोचनाम् ॥२१७८॥

कस्मात्? इत्याह—

**अवराहविहारपगासणाउ दोण्णि वि भवंति गीयत्थे ।**
**अवराहपयं मोत्तुं, पगासणं होतगीयत्थे ॥ २१७९ ॥**

**अपराध**प्रकाशना **विहारप्रकाशना** च एते **द्वे अपि** प्रकाशने **भवतो गीतार्थे। अगीतार्थे** पुन**रपराधपदं मुक्त्वा** शेषस्य विहारस्य **प्रकाशनं भवति,** विहाराऽऽलोचना भवति नापराधालोचनेति भावः। अगीतार्थतया तस्यापराधाऽऽलोचनानर्हत्वात् ॥ २१७९ ॥

सम्प्रत्युपसंहारमाह—

**भिक्खुस्सेगस्स गयं, पलिच्छन्नाणं इयाणि वोच्छामि ।**
**दव्वपलिच्छाएणं, जहण्णेण अप्पतइयाणं ॥ २१८० ॥**

"भिक्खुस्स मासियं खलु" इत्यनेन पदेन यद् **एकस्य भिक्षोः** वक्तुमुपक्रान्तं तत् **गतं** परिसमाप्तम्। **इदानीं द्रव्यपरिच्छदेन परिच्छन्नानां जघन्येनाऽऽत्मतृतीयानां** यद्वक्तव्यं **तद्वक्ष्यामि** ॥ २१८० ॥

तदेवाह—

**तेसिं गीयत्थाणं, अगीतमिस्साण एस चेव विही ।**
**एत्तो सेसाणंपि य, वुच्छामि विहिं जहाकमसो ॥ २१८१ ॥**

**तेषां** द्रव्यपरिच्छन्नानां जघन्यत आत्मतृतीयानां बहूनां सर्वेषां [वा] **गीतार्थाना**मथवा **अगीतार्थानाम्** यदि वा **मिश्राणां** केषाञ्चिद् गीतार्थानां केषाञ्चिदगीतार्थानामित्यर्थः, **एष एवा**नन्तरोदित एकभिक्षुगत आलोचनाविषयो **विधिरव**सातव्यः, व्यतिरेके च प्रायश्चित्तमपि तथैव । **अत** ऊर्ध्वं **शेषाणामपि विधिं यथाक्रमशो** यथाक्रमेण **वक्ष्यामि** ॥ २१८१ ॥

तत्र शेषशब्दवाच्यानुपदर्शयति—

**सेसा तू भण्णंती, अप्पबितिया उ जे तहिं केई ।**
**गीयत्थमगीयत्थे, मीसे य विही उ सो चेव ॥ २१८२ ॥**

**शेषा** नाम ते **भण्यन्ते यत्र** तेषां बहूनां भिक्षूणां मध्ये **केचिदात्मद्वितीयाः**। तस्मिन् शेषे **गीतार्थे अगीतार्थे मिश्रे च स एव** पूर्वोक्तो **विधि**रालोचनाविषयस्तद्व्यतिरेके प्रायश्चित्तविधिश्चावसातव्यः ॥२१८२॥

सम्प्रति चशब्दव्याख्यानमाह—

**संजोगा उ चसद्देण, अहिगया जह य एगो दो चेव ।**
**एगो जइ न वि दोण्हिं, उवगच्छे [1]चउलहू तो से ॥ २१८३॥**

परिच्छन्नानां च इत्यत्र **चशब्देन संयोगा अधिकृताः** सूचिता इत्यर्थः । तानेवोपदर्शयति–**यथा चेति** भङ्गोपप्रदर्शने। एकत **एको** भिक्षुरपरतो **द्वौ** भिक्षू, तत्रैकेनाऽऽत्मद्वितीय उपसम्पत्तव्यः। **यदि** पुनरे**को न द्वौ उपगच्छति** उपसम्पद्यते **तदा से** तस्य प्रायश्चित्तं [2]**चत्वारो लघुकाः** ॥ २१८३॥



---

१. चउगुरु तो- खं. ॥ २. चत्वारो गुरुकाः- खं. ।"एगल्लभिक्खुणो जो अण्णो अप्पबितिओ अप्पततिओ वा सो उवसंपज्जियव्वो। जति ण उवसंपज्जति चउलहुया" इति चूर्णिकृतः ॥

**पच्छा इयरे एगं, जइ नवि उवगच्छे मासियं लहुयं ।**
**जत्थ वि एगो तिण्णी य, न उवगमे तत्थ वी लहुगा ॥ २१८४ ॥**

एकस्मिन्नुपसम्पन्ने **पश्चादितरा**वप्युपसम्पद्येते, **यदि पुनरेकं** तावितरौ पश्चान्नो**पगच्छेतां** तदा तयो**र्मासिकं** प्रायश्चित्तं **लघु**। **यत्राऽपि** भङ्गे एकत **एको**ऽपरत्र **त्रय**स्तत्र यदि परस्परमुक्तप्रकारेण **नोपगमस्तदा** प्रायश्चित्तं **लघुकाः**। किमुक्तं भवति यद्येकस्त्रीन्नोपगच्छति तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः, तं चेदुपगच्छन्तं पश्चादितरे त्रयो नोपगच्छन्ति तर्हि तेषां प्रायश्चित्तं लघुको मासः ॥ २१८४॥

**एमेव अप्पबीतो, अप्पतइयं तु जइ न उवगच्छे ।**
**इयरेसि मासलहुयं, एवमगीए य दट्ठव्वं ॥ २१८५॥**

**एवमेव** अनेनैवानन्तरोदितेन प्रकारेणा**त्मद्वितीय आत्मतृतीयं यदि नोपगच्छति** तदा तस्य प्रायश्चित्तं चतुर्लघु । इतरश्चेत् तमुपगच्छन्तं नोपगच्छेत्तदा तस्य मासिकं लघु। **इतरेषामेक** आत्मतृतीयोऽपर आत्मचतुर्थ इत्येवमादीनां परस्परमनुपगमे प्रायश्चित्तं **मासलघु**। **एवमुक्त**-प्रकारेणा**गीते** अगीतार्थानां गीते गीतार्थानां च **द्रष्टव्यम्** ॥ २१८५॥

मिश्रानधिकृत्याह—

**मीसाण एगो गीतो, होंति अगीया उ दोण्णि तिण्णि वा।**
**एगं उवसंपज्जे, ते उ अगीया इहर मासो ॥ २१८६ ॥**

**मिश्राणां** मध्ये **एक** एकाकी **गीतो** गीतार्थः, अपरे तु **द्वौ त्रयो वा भवन्त्यगीता** अगीतार्थाः। तत्र **तेऽगीता एकमुपसम्पद्येरन्** । **इतरथा** चेन्नोपसम्पद्यन्ते तर्हि तेषां प्रायश्चित्तं लघुको **मासः** ॥२१८६॥

**सो वि य जइ नवि इयरे, तस्स वि मासो उ एव सव्वत्थ ।**
**उवसंपया उ तेसिं, भणिया अण्णोण्ण निस्साए ॥ २१८७ ॥**

**सोऽपि** चैको **यदि** तान् इतरानुपसम्पद्यमानान् **नोपसम्पद्यते** तदा **तस्यापि** प्रायश्चित्तं **मासो** लघुः। एवमेक आत्मद्वितीयो गीतार्थोऽपर आत्मतृतीय आत्मचतुर्थः इत्यादौ **सर्वत्र** भावनीयम्। एव**मन्योन्यनिश्रया** प्राग् द्वारगाथायां **तेषामुपसम्पत् भणिता** उद्दिष्टा ॥ २१८७॥

**अण्णोण्णनिस्सियाणं, अग्गीयाणंपि उग्गहो तेसिं ।**
**गीयपरिग्गहियाणं, इच्छाए तेसिमो होइ ॥ २१८८ ॥**

**अन्योन्यनिश्रितानां तेषामगीतानामपि गीतपरिगृहीतानामवग्रहो** भवति। अवग्रहो नाम आभवनव्यवहारः। स च द्विधा-इच्छया सूत्रोक्तश्च। तत्र **इच्छया तेषामयं** वक्ष्यमाणो **भवति** ॥२१८८॥

तमेवाह—

**इच्छियपडिच्छिएणं, खेत्ते वसहीए दोण्हवी लाभो ।**
**अच्छंते न होइ उग्गहो, निक्कारण कारणे दोण्हं ॥ २१८९ ॥**

इच्छया अवग्रहो नाम **इच्छितप्रतीच्छितेन,** इच्छा संजाताऽस्येति इच्छितं, प्रतीच्छा सञ्जातास्येति प्रतीच्छितं, इच्छितं च तत् प्रतीच्छितं च इच्छितप्रतीच्छितं, वाचा आभवनव्यवहारस्थापनम्। यथा- यत्पथि लभ्यते तदस्माकं, यत् ग्रामे तद् युष्माकं, यदि वा यत्सचित्तं तदस्माकं, यदचित्तं तत् युष्माकमथवा या स्त्री व्रतग्रहणार्थमुपतिष्ठति सा युष्माकं

पुरुषः अस्माकं; यद्वा बालो युष्माकं, वृद्धोऽस्माकम्, अथवा यः सार्थेन सह व्रजतां लाभः सोऽस्माकम्, असार्थेन युष्माकम्, यदि वा यो यल्लभते तत्तस्यैव। एवम्भूतेनेच्छितप्रतीच्छितेन य आभवनव्यवहारः स इच्छयाऽवग्रहः। एष च प्रायः पथि गच्छतां भवति। स्थानप्राप्तानां तु सूत्रोक्त आभवनव्यवहारस्ततस्तमुपदर्शयति-समकालं क्षेत्रे प्राप्तानामक्षेत्रे वा **वसतिं** प्राप्तानां **द्वयानामपि लाभः** साधारणः। अथ न क्षेत्रमक्षेत्रे वा वसतिं समकालं प्राप्ताः किन्तु विषमकालं तत आह— **अच्छंते न होति** इत्यादि, यदि **निष्कारणं** स्थिता इति पश्चात् प्राप्तास्तदा नास्ति तेषाम**वग्रहः**, किन्तु पूर्वप्राप्तानामेव। अथ **कारणेन** केनापि ग्लानप्रतिजागरणादिना स्थितास्ततः पश्चात्प्राप्तास्तर्हि भवति द्वयेषामपि साधारणोऽवग्रहः ॥ २१८९॥

एतदेव स्पष्टतरमुपदर्शयति—

**समयं पत्ताणं साहारणं तु, दोण्हं पि होति तं खेत्तं ।**
**विसमं पत्ताणं पुण, इमा उ तहिं मग्गणा होइ ॥ २१९० ॥**

**समक**मेककालं **प्राप्तानां द्वयानामपि तत्क्षेत्रं भवति साधारणम्। विषमं** विषमकालं **प्राप्तानां पुनरियं तत्र** क्षेत्रे **मार्गणा भवति** ॥ २१९०॥

तामेव कुर्वन्नाह—

**पडियरए व गिलाणं, सयं गिलाणाउरो व मंदगती ।**
**अप्पत्तस्स वि एएहिं, उग्गहो दप्पतो नत्थि ॥ २१९१ ॥**

**प्रतिचरति वा** प्रतिजागर्ति **ग्लानं** यदि वा **स्वयं ग्लान आतुरो वा,** यदि वा स्वभावान्मन्दगतिः, **एतैः** कारणैर**प्राप्तस्यापि** समकालं पश्चात्प्राप्तस्याऽवग्रहो भवति । **दर्पतो** निष्कारणं स्थितानां पुनर**वग्रहो** नास्ति॥ २१९१ ॥

**एमेव गणावच्छे, पलिछण्णाणं च सेसगाणं तु ।**
**पलिच्छन्ने ववहारो, दुविहो वायंतिओ नाम ॥ २१९२ ॥**

यथा भिक्षोरेकस्य बहूनां परिच्छन्नानां शेषकाणां चोक्तम्, **एवमेव** अनेनैव प्रकारेण एकस्मिन् गणावच्छेदे बहूनां **परिच्छन्नानां** जघन्यतोऽप्यात्मतृतीयानां **शेषकाणां** च कारणवशत आत्मद्वितीयानां, तुशब्दादेकत एकोऽपरत आत्मद्वितीय इत्यादिसंयोगगतानां च निरवशेषं वक्तव्यम् । तत्र **परिच्छन्ने** जातावेकवचनं परिच्छन्नानामुपलक्षणमेतत्, परस्परमुपसम्पन्नानां

चाभवन**व्यवहारो द्विधा** भवति— सूत्रोक्तो वागन्तिकश्च। वाचा अन्तः परिच्छेदो वागन्तस्तेन निर्वृत्तो वागन्तिकः। तत्र **वागन्तिको नाम** वक्ष्यमाणः॥ २१९२॥

तमेवाह—

**पह गामे, चित्तऽचित्तं, थी पुरिसं, बाल वुड्ढ, सत्थादी ।**
**इच्छाए वा देंती, जो जं लाभे भवे बितितो ॥ २१९३ ॥**

**यत्पथि** मार्गे लभ्यं तदस्माकम्, यत् **ग्रामे** तत् युष्माकम्। यदि वा यत्**सचित्तं** तत् युष्माक**मचित्तम**स्माकम्। अथवा **स्त्री** युष्माकं **पुरुषो**ऽस्माकम्। अथवा **बालो**ऽस्माकं **वृद्धो** युष्माकम्। यदि वा **सत्थादी** इति, यत् सार्थे लभ्यं तत् युष्माकमसार्थे अस्माकम्। अथवा **इच्छया ददति** । कथम्? इत्याह–**यो यल्लभते** तत्तस्याऽऽ**भवति** एष सूत्रोक्तादाभवन-व्यवहारात् **द्वितीयो** वागन्तिक आभवनव्यवहारः॥ २१९३॥

क्षेत्रे प्राप्तानामक्षेत्रे वा वसतिं प्राप्तानां यः सूत्रोक्त आभवनव्यवहारः स भिक्षूणामिव प्रतिपत्तव्यः, स चाविशेषेणोक्तः, गीतार्थाऽगीतार्थादिविशेषानुपादानाद्, अविशेषणे च भवति संदेहः, ततो भिक्षूणां गणावच्छेदकानां च गीतार्थादिविभागेन विशेषं बिभणिषुरिदमाह—

**समगीताऽगीता वा, गीतत्थपरिग्गहाण सति कज्जे ।**
**असमत्ताण वि खेत्तं, अपभू पच्छा समत्तो वि ॥ २११४ ॥**

यदि द्वावपि पक्षौ **गीतार्थौ** यदि वा द्वावप्य**गीतार्थौ** अथवा **गीतार्थपरिगृहीताः** गीतार्थनिश्रां प्रतिपन्नाः समकमेककालं प्राप्तास्तेषां साधारणं क्षेत्रमाभवति। **सति** विद्यमाने **कार्ये** ग्लानप्रतिजागरणादिलक्षणे ये स्थिता अगीतार्था **असमाप्ताश्च** तेषामपि पश्चात्प्राप्तानां साधारणं **क्षेत्रम्**। ये पुनरगीतार्था अपि असमाप्ता अपि च पूर्वं प्राप्ताः, गीतार्थाः समाप्ताश्च निष्कारणं प्राक् स्थित्वा प्राप्तास्तदा असमाप्तानामप्यगीतार्थानामपि च तत् क्षेत्रं, पूर्वं प्राप्तत्वात्, न गीतार्थः **समाप्तोऽपि** च तस्य क्षेत्रस्य प्रभुः, निष्कारणं स्थित्वा **पश्चात्**प्राप्तत्वात् ॥ २११४॥

**समपत्त कारणेणं, खेत्ते वसहीए दोण्ह वी लाभो ।**
**रायणिए होति उग्गहो, गीयत्थे सममि दोण्हं पि ॥ २११५ ॥**

**समं** समकमेककालं **कारणेन** पश्चाद्वा **क्षेत्रे**ऽक्षेत्रे वा **वसतौ प्राप्तयोर्द्वयोरपि लाभः** साधारणः। अत्र पुनर्यदि विशेषविवक्षा क्रियते तदा यो **रत्नाधिक**स्तस्मि**न्नवग्रहो भवति**।

यद्यपि नाम द्वयोरपि साधारणो लाभस्तथापि यथा संघाटकेन भिक्षां हिण्डमानयो रत्नाधिकस्य लाभो गण्यते, एवमिहापि रत्नाधिकस्यावग्रहः। अथैको गीतार्थः अपरोऽगीतार्थस्तत्र यदि रत्नाधिकोऽगीतार्थोऽवमरत्नाधिको गीतार्थस्ततोऽवमरत्नाधिकस्यावग्रहः। अथ **द्वावपि** समगीतार्थौ तत आह— **समे गीतार्थे**ऽपरस्मिन् समकं च प्राप्ते द्वयोरपि साधारणोऽवग्रहः। तदेवं द्विसंख्याकगणावच्छेदकसूत्रमपि भावितम्। एवं द्विसंख्याकाऽऽचार्योपाध्यायसूत्रमपि भावनीयम् ॥ २१९५॥

इदानीं बहुत्वसूत्राणि पिण्डसूत्रं चातिदेशत आह—

**एमेव बहूणं पी, पिंडे नवरोग्गहस्स उ विभागो ।**
**किं कतिविहो कस्स व[1] कम्मि व केवइयं वा भवे कालं॥२१९६ ॥** दारगाहा।

**एवमेव बहूनामपि** भिक्षुप्रभृतीनामपि सूत्राणि भावनीयानि, [2]द्विकसूत्रापेक्षया बहुत्व-सूत्राणामर्थतो नानात्वाभावात् । **पिण्डे** पिण्डकसूत्रस्यापि स एवार्थः। **नवरमत्राऽवग्रहस्य**



१. व कहिं केवइयं- पु. प्रे. ॥ २. द्वित्वसूत्रा° मो. सं. ॥

विभागो वक्तव्यः। तमेवाह-**किं१ कतिविधः२ कस्य वा ३ कस्मिन् वा ४ कियन्तं वा कालं भवत्यवग्रहः** ? ५ ॥२१९६॥

तत्र किमित्याद्यद्वारव्याख्यानार्थमाह—

**किं उग्गहो? त्ति भणिए[1], उग्गहो तिविहो होति सचित्तादी।** दारं १।
**एक्केक्को पंचविहो, देविंदादी मुणेयव्वो ॥ २१९७ ॥** दारं २।

**किमवग्रहः ? इति भणिते** पृष्टे सूरिराह-**त्रिविधो भवत्यवग्रहः सचित्तादिः** सचित्तोऽचित्तो मिश्रश्च १। पुनरकैकः कतिविधः? इति प्रश्नमुपजीव्याह- एकैकः **पञ्चविधः** पञ्चप्रकारो ज्ञातव्यः। कोऽसौ? इत्याह- **देवेन्द्रादिः** देवेन्द्रावग्रहो१ राजावग्रहो२ माण्डलिकावग्रहः३ शय्यातरावग्रहः ४ साधर्मिकावग्रहश्च ५॥ २१९७॥

गतं कतिविधद्वारम्, इदानीं कस्य भवत्यवग्रहः? कस्य न भवति? इति प्रतिपादयति—



---

**१. °ए उग्गहो तिविहो उ होति चित्तादि- वा. पु. खंभा. वा. मा. जेभा. मु. ॥**

**कस्स पुण उग्गहो त्ती, परपासंडीण उग्गहो नत्थि ।**
**णिण्होसन्ने, संजति, अगीते, गीते एक्के वा ॥ २१९८ ॥**

**कस्य पुनरवग्रहो** भवति? इति शिष्यप्रश्नमाशङ्क्य प्रोच्यते— **परपाषण्डिनामवग्रहो नास्ति** । ये च **निण्हवा** ये चाऽ**वसन्नाः**, याश्च **संयत्यो** गीतार्थैरपरिगृहीताः, ये **चागीतार्था** गीतार्थनिश्रामनुपपन्नाः, यश्च निष्कारणमे**काकी गीतार्थः**। एतेषां सर्वेषामप्यवग्रहो नास्ति ॥ २१९८ ॥

एतदेव सुव्यक्तमाह—

**ओसण्णाण बहूण वि, गीतमगीताण उग्गहो नत्थि ।**
**सच्छंदियगीयाण य, असमत्त अणीस गीए वि ॥ २१९९ ॥**

**अवसन्नानां बहूनामपि गीतार्थानामगीतार्थानां चाऽवग्रहो नास्ति । सच्छंदियगीयाण यत्ति**, ये गीतार्था अपि स्वच्छन्दिकाः, स्वच्छन्दतयैव च एकाकिनो विहरन्ति तेषामपि नास्त्यवग्रहः। तथा ये **असमाप्ता** असमाप्तकल्पाः, यस्य च समुदायस्य **न** विद्यते **गीतो** गीतार्थ **ईशस्तेषामपि** नास्त्यवग्रहः ॥ २१९९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एवं ता सावेक्खे, निरवेक्खाणं पि उग्गहो नत्थि ।**
**मोत्तूण अहालंदे, तत्थ वि जे गच्छपडिबद्धा ॥ २२०० ॥**

**एवं तावत्सापेक्षे** जातावेकवचनं, सापेक्षाणामुक्तं, सापेक्षा नाम- स्थविरकल्पिकाः। **निरपेक्षा**-जिनकल्पिकादयस्**तेषामप्यवग्रहो नास्ति** । किमविशेषेण सर्वेषां न? इत्याह,- **मुक्त्वा यथालन्दान्**। **तत्रापि गच्छप्रतिबद्धान्**, तेषामवग्रहो भवति, गच्छप्रतिबद्धत्वात्, अन्येषां तु सर्वेषामपि नास्ति ॥२२००॥

**आसन्नतरा जे तत्थ, संजया सो व जत्थ नित्थरइ ।**
**तहियं देंतुवदेसं, आयपरं ते न इच्छंति ॥ २२०१॥**

तेषां गच्छनिर्गतानां जिनकल्पिकादीनां यो व्रतग्रहणार्थमुपतिष्ठति तं ते न प्रव्राजयन्ति, तथाकल्पत्वात्, किन्तु **ये तत्रासन्नतराः संयताः** स्थितास्तत्रोपदेशं ददति; यथा अमुकानां समीपे गत्वा प्रव्रजेति। अथवा जानन्ति ते श्रुतबलतो ये दूरे स्थितास्तत्र स एष निस्तरिष्यति तदेतत् ज्ञात्वा **यत्र स निस्तरति तत्रोपदेशं प्रयच्छन्ति**। परमार्थतः पुनस्ते **आत्मपर**मात्म-



For Private and Personal Use Only

गच्छपरगच्छविभागं **नेच्छंति**, स्थविरकल्पादुत्तीर्णत्वात् ॥२२०१॥

**अग्गीय समण संजइ, गीयत्थपरिग्गहाण खेत्तं तु ।**
**अपरिग्गहाण गुरुगा, न लभति सीसेत्थ आयरिओ ॥ २२०२ ॥**

**अगीता**नामगीतार्थानां **श्रमणानां संयतीनां** च **गीतार्थपरिग्रहाणां** गीतार्थपरिगृहीतानां **क्षेत्रम्** अवग्रहो भवति, इयमत्र भावना-ये अगीतार्था अपि साधवो गीतार्थपरिगृहीता विहरन्ति, या अपि संयत्यो गीतार्थपरिगृहीता वर्तन्ते तेषामवग्रहो भवति । ते च यदि साधवो यदि वा संयत्यो गीतार्थनिश्रामनुपपन्ना अगीतार्था विहरन्ति तदा तेषाम**परिग्रहाणां** गीतार्थपरिग्रह-रहितानां विहरतां प्रायश्चित्तं चत्वारो **गुरुका** इति । एतेषां च संयतानां संयतीनां च गीतार्थाऽपरिगृहीतानां यः परिव्राजक **आचार्यः** सोऽत्र **शिष्यान्** स्वदीक्षितान् **न लभते** अपरिगृहीततयैव तेषां दीक्षणात् ॥२२०२॥

**गीयत्थाऽऽगते गुरुगा, असती एगाणिए वि गीयत्थे ।**
**समोसरणे नत्थि उग्गहो, वसहीए उ मग्गणा अक्खेत्ते ॥ २२०३ ॥**

ये ते स्वयमगीतार्था गीतार्थपरिग्रहरहिता वर्तन्ते ते यद्यन्यस्मिन् **गीतार्थे आगते** तस्योपसम्पदं न प्रतिपद्यन्ते, तदा तेषां प्रायश्चित्तं चत्वारो **गुरुकाः**। अथाऽन्यो गीतार्थ उपसम्पदनार्हो नायातः कारणवशतश्च कथमप्येकाकी जातस्तस्य **गीतार्थ**स्याशठस्य परिवाररहितत्वे-**नैकाकिनोऽपि** क्षेत्रमाभवति। गतं कस्येति द्वारम्। इदानीं कस्मिन्वेति द्वारमधिकृत्याह-यत्र वा यावन्ति दिनानि सङ्घस्य समवसरणं तत्र तावन्ति दिनान्यवग्रहो न भवति। एवं जिनस्नानादिषु मिलितानां यावन्महिमा तावदवग्रहाऽभावः। एतत्सर्वं **समवसरणे नास्त्यवग्रह** इत्यनेन सूचितम्। एवमक्षेत्रेऽवग्रहाऽभावः। अक्षेत्रेऽपि **वसतौ मार्गणा**ऽवग्रहस्य भवति। सा चैवमक्षेत्रे वसतिषु समकं स्थितानां साधारणं क्षेत्रं, पश्चादागतानां तु न भवति ॥ २२०३॥

**सेसं सकोसजोयण, पुव्वुग्गहियं तु जेण तस्सेव ।**
**समगोग्गह साहारं, पच्छाऽऽगतो होइ उ अखेत्ती ॥ २२०४ ॥**



**शेषं** क्षेत्रमवग्रहो भवति, तच्च प्रमाणतः **सक्रोशं योजनं** पञ्चगव्यूतानीत्यर्थः । तत्रापि **येन पूर्वमवगृहीतं तस्यैव** तत्क्षेत्रमाभवति, न शेषस्य । अथ **समक**मेव तस्या**वग्रहः** कृतस्तत्र आह- **साधारणं** तदा तेषां क्षेत्रम्। यस्तु **पश्चादागतः** स **भवत्यक्षेत्री,** न तस्याऽऽभवति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षेत्रमिति भावः ॥२२०४॥

**अण्णागते कहंते, उवसंपण्णा तहिं च ते सव्वे ।**
**संकंतो उ कहंते, साहारणे तस्स जो भागो ॥ २२०५ ॥**

**अन्यः** कोऽप्याचार्यः कथयन् बहुश्रुतः पश्चादागतः, **ते** च पूर्वस्थिताः **सर्वे**ऽपि तस्मि**न्नागते कथयत्युपसम्पन्ना**स्तदा तस्मिन् **कथयति** सोऽवग्रहः **सङ्क्रान्तः**, तस्याऽऽभाव्यं तत् क्षेत्रं जातमिति भावः। अथ समकप्राप्ततया **साधारणे** क्षेत्रे स्थितानां मध्ये एकः कश्चनापि तं पश्चादागतमन्यमाचार्यं बहुश्रुतमुपसम्पन्नस्तदा यस्तस्य **भागः** स तत्र कथयति सङ्क्रान्तः ॥२२०५॥

**निक्खित्तगणाणं वा, तेसिं चिय होइ तं तु खेत्तं तु ।**
**खेत्तभया वा कोई, माइट्ठाणेण सुणएवं ॥ २२०६ ॥**

यदि क्षेत्रवतां शिष्य आगन्तुकमाचार्यमुपसम्पन्नः, यदिवाऽऽचार्याः गणं शिष्ये गीतार्थे निक्षिप्य तमुपसम्पन्नास्तदा **तेषामेव निक्षिप्तगणानां, वा**शब्दादुपसम्पन्नतदेकशिष्याणां **तत्**



For Private and Personal Use Only

**क्षेत्रम् भवति**। किमुक्तं भवति ? यत्ततः क्षेत्रात्सचित्तादिकमुत्पद्यते तत्तेषामेवाऽऽभवति न तु प्रवाचयन्नागन्तुको लभते । **कोऽपि** पुनः 'मा ममागन्तुकस्य पार्श्वे शृण्वतः क्षेत्रं यायाद्' इति **क्षेत्रभयादेवं** वक्ष्यमाणप्रकारेण **मातृस्थानेन शृणोति** ॥ २२०६ ॥

तमेव प्रकारमाह—

**कुड्डेण चिलिमिलीए व, अंतरितो सुणइ कोइ माणेण ।**
**अहवा चंकमणीयं, करेंतो पुच्छागमो तत्थ ॥ २२०७ ॥**

**कुड्येन** यदि वा **चिलिमिलिन्या** जवनिकयान्तरितः सन् **कोऽपि मानेन** ममेदं क्षेत्रमाभवति तन्मा हस्तादुत्तरत्विति क्षेत्रगर्वेण **शृणोति** । **अथवा** मानेनैव यथोक्तरूपेण **चङ्क्रमणिकां कुर्वन्** कोऽपि शृणोति, तत्र यद्यपि स न शृणोति तथापि **तत्र पृच्छागमो** भवति पृच्छा कर्तव्या भवति। ततः पृच्छातोऽपि तस्य तद् आभवति क्षेत्रम् ॥ २२०७॥

अथ कतिभिः पृच्छाभिः कियन्तं कालं तस्याऽऽभवति क्षेत्रम्। अत आह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पुच्छाहि तीहि दिवसं, सत्तहि पुच्छाहि मासियं हरइ ।**
**अहवा विसेसमन्नो, इमो उ तहियं अहिज्जंते ॥ २२०८ ॥**

**तिसृभिः पृच्छाभिरेकं दिवसं** यावत् तत्क्षेत्रं हरति, पृच्छादिवसे यत्तस्मिन् क्षेत्रे सचित्तादिकमुत्पद्यते तत् कथयन् लभते नेतर इति भावः। **सप्तभिः पृच्छाभिः** पुन**र्मासिकं,** पृच्छादिवसादारभ्य मासं यावत्सचित्तादिक**मपहरति**। तदेवं 'खेत्तभया वा कोई' [गा. २२०६] इत्यादिगाथापश्चार्धं व्याख्यातम्। इदानीं 'निक्खित्तगणाणं वा' इत्यादि पूर्वार्धं व्याख्यानयति। **अथवाऽयं** वक्ष्यमाणो**ऽन्यो विशेषस्तस्मिन्न**धीयानेऽध्यापयितरि ॥ २२०८॥

तमेवाह—

**जति निक्खिविऊण गणं, उवसंपाएऽहवावि सीसं तु ।**
**ता तेसिं चिय खेत्तं, वाएंते लाभो खेत्तबहिं ॥ २२०९ ॥**

**यदि** गीतार्थे **गणं निक्षिप्य** तमागन्तुक**मुपसम्पद्यते, अथवा शिष्यं** प्रेषयति **तदा तेषामेव** पूर्वस्थितानां तत्**क्षेत्र**माभवति, न तु वाचयतः। **वाचयति लाभस्तस्मात्क्षेत्राद् बहिः** ॥२२०९॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अह बेती वाएंतो, लाभो णे नत्थिहं ति वच्चामो ।**
**इयरेहि य सो रुद्धो, मा वच्चसु अम्ह साहारं ॥ २२१० ॥**

**अथ ब्रूते वाचयन्** यथा नः अस्माक**मिह नास्ति लाभ इति व्रजाम** एवमुक्ते **इतरैः** पूर्वस्थितैः **स रुद्धो** यथा **मा व्रजत** यूयम्, युष्माक**मस्माकं** च **साधारण**मिदं क्षेत्रमिति ॥ २२१० ॥

अथ साधारणेऽपि क्षेत्रे स्थिता न संस्तरन्ति तत्र विधिमाह—



**निग्गमणे चउभंगो, निट्ठिय सुहदुक्खयं जति करेंति ।**
**निट्ठिय पहावितो वा, रुद्धो पच्छा य वाघातो ॥ २२११ ॥**

अथ साधारणे क्षेत्रे स्थितास्ते न संस्तरन्ति तर्हि निर्गन्तव्यम् । तत्र च **निर्गमने चतुर्भङ्गी** वक्तव्या, गाथायां पुंस्त्वनिर्देशः प्राकृतत्वात् । तथा य[१]स्य श्रुतस्कन्धस्य निमित्तमुपसम्पन्नास्तत् निष्ठितम् तस्मिन् **निष्ठिते** समाप्ते भूयः क्षेत्रं साधारणं जातम् । तत्र **यदि** भूयः **सुखदुःखतां**

---

१. यस्य प्रकृतश्रुत° खं. ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कुर्वन्ति** सुखदुःखनिमित्तमुपसम्पदं प्रतिपद्यन्ते, तथा **निष्ठिते** श्रुतस्कन्धे यः **प्रधावितः** पुनरपि प्रतीच्छिकैः **पश्चात् रुद्धो व्याघातो वा**ऽशिवादिभिः कारणैरुपजातस्तत्र यद् आभाव्यं तद्वक्तव्यमिति द्वारगाथासंङ्क्षेपार्थः ॥ २२११ ॥

साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतो निर्गमनचतुर्भङ्गीमाह—

**वत्थव्व निंति न उ जे, उ पाहुणा१ पाहुणा न इयरे वा२ ।**
**उभयं व ३ नोभयं वा४, चउभयणा होति एवं तु ॥ २२१२ ॥**

यस्य ग्रामप्रधानस्य नगरप्रधानस्य वा नियोगेन तिष्ठन्ति साधवः स चतुर्धा, तद्यथा-आगन्तुकभद्रको नामैको न वास्तव्यभद्रकः १ वास्तव्यभद्रको नामैको नागन्तुकभद्रकः २ आगन्तुकभद्रको वास्तव्यभद्रकश्च ३ नागन्तुकभद्रको नापि वास्तव्यभद्रकः ४ एतच्चतुर्भङ्गी-वशादधिकृतापि चतुर्भङ्गी जाता । तद्यथा-प्रथमभङ्गवशात् **वास्तव्या निर्गच्छन्ति न प्राघूर्णका,** नियोक्तुरागन्तुकभद्रकत्वात्। द्वितीयभङ्गवशात् **प्राघूर्णका** निर्गच्छन्ति **न इतरे,** द्वितीयभङ्गे नियोक्तुर्वास्तव्यभद्रकत्वाच्चतुर्थभङ्गवशात् **उभयं** प्राघूर्णका वास्तव्याश्च निर्गच्छन्ति,



For Private and Personal Use Only

उभयानपि प्रति नियोक्तुरभद्रकत्वात्तृतीयभङ्गवशा**न्नोभयं** वास्तव्या प्राघूर्णकाश्च निर्गच्छन्ति। उभयानपि प्रति तस्य भद्रकत्वात्। **एव**ममुना प्रकारेण **चतुर्भजना** चतुर्भङ्गी **भवति**॥ २२१२॥

तत्र प्रथमभङ्गमधिकृत्य विशेषमाह—

**आगंतुभद्दगम्मी, पुव्वट्ठिया गंतु जइ पुणो एज्जा ।**
**तम्मि अपुण्णे मासे, संकमति पुणो वि सिं खेत्तं ॥ २२१३ ॥**

**आगन्तुकभद्रके** नियोक्तरि ये **पूर्वस्थितास्ते** वक्ष्यमाणचतुर्भागार्धभागगमनयतनया गच्छन्ति, तथाप्यसंस्तरणे सर्वात्मना गच्छन्ति। ते **गत्वा** यद्यपूर्ण एव मासे तस्मिन् क्षेत्रे पुनरागच्छेयुस्तदा ''सिं'' तेषां प्रत्यागतानां क्षेत्रं सङ्क्रामति, तेषां तदाभाव्यं भवतीति भावः; कारणतो गत्वा पुनरपूर्णे एव मासे प्रत्यागमनात्। अथ साधारणमुभयेषां तत्क्षेत्रमासीत् ''मा वच्चसु अम्ह साहारं'' इति व्यवस्थाकरणात्, तदा तेषां पुनः प्रत्यागतानां साधारण्येन क्षेत्रं संक्रामति ॥ २२१३॥

द्वितीयं भङ्गमधिकृत्याह—

श्री व्यवहार-सूत्रम् चतुर्थ उद्देशकः ९७३ (B)

**वत्थव्वभद्दगम्मी, संघाडग जयण तह वि उ अलंभे ।**
**आगंतू नेंति तओ अच्छति उ पवायगो नवरं ॥ २२१४ ॥**

**वास्तव्यभद्रके** नियोक्तरि तेषामागन्तुकानामसंस्तरतामियं **यतना**— वास्तव्या आगन्तुकैः सममेकैकेन **सङ्घाटेन** भिक्षां हिण्डन्ते। अथ **तथाप्यलाभ**स्तर्हि निर्गच्छन्ति। तत्रेयं भङ्गचतुष्टयेन यतना-आगन्तुकानां चतुर्भागो निर्गच्छति न वास्तव्यानां १, वास्तव्यानां चतुर्भागो, निर्गच्छति नागन्तुकानां २, वास्तव्यानामपि चतुर्भाग आगन्तुकानामपि च चतुर्भागः ३, उभयेषामपि चतुर्भागागमने चतुर्थः ४, स चात्र शून्यः, गमनमन्तरेणासंस्तरणात् । एवमप्यसंस्तरणेऽर्द्धार्द्धगमने Î[१]चतुर्भङ्गीयतना कर्तव्या। साप्येवम्-अर्धमागन्तुकानां गच्छति न वास्तव्यानां १, वास्तव्यानामर्धं गच्छति नागन्तुकानां २, वास्तव्यानामप्यर्धं गच्छति आगन्तुकानामपि ३, उभयेषामप्[२]यर्धार्धा-गमनतः चतुर्थः, स चात्रापि पूर्वप्रकारेण शून्यः। इयं चतुर्भङ्ग्या चतुर्भागार्धभागगमनेन Î। यतना प्रथमभङ्गेऽपि द्रष्टव्या। अथैवमपि न संस्तरति **तत आगन्तुकाः** सर्वे **निर्गच्छन्ति, नवरमेकः प्रवाचकस्तिष्ठति** येन वास्तव्यान् प्रवाचयति।

गाथा २२१०-२२१४ साधरणे क्षेत्रे असंस्तरणे यतना ९७३ (B)

१. ÎÎ चिह्नान्तर्गत पाठः वा. पु. मु. नास्ति॥ २. ०प्यर्द्धार्द्धगमनतः- पु. प्रे.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ सोऽप्यसंस्तरणे स्वशिष्यैः सह गतस्ते च वास्तव्यास्तमुपसम्पन्ना यदि ''मा वच्चसु अम्ह साहार''मिति व्यवस्थाकरणत उभयेषां साधारणं तत् क्षेत्रं, ततो यदि गत्वा पुनरपि अपूर्णे एव मासे तत्र क्षेत्रे प्रत्यागच्छन्ति तदा तत् कृतायामुपसम्पदि तेषामेव प्रत्यागतानां क्षेत्रमाभाव्यतया संक्रामति, यदि वा साधारण्येन ॥२२१४॥

साम्प्रतमनयोरेव भङ्गयोराभवनव्यहारशेष उच्यते । अत्र पतितं ''निट्ठिय सुहदुक्खयं जति करेंति'' [गा. २२११] इति द्वारम्, अस्य व्याख्यानार्थमाह—



**सुहदुक्खितो समत्ते, वाएंतो निग्गएसु सीसेसु ।**
**वाइज्जंतो वि तहा, निग्गयसीसो समत्तम्मि ॥ २२१५ ॥**

इदमुक्तम्—आगन्तुकाः सर्वेऽपि निर्गच्छन्ति, केवलमेकः प्रवाचकोऽवतिष्ठते । तत्र यदि **निर्गतेषु शिष्येषु वाचयन्** प्रवाचकः **समाप्ते** श्रुते सुखदुःखितः सुखदुःखनिमित्तमुपसम्पदं ग्राहितस्तदा तस्य वाच्यमानस्याऽऽभवति तत्क्षेत्रम्। इदं द्वितीयभङ्गमधिकृत्योक्तम्। प्रथमभङ्ग-मधिकृत्याह-**तथा वाच्यमानोपि निर्गतशिष्यः समाप्ते** श्रुते वक्तव्यः। किमुक्तं भवति? यदि

For Private and Personal Use Only

वाच्यमानो निर्गतेषु शिष्येषु वाचनाग्रहणाय पश्चात् स्थितः। समाप्ते श्रुतस्कन्धे वाचयता सुखदुःखनिमित्तमात्मोपसम्पदं ग्राहितस्तदा वाचयति आभवति क्षेत्रम् ॥ २२१५॥

**दोण्हवि विणिग्गएसुं, वाएंतो तत्थ खेत्तितो होति ।**
**तम्मि सुए असमत्ते, समत्ते तस्सेव संकमति ॥ २२१६ ॥**

**द्वयोरपि** शिष्येषु **विनिर्गतेषु** तावेव द्वौ केवलौ तिष्ठतः, तत्र यावदद्यापि तत् श्रुतं न समाप्यते तावत्तस्मिन् **श्रुते असमाप्ते** तत्र तयोर्द्वयोर्मध्ये **वाचयन् क्षेत्रिको भवति । समाप्ते** पुनः श्रुते **तस्यैव** पूर्वस्थितस्य तत्क्षेत्रं सङ्क्रामति। अथ द्वावपि परस्परं सुखदुःखोपसम्पदं प्रतिपन्नौ तदा साधारणं क्षेत्रमिति यो यल्लभते तस्य तदाभवतीति ॥२२१६॥

**संथरे दो वि न नेंती, तेहि उ उववाइया उ जइ सीसा ।**
**लाभो नत्थि महं ति य, अहव समत्ते पधावेज्जा ॥ २२१७॥**

**संस्तरे** संस्तरणे **द्वयेऽपि** पूर्वस्थिता आगन्तुकाश्च **न निर्गच्छन्ति। तैश्च** पूर्वस्थितै**र्यदि** बहवः **शिष्या उपपादिता** उत्पादितास्तदा स आगन्तुको **नास्ति मम लाभ इति** विचिन्त्य

प्रधावेत् गच्छेत्। अथ ते निक्षिप्तगणास्तस्य समीपे वाचयन्ति तेषां शिष्यो वा तत आह–**अथवा समाप्ते** श्रुते **प्रधावेत्**॥ २२१७॥

सम्प्रति ''निट्ठिय पहावितो वा रुद्धो पच्छा य वाघातो'' [गा.२२११] इत्येतद् व्याख्यानयति—

**जइ वायगो समत्ते, निंतो उ पडिच्छिएहिं रुंभेज्जा ।**
**असिवादिकारणे वा, न नेंते लाभो इमो होइ ॥ २२१८ ॥**

**यदि समाप्ते** श्रुते ततः क्षेत्रात् **वाचको निर्गच्छन् प्रातीच्छिकै**रुच्यते, यथा— 'मा निर्गच्छत यूयं, वयमद्यापि वाचयिष्याम इति,' यदि वा निर्गच्छतो बहि**रशिवादीनि कारणा**न्युपस्थितानि, ततो व्याघात इति कृत्वा न निर्गच्छति, तदा तस्मिन् प्रातीच्छिकैरवरोधनात्, पश्चाद् व्याघाताद्वा **अनिर्गच्छति** तस्य **अयम्** आभाव्यो **लाभो भवति** ॥ २२१८॥

तमेवाह—

**आयसमुत्थं लाभं, सीसपडिच्छेहिं सो लहइ रुद्धो ।**
**एवं छिण्णुववाए, अच्छिण्णे सीसाऽऽगते दोण्हं ॥ २२१९ ॥**

**स** प्रातीच्छिकैर्गच्छन्न**परुद्धः** सन् यत्स्वयं लभते, यच्च तस्य शिष्या यच्च तस्य प्रातीच्छिका वा लभन्ते तत्सर्व**मात्मसमुत्थं शिष्यप्रातीच्छकैर्वा** समुत्पादितं **लभते**। **एव**माभवनं **छिन्ने** समाप्ते **उपपाते** उपपातहेतौ श्रुतस्कन्धादौ श्रुते द्रष्टव्यम्। अच्छिन्ने असमाप्ते श्रुतस्कन्धादौ यदि तस्य पठत आचार्यस्य **शिष्या** ग्रामान्तरगताः प्रत्या**गताः**, तस्य च शिष्यो नियमात् गीतार्थो यस्य गण आरोपितस्तदा **द्वयो**रपि लाभः साधारणः, गीतार्थे शिष्ये निक्षिप्तगणतया पठतोऽप्याचार्यस्य, पाठयिता गच्छन् तेन प्रतिरुद्ध इति पाठयितुरप्याभवनात् ॥ २२१९॥

**एवं ता उउबद्धे, वासासु इमो विही हवति तत्थ ।**
**खेत्तपडिलेहगा उ, पयट्टिया तेण अन्नत्थ ॥ २२२० ॥**

**एवं तावत् ऋतुबद्धे** काले आभवनव्यवहारविधिरुक्तः, **वर्षासु** वर्षाकाले पुनर**यं** वक्ष्यमाणो **विधिर्भवति,** तमेवाह- **तत्थे**त्यादि, द्वयोराचार्ययोः ऋतुबद्धे काले साधारण-क्षेत्रस्थितयोरेकोऽपरस्यैकस्य पार्श्वे उपसम्पदं गृहीतवान्, वर्षारात्रश्च प्रत्यासन्नीभूतः, अन्यानि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च क्षेत्राणि वर्षावासयोग्यानि तादृशानि प्रत्यासन्नानि न सन्ति, ततः स उपसम्पन्न आचार्यस्तत्रेति तस्मिन्नेव आषाढमासिके क्षेत्रे वर्षावासं स्थितः, **तेन** च वाचनाचार्येण **अन्यत्र** वर्षावासयोग्यस्य **क्षेत्रस्य प्रतिलेखकाः** प्रत्युपेक्षकाः **प्रवर्तिताः** ॥ २२२० ॥

तांश्च प्रवर्तयन्निदमवादीत्—

**जा तुब्भे पेहेहा, तावेतेसिं इमं तु सारेमि ।**
**तं च समत्ते तेसिं, वासं च पबद्धमालग्गं ॥ २२२१ ॥**

**यावत् यूयं** क्षेत्रं **प्रत्युपेक्ष्य** समागच्छथ **तावदेतेषामा**चार्याणा**मिदं** श्रुतस्कन्धादिकं **सारयामि** सूत्रतोऽर्थतश्च गमयामि, **तच्च** श्रुतस्कन्धादिकं **तेषां** तथा अधीयानानां समाप्तम्, एतद् व्यवच्छिन्नमित्युच्यते। अत्रान्तरे च **वर्षं प्रबद्धं** प्रबन्धेन पतितु**मालग्नम्**, तेऽपि च क्षेत्रप्रत्युपेक्षकास्तत्रैव वर्षेण निरुद्धाः ॥ २२२१ ॥

**निग्गंतूण न तीरइ, चउमासे तत्थ लाभमायगयं ।**
**लभती वोच्छिण्णेवं, कुव्वंति गिलाणस्स वि य ॥ २२२२ ॥**



For Private and Personal Use Only

यतः प्रबन्धेन वर्षं पतितुमारब्धं, न च क्षेत्रप्रत्युपेक्षकाः समागच्छन्, ततः समाप्तेऽपि श्रुते स वाचनाचार्यस्ततः **क्षेत्रान्निर्गन्तुं न शक्नोति,** अनिर्गतश्च **तस्मिन्** क्षेत्रे **चतुरो** वर्षारात्र**मासान्** यावदा**त्मगतं** आत्मसमुत्थं **लाभं** लभते, द्वितीयोऽप्यात्मसमुत्थस्य लाभस्य स्वामी। **एवं कुर्वते व्यवच्छिन्ने** समाप्ते श्रुते। अथवा **गिलाणस्स वि य** इति समाप्ते श्रुते वाचनाचार्यो ग्लानोऽभवत्, ततो गन्तुमशक्तस्यापि च ग्लानस्यैवमाभवनव्यवहारो द्रष्टव्यः, उभयोरपि चतुरो वर्षामासानात्मसमुत्थो लाभ इत्यर्थः ॥२२२२॥

**अह पुण अच्छिण्ण सुए, ते आया बेंतिमे य तुब्भं तु ।**
**अम्हे खेत्तं देमो, साहारणं तम्मि एसिं तु ॥ २२२३ ॥**

**अथ** तत् श्रुतस्कन्धादिकमद्यापि **न समाप्तं, ते** च क्षेत्रप्रत्युपेक्षका **आयाता**स्ततो वाचनाचार्या आपृच्छन्ति वयं निर्गच्छामः । तत **इमे** प्रतीच्छिका आचार्या **ब्रुवते,** मा **यूयं** निर्गच्छत, समाप्तेऽपि श्रुते युष्माकं **वयं क्षेत्रं दास्यामः** । एवमुक्ते तत्क्षेत्र**मेतेषां** द्वयानामपि **साधारणं** भवति॥ २२२३॥

एष संस्तरणे विधिः। असंस्तरणमधिकृत्याह—

**असंथरणे निंतऽनिंते, चउभंगो होइ तत्थ वि तहेव ।**
**एवं ता खेत्तेसुं, इणमन्ना मग्गणविहादी ॥ २२२४ ॥**

**असंस्तरणे** साधुषु **निर्गच्छदनिर्गच्छत्सु चतुर्भङ्गी भवति**। सा चैवम्-वास्तव्यानां चतुर्भागादिना प्रकारेण साधवो निर्गच्छन्ति न वाचनाचार्याणामिति प्रथमः१, वाचनाचार्याणां नेतरेषामिति द्वितीयः२, उभयेषामिति तृतीयः३, नोभयेषामिति चतुर्थः ४। **तत्रापि** चतुर्भङ्ग्यामपि **तथैवा**ऽऽभवनव्यवहारः, द्वयानामप्यात्मसमुत्थो लाभ इति भावः। तृतीयभङ्गे यद्येकतर एकतरस्य पार्श्वे साध्वभावत उपसम्पद्यते तत उपसम्पद्यमानलाभ इतरस्मिन् सङ्क्रामति। अनुपसम्पत्तौ च द्वयोरपि साधारणं क्षेत्रम्। **एवं तावत् क्षेत्रे** मार्गणा कृता। **अयमन्यो मार्गणाविधि**रादिशब्दात् दिग्धारणपरिग्रहः, गाथायां च स्त्रीत्वनिर्देशः प्राकृतत्वात् ॥२२२४॥

तमेव मार्गणाविध्यादिकमाह—

**अद्धाणादिसु नट्ठा, अणुवट्ठविया तहा उवट्ठविया ।**
**अगविट्ठा य गविट्ठा, निप्फण्णा धारणदिसासु ॥ २२२५ ॥**

अध्वा-मार्गः, आदिशब्दादशिवाऽवमौदर्यादिनिमित्तनिर्गमनपरिग्रहः, तेष्व**ध्वादिषु नष्टाः** साधवः, ते च द्विधा-**उपस्थापिता अनुपस्थापिताश्च**। एकैके द्विधा-यस्याचार्यस्य, ते तेन **गवेषिता अगवेषिताश्च**। अत्र ये **निष्पन्ना** उपस्थापितास्ते निष्पन्ना एव, न तेषां **दिग्धारणं** कर्तव्यम्, इतरेषां यथाऽऽभवनं धारणं दिक्षु ॥२२२५॥

अध्वादिषु नष्टा इत्युक्तं तत्र यैः कारणैस्ते नष्टाः साधवस्तान्यभिधित्सुराह—

**संभम महंतसत्थे, भिक्खायरिया गया व ते नट्ठा ।**
**सिग्घगती परिरएण व, आउर-तेणादिएसुं च ॥ २२२६ ॥**

**संभ्रमः**- वनदवाग्निसंभ्रमादिकः तद्वशाद् गच्छात् स्फिटिताः। यदि वा **महति सार्थे** व्रजतां केऽपि कुत्रापीति गच्छादपगताः। यदि वा **भिक्षाचर्या**निमित्तं सार्थादपसृत्य व्रजिका-पल्ल्यादिषु गतास्ततो नष्टाः। अथवा सार्थः **शीघ्रगतिस्ते** च मन्दगतयः ततः सार्थाद् गच्छाच्च परिभ्रष्टाः। **परिरएण व**त्ति, यदि वा नद्यादिषूत्तरीतव्यासु सार्थ ऋजुमार्गेणोत्तीर्ण इतरे साधवः

परिरयेण गत्वा स्तोकपानीये समुत्तरन्ति, चिन्तयन्ति च— वयं सार्थे झटित्येव मिलिष्यामः, ते च तथा परिरयेण गच्छन्तः सार्थात् स्फिटिताः। अथवा **आतुराः** प्रथमद्वितीयपरीषहाभ्यां जिताः, ते तथा आतुराः सन्तोऽशक्नुवन्तः सार्थात् परिभ्रष्टाः। स्तेनाः–चौराः, आदिशब्दात्पर-चक्रादिपरिग्रहस्तेषु **स्तेनादिषु** समापतत्सु भयेन पलायमाना गच्छादवस्फिटिताः। एवमध्वादिषु साधवो नष्टा भवन्ति ॥ २२२६॥



अत्र मार्गणविधिं दिग्धारणविधिं चाह—

**गवेसऊ मा व कयव्वया जे, सच्चेव तेसिं तु दिसा पुरिल्ला ।**
**गवेसमाणो लभतेऽणुवट्ठे, अणाढिया संगहिया उ जेणं ॥ २२२७॥**

**ये कृतव्रता** उपस्थापिता इत्यर्थः, तान् प्रव्राजनाचार्यो **गवेषयतु वा मा वा,** तथापि **तेषां सैव दिक् पुरातनी** या प्रव्राजनाचार्येण कृता, ये त्व**नुपस्थापिता**स्तान् यदि प्रव्राजना-चार्योऽशठभावेन **गवेषयति** न च लभते तथापि तान्सुचिरेणापि कालेन लब्धान् स एव प्रव्राजनाचार्यो **लभते**। **अणाढिया संगहिया उ जेणं** इति ये पुनरनादृताः न आदरपरेण

गवेषितास्ते येन संगृहीतास्तस्यैव ते शिष्या इति स तेषामात्मीयां दिशां धारयति ॥ २२२७॥

अयमेव वृत्तबद्धोऽर्थोऽन्येनाचार्येण श्लोकेन च बद्धस्तमेव श्लोकमाह—

**गवेसिए पुव्वदिसा, अगविट्ठए उ पच्छिमा ।**
**अणुवट्ठविए एवं, अभिधारेंते उ इणमन्ना ॥ २२२८ ॥**

अनुपस्थापिते नष्टे शिष्ये शिष्यवर्गे वा प्रव्राजनाचार्येण **गवेषिते पूर्वदिक्** प्रव्राजनाचार्यदिग् भवति। **अगवेषिते पश्चिमा** दिक्, येन संगृहीतास्तस्य दिग् भवतीत्यर्थः। **एवमनुपस्थापिते** मार्गणा भवति। यः पुनरन्यक्षेत्रगतानाचार्या**नभिधारयन्** व्रजति तत्र **इयमन्या** मार्गणा॥ २२२८॥

तामेवाह—

**अभिधारेंतो वच्चति, वत्त अवत्तो व वत्त एगागी ।**
**जं लभति खेत्तवज्जं, [1]अभिधारेज्जंत तं सव्वं ॥ २२२९ ॥**

अन्यक्षेत्रगतानाचार्यान् **अभिधारयन् व्रजति व्यक्तोऽव्यक्तो वा,** गीतार्थोऽगीतार्थो वा

१. ला.। अभिधारेंतेण तं- पु. प्रे.॥

इत्यर्थः। तत्र **व्यक्त एकाकी** व्रजन् **यत् लभते तत्सर्वं क्षेत्रवर्जं** क्षेत्रमेकाकिनो न भवतीति तत्प्रतिषेधः कृतः, **अभिधार्यमाणे** यस्य समीपे गन्तव्यं तस्मिन् भवति। तदभिधारणस्थितेन तेन तस्य लाभात्॥२२२९॥

**अव्वत्ते ससहाये, परखेत्तविवज्ज लाभो दोण्हं पि ।**
**सव्वो सो मग्गिल्ले, जाव न निक्खिप्पए तत्थ ॥ २२३०॥**

अथ **अव्यक्तः ससहायस्**तमभिधारयन् व्रजति तर्हि तस्मिन् **अव्यक्ते ससहाये** व्रजति यः **परक्षेत्रवर्जो** यस्मिन् क्षेत्रे ते अभिसन्धार्यमाणा आचार्या वर्तन्ते तत्क्षेत्रवर्जः, तत् किल क्षेत्रं तेषामभिधार्यमाणानामाभाव्यमिति, तत्प्रतिषेधः। यो **द्वयोरपि लाभो**ऽव्यक्तस्य सहायानां च यो लाभ इत्यर्थः, **स सर्वः** पूर्वस्याचार्यस्याभवति, स च तावद् **यावत्तत्र न निक्षिप्यते** ॥२२३०॥

**निक्खित्तनियत्ताणं, खेत्तंतो लाभो होति वाएंते ।**
**तस्स वि य जा न नीती, लाभो सो ऊ पवाएंते ॥ २२३१ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमव्यक्तं तत्र **निक्षिप्तं** कृत्वा ये **निवृत्ताः** सहायास्तेषां **क्षेत्रस्य** पञ्चगव्यूतप्रमाण**स्यान्तः**-मध्ये यो **लाभो भवति,** स **वाचयत्या**भवति, तत्क्षेत्रे तस्य लाभस्य भावात्। **तस्यापि** च निक्षिप्तस्य **यावन्न निर्गच्छति** तावद्यः कश्चनापि **लाभः सोऽपि प्रवाचयति** भवति॥ २२३१॥

सम्प्रति यस्तत्र क्षेत्रे स्थितः सन् गणं निक्षिप्योपसम्पन्नस्तस्य यत्पूर्वं[१] न भणितं तदिदानीं सिंहावलोकनन्यायेनाह—

**अहवा आयरिओ वी, निक्खित्तगणागतो उ आउत्थं ।**
**वाएंते देइ लाभं, जं खेत्तीतो न उ न ईसो ॥ २२३२ ॥**

**अथवे**ति प्रकारान्तरे। तच्च प्रकारान्तरमिदं— पूर्वं शिष्यस्य व्यक्तस्याव्यक्तस्य चोक्तम्। इदानीमाचार्यस्य तत्क्षेत्रगतस्योच्यते— **आचार्योऽपि** क्वचित् गीतार्थे शिष्ये **निक्षिप्तगणो** भूत्वा तत्रा**गत**स्तत्रोपसम्पन्नः सन् यत्स्वयं लभते तमा**त्मोत्थं लाभं वाचयति ददाति**। अथ तेन गणः स्वशिष्ये निक्षिप्तस्ततः स [तस्य] क्षेत्रस्याप्रभुरेवेति कुतस्तस्यात्मसमुत्थो लाभस्तत

१. यत् सर्वं न् वा. मो. पु. मु.॥



For Private and Personal Use Only

आह- **यत्** यस्मात् स **क्षेत्रिकः** क्षेत्रस्य प्रभुरासीत्तस्मान्न शक्यते वक्तुं तस्मिन् क्षेत्रे आत्मसमुत्थस्य लाभस्य **न ईशः** प्रभुरिति ॥ २२४० ॥ तदेवमुक्तो विधिः संयतानाम् । अधुना संयतीनां विधिमतिदेशत आह—

**आरब्भ सुत्ता सरमाणगातो, जा पिंडसुत्तं इणमंतिमं तू ।**
**एमेव वच्चो खलु संजतीणं, वोच्छिन्न-मिसेसु अयं विसेसो ॥ २२३३ ॥**

**सरमाणकान्** "आयरिय उवज्झाए सरमाणे" [सू. १५] इत्येवंरूपात्**सूत्रादारभ्य यावदिदं अन्तिमं पिण्डसूत्रम्** [सू. ३२] एतेषु सूत्रेषु यथा संयतानां विधिरुक्तः **एवमेव खलु संयतीनामपि** गीतार्थपरिगृहीतानां **वाच्यः**, केवलं **व्यवच्छिन्ने मिश्रे** च **अयं** वक्ष्यमाणो विधि**विशेषः** ॥२२३३॥

तमेवाह—

**वोच्छिण्णे उ उवरए, गुरुम्मि गीयाण उग्गहो तासिं ।**
**दोण्ह बहूण व पिंडए, कुलिच्चमन्नं जयऽभिधारे ॥ २२३४ ॥**

**व्यवच्छिन्नो** नाम तासां गुरुरुपरतः कालगत इत्यर्थस्तस्मिन् **गुरावुपरते** यदि **कुलिच्चमन्नं**ति कुलसत्कमन्यमाचार्यमभिधारयन्ति ततस्**तासां द्वयोर्बहूनां** वा **पिण्डके** समुदायेन स्थितानां **गीतार्थानां** सतीनां पिण्डकेन व्यवस्थितानामपि **नावग्रहः**, संयतीनां स्वतन्त्राणामवग्रहाभावात् ॥ २२३४ ॥

मिश्रे विशेषमाह—

**मीसो उभयगणावच्छेओ, तत्थ समणीण जो लाभो ।**
**सो खलु गणिणो नियमा, पुव्वट्ठिया जाव तत्थण्णे ॥ २२३५ ॥**

**मिश्रो** नाम **उभयगणावच्छेदकस्तत्र** उभयगणावच्छेदके सति **यः श्रमणीनां** संयतीनां **लाभः स खलु नियमात्** ये **पूर्वस्थितास्तत्र गणिनो यावदन्ये** नाऽऽगच्छन्ति तावत्तस्य गणिनो वेदितव्यः। सोऽन्येष्वाचार्येष्वागतेषु तेषामिति ॥ २२३५ ॥

तदेवं गतं कस्येति द्वारम् । सम्प्रति कियन्तं कालमवग्रहः इति द्वारव्याख्यानार्थमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**केवतिकालं उग्गहो? तिविहो उउबद्धे१ वास२ वुड्ढे३ य ।**
**मासचउमास वासे, गेलण्णे सोलसुक्कोसा ॥ २२३६ ॥**

**कियन्तं कालमवग्रह?** इति शिष्येण प्रश्ने कृते सूरिराह–**त्रिविधो** भवति अवग्रहस्तद्यथा–**ऋतुबद्धे१ वर्षे** वर्षाकाले२ **वृद्ध**वासे३ च । तत्र ऋतुबद्धे काले उत्सर्गत एकं **मास**मवग्रहः । **वर्षे** वर्षाकाले **चतुरो मासान्**। **ग्लानत्वमधिकृत्योत्कर्षतः षोडश** मासान् । अन्ये तु षोडश वर्षाणीत्याहुः ॥२२३६॥

सम्प्रति वृद्धवासशब्दस्य व्युत्पत्तिमाह—

**वुड्ढस्स उ जो वासो, वुड्ढिं व गतो उ कारणेणं तु ।**
**एसो उ वुड्ढवासो, तस्स उ कालो इमो होइ ॥ २२३७ ॥**

**वृद्धस्य** जरसा परिणतस्य परिक्षीणजङ्घाबलस्य वा सतो **वासो** वृद्धवासः, अथवा वृद्धः **कारणवशेन** रोगेण **वृद्धिं गतो वासो** वृद्धवासः। **एष** खलु **वृद्धवासः** वृद्धवासशब्दार्थः। **तस्य** तु वृद्धवासस्य **कालोऽयं** वक्ष्यमाणो जघन्यादिभेदभिन्नो **भवति** ॥ २२३७॥



For Private and Personal Use Only

तमेवाह—

**अंतोमुहुत्तकालं, जहन्नमुक्कोस पुव्वकोडीओ ।**
**मोत्तुं गिहिपरियागं, जं जस्स व आउयं तित्थे ॥ २२३८ ॥**

वृद्धवासो **जघन्येनान्तर्मुहूर्तं कालं** कथमिति चेदुच्यते-वृद्धवासबुद्ध्या स्थितस्यान्तर्मुहूर्तानन्तरं मरणभावाद्। **उत्कर्षतः पूर्वकोटी गृहपर्यायं** नववर्षलक्षणं **मुक्त्वा,** नववर्षोना पूर्वकोटी इत्यर्थः। कथमेतावान् कालो वृद्धवासस्य लभ्यते? इति चेत्, कोऽपि नववर्षप्रमाण एव श्रमणो जातः। स च श्रामण्यपरिग्रहादनन्तरमेव प्रतिकूलकर्मोदयवशतः क्षीणजङ्घाबलतया रोगेण वा विहर्तुमसमर्थो जातस्तत एकत्र वासो यथोक्तकालमानो भवति। इदं चोत्कर्षतो वृद्धवासकालपरिमाणं भगवत **ऋषभस्वामिन**स्तीर्थे। शेषतीर्थकरतीर्थान्यधिकृत्याह-**यस्य** वा तीर्थकरस्य **तीर्थे यत्** उत्कृष्ट**मायुः** प्रमाणं वर्षनवकहीनं तस्य तीर्थे तावान् उत्कृष्टो वृद्धवासकालः ॥२२३८॥

तत्र योऽसौ जरापरिणामेन वृद्धवासीभूतः स एतादृशः—

**[१]कया विज्जा चरियं लाघवेणं, तत्तो तवो देसितो सिद्धिमग्गो ।**
**अहाविहिं संजम पालइत्ता, दीहाउणो वुड्ढवासस्स कालो ॥२२३९॥**

**विद्या** नाम सूत्रार्थतदुभयग्रहणं तत्**कृतं**। तद्यथा-द्वादशवर्षाणि सूत्रग्रहणं कृतम्, द्वादशवर्षाण्यर्थग्रहणम्, तदनन्तरं **चरितं** देशदर्शनाय द्वादशवर्षाणि भ्रमणं कृतम्। तथा सदैव **लाघवेन** उपकरणलाघवादिना वर्तितम्। तथा **तप्तं** चतुर्थषष्ठादिरूपं नानाप्रकारं **तपः**। तथा अनिगूहितबलवीर्येण देशदर्शनानन्तरं द्वादशावर्षाण्यव्यवच्छित्तिं कुर्वता ज्ञानादिकः **सिद्धिमार्गो देशितः**। सदैव च **यथाविधि** श्रुतोपदेशेन सप्तदशविधः **संयमः** परिपालितः । तं सकलकालं संयमं यथाविधि **पालयित्वा** द्वादशावर्षाण्यव्यवच्छित्तिं कुर्वता यदि शिष्यो निष्पादितस्ततस्तं गणे स्थापयित्वा स्वयमभ्युद्यतविहारेण विहर्तव्यमिति भगवतामर्हतामुपदेशः। अथ न कोऽपि शिष्यो निष्पन्नस्तर्हि गच्छः परिवर्द्धनीयः, तथा यद्यपि च निष्पन्नः कोऽपि शिष्यस्तथापि कश्चिदसमर्थो भवत्यभ्युद्यतविहारेण विहर्तुं सोऽपि नाभ्युद्यतविहारं प्रतिपद्यते; तस्य शिष्यनिष्पत्त्यभावेनाभ्युद्यतविहारप्रतिपत्त्यशक्त्या वा गच्छं परिपालयतो **दीर्घायुषो वृद्धवासस्य कालः** ॥ २२३९ ॥



---

**१.वज्ज कया चारिय-ला.॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एनामेव गाथां व्याख्यानयति—

**सुत्तागमो बार समा, चरियं देसाण दरिसणं तु कयं ।**
**उवकरण-देह-इंदिय, तिविहं पुण लाघवं होइ ॥ २२४० ॥**

विद्या नाम **सूत्रागमः** । स च **द्वादश समा** वर्षाणि यावत् कृतः, उपलक्षणमेतद्, अर्थागमोऽपि विद्या, सोऽपि द्वादशवर्षाणि कृतः । तथा **चरितं** नाम **देशानां दर्शनं**, तदपि द्वादश वर्षाणि यावत् **कृतं** । **लाघवं पुनस्त्रिविधं भवति**, तद्यथा -**उपकरण**लाघवं, **देह**लाघवं, **इन्द्रिय**लाघवं च । तत्रोपकरणलाघवं नाम यदतिरिक्तमुपकरणं न गृह्णाति, गृहीतं वाऽरक्तद्विष्टः सन् सूत्रोक्तविधिना परिभुङ्क्ते। शरीरलाघवं-यन्नातिकृशो नातिस्थूलः शरीरेण। इन्द्रियलाघवं यदिन्द्रियाणि तस्य वशे वर्तन्ते ॥ २२४० ॥

**[१]चउत्थ-छट्ठादि तवो कतो ऊ, अव्वोच्छित्तीए होइ सिद्धिपहो ।**
**सुत्तविहीए संजमो, वुड्ढो अह दीहमाउं च ॥ २२४१ ॥**

---

१. अत्र २२४१ गाथायाश्चतुर्थचरणे छन्दोभङ्गः इति ला. टिप्पन पृ.२१५ टि.१७॥



For Private and Personal Use Only

**तपश्चतुर्थ-षष्ठादिकं कृतम्।** तथा **अव्यवच्छित्तौ** क्रियमाणायां **सिद्धिपथो** मोक्षमार्गो देशितो **भवति।** तथा **सूत्रविधिना संयमः** परिपालितः। स च जातो **वृद्धः अथ दीर्घमायुः** ॥ २२४१ ॥

**अब्भुज्जयमचएंतो, अगीतसिस्सो व गच्छपडिबद्धो ।**
**अच्छति जुण्णमहल्लो, कारणतो वा अजुण्णो वी ॥ २२४२ ॥**

**अभ्युद्यतम्** अभ्युद्यतविहार**मशक्नुवन्, अगीताः शिष्याः** अद्यापि यस्यासौ वा **गच्छप्रतिबद्धो** गच्छपरिपालनप्रवृत्तः सन् **जीर्णो महान्** वृद्धवासे **तिष्ठति। अजीर्णोऽपि** वा तरुणोऽपि **कारणतः** क्षीणजङ्घाबलतया रोगादिना **वा** वृद्धवासमुपसेवते ॥२२४२॥ तदेव कारणजातं गाथाद्वयेनाह—

**जंघाबले च खीणे१, गेलन्ने२ऽसहायता३ व दुब्बले४ ।**
**अहवा वि उत्तमट्ठे५, निप्फत्ती चेव तरुणाणं६ ॥ २२४३ ॥**

**खेत्ताणं च अलंभे७ कयसंलेहे व८ तरुणपडिकम्मे९।**
**एएहिं कारणेहिं, वुड्ढावासं वियाणाहि ॥ २२४४ ॥**

**जङ्घाबलं** वा **क्षीणम्**१। **ग्लानत्वं** वा तस्यान्यस्य वा जातम्२। **असहायता** वा समुत्पन्ना३। **दौर्बल्यं वा** शरीरस्योपजातम्४। **अथवा उत्तमार्थ**प्रतिपन्नः५। अथवा **तरुणानामात्मपरलक्षणानां निष्पत्तिः** सूत्रतोऽर्थतश्च कर्तव्या ६। **क्षेत्राणां** वा संयमस्फातिहेतूनामलाभः, **कृतः संलेखो** वा प्रतिपन्नसंलेखनाको वर्तते ८। यदि वा **तरुणस्य** रोगविमुक्तस्य सतः **प्रतिकर्म** बलविवृद्धिकरणं समारब्धम् ९। ततो वृद्धवासः। तथा चाह–**एतैः कारणैर्वृद्धावासं विजानीहि**॥ २२४३-४४॥

तत्र प्रथमे द्वारे 'जङ्घाबलं परिक्षीणम्' इत्येवंरूपं कियत् क्षेत्रं कियता कालेन गन्तुं शक्नुवन् विहरणाऽर्हो भवति? कियद्वा अशक्नुवन् जङ्घाबलपरिक्षीण इत्येतत्प्रतिपादयति—

**दुण्णि वि दाऊण दुवे, सुत्तं दाऊण अत्थवज्जं च ।**
**दोण्णी दिवड्डमेगं, गाउयं तीसु अणुकंपा ॥ २२४५ ॥**



**द्वे** पौरुष्यौ सूत्रपौरुषीमर्थपौरुषीं चेत्यर्थः **दत्त्वा** यावद्भिक्षावेला भवति तावद्यो **द्वे** गव्यूते व्रजति एष सपराक्रमो विहर्तुम्१। **सुत्तं दाऊण अत्थवज्जं चेति, सूत्रं** सूत्रपौरुषीं **दत्त्वा**

**अर्थवर्जं** च अर्थपौरुषीमदत्त्वा यो भिक्षावेलात अर्वाग् द्वे गव्यूते व्रजति सोऽपि सपराक्रमो विहर्तुम्२। '**च**शब्दः' अनुक्तसमुच्चयार्थः, स चैतत् समुच्चिनोति- सूत्रपौरुषीमदत्त्वा वा भिक्षावेलात् आरतो यो द्वे गव्यूते याति एषोऽपि सपराक्रमो विहर्तुमिति३। एवमेते त्रयः प्रकारा गव्यूतद्वयेऽभिहिताः। एते एव त्रयः प्रकारा द्व्यर्द्धे गव्यूते, त्रयश्च प्रकारा गव्यूते द्रष्टव्याः। एतेषु च त्रिष्वपि गव्यूतद्विक-द्व्यर्धगव्यूत-गव्यूतरूपेषु तस्यानुकम्पा विश्रामणादिरूपा वक्ष्यमाणा कर्तव्या॥२२४५॥

सम्प्रति चशब्दसूचितं तृतीयं प्रकारमुपदर्शयति—

**खेत्तेण अद्धजोयण, कालेणं जाव भिक्खवेला उ ।**
**खेत्तेण य कालेण य, जाणसु सपरक्कमं थेरं ॥ २२४६॥**

सूत्रपौरुषीमर्थपौरुषीं वाऽकृत्वा **कालतः** प्रातर्वेलात आरभ्य **यावद् भिक्षावेला** भवति तावद् यः क्षेत्रतः 'अर्धयोजनं' गव्यूतद्वयप्रमाणं व्रजति तं जानीत **क्षेत्रतः कालतश्च सपराक्रमं स्थविरम्**। तदेवं गव्यूतद्वयविषये चशब्दसूचितस्तृतीयः प्रकार उपदर्शितः। एवं द्व्यर्द्धगव्यूते गव्यूतेऽपि च द्रष्टव्यस्तथा चैतदर्थख्यापनार्थमेव गव्यूतविषयं तृतीयं प्रकारमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जो गाउयं समत्थो, सूरादारब्भ भिक्खवेला ।**
**विहरउ एसो सपरक्कमो उ नो विहरे तेण परं ॥ २२४७ ॥**

**यः सूरात्सूरोद्गमादारभ्य** यावद्भिक्षा**वेला** भवति तावत् **गव्यूतं** गन्तुं **समर्थ एषो**ऽपि **सपराक्रम** इति **विहरतु । ततः परं** गव्यूतमपि तावता कालेन गन्तुमशक्नुवन् **नो विहरेत्**। इदमुक्तं [भवति] त्रिष्वपि गव्यूतद्वयादिष्वनुकम्पा कर्तव्येति ॥ २२४७॥

तत्र तामेवानुकम्पामाह—

**वीसामण उवगरणे, भत्ते पाणेऽवलंबणे चेव ।**
**गाउ य दिवड्ढ दोसुं, अणुकंपेसा तिसुं होइ ॥ २२४८ ॥**

अन्तरान्तरा यत्र **विश्रामणार्थं** तिष्ठति तत्र विश्राम्यते। तथा **उपकरणे** उपकरणविषयेऽनुकम्पा कर्तव्या, यत्तस्योपकरणं तदन्ये वहन्ति, यैश्च तस्य शीतं न भवति तादृशानि वस्त्राणि देयानि। तथा **भक्तं पानं** च यदि तत्प्रायोग्यं शुद्धं न लभ्यते तदा पञ्चकपरिहान्या तदुत्पादनीयम्। यत्र च विषमं तत्र बाहुप्रदानादिना**ऽवलम्बनं** कर्तव्यम् । चशब्दात्स तेन



For Private and Personal Use Only

कालेनोच्चालनीयो यस्मिन्नुष्णादिभिर्न परिताप्यते। **एषाऽनुकम्पा त्रिषु गव्यूत-द्व्यर्धगव्यूत-द्विगव्यूतेषु भवति** ज्ञातव्या ॥२२४८॥

अथवा त्रिष्वनुकम्पेति प्रकारान्तरेण व्याख्यानयति—

**अहवा आहारुवही, सेज्जा अणुकंप एस तिविहा उ ।**
**पढमालिदाण-विस्सामणादि उवही य वोढव्वो ॥ २२४९॥**

**अथवा आहारे उपधौ शय्यायां** च या **अनुकम्पा एषा त्रिविधा**ऽनुकम्पा भवति। तत्राहारे **प्रथमालिकादानं**१,शय्यायां गतस्य **विश्रामणादि**२ मार्गे **चोपधिर्वोढव्यः**३ ॥२२४९॥

साम्प्रतमपराक्रममाह—

**खेत्तेण अद्धगाउ य कालेण य जाव भिक्खवेला उ ।**
**खेत्तेण य कालेण य जाणसु, अपरक्कमं थेरं ॥ २२५० ॥**

यः **कालतः** सूरोद्गमादारभ्य **यावद् भिक्षावेला** तावद् यः **क्षेत्रतोऽर्धगव्यूतं** याति तं **क्षेत्रतः कालतश्च जानीतापराक्रमं स्थविरम्** ॥२२५०॥

**अण्णो जस्स न जायइ, दोसो देहस्स जाव मज्झण्हो ।**
**सो विहरइ सेसो, पुण अच्छति मा दोण्ह वि किलेसो ॥ २२५१ ॥**

प्रातरारभ्य **यावन्मध्याह्न**स्तावद् यस्य गच्छतो **देहस्यान्यो** [१]**दोषो** भ्रम्यादिलक्षणो **नोपजायते स विहरति। शेषः पुनस्तिष्ठति** कस्माद्? इत्याह–**मा द्वयानामपि** तस्य सहायानां च **क्लेशो** भूयादिति हेतोः ॥ २२५१॥

अन्यो दोषो न जायते' इत्युक्तं । तत्रान्यं दोषमाह—

**भमो वा पित्तमुच्छा वा, उद्धसासो व खुब्भति ।**
**गतिविरए वि संतम्मि, इच्चादिसु न रीयति ॥ २२५२ ॥**

यस्मिन् **गतिविरतेऽपि सति भ्रमः** आकस्मिकी भ्रमिः, पित्तनिमित्ता मूर्च्छा **पित्तमूर्च्छा, ऊर्ध्वश्वासो वा क्षुभ्यति** चलति। **आदिशब्दात्** शिरोव्यथादिपरिग्रहः, **न रीयते** न गच्छति, न विहारक्रमं करोतीति भावः ॥ २२५२॥

१. दोषः पञ्चम्यादि॰ वा. पु.॥

तस्य चापराक्रमस्य वृद्धावासेन तिष्ठतः सहाया दातव्यास्तेषां परिमाणमाह—

**चउभाग-तिभागऽद्धे, सव्वेसिं गच्छतो परीमाणं ।**
**संताऽसंतसतीए, वुड्ढावासं वियाणाहि ॥ २२५३ ॥**

**गच्छतः** गच्छमधिकृत्य साधूनां **परिमाणं** ज्ञात्वा **सर्वेषां चतुर्भागस्त्रिभागोऽर्ध** वा साहाय्यास्तस्य वृद्धावासप्रतिपन्नस्य दीयन्ते । तत्र त्रिभागोऽर्द्धं वा दीयते, **संताऽसंतसतीए** सद्भावेनासद्भावेन चेत्यर्थः। तत्र सद्भावेन सन्ति साधवो भूयांसः, केवलमगीतार्थाः, ततस्ते सन्तोऽप्यसन्तः। असद्भावो न सन्ति बहवः साधवः। एवं **वृद्धावासं** ससहायं **जानीहि** ॥२२५३॥

तत्र 'गच्छतः साधूनां परिमाणं ज्ञात्वा सर्वेषां चतुर्भागसहाया दातव्या' इत्युक्तम्, ततो गच्छपरिमाणं जघन्यादिभेदत आह—

**अट्ठावीस जहण्णेण, उक्कोसेण सयग्गसो ।**
**सहाया तस्स जेहिं तु, उवट्ठाणा न जायति ॥ २२५४ ॥**

गच्छस्य परिमाणं **जघन्यतोऽष्टाविंशतिः, उत्कर्षत शताग्रशः** शतादारभ्य यावद् द्वात्रिंशत्सहस्राणि। तत्राष्टाविंशतिकस्य गच्छस्य चतुभार्गः सप्त, एतावन्तः **सहायास्तस्य** दातव्याः। यैरुपस्थाना उप सामीप्येन सर्वदावस्थानलक्षणेन [१]तिष्ठन्त्यस्यामिति **उपस्थाना** शय्या अजादिपाठात् प्रत्ययः नित्यवसतिर्न **जायते**।

इयमत्र भावना-प्रतिमासम् अन्यान्या वसतिर्न लभ्यते, स चालाभो द्विधा-सदलाभोऽसद-लाभश्च। तत्र सदलाभो नाम- लभ्यन्ते वसतयः किन्त्वकल्पिकाः। असदलाभो मूलत एव न लभ्यन्ते वसतयः। एवं सदलाभेनासदलाभेन वा प्रतिमासमन्यान्यवसत्यलाभे एकस्यामेव वसतौ जङ्घाबलपरिक्षीणो वसति । तस्य च सहाया अष्टाविंशतिकस्य गच्छस्य चतुर्भागमात्राः सप्त प्रदत्ताः, ते ऋतुबद्धे काले एकं मासं स्थित्वा गच्छं व्रजन्ति। अन्ये सप्त सहाया स्थविरस्या-गच्छन्ति, तेऽपि द्वितीये मासे परिपूर्णे गताः। ततोऽन्ये सप्त समागच्छन्ति तेऽपि तृतीये मासे परिपूर्णे गताः। ततोऽन्ये सप्त सहाया आयान्ति, तेऽपि चतुर्थं मासं स्थित्वा गच्छं व्रजन्ति, ये प्रथमे मासे सप्ताऽऽगच्छन् ते भूयः समागच्छन्ति। एवं त्रिमासान्तरितः सर्वेषां पुनर्वारको

१. तिष्ठन्ति तस्या०

भवति, एवं वारेण वारेणाऽऽगमने तैर्नित्यवसतिदोषः परिहृतो भवति। अथ सदभावेन असदभावेन वाष्टाविंशतेरूनो गच्छो वर्तते यावदेकविंशतिकः, तस्य त्रिभागे सप्त, तेषां द्विमासान्तरितो वारको भवति, तथैव सदभावेन असदभावेन वा यदि चतुर्दशको गच्छो भवति तदा तेषामर्द्धेन सप्त, तेषामेकमासान्तरितः पुनर्वारकः। एवं प्रतिमासमन्यान्यवसत्यभावे वृद्धस्यैवैकस्य वृद्धवासो भवति, न तु सहायानाम्। अथ सदभावेनासदभावेन वा चतुर्दश गच्छे न सन्ति तदा ते एव सप्तजनाः चिरकालमपि तिष्ठन्तो यतनया तं वृद्धं परिपालयन्ति ॥ २२५४॥

अमुमेवार्थमभिधित्सुराह—

**चत्तारि सत्तगा तिण्णि दोण्णि एक्को व होज्ज असतीए ।**
**संतासती अगीया, ऊणा उ असंतओ असती ॥ २२५५ ॥**

**चत्वारः सप्तका** वारेण वारेण वृद्धपरिपालनाय प्रेषणीयाः। **असती**[**ए** सदभावेना] सदभावेन चाष्टाविंशतेरभावे **त्रयः** सप्तका वारकेण प्रेष्याः। तावतामप्यभावे **द्वौ** सप्तकौ वारकेण प्रेष्यौ। तयोरप्य**भावे एकः** सप्तकः सदावस्थायी तत्परिपालको **भवेत्**। सदभावेनासदभावेन वा असतीत्युक्तं तत्र सदभावं[असदभावं] च व्याख्यानयति— **संतासती** इत्यादि, सन्तासती

सदभावो नाम ये **अगीतार्थाः** ते हि सन्ति भूयांसः परं ते सन्तोऽप्यसन्तः, वृद्धस्य सहायकार्येष्व-समर्थत्वात्। **असंतओ असती** असदभावः स्वभावतोऽ**प्यूनाः** ॥ २२५५ ॥

अथ कस्मात् सप्तसहायाः क्रियन्ते? न न्यूनाः? इत्याह—

**दो संघाडा भिक्खं, एक्को बहि दो य गेण्हए थेरं ।**
**आलित्तादिसु जयणा, इहरा परिताव-दाहादी ॥ २२५६ ॥**

**द्वौ सङ्घाटौ भिक्षां हिण्डते, एको बहि**र्वसतेस्तिष्ठति रक्षकः, **द्वौ च स्थविरं गृह्णीतः।** एवं सप्तसु सत्सु **आदीप्तादिषु** प्रदीपनादिषु **यतना** भवति, **इतरथा परितापदाहादिकं** वृद्धादेरुपजायते। अथ सदभावेनासदभावेन वा सप्तको गच्छो न विद्यते, किन्तु षष्ठादिक-स्तदापि सर्वेऽपि वृद्धावासिका भवन्ति, यतनया च तं परिपालयन्ति ॥ २२५६ ॥

तामेव यतनामाह—

**आहारे जयणा वुत्ता, तस्स जोग्गे य पाणए ।**
**निवाय मउए चेव, छवित्ताणेसणादिसु ॥ २२५७ ॥**

**तस्य** वृद्धस्य **योग्ये आहारे पानके** उपाश्रये **निवाते छविस्त्राणं** वस्त्रं तस्मिन्**मृदुके** च **एषणीयानि** तदलाभे पञ्चकपरिहाण्याप्युत्पादनीयानि ॥२२५७॥

तदेवमुक्ता चतुर्विधा यतना। सम्प्रति प्रकारान्तरेण चतुर्विधामेव यतनामाह—

**वुड्ढावासे जयणा, खेत्ते१ काले य२ वसहि३ संथारे४ ।**

**खेत्तम्मि नवगमादी, परिहाणी एक्कहिं वसइ ॥ २२५८ ॥**

**वृद्धावासे यतना** चतुर्विधा। तद्यथा-**क्षेत्रे१ काले२ वसतौ३ संस्तारे च** ४। तत्र **क्षेत्रे नवकादि**विभाग नवकमादिं कृत्वा एकैकविभागे **परिहाण्या** तावद्वस्तव्यं यावदे**कस्मिन्न**पि भागे चिरकालं **वसति**। इयमत्र भावना-क्षेत्रं नव भागान्करोति, तत्रैकस्मिन् भागे वसतिं गृहीत्वा तस्मिन्नेव भागे संस्तारकभिक्षादीनि निर्दिशति। शेषानष्टौ भागान्परिहरति। तांश्च तावत्परिहरति यावत्परिपूर्णो मार्गशीर्षः। ततो द्वितीये पोषमासे द्वितीये भागे वसत्यादि गृह्णाति, शेषानष्टौ भागान्परिहरति, एवं तृतीयादिषु विभागेषु माघादय आषाढान्ता मासा नेतव्याः। वर्षाकाले चतुरो मासान् नवमे भागे वसत्यादि गृह्णाति, शेषानष्टौ भागान्परिहरति। तथाविधभिक्षाद्यलाभे नववसतयोऽष्टौ भिक्षादियोग्या भागाः परिकल्पनीयाः १, वसत्यलाभे अष्टौ भागा वसतियोग्याः, नव भागा भिक्षादियोग्याः २, वसत्यलाभे भिक्षाद्य-

लाभे चाष्टौ वसतिभागाः, अष्टौ भिक्षादिभागाः ३। एवं त्रिभिः प्रकारैरेकैकभाग-परिहाण्या तावत् ज्ञेयं यावदेकैकस्मिन् भागे वसतिं भिक्षादीनि च गृह्णाति ॥ २२५८॥

एतदेव प्रतिपिपादयिषुराह—

**भागे भागे मासं, काले वी जाव एक्कहिं सव्वं ।**
**पुरिसेसु वि सत्तण्हं, असतीए जाव एक्को उ ॥ २२५९ ॥**

ऋतुबद्धे काले **भागे भागे मासं** कुर्यात् । अलाभे च सति भिक्षादीनां च पूर्वप्रकारेणैकैकपरिहाण्या तावद्यतेत **यावत्कालेऽपि** ऋतुबद्धकालेऽपि **सर्वं** वसत्यादिक**मेकस्मिन्** भागे गृह्णीयात् **पुरुषेष्वपि** सहायभूतेषु चिन्तायां **सप्तानामभावे** एकैकपरिहाण्या तावद्यतना विधेया **यावदेकोऽपि** सहायो भवत्विति ॥२२५९॥

**पुव्वभणिया[१] य जयणा, वसही भिक्खे वियारमादी य ।**
**सच्चेव च होइ इहं, वुड्ढावासे वसंताणं ॥ २२६० ॥**



---

१. सेहा उ पुव्वभणिय। तु जयणा वसही- P ला. पाठान्तरम् ॥

**पूर्व**मोघनिर्युक्तौ कल्पाध्ययने वा या वसतौ **भिक्षायां विचारादौ च यतना भणिता** महता प्रबन्धेन, **सैव चेह वृद्धवासे वसतां भवति** ज्ञातव्या॥ २२६०॥

उक्ता क्षेत्रयतना ॥ कालयतनामाह—

**धीरा कालच्छेयं, करेंति अपरक्कमा तहिं थेरा ।**
**कालं वाऽविवरीयं, करेंति तिविहा तहिं जयणा ॥ २२६१॥**

**धीरा** बुद्धिमन्तः संयमकरणोद्यता अप्रमादिनो**ऽपराक्रमा** जङ्घाबलपरिहीणाः **स्थविरास्तत्र** वृद्धवासे **कालच्छेदं कुर्वन्ति** ऋतुबद्धे काले अष्टसु मासेषु प्रतिमासमन्यान्यवसतिभिक्षादि-ग्रहणतः, वर्षासु चतुरो मासान् एकवसत्येकभागभिक्षादिग्रहणतः, तदभावे पूर्वोक्तयतनया कालत्रुटिं कुर्वन्ति। तथा **कालमविपरीतं** च **कुर्वन्ति,** ऋतुबद्धे काले वर्षाकालकल्पं वर्षासु ऋतुबद्धकालकल्पं न कुर्वन्तीति भावः। तथा **त्रिविधा यतना तत्र** ऋतुबद्धे काले कर्तव्या ॥२२६१॥

साम्प्रतमविपरीतमेव कालं व्याख्यानयति—

**अव्विवरीतो नामं, काले उवट्ठाणदोस परिहरति ।**
**असती वसहीए पुण, अव्विवरीओ उवट्ठे वि ॥ २२६२ ॥**

**अविपरीतो नाम** कालः क्रियमाण एष यत् **काले** ऋतुबद्धे प्रतिमासमन्यान्यवसतिभिक्षादिग्रहणत **उपस्थानदोषान्** नित्यवासदोषान् **परिहरति** । **असत्य**भावे **वसतेः**, उपलक्षणमेतत्, भिक्षाद्यभावे च **उपस्थितेऽपि** एकस्यां वसतौ सततमवस्थितेऽपि यतना कर्तव्या ॥ २२६२ ॥

**तिविहा जयणाऽऽहारे१ उवही२सेज्जासु३ होइ कायव्वा ।**
**उग्गमसुद्धा तिण्णिवि असतीए पणगपरिहाणी ॥ २२६३ ॥**

**आहारे उपधौ शय्यासु** च वसतिषु [**यतना कर्तव्या भवति**] का यतनेत्यत आह– **त्रीण्यपि** प्रथमत **उद्गमादिशुद्धानि** उद्गमोत्पादनैषणाशुद्धानि ग्रहीतव्यानि तेषा**मसत्य**भावे **पञ्चकपरिहाण्यापि** समुत्पादनीयानि ॥ २५६३ ॥

गता कालयतना। सम्प्रति वसतियतनामाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सेलियकाणेट्टघरे, पक्के आमे य पिंड-दारुघरे ।**
**कडिते कडग-तणघरे, वोच्चत्थे होंति चउगुरुगा ॥ २२६४ ॥**

**शैलिकं** नाम पाषाणेष्टिकाभिः कृतम्। **काणेट्ट**त्ति लोहमय्य इष्टकास्ताभिः कृतं **गृहं** काणेष्टकागृहम्। "**पक्के**" इति पक्वेष्टिकागृहम् **आमे य**त्ति, आमाः अपक्वाः, ताभिरिष्टकाभिः कृतं गृहम्। **पिंड-दारुघरे**त्ति गृहशब्दः प्रत्येकमभिसम्बध्यते, पिण्डगृहं चिक्खल्लपिण्डै-[1] र्निष्पादितं, **दारुगृहं** करपत्रस्फाटितदारुफलकमयं गृहम्। **कडित**त्ति कण्टिभिः कृतं गृहं कण्टित[2] [गृहम्]। **कडग**त्ति वंशदलनिर्मापितकटात्मकं गृहं कटकगृहं, **तृणगृहं** दर्भादितृण-मयम्। एतेषां सति लाभे प्रथमं गृहीतव्यम्, तदभावे द्वितीयम्, एवं शेषाण्यपि भावनीयानि। यदि पुनः सति विपर्यस्तं कुर्यात् तदा **विपर्यस्ते** विपर्यासे प्रायश्चित्तं **भवति चत्वारो गुरुकाः** ॥२२६४॥

तत्राद्येषु चतुर्षु गृहेषु यो गुणो भवति तमभिधित्सुराह—

१. पिण्डकैर्नि॰ वा. पु. ॥ २. कण्टकैराच्छादितं सम्भाव्यते ॥



For Private and Personal Use Only

**कोट्टिमघरे वसंतो, आलित्तम्मि वि न डज्झती तेण ।**
**सेलादीणं गहणं, रक्खति य निवाय वसही उ ॥ २२६५ ॥**

**कोट्टिमम्** उपरिबद्धभूमिकं **गृहं**, तच्च शैलादिमयं तस्मिन् **वसन् आदीप्तेऽपि** प्रदीपनकेऽपि **न दह्यते**, तत्राग्नेः प्रवेशासंभवात्। तेन कारणेन **शैलादीनां ग्रहणम्**। तथा **रक्षति निवाता वसतिः** शीतादिकमिति वा शैलादिकग्रहणमकारि ॥ २२६५॥

उक्ता वसतियतना। सम्प्रति संस्तारकयतनामाह—

**थिरमउयस्स असती, अप्पडिहारिस्स चेव वच्चंति ।**
**बत्तीसजोयणाणि वि, आरेण अलब्भमाणम्मि ॥ २२६६ ॥**

यो वसतौ यथासंस्तृतश्चम्पकपट्टोऽन्यो वा **स्थिरमृदुक**संस्तारकः अप्रतिहार्यः स गृहीतव्यः। **तस्याभावे** वसतेरेव सम्बन्धि यन्निवेशनं गृहं तस्मादानेतव्यः। तस्याप्यलाभे वाटकादानेयः। तत्राप्यलाभे वाटकाद्बहिष्ठोऽप्यानेतव्यः। तत्राप्यसति स्वग्रामे दूरतोऽपि, तत्राप्यलाभे परग्रामादपि अर्धक्रोशात्। तथाप्यलाभे क्रोशादपि। एवमर्धकोशवृद्ध्या तावद् गन्तव्यं यावदुत्कर्षतो द्वात्रिंशतो योजनेभ्योऽपि। तथा चाह- **स्थिरमृदुकस्या**प्रतिहार्यस्य संस्तारकस्य वसत्यादौ अलाभे

**अप्रतिहार्यस्यैव** संस्तारकस्यानयनाय **परग्रामे व्रजन्ति**। तत्र च **आरतोऽलभ्यमाने द्वात्रिंशति योजनान्यपि** यावत् व्रजन्ति ॥२२६६॥

एतदेव सुव्यक्तमाह—

**वसहि निवेसण साही, दूराणयणम्मि जो उ पाउग्गो ।**
**असतीए पाडिहारिय, मंगलकरणम्मि नीणंति ॥ २२६७ ॥**

**वसतौ** यथासंस्तृतः स्थिरमृदुकः संस्तारको मृगणीयस्तदभावे **निवेशने** अप्रतिहार्यो गवेषणीयस्तत्राप्यलाभे **साही**त्ति वाटके। तत्राप्यलाभे **यः प्रायोग्यो**ऽप्रतिहार्यः संस्तारकः तस्य **दूरा**दपि द्वात्रिंशद्योजनप्रमाणादानयनं कर्तव्यम्। एवमपि तथारूपस्याप्रातिहार्यस्य संस्तारकस्य **असति** अलाभे **प्रातिहार्यं** मङ्गलकरणे मंगलकरणनिमित्तं ध्रियमाणं **नीणंति** आनयन्ति ॥२२६७॥

एतदेव स्पष्टतरमाह—

**ओगालीफलगं पुण, मंगलबुद्धीए सारविज्जंतं ।**
**पुणरवि मंगलदिवसे, अच्चियमहियं पवेसेंति ॥ २२६८ ॥**

गाथा २२६४-२२६९ स्थिरवासे वसतियतना संस्तारकयतना ९९१ (A)

**ओगालफलकं** नाम आर्यक-प्रार्यकप्रभृतीनामावल्या समागतं चम्पकपट्टादिफलकं **मङ्गलबुद्ध्या सारविज्जंतं** ध्रियमाणम्। तथाहि- ते मङ्गलबुद्ध्या तं फलकं धरन्ति। उत्सवादिषु च तं फलकं श्रीखण्डादिना अर्चयन्ति। पुष्पादिभिर्महयन्ति, न च कोऽपि तं फलकं परिभुङ्क्ते, एवं मङ्गलबुद्ध्या साराप्यमानं साधवो याचन्ते, यथाऽस्माकमाचार्याः स्थविराः. तेषामिदं फलकं प्रातिहार्यं समर्पयत, अस्माकं विरतानां पूज्यास्ते देवानामपि पूज्याः, किं पुनर्युष्माकं? ते एवमुक्ताः सन्तो ब्रुवते-सत्यं, दद्मः केवलमुत्सवदिवसे आनेतव्यो येन वयं पूजयामः, ततः पुनरपि दास्यामः। एवमुक्ते तं नीत्वा उत्सवदिवसे तस्यां पूजावेलायां प्रेषयन्ति, येनावष्वष्कणोत्ष्वष्कणदोषा न भवन्ति। ततः **पुनरपि** तस्मिन् **मङ्गलदिवसे अर्चित-महितं** तं चम्पकादिपट्टं **कृतं** वसतौ **प्रवेशयन्ति** ॥२२६८॥

**पुण्णम्मि अप्पिणंती, अण्णस्स व वुड्ढवासिणो देंति ।**

**मुत्तूण वुड्ढवासिं, आवज्जइ चउलहुं सेसे ॥ २२६९ ॥** दारं १।

**पूर्णे** वृद्धवासे कालगतत्वादिना यस्य सत्कश्चम्पकादिपट्टस्तस्य तं **समर्पयन्ति, अन्यस्य**

**वा वृद्धवासिनो ददति, वृद्धवासिनं मुक्त्वा** यद्यन्यस्य शेषस्य समर्पयन्ति ततः **शेषे** शेषस्य समर्पणे तेषां प्रायश्चित्त**मापद्यते चतुर्लघु।** इदृशस्य फलकस्यालाभे यदन्यद् अपरिशाटिफलकं तदप्रतिहार्यं मृगयन्ते । तदलाभे प्रातिहार्यमपि । एवं क्षेत्र-काल-वसति-संस्तारकयतना कर्तव्या, एकतरयतनाविभागासम्भवे त्रिविभागा यतना कर्तव्या, तस्या अप्यसम्भवे द्विविभागा, तस्या अप्यसम्भवे एकविभागापीति ॥२२६९॥

गतं जङ्घाबलं परिक्षीणमिति द्वारम्। इदानीं ग्लानद्वारमाह—

**पडियरति गिलाणं वा, सयं गिलाणो व तत्थ वि तहेव ॥** दारं २।
**भावियकुलेसु अच्छति, असहाए रीयतो दोसा ॥ २२७० ॥** दारं ३।

**प्रतिचरति ग्लानं,** यदि **वा स्वयं ग्लानो** जातस्ततस्तस्य वृद्धवासो भवति, **तत्रापि तथैव** क्षेत्र-काल-वसति-संस्तारकयतना द्रष्टव्या । गतं ग्लानद्वारम्। असहायताद्वारमाह- **भावितकुलेषु** संविग्नभावितेषु कुलेष्व**सहायः** सहायहीनस्ति**ष्ठति**, यतस्तस्य **रीयमाणस्य** विहरतो बहवो **दोषाः** स्त्र्यादिभ्यः ॥ २२७०॥

गतमसहायताद्वारम्। सम्प्रति दौर्बल्यद्वारमाह—

**ओमादी तवसा वा, अचएंतो दुब्बलो वि एमेव ।**
**संताऽसंतसतीए बलकरदव्वे य जयणा उ ॥ २२७१ ॥** दारं ४।

**अवमं** दुर्भिक्षम्, **आदि**शब्दात् नगररोधादिपरिग्रहः। तत्रावमौदर्येण **दुर्बलीभूतो** न शक्नोति विहर्तुम्, **तपसा वा** क्षामीभूतः । कथमित्याह **संतासंतसतीए** सदभावेनासदभावेन वा । तत्र सदभावो लभ्यते, यथातृप्ति भक्ष्यं केवलमन्तं प्रान्तं, तेन क्षामीभूतः। असदभावो यथातृप्ति भक्ष्यस्यैवाभावः। स तथाक्षामीमूतो विहर्तुम**शक्नुवन्, एवमेव** क्षीणजङ्घाबलगतेन प्रकारेण तिष्ठति, केवलं तेन **बलकरद्रव्ये यतना** कर्तव्या । प्रथमत उद्गमादिशुद्धं तदुत्पादनीयं, तदभावे पञ्चकपरिहाण्यापि। ततो बलिकीभूतो विहरति॥ २२७१ ॥

गतं दौर्बल्यद्वारम्। साम्प्रतमुत्तमार्थद्वारमाह—

**पडिवण्णउत्तमट्ठे, पडियरगा वा वसंति तन्निस्सा ।**
**आय-परे निप्फत्ती, कुणमाणो वा वि अच्छेज्जा ॥ २२७२ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपन्न उत्तमार्थोऽनशनं येन स **प्रतिपन्नोत्तमार्थः** । स वा तस्य वा **प्रतिचारकास्तन्निश्रा** उत्तमार्थप्रतिपन्ननिश्रा मासातीतं वर्षाकालातीतं वा **तिष्ठन्ति**। गतमुत्तमार्थद्वारम् ॥ अधुना तरुण-निष्पत्तिद्वारमाह–**आत्मनः परस्य** च सूत्रार्थतदुभयेन **निष्पत्तिं कुर्वन्वा** वृद्धवासेन तिष्ठेत् ॥२२७२॥

कियन्तं कालम्? अत आह—

**संवच्छरं च झरए, बारस वासा य कालियसुयम्मि।**
**सोलस य दिट्ठिवाए, एसो उक्कोसतो कालो ॥ २२७३ ॥**

**संवत्सरं** यावत् कालिकश्रुतं **झरति** परावर्तयति। ग्रहणे पुनः **कालिकश्रुते** कालिकश्रुतस्य लगन्ति **द्वादशवर्षाणि**। **दृष्टिवादे** ग्रहणमधिकृत्य **षोडश** वर्षाणि लगन्ति। **च**शब्दाद् झरणमधिकृत्य द्वादश वर्षाणि। **एष** एतावान् आत्मपरनिष्पत्तिमधिकृत्यैकत्रावस्थानस्य **उत्कृष्टः कालः** ॥२२७३॥

एतदेव सुव्यक्तमाह—



For Private and Personal Use Only

**बारसवासे गहिए, उ कालियं झरति वासमेगं तु ।**
**सोलस उ दिट्ठिवाए, गहणं झरणं दस दुवे य ॥ २२७४ ॥**

**द्वादश वर्षाणि** यावत् यत्परिपूर्णं **गृहीतं कालिकश्रुतं** तत् **वर्षमेकं झरति** एकेन वर्षेण परावर्त्यते। **ग्रहण**मधिकृत्य **दृष्टिवादे षोडश** वर्षाणि लगन्ति, **झरण**मधिकृत्य पुनः **दश द्वे च** द्वादश वर्षाणीत्यर्थः। ततो ग्रहणं झरणं चाधिकृत्य तावन्तं कालमेकत्रावतिष्ठते ॥ २२७४॥

अत्र पर आह—

**झरए य कालियसुए, पुव्वगए य जइ एत्तिओ कालो ।**
**आयारपकप्पनामे, कालच्छेदो उ कयरेसिं? ॥ २२७५ ॥**

**कालिकश्रुते च पूर्वगते च श्रुते झरके च**शब्दात् ग्राहके च **यदि एतावान्कालो** लगति तर्हि **आचारप्रकल्पनाम्नि निशीथे**ऽध्ययने योऽसौ **कालच्छेदः** कृतः, यथा ऋतुबद्धे काले मासमासितव्यं, वर्षासु चतुरो मासानिति, स **कतरेषां** द्रष्टव्यः ? ॥ २२७५॥

सूरिराह—

**सुत्तत्थतदुभएहिं, जे उ समत्ता महिड्डिया थेरा ।**
**एएसिं तु पकप्पे, भणितो कालो नितियसुत्ते ॥ २२७६ ॥**

**सूत्रार्थतदुभयैर्ये समाप्ता महर्धिकाः स्थविरा एतेषामाचारप्रकल्पे नैत्यिकसूत्रे भणितः कालो** द्रष्टव्यः। न तु सूत्रार्थग्राहकान् प्रति ॥२२७६॥

सूत्रार्थग्राहकाणामपि ग्रहणे झरणे च तावानुत्कृष्टः कालो यथा[१] भवन् सम्भवति तथोपदर्शयति—

**थेरे निस्साणेणं, कारणजातेण एत्तिओ कालो ।**
**अज्जाणं पणगं पुण, नवगग्गहणं तु सेसाणं ॥ २२७७ ॥**

**स्थविरे** जङ्घाबलपरिक्षीणे **निश्राणेन** निश्रया **कारणजातेन** आत्मपरनिष्पत्तिलक्षणेन जातेन कारणेन **एतावान्** पूर्वोक्तप्रमाण [२]एकत्रावस्थाने उत्कृष्ट**कालो** भवति। **आर्याणाम्**

१. यथा लगन् स० वा. मो. पु. मु. सं.॥ २. एकत्रस्थाने- वा. मो. पु.॥

आर्यिकाणां **पुनर्वृद्धवासमावसन्तीनां पञ्चकं** क्षेत्रपञ्चकं भवति। तद्यथा- सबाह्ये क्षेत्रे द्वौ भागौ बहिः, द्वौ भागावन्तः, एकैकस्मिंश्च क्षेत्रविभागे द्वौ द्वौ मासाववस्थानं, पञ्चमो वर्षारात्रयोग्यः क्षेत्रविभागः। **शेषाणां** साधूनां पुनः कारणवशत एकत्र स्थितानां **नवकग्रहणं** नवभिर्भागैः क्षेत्रकरणम्॥२२७७॥

इह ये जङ्घाबलपरिक्षीणाः स्थविरास्तेषां समीपे आत्मपरनिष्पत्तिमिच्छतां यादृशाः सहाया दातव्याः तादृशानभिधित्सुराह—

**जे गेण्हिउं धारयिउं च जोग्गा, थेराण ते देंति सहायए उ ।**
**गेण्हंति ते ठाणट्ठिया सुहेणं, किच्चं च थेराण करेंति सव्वं ॥ २२७८ ॥**

सूत्रमर्थं च **ये गृहीतुं धारयितुं च योग्यास्तान्सहायकान् स्थविराणां ददति** । ततस्ते **स्थानस्थिताः** कालिकश्रुतं दृष्टिवादं वा सुखेन **गृह्णन्ति, कृत्यं च सर्वं स्थविराणां कुर्वन्ति**। एवं तेषां ग्रहणे झरणे च पूर्वोक्त उत्कृष्टः काल एकत्रावस्थाने भवति॥ २२७८॥

गतं तरुणनिष्पत्तिद्वारम्। अधुना क्षेत्रलाभद्वारमाह—

**आसज्ज खेत्त-काले, बहुपाउग्गा न संति खेत्ता वा ।**
**निच्चं च विभत्ताणं, सच्छंदादी बहू दोसा ।। २२७९ ।।** दारं ७।

**आसाद्य** प्रतीत्य **क्षेत्रकालौ**। तद्यथा-अन्येषु क्षेत्रेष्वशिवादीनि कारणानि, यदि वा नास्ति साम्प्रतमन्येषु क्षेत्रेषु तादृशः कालो येन संस्तरन्ति, **अथवा बहुप्रायोग्यानि** महागणप्रायोग्यानि **न सन्ति क्षेत्राणि**, यदि पुनर्महतो गणस्य विभागः क्रियते। ततो **विभक्तानाम**द्याप्यपरिनिष्पन्नत्वेनागीतार्थानां **नित्यम**वश्यं **स्वच्छन्दादयो दोषा** भवन्ति। एतैः कारणै ऋतुबद्धातीतं वर्षातीतं च कालमेकक्षेत्रे यतनया तिष्ठन्ति॥ २२७९॥

अधुना कृतसंलेखद्वारं तरुणप्रतिकर्मद्वारं चाह—

**जह चेव उत्तमट्ठे, कयसंलेहम्मि ठंति तह चेव ।** दारं ८ ।
**तरुणपडिकम्मं पुण, रोगविमुक्के बलविवड्ढी ॥ २२८० ॥** दारं ९।

**यथा** चैव **उत्तमार्थे** प्रतिपन्ने तिष्ठन्ति **तथा** चैव **कृतसंलेखेऽपि तिष्ठन्ति**। इयमत्र भावना-यथा प्रतिपन्नोत्तमार्थस्तत्प्रतिचारका वा तन्निश्रा एकत्र स्थाने वसन्ति। एवं

प्रतिपन्नसंलेखनाकस्तत्प्रतिचारकाश्च तन्निश्रा एकत्रस्थाने वसन्ति। **तरुणप्रतिकर्म नाम रोगविमुक्तस्य** सततस्तरुणस्य **बलविवृद्धि**करणं, तन्निमित्तं मासातीतं वर्षातीतं च कालं तिष्ठन्ति ॥ २२८० ॥

**वुड्ढावासातीते, कालातीते न उग्गहो तिविहो ।**
**आलंबणे विसुद्धे, उग्गहो तक्कज्जवोच्छेओ ॥ २२८१ ॥**

**वृद्धवासाती**ते मरणेन प्रतिभग्नतया वा अरोगीभवनेन वा, सूत्रार्थग्रहणेन वा झरणेन वा वृद्धवासातीते **कालेऽतीते** ऋतुबद्धे काले मासाधिके काले वर्षासु चतुर्मासाधिके **अवग्रहस्त्रिविधो**ऽपि **न** भवति, सचित्तस्याचित्तस्य मिश्रस्य च ग्रहणं तत्र न कल्पते इति भाव:। कुत? इत्याह— **आलम्बने** वृद्धवासलक्षणे **विशुद्धे** परिसमाप्ते यस्त**त्कार्य**भूतो**ऽवग्रह**स्तस्यापि **व्यवच्छेदो** भवति, कारणाभावे कार्यस्याभावात् ॥ २२८१ ॥

यस्तु मन्यते कालातीतेऽपि नावग्रहस्य व्यवच्छेदस्तं प्रति दृष्टान्तमाह—

**आगासकुच्छिपूरो, उग्गह पडिसेहियम्मि जो कालो ।**
**न हु होंति उग्गहो सो, कालदुगे वा अणुण्णातो ॥ २२८२ ॥**

यथा कोऽपि पुरुषो बुभुक्षया पीडितः सन् चिन्तयति— पूरयाम्युदरमाकाशेन येन मे बुभुक्षाऽपगच्छति, स यथा **आकाशे कुक्षिपूरः** प्राप्तो न भवति, अरूपित्वाद् आकाशस्य। एवम**वग्रहे प्रतिषेधिते यः कालो** वर्तते तस्मिन्नुत्पादितः सः **अवग्रहो**ऽवग्रहो **न भवति** प्रतिषिद्धकालाचीर्णत्वात् । **अथवा** प्रकारान्तरेण **कालद्विकेऽनुज्ञातो**ऽवग्रहः ॥२२८२॥

कथम्? इति चेद्, अत आह—

**गिम्हाण चरिम मासो, जहिं कतो तत्थ जति पुणो वासं ।**
**ठायंति अन्नखेत्तासतीए दोसुंपि तो लाभो ॥ २२८३ ॥**

**यत्र ग्रीष्माणां** उष्णकालस्य **चरमः** आषाढनामा **मासः कृतस्तत्र यदि** पुनः अन्यक्षेत्रासति तथाविधान्यक्षेत्राभावतो **वर्षं** वर्षाकाले तिष्ठन्ति । ततः **द्वयोरपि** कालयोः ग्रीष्मचरममासे वर्षाकाले चेत्यर्थः **लाभो** भवति, एवं कारणवशतो द्वयोरपि कालयोः सचित्तादिलाभोऽनुज्ञात इत्यर्थः ॥२२८३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एमेव य समतीते, वासे तिण्णि दसगा उ उक्कोसो ।**
**वासनिमित्तठियाणं, उग्गहो छमासो उक्कोसा ॥ २२८४ ॥**

**एवमेव** अनेनैव प्रकारेण **वर्षे** वर्षाकाले **समतीते** यदि मेघो वर्षति ततोऽन्यद्दिवसदशकं स्थीयते, तस्मिन्नपि समाप्तिमुपगते यदि पुनः वर्षति ततो द्वितीयं दिवसदशकं स्थातव्यम्, तस्मिन्नप्यतीते पुनर्वृष्टौ तृतीयमपि दिवसदशकं तिष्ठति। एवं **उत्कर्षतस्त्रीणि** दिवस**दशका**नि **वर्षानिमित्त स्थितानामुत्कृष्टोऽवग्रहः षण्मासः** षण्मासप्रमाणो भवति । तद्यथा— एको ग्रीष्मचरममासः, चत्वारो वर्षाकालमासाः, षष्ठो मार्गशीर्षो दिवसदशकत्रयलक्षण इति ॥२२८४॥

**॥ इति श्रीमलयगिरिविरचितायां व्यवहारटीकायां चतुर्थ उद्देशकः समाप्तः ॥**
**॥ चतुर्थोद्देशके ग्रंथाग्रं ॥ ४०४०॥**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥
॥ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्रीव्यवहारसूत्रम्

## ॥ पंचम उद्देशकः ॥



For Private and Personal Use Only

उक्तश्चतुर्थ[1] उद्देशकः। अधुना पञ्चमो वक्तव्यः । तत्रेदमादिसूत्रकदम्बकम्—

नो कप्पइ पवत्तिणीए अप्पबिइयाए हेमंतगिम्हासु[2] चारए १। कप्पइ पवत्तिणीए अप्पतइयाए हेमंतगिम्हासु चारए २। नो कप्पइ गणावच्छेइणीए अप्पतइयाए हेमंतगिम्हासु चारए ३। कप्पइ गणावच्छेइणीए अप्पचउत्थाए हेमंतगिम्हासु चारए ४। नो कप्पइ पवत्तिणीए अप्पतइयाए वासावासं वत्थए ५। कप्पइ पवत्तिणीए अप्पचउत्थाए वासावासं वत्थए ६। नो कप्पइ गणावच्छेइणीए अप्पचउत्थाए वासावासं वत्थए ७। कप्पइ गणावच्छेइणीए अप्पपंचमाए वासावासं वत्थए ८। से गामंसि वा जाव संनिवेसंसि वा बहूणं पवत्तिणीणं अप्पतइयाणं, बहूणं गणावच्छेइणीणं अप्पचउत्थाणं कप्पइ हेमंतगिम्हासु चारए अन्नमन्नं नीसाए ९। से गामंसि वा जाव संनिवेसंसि वा बहूणं पवत्तिणीणं अप्पचउत्थाणं बहूणं गणावच्छेइणीणं अप्पपंचमाणं कप्पइ वासावासं वत्थए अन्नमन्नं नीसाए १०।

१. चतुर्थोद्दे° पु. प्रे. ॥

गामाणुगामं दूइज्जमाणी निग्गंथी य जं पुरओ काउं विहरइ सा य आहच्च वीसुंभेज्जा. अत्थि[1] या इत्थ काइ अन्ना उवसंपज्जणारिहा, सा उवसंपज्जियव्वा, नत्थि[2] या इत्थ काइ अन्ना उवसंपज्जणारिहा, तीसे य अप्पणो कप्पाए असमत्ते एयं से कप्पइ एगराइयाए पडिमाए जण्णं जण्णं दिसं अन्नाओ साहम्मिणीओ विहरंति तण्णं तण्णं दिसं उवलित्तए नो कप्पइ तत्थ विहारवत्तियं वत्थए । कप्पइ से तत्थ कारणवत्तियं वत्थए । तंसि च णं कारणंसि निट्ठियंसि परो वएज्जा- 'वसाहि अज्जे ! एगरायं वा दुरायं वा', एवं से कप्पइ एगरायं वा दुरायं वा वत्थए । नो से कप्पइ परं एगरायाओ वा दुरायाओ वा वत्थए । जा तत्थ एगरायाओ वा दुरायाओ वा परं वसइ सा संतरा छेए वा परिहारे वा॥ ११ ॥

वासावासं पज्जोसविया णिग्गंथी य जं पुरओ काउं विहरइ, सा य आहच्च वीसुंभेज्जा, अत्थि या इत्थ काइ अण्णा उवसंपज्जणारिहा सा उवसंपज्जियव्वा ।

---

१. अत्थि याइं थ- श्युब्रींग एवमग्रेऽपि॥ २. नत्थि याइं थ- श्युब्रींग॥

नत्थि या इत्थ काइ अण्णा उवसंपज्जणारिहा तीसे य अप्पणो कप्पइ असमत्ते, एवं से कप्पइ एगराइयाए पडिमाए जण्णं-जण्णं दिसं अण्णाओ साहम्मिणीओ विहरंति तण्णं तण्णं दिसं उवलित्तए ।

नो से कप्पइ तत्थ विहारवत्तियं वत्थए । कप्पइ से तत्थ कारणवत्तियं वत्थए ।

तंसि च णं कारणंसि निट्ठियंसि परो वएज्जा-' वसाहि अज्जे! एगरायं वा दुरायं वा', एवं से कप्पइ एगरायं वा दुरायं वा वत्थए। नो से कप्पइ परं एगरायाओ वा दुरायाओ वा वत्थए। जा तत्थ एगरायाओ वा दुरायाओ वा परं वसइ सा संतरा छेए वा परिहारे वा ॥ १२ ॥

पवत्तिणी य गिलायमाणी अन्नयरं वएज्जा- ''मए णं अज्जे! कालगयाए समाणीए इयं समुक्कसियव्वा।'' सा य समुक्कसिणारिहा समुक्कसियव्वा, सा य नो समुक्कसिणारिहा नो समुक्कसियव्वा। अत्थि य इत्थ अण्णा काइ समुक्कसिणारिहा सा समुक्कसियव्वा। नत्थि य इत्थ अण्णा काइ समुक्कसिणारिहा सा चेव समुक्कसियव्वा। ताए च णं समुक्किट्ठाए

परा वएज्जा- ''दुस्समुक्किट्ठं ते अज्जे! निक्खिवाहि'' ताए णं निक्खिवमाणाए नत्थि केइ छेए वा परिहारे वा।

जाओ साहम्मिणीओ अहाकप्पं नो उट्ठाए विहरंति सव्वासिं तासिं तप्पत्तियं छेए वा परिहारे वा॥ १३ ॥

पवत्तिणी य ओहायमाणी अन्नयरं वएज्जा- ''मए णं अज्जे! ओहावियाए समाणीए इयं समुक्कसियव्वा।'' सा य समुक्कसिणारिहासमुक्कसियव्वा, सा य नो समुक्कसिणारिहा नो समुक्कसियव्वा। अत्थि य इत्थ अण्णा काइ समुक्कसिणारिहा सा समुक्कसियव्वा। नत्थि य इत्थ अण्णा काइ समुक्कसिणारिहा सा चेव समुक्कसियव्वा। ताए च णं समुक्किट्ठाए परा वएज्जा- ''दुस्समुक्किट्ठं ते अज्जे! निक्खिवाहि॥'' ताए णं निक्खिवमाणाए नत्थि केइ छेए वा परिहारे वा ॥ १४॥

''नो कप्पति पवत्तिणीए'' इत्यादि तावत्, यावद् अवधावनसूत्रम्।

अथ सम्बन्धप्रतिपादनार्थमाह—

**उद्देसम्मि चउत्थे, जा मेरा वण्णिया उ साहूणं ।**
**सा चेव पंचमे संजतीण गणणाए णाणत्तं ॥२२८५॥**

**चतुर्थे उद्देशके या मर्यादा वर्णिता साधूनां सैव पञ्चमे** उद्देशे **संयतीनां** वर्ण्यते, केवलं **गणनायां नानात्वम्,** तदपि च सूत्रे साक्षादुक्तमिति प्रतीतम्। अतः प्रथमत एव संयतीसूत्रकदम्बकोपनिपातः ॥ २२८५॥

प्रकारान्तरेण सम्बन्धमाह—

**वुत्तमहवा बहुत्तं, पिंडगसुत्ते चउत्थ चरमम्मि ।**
**अबहुत्ते पडिसेहं, काउमणुण्णा बहूणं तु ॥२२८६॥**

**अथवा चतुर्थस्य** उद्देशकस्य **चरमे पिण्डकसूत्रे बहुत्वमुक्तम्,** ततो बहुत्वप्रस्तावात् पञ्चमे उद्देशके संयतीनाम् **अबहुत्वे प्रतिषेधं कृत्वा बहूनामनुज्ञा** कृता। ननु बहूनामपि त्रिप्रभृतीनां विहारो न कल्पते, असमाप्तकल्पत्वात्। तथाहि-जघन्यतोऽपि ऋतुबद्धे काले

संयतीनां सप्तकः समाप्तकल्पः, वर्षाकाले नवकः। ततः कथं नाधिकृतसूत्रकदम्बकविरोधः? उच्यते— नैष दोषः, कारणवशतः सूत्रकदम्बकस्य प्रवृत्तेः ॥ २२८६॥

तान्येव कारणान्युपदर्शयति—

**संघयणे१ वाउलणा२, छट्ठे अंगम्मि३, गमणमसिवादी४ ।**
**सागर५ जाते जयणा, उउबद्धोलोयणा[1] भणिया ॥२२८७॥**

प्रवर्तिन्या गणावच्छेदिन्या वा उत्तमेन **संहननेन,** उपलक्षणमेतत्, उत्तमया च धृत्या सूत्रमर्थश्च भूयान् गृहीतः १। गच्छे च व्याघातः, स च व्याकुलनावशात्, तत उक्तं द्वितीयं कारणं **व्याकुलना;** सा च 'धम्मकहि महिड्डिए' [गा.१७१९] इत्यादिना प्रकारेण यथा प्राक् तृतीयोद्देशकेऽभिहिता तथैवात्रापि भावनीया, पुनरुक्तदोषभयात्तु नाभिधीयते, ततः सूत्रार्थस्मरणनिमित्तमात्मतृतीयायाः प्रवर्तिन्या आत्मचतुर्थायाश्च गणावच्छेदिन्या गमनम् २। तथा **षष्ठेऽङ्गे ज्ञा**ताधर्मकथाख्ये बहवः सदृशा गमाः, तथा च तत्रानेकाः कथानककोटयः सदृशपाठाः, विसदृशपाठास्त्वर्द्धचतुर्थाः कथानककोटयः, तदभिनवगृहीतं वर्तते, पुनः पुनरस्मृतं

१. **सर्वेषु भाष्यादर्शेषु, लाडनुंसंस्करणे, सर्वासु च टीकाप्रतिषु, 'उउबद्धालोयणा' इत्येव पाठो वर्तते॥**

च विस्मृतिमुपयाति, ततस्तत्स्मरणार्थमुक्तपरिवाराया अपि गमनम् ३। तथा **अशिवादिभिः** अशिवाऽवमौदर्यादिभिः उक्तसंख्याकपरिवाराया **गमनम्** ४। तथा षष्ठप्रभृतीन्यङ्गानि संयतीनां **सागरत्ति, स्वयम्भूरमणसागरतुल्यानि,** तानि अभिनवगृहीतानि परावर्तनीयानि सन्ति अपरावर्तितानि नश्यन्ति, ततस्तेषां परावर्तनाय यथोक्तसंङ्ख्याकपरिवाराया अपि गमनम् ५। तदेवमधिकृतसूत्रकदम्बकप्रवृत्तौ कारणान्यभिहितानि । अधुना शेषवक्तव्यतामाह-**जाते**त्ति जातादिरूपः कल्पो वक्तव्यः, स च ऋतुबद्धे सप्तकः समाप्तकल्पः, तदूनोऽसमाप्तकल्पः, वर्षाकाले नवकः समाप्तकल्पः, तदूनोऽसमाप्तकल्पश्च। एकैकोऽपि द्विधा-जातोऽजातश्च, गीतार्थोऽगीतार्थश्चेति। अत्र च भङ्गचतुष्टये प्रथमवर्जेषु शेषेषु त्रिषु भङ्गेषु प्राग्वत् **यतना** कर्तव्या । तथा **ऋतुबद्धे** काले निरन्तरं साध्वीप्रेषणतो**ऽवलोकना** कर्तव्या **भणिता** ॥२२८७॥

गाथा २२८७-२२९० सूत्रकदम्ब-प्रयोजनादिः

तदेवमभिहितानि कारणानि, एतैः कारणैरायातस्यास्य सूत्रकदम्बकस्य व्याख्या— सा च तथैव। तथा चाह—

**जह भणिय चउत्थे, पंचमम्मि तह चेविमं तु नाणत्तं ।**
**गमणित्थि मीस संबंधि वज्जिए पूजिते लिंगे ॥२२८८॥**

**यथा चतुर्थे** उद्देशके निर्ग्रन्थसूत्राणां व्याख्यानं भणितम्, तथा पञ्चमेऽपि उद्देशके निर्ग्रन्थीसूत्राणामपि वक्तव्यम्, नवरं **इदं नानात्वम्।** तदेवाह- **गमणित्थि** इत्यादि, विष्वग्भूतायां प्रवर्तिन्यां **गमनं** सर्वाभिरार्यिकाभिराचार्यसमीपे कर्तव्यम्। तच्च **स्त्रीभिः** सह, तदभावे **मिश्रैः** स्त्री-पुरुषैः, तेषामप्यभावे **सम्बन्धि**पुरुषैः, एतेषामप्यभावे सम्बन्ध**वर्जितैर**-विकारिभिः पुरुषैः। अथ सप्रत्यपायाः पन्थानः, तर्हि यद् तत्र **पूजितं लिङ्गं** तस्मिन् लिङ्गे गृहीते गमनम् ॥ २२८८॥

एतदेव सुव्यक्तमाह—

**वीसुंभियाए सव्वासिं, गमणं अद्धऽद्ध जाव दोण्हेक्का ।**
**संबंधि इत्थिसत्थे, भावितमविकारितेहिं वा ॥२२८९॥**



**विष्वग्भूतायां** शरीरात्पृथग्भूतायां, मृतायामित्यर्थः, प्रवर्तिन्यामाचार्यसमीपे **सर्वाभिर्गन्तव्यम्।** तत्र च गतानामाचार्येण प्रवर्तिनी स्थापयितव्या। यदि **सर्वासां** तरुणीनां पथि प्रत्यवायस्तर्हि **अर्धाः** याः परिणतवयसस्ता(स्ताः) व्रजन्ति। अथ सर्वास्तरुणप्रायाः कतिपयाः स्थविरास्ततो या मन्दरूपास्तरुण्यो याश्च स्थविरास्तासां समुदायस्य चतुर्भागमात्रा

व्रजन्ति, एवं तावद्वाच्यं यावत् **द्वे** जने गच्छतः, द्वयोरप्यसम्भवे **एका** व्रजति। ताः पुनः केन सार्थेन सह व्रजन्ति? तत आह— '**संबंधी**'त्यादि, सम्बन्धिना **स्त्रीसार्थेन** [तस्याऽप्यलाभे मिश्रैः स्त्री-पुरुषैः] सह गन्तव्यम्, तदलाभेऽसम्बन्धिनापि स्त्रीसार्थेन, तस्याप्यलाभे पुरुषा ये **भाविताः** सम्बन्धिनस्तैः समं व्रजेयुः, तेषामप्यलाभेऽसम्बन्धिनोऽपि **येऽविकारिणः** पुरुषास्तैः समम्। अथ सप्रत्यवायाः पन्थानः, तर्हि यद् यत्र देशे पूजितं लिङ्गं तेन गृहीतेन व्रजन्ति। एतच्च सुगमत्वान्न व्याख्यातम्॥ २०८९॥

अत्र शिष्यः प्राह- यद्याचार्येण प्रवर्तिनी स्थापयितव्या तर्हि ये एते द्वे सूत्रे "पवत्तिणी गिलायमाणी वएज्जा, मए णं अज्जे! काल गयाए इयं समुक्कसियव्वा" १३ इत्यादि, तथा "पवत्तिणी ओहायमाणी वएज्जा, मए णं ओहावियाए इयं समुक्कसियव्वा" १४ इत्यादि ते कथं नीयेते ? तत आह—



**असिवादिएसु फिडिया, कालगए वावि तम्मि आयरिए ।**
**तिगथेराण य असती, गिलाण ओहाण सुत्ता उ ॥२२९०॥**

**अशिवादिभिः** कारणैः, गाथायां सप्तमी तृतीयार्थे प्राकृतत्वात्, यस्याऽऽचार्यस्य समीपे

आसीरन् तस्मात् **स्फिटिताः**। ततः सा ग्लानीभूता अवधावनप्रेक्षिका वा यत्सूत्रेऽभिहितं तद् वदति। अन्यस्याऽऽचार्यस्य परिज्ञानकरणार्थं यथा एषा अर्हा इति तां प्रवर्तिनीं स एव अन्य आचार्यः स्थापयति, यदि वा यस्याचार्यस्य समीपे ता अतिष्ठन् स कालगतः ततस्तस्मिन्नाचार्ये कालगते सा ग्लानीभूता अवधावनप्रेक्षिका वा अन्यस्याचार्यस्य परिज्ञानकरणार्थं सूत्राभिहितं वदति, **तिगथेराण य असती** इति त्रिकं कुल-गण-सङ्घस्तस्य स्थविराः त्रिकस्थविरास्तेषामसति, किमुक्तं भवति? कुलस्थविराणां गणस्थविराणां सङ्घस्थ-विराणां वा प्रत्यासन्नानामभावे 'एषा अर्हा' इति शेषस्थविरपरिज्ञानकरणाय[1] यत्सूत्रेऽभिहितं तद् वदति, ततो **ग्लानाऽवधावनसूत्रे** उपपन्ने ॥ २२९० ॥

**साहिणम्मि वि थेरे, पवत्तिणी चेव तं परिकहेइ ।**
**एसा पवत्तिणी भे!, जोग्गा गच्छे बहुमता य ॥२२९१॥**

अथवा **स्वाधीनेऽपि स्थविरे** आचार्ये सा **प्रवर्तिनी** ग्लायन्ती अवधावनप्रेक्षिका वा **तां परिकथयति**। यथा **भे!** भगवन्! **एषा प्रवर्तिनी योग्या** प्रवर्तिनीत्वस्यार्हा, सूत्राऽर्थतदुभयनिष्णाततत्वात्, **गच्छे बहुमता [च]**। तत एवमपि ते सूत्रे उपपन्ने ॥२२९१॥

१. °कारणे यत्- सं. ॥

**अब्भुज्जयं विहारं, परिवज्जिउकामे दुस्समुक्कट्ठं ।**
**जह होती समणाणं, भत्तपरिण्णा तहा तासिं ॥२२९२॥**

**यथा** प्राक् **श्रमणानामभ्युद्यतविहारं प्रतिपत्तुकामे दुःसमुत्कृष्टं भवति** दुःसमुत्कृष्टं प्रतिपादितम्, **तथा तासां** श्रमणीनां **भक्तपरिज्ञां** प्रतिपत्तुकामायां दुःसमुत्कृष्टं भावनीयम् ॥२२९२॥

**सूत्रम्— निग्गंथीए नवडहरतरुणियाए आयारपकप्पे नामं अज्झयणे परिब्भट्ठे सिया, सा य पुच्छियव्वा 'केण' भे कारणेणं अज्जे ! आयारपकप्पे नामं अज्झयणे परिब्भट्ठे, किं आबाहेणं उदाहु पमाएणं' ? सा य वएज्जा 'नो आबाहेणं, पमाएणं', जावज्जीवाए तीसे तप्पत्तियं नो कप्पइ पवत्तिणित्तं वा गणावच्छेइणित्तं वा उद्दिसित्तए वा धारेत्तए वा। सा य वएज्जा 'आबाहेण, नो पमाएणं', सा य 'संठवेस्सामीति' संठवेज्जा, एवं से कप्पइ पवत्तिणित्तं वा गणावच्छेइणित्तं वा उद्दिसित्तए वा धारेत्तए वा, सा य संठवेस्सामीति' नो संठवेज्जा, एवं से नो कप्पइ पवित्तिणित्तं वा गणावच्छेइणित्तं वा उद्दिसित्तए वा धारेत्तए वा ॥ १५॥**

'निग्गंथीए नव-डहर-तरुणाए' इत्यादि सूत्रद्विकम्। अस्य व्याख्या- **निर्ग्रन्थ्याः नव-डहर-तरुण्या** वक्ष्यमाणस्वरूपायाः **आचारप्रकल्पो नामाध्ययनं परिभ्रष्टं स्यात्, सा च प्रष्टव्या— केन कारणेन आचारप्रकल्पो नामाध्ययनं परिभ्रष्ट**मभवत्, **किमाबाधेन प्रमादेन वा**? एवं पृष्टा सती **सा,** यदीति गम्यते, **वदेत्, नाबाधेन** किन्तु **प्रमादेन,** तर्हि **यावज्जीवं तस्यास्तत्प्रत्ययं** प्रमादतोऽध्ययननाशनप्रत्ययं **नो कल्पते प्रवर्तिनीत्वं वा गणावच्छेदिकात्वं वा उद्देष्टुं,** नापि तस्याः स्वयं **धारयितुम्**। अथ **सा वदेत् आबाधेन** नष्टं, **न** तु **प्रमादेन, सा च** नष्टमध्ययनं **संस्थापयामी**त्युक्त्वा **संस्थापयेत्, एवं 'से'** तस्याः **कल्पते प्रवर्त्तिनीत्वं वा गणावच्छेदिकात्वं वा उद्देष्टुम्** अनुज्ञातुं स्वयं **धारयितुम्**। अथ नष्टमध्ययनं **संस्थापयिष्यामि** इत्युक्त्वा **न संस्थापयेत् एवं** तर्हि **से** तस्या **न कल्पते प्रवर्तिनीत्वं वा गणावच्छेदिकात्वं उद्देष्टुं**[1] **वा** [अनुज्ञातुं]वा स्वयं **धारयितुमि**ति। एवं निर्ग्रन्थसूत्रमपि भावनीयम्[2]।

---

**१. उद्देष्टुं वा स्वयं - सं खं. वा. पु.॥ २. इदं तु ध्येयं श्युब्रींग संस्करणे आगम प्रकाशने च १५ तमं निर्ग्रन्थविषयं सूत्रम्, ततः पश्चात् १६ तमं निर्ग्रन्थीविषयं सूत्रम्, प्रतिलिपिमध्ये तु ॥**

**सूत्रम्— निग्गंथस्स नवडहरतरुणगस्स आयारपकप्पे नामं अज्झयणे परिब्भट्ठे सिया, से य पुच्छियव्वे 'केण ते अज्जो ! कारणेणं, आयारपकप्पे नामं अज्झयणे परिब्भट्ठे ? किं आबाहेणं उदाहु पमाएणं' ? से य वएज्जा 'नो आबाहेणं, पमाएणं,' जावज्जीवाए तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा। से य वएज्जा 'आबाहेणं, नो पमाएणं.' से य 'संठवेस्सामीति' संठवेज्जा, एवं से कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा। से य संठवेस्सामीति नो संठवेज्जा, एवं से नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए धारेत्तए वा ॥ १६ ॥**

नवडहरतरूणव्याख्यानं च प्रागुक्तमवसेयम् ।

'**तिवरिसो होइ नवो** व्रतपर्यायेणेति वाक्यशेषः **आसोलसगं तु,** जन्मपर्यायेणेति गम्यते, **डहरगं बेंति** ।

तरुणो चत्ता सत्तरुण मज्झिमो थेरओ सेसो' ॥१॥ [गा.१५५९]

आचार्यत्वं वा यावत्करणादुपाध्यायत्वं वा प्रवर्तित्वं वा स्थविरत्वं वेति परिग्रहः, शेषं तथैव॥ अत्राऽऽह शिष्यः- 'पुरुषोत्तमो धर्मः' इति [१]पूर्वं निर्ग्रन्थसूत्रं वक्तव्यं, पश्चाद्

१. पूर्वं निर्ग्रन्थीविषयं तदनन्दरं निर्ग्रन्थविषयम् ।

निर्ग्रन्थीसूत्रम्, पूर्वत्र चाध्ययनद्वये पूर्वं निर्ग्रन्थसूत्राण्युक्तानि पश्चान्निर्ग्रन्थीसूत्राणि । अत्र तु केन कारणेन सूत्रविपर्ययः कृतः ?। सूरिराह-

**जइ वि य पुरिसादेसो, पुव्वं तह वि य विवज्जओ जुत्तो ।**
**जेण समणी उ पगया, पमायबहुला य अथिरा य ॥२२९३॥**

**यद्यपि** च पुरुषोत्तमो धर्मः **पूर्वत्र** चाध्ययनद्वये[१] **पूर्वं** [२]**पुरुषादेशः** सूत्रादेश**स्तथाप्यत्र विपर्ययो युक्तः**। केन कारणेन? इत्याह-**येन** कारणेन **श्रमण्यः प्रकृताः**, तथा प्रायः श्रमण्यः **प्रमादबहुला अस्थिराश्च,** न तु श्रमणाः, अध्ययनस्य च नाशः प्रायः प्रमादतः, ततः श्रमण्यधिकारादधिकृतसूत्रार्थस्थानत्वात् पूर्वं निर्ग्रन्थीसूत्रमुक्तम्, पश्चात् निर्ग्रन्थसूत्रम् ॥ २२९३॥

नव-डहर-तरुणीनां व्याख्यानमाह—

---

१.°नत्रये - खं. सं. मु॥ २. पुरुषादेशेस्तथाऽप्येवं विप° वा. पु.॥

**तेवरिसा होइ नवा, अट्ठारसिया उ डहरिया होइ ।**
**तरुणी खलु जा जुवई, चउरो दसगा व पुव्वुत्ता ॥२२९४॥**

व्रतपर्यायेण यावत् **त्रिवर्षा** तावद्भवति **नवा**। जन्मपर्यायेण यावद् **अष्टादशिका** अष्टादशवर्षप्रमाणा तावद् **भवति डहरिका**। **तरुणी खलु** तावद् द्रष्टव्या **यावद् युवतिः** । अथवा **पूर्वोक्ताः** तृतीयोद्देशके नव-डहर-तरुणसूत्रे येऽभिहितास्तरुणस्य **चत्वारो दशकाः** चत्वारिंशद्वर्षाणीत्यर्थः, ते अत्रापि तरुण्या द्रष्टव्याः ॥ २२९४॥

**सा एयगुणोवेया, सुत्तऽत्थेहिं पकप्पमज्झयणं ।**
**समहिज्जिया इतो यावि आगया नवसुया अण्णा ॥२२९५॥**

**सा** नव-डहर-तरुणी **एतद्गुणोपेता सूत्रार्थाभ्यां प्रकल्पनामकमध्ययनमधीता** [१]अधीतवती, ततः सा प्रवर्तिनीत्वस्य योग्या सूरिभिः [२]सम्भाविता। अथ च तस्याः सूत्रतोऽथ-'तश्चाऽऽचारप्रकल्पः परिभ्रष्टः स कथं ज्ञातः? इत्याह- **इतश्चापि आगता** अन्यगच्छा**दन्या** साध्वी, उपसम्पन्ना च सा विज्ञपयति ॥ २२९५॥

---

**१. सं.मु.। अधीतीनी, पु.प्रे. ॥ २. संसाधिता - सं.॥**

कथम्? इत्याह—

**अत्थेण मे पकप्पो, समाणितो न य जितो महं भंते ।**
**अमुगा मे संघाडं, ददंतु वुत्ता उ सा [1]गणिणा ॥२२९६॥**

हे **भदन्त** ! भगवन् ! अर्थेन अर्थतो **मम** आचार**प्रकल्पः समानीतः** समासिं नीतः, परं **न च** नैव **मम** स **जितः** परिचितोऽभूत्, ततो**ऽमुका** या प्रवर्तिनीत्वेन सम्भाविता, तां **सङ्घाटं** पूज्या **ददतु**; एवं तया विज्ञप्तेन **गणिना** आचार्येण **सा उक्ता** 'आर्ये! देहि एतस्याः सङ्घाटम् ॥ २२९६॥

**सा दाउं आढत्ता, नवरि य णट्टं न किंचि आगच्छे ।**
**एमेव मुणमुणंती, चिट्ठति मुणिया य सा तीए ॥२२९७॥**

सा सङ्घाटं **दातुं प्रवृत्ता**, परावर्तयितुं व्याख्यातुं च प्रवृत्ता इत्यर्थः। **नवरि नष्टं** तदध्ययनम्, **न किमप्यागच्छति**, केवल**मेवमेव मुणमुणंती** अव्यक्ताक्षरं किमपि ब्रुवन्ती **तिष्ठति**, ततः **सा** [2]तया **ज्ञाता** यथा न किमप्ये**तस्या** आगच्छति ॥२२९७॥

१. गुरणा-खं. वा. मो. पु. मु. ॥ २. तया मुणिता - वा. मो. पु. मु. ॥

**पुणरवि साहति गणिणो, सा नट्ठसुया दलाह मे अन्नं ।**
**अब्भक्खाणं पि सिया, वाहित्तुं होइमा पुच्छा ॥२२९८॥**

ततः सा **पुनरपि गणिनः** आचार्यस्य **कथयति** यथा- **सा नष्टश्रुता,** तस्माद् **ममान्यां** सहायां **ददतु,** एवमुक्ते आचार्येण विचारयितव्यं-सत्यं? किं परिभ्रष्टं तस्या अध्ययनं किं वा न को जानाति? **अभ्याख्यानमपि** काचित् केनापि कारणेन प्रद्विष्टा सती दद्यात्। ततस्तां **व्याहृत्य** तस्या **इयं** वक्ष्यमाणा **पृच्छा** कर्तव्या॥ २२९८॥ तामेवाह—

**दंडकगह-निक्खेवे, आवसियाए निसीहियाऽकरणे ।**
**गुरूणं च अप्पणामे, य भणसु आरोवणा का उ? ॥२२९९॥**

**दण्डकस्य** प्रत्युपेक्षाप्रमार्जनाव्यतिरेकेण **ग्रहणे निक्षेपणे** च, तथा **आवश्यिक्या नैषिधिक्याश्चाऽकरणे,** बहिःप्रदेशादागच्छता वसतेः प्रवेशे 'नमः क्षमाश्रमणेभ्यः' इत्येवं **गुरूणामप्रणामे** च प्रणामाकरणे च **का आरोपणा** प्रायश्चित्तं भवति ? ॥२२९९॥

**पुट्ठा अनिव्वहंती, किह नट्ठं[1] ऽबाहतो? पमाएणं? ।**
**साहेइ पमाएणं, सो य पमादो इमो होइ ॥२३००॥**

सा एवं **पृष्टा सती** यदि न निर्वहति, न यथावस्थितमुत्तरं ददाति तदा सा **अनिर्वहन्ती** भूयः प्रष्टव्या **कथं** केन[2] कारणेन ते **नष्टमा**चारप्रकल्पनामकमध्ययनं?, किमा**बाधातः** उत **प्रमादेन**?, तत्र यदि सा **कथयति—प्रमादेन, स च प्रमादोऽयं** वक्ष्यमाणो **भवति** ॥२३००॥

तमेवाह—

**धम्मकह-निमित्तादी, उ पमातो तत्थ होति नायव्वो ।**
**मलयवइ मगहसेणा, तरंगवइयाइ धम्मकहा ॥२३०१॥**

**तत्र** तस्यां संयत्यां **धर्मकथा-निमित्तादिकः**, आदिशब्दात् ग्रहचरितादिपरिग्रहः, **प्रमादो भवति ज्ञातव्यः**। तत्र **धर्मकथा मलयवती मगधसेना तरङ्गवती, आदिशब्दात् वसुदेव**-हिण्ड्यादिपरिग्रहः एताः कथा अधीयानाया विस्मृतिं गतं प्रकल्पनामकमध्ययनम् ॥२३०१॥



---

**१. नट्ठाऽऽबाधतो? खंभा. वाभा. जेभा. ॥ २. केन प्रकारेण- खं. मो. मु.॥**

**गहचरिय-विज्ज-मंता-चुण्ण-निमित्तादिणा पमाएणं ।**
**नट्ठम्मि संधयंती, असंधयंती व सा न लभे ॥२३०२॥**

**ग्रहचरितं** ज्योतिष्कं, ससाधना **विद्या,** साधनारहितो **मन्त्रः, चूर्णो** योगचूर्णः, **निमित्तम्** अतीतादिभावकथनम्, आदिशब्दात् **कु**हुकशास्त्रादिपरिग्रहः। **इत्यादिना प्रमादेन** इत्याद्यध्ययनलक्षणेन प्रमादेन **नष्टे** प्रकल्पनाम्नि अध्ययने, यदि भूयः सा तत्सन्दधाति, यदि वा न सन्दधाति, तथापि **सा सन्दधती असन्दधती वा** यावज्जीवं गणं **न लभते** ॥२३०२॥

**जावज्जीवं तु गणं, इमेहि नाएहिं लोगसिद्धेहिं ।**
**अतिपाल-वेज्ज-जोहे, धणुगाई भग्गफलगाण ॥२३०३॥**

**यावज्जीवं गणं न** लभते, **एभिः अजापालक-वैद्य-योधैर्लोकसिद्धैर्ज्ञातैः।** तत्र योधे प्रमादाचरितं सम्यगविदित**धनुरादि**भिर्धनुर्भग्नविभग्नं दृष्टं, जीवा छिन्नविच्छिन्ना, काण्डानि असज्जितानि; न केवलमेतैर्ज्ञातैः, किन्तु **भग्नफलकेन** शटित-पतित-मलचयनज्ञातेन ॥२३०३॥

तत्र प्रथममजापालकदृष्टान्तमाह—

**खेलंतेण उ अइया, पणासिया जेण सो पुणो न लभे ।**
**सूलादिरुया नट्ठा, वि लहति एमेव उत्तरिए ॥२३०४॥**

कोइ अयवालो वेयणएण अयातो रक्खेइ। तेण ततो वट्टगादिखेल्लणादीहिं पमाएहिं नासिया। तो सो अण्णातो दवावितो भणइ- पुणो रक्खामि, न एरिसं काहामि। सो एवं भणंतो वि जावज्जीवं अन्नत्थ वि न लहति। अह सूलं से उट्ठियं, जरो वा अतिआउरो आगतो, ततो तातो नट्ठातो ताहे सो पुणो वि लभते रक्खिउं ॥

अक्षरगमनिका-**येन खेलता** वृत्तादिना क्रीडता **अजिकाः प्रणाशिताः, स पुनर्न लभते,** यावज्जीवमन्यत्राप्यजा रक्षितुम् । अथ **शूलादिरुजा,** अत्रादिशब्दादत्यातुरज्वरादिपरिग्रहः, ता अजा **नष्टास्ततः** पुनरपि **लभते** रक्षितुम्। **एवम् उत्तरके**ऽपि लोकोत्तरेऽपि उपनयः कर्तव्यः:प्रमादेन नष्टे अध्ययने यावज्जीवं न लभते गणम् आबाधेन तु नष्टे लभते ॥ २३०४॥

अधुना वैद्यज्ञातं भावयति—

**जति से सत्थं नट्ठं, पेच्छह से सत्थकोसगं गंतु ।**
**हीरति कलंकिएसु, भोगो जूयादिदप्पेणं ॥२३०५॥**

कोइ वेज्जो रण्णा कयवित्तीतो, तेण जूयपमादेण विसयपमादेण वा वेज्जसत्थं नासियं, सत्थकोसगाणि य पच्छणगादीणि कट्टकलंकियाणि, न निसीयइ, अण्णया रण्णो कज्जं जायं, सद्दावितो वेज्जो, सो किरियोवदेसं न किंचि सक्केइ वोत्तुं । ततो रण्णा भणियं- किमेयं? ततो सो भणइ-मे पोत्थगा चोरेहिं हिया, पाडिपुच्छगंपि नत्थि, तो मम नट्ठं वेज्जसत्थं, नत्थि पुण मम अण्णो पमाओ जेण वेज्जसत्थं नासियं। ताहे रण्णा पुरिसा पेसिया । **यदि से** तस्य **शास्त्रं**[1] **नष्टं** तर्हि 'से' तस्य, यूयं **गत्वा शास्त्रकोशकं प्रेक्षध्वम्** ततस्तैस्तद् **ह्रियते** राज्ञः समर्प्यते। दृष्टानि राज्ञा समस्तानि प्रतक्षणकप्रभृतीनि शास्त्राणि कट्टकलङ्कितानि। ततस्तेषु **कलङ्कितेषु** दृष्टेषु ज्ञातं, यथा- **द्यूतादिदर्पेण** द्यूतादिना प्रमादेन विनाशितं वैद्यशास्त्रम्, ततो **भोगः** छिन्नः, पश्चादन्यत्र गत्वा वैद्यशास्त्रं पुनरप्युज्वाल्य समागतो भूयोऽपि राज्ञः समीपे भोगान् याचते, स च याचमानोऽपि न लभते। एवं लोकोत्तरेऽप्युपनयभावना प्राग्वत् कर्तव्या ॥२३०५॥



---

१. शस्त्र- पु. प्रे. एवमग्रेऽपि॥

योधदृष्टान्तभावनार्थमाह—

**चुक्को जइसरवेही, तहा वि पुलोएह से सरे गंतुं ।**
**अकलंक कलंकं वा, भग्गमभग्गाणि य धणूणि? ॥२३०६॥**

कोइ जोहो धणुव्वेयं अहिज्जंतो गुरूवएसेणं अब्भासेण य सो अपासंतो वि सद्देणं विंधति। रन्ना कयपभूयवित्तितो कतो। अन्नया तेण विसयपमाएण तं **धणुव्वेय**सत्थं तं च अब्भासकरणं नासियं । अन्नया जुद्धकज्जे समावडिए न किंचि वि सक्केइ विंधिउं पराजिणिउं वा। रण्णा पुच्छितो- किमेयं? ति। सो भणइ-नत्थि मे पमादो। ताहे रण्णा भणियं— यदि नाम प्रमादाकरणत एष **स्वरवेधी चुक्को** भुल्लस्**तथापि 'से'** तस्य **शरान् गत्वा प्रलोकयत,** किं तत् शरजालम**कलङ्कं** सकलङ्कं वा? धनूंष्यपि **भग्नान्यभग्नानि वा?** दृष्टं शरजालं कलङ्कितं, धनूंषि च भग्नानि। ततो ज्ञातं प्रमादतः सर्वं नष्टम्। कृतो वृत्तिव्यवच्छेदः। सोऽन्यत्र गत्वा धनुर्वेदशास्त्रमुज्ज्वाल्य कृताभ्यासः पुनरागतो वृत्तिं याचमानोऽपि यावज्जीवं न लभते। एवं लोकोत्तरेऽप्युपनयः प्राग्वत् कर्तव्यः ॥२३०६॥

फलकज्ञातमाह—

**फालहियस्स वि एवं, जइ फलतो भग्गलुग्गो तो भोगो ।**
**हीरति सव्वेसिं पिय, न भोगहारो भवे कज्जे ॥२३०७॥**

कोती अणेगवनप्फत्ति-पत्त-सागादि-कलिए फलहे केणावि निउत्तो। सो विसयपमाएणं जुयपमाएण वा न रक्खइ न य पाणिएणं पालेति। सो य फलहो लोगेण गोरूवेहि य उल्लूडितो सुक्को य, न किंपि ततो वणफलादि आगच्छइ। फलहसामिणा भणियं-किमेयं? सो भणइ-किं करोमि? रक्खेमि ताव अहं, नत्थि मे पमादो। ततो फलहसामिणा फलहो गवेसावितो। तथा चाह- **फालकिकस्य** फलकस्वामिन **एवं** पूर्वदृष्टान्तेषु राज्ञ इव फलकगवेषणे चिन्ता जाता **यदि फलको भग्गलुग्गो** भविष्यति, ततोऽस्य [1]**भोगो हरिष्यते** गाथायां "**वर्तमानसामीप्ये वर्तमानवद् वा**" [ **मलय** कृ. ४-८८] इति वचनतो भविष्यति वर्तमाना। कस्मात् हरिष्यते? इत्याह-**कार्ये** प्रयोजने समापतिते **सर्वेषामपि** कुटुम्बजनानां **भोगहारो न** स्यादिति हेतोः। तत्र गवेषणे कृते फलको [2]भग्नरुग्णो दृष्टः । भग्नो गोरूपादिभिर्विध्वंसनात्, रुग्णो जलसेचनाकरणतः। ततस्तस्य वृत्तिश्छिन्ना। ततो 'नाहं भूय एवं करिष्यामी'ति याचमानोऽपि यावज्जीवं न लभते वृत्तिम्। एवं लोकोत्तरेऽप्युपनयः कर्तव्यः॥ २३०७॥

---

१. भागो- पु. प्रे.॥ २. भगभग्नो- सं.॥

तमेवाह—

**एवं दप्पपणासिते ण वि दिंति गणं पकप्पमज्झयणे ।**
**आबाहेणं नासिए, गेलण्णादीण दलयंति ॥२३०८॥**

**एवं** पूर्वोक्तदृष्टान्तप्रकारेण **दर्प्पतो** धर्मकथाध्ययनतो व्याकरणाध्ययनतो निमित्तशास्त्राद्यध्ययनतो वा इत्यर्थः। **प्रणाशिते प्रकल्पनाम्न्यध्ययने** यावज्जीवमाचार्यास्तस्या **गणं न ददति। आबाधेन ग्लानत्वादिना पुनर्नाशिते** भूयोऽप्युज्ज्वालिते **दलयन्ति** प्रयच्छन्ति ॥२३०८॥

एतदेव सप्रपञ्चं भावयति—

**गेलण्णे असिवे वा, ओमोयरियाए रायदुट्ठे वा ।**
**एएहिं नासियम्मी, संधेमाणीए देंति गणं ॥२३०९॥**

**ग्लानत्वे** वा जाते, ग्लानप्रतिजागरणे वा कृते, **अशिवे** वा समुपस्थिते, **अवमौदर्ये** वा दुर्भिक्षे जाते भिक्षापरिभ्रमणतः, **राजद्विष्टे** वा पलायनतो, यदि नष्टं प्रकल्पनामकमध्ययनं, तत **एतैः** कारणैः **नाशितेऽ**पि पुनः **सन्दधत्या गणं ददति** प्रयच्छन्ति ॥२३०९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदेवं निर्ग्रन्थीसूत्रं भावितम्। अधुना निर्ग्रन्थसूत्रं विभावयिषुराह—

**एमेव य साहूणं, वागरण-निमित्त-च्छंद-कहमादी ।**
**बिइयं गिलाणतोमे, अद्धाणे चेव थूभे य ॥२३१०॥**

**एवमेव** अनेनैव प्रकारेण, **साधूना**मपि सूत्रं भावनीयम्, नवरं तत्र प्रमादो **व्याकरण-निमित्त-छन्दः-कथाद्य**धीयानस्य प्रतिपत्तव्यः। **द्वितीय**माबाधालक्षणं कारणम्। स्वतो **ग्लाने** ग्लानप्रतिजागरणे वा, **अवमौदर्ये,** अशिवादिकारणतोऽ**ध्वनि** वा गमने, **स्तूपे वा** द्रष्टव्यम्। इयमत्र भावना- यदि व्याकरणाध्ययनतो निमित्तशास्त्राध्ययनतश्छन्दःशास्त्राध्ययनतो धर्मकथाध्ययनतः, आदिशब्दाद् विद्या-मन्त्रादिव्याक्षेपतो यदि प्रकल्पाध्ययनं नाशितं तदा पश्चादुज्ज्वालितेऽपि यावज्जीवं तस्मै गणं सूरयो न प्रयच्छन्ति। अथ ग्लानत्वाद्याबाधातो नाशितं तदा तस्मिन् पुनरुज्ज्वालिते प्रयच्छन्ति, प्रमाददोषाभावात् । तत्र ग्लानत्वादिविषय आबाधः प्रतीतः ॥ २३१० ॥

सम्प्रति स्तूपविषयमाह—



For Private and Personal Use Only

**महुरा खमगाऽऽयावण देवय आउट्ट आणवेज्जत्ति ।**
**किं मम असंजतीए?, अप्पत्तिय होहिती कज्जं ॥२३११॥**

**थूभ विउव्वण भिच्छू, विवाय छम्मास संघो को सत्तो ।**
**खमगुस्सग्गाऽऽकंपण खिंसण सुक्का कय पडागा ॥२३१२॥**

**मथुरायां** नगर्यां कोऽपि **क्षपक आतापयति।** तस्याऽऽतापनां दृष्ट्वा **देवता आवृत्ता** तमागत्य वन्दित्वा ब्रूते— यन्मया कर्तव्यं तन्मा**माज्ञापये**द्भवानिति । एवमुक्ते सा क्षपकेण भण्यते— **किं मम** कार्य**मसंयत्या** भविष्यति? ततस्तस्या देवताया **अप्रीतिक**मभूत्। अप्रीतिवत्या च तयोक्तम्— अवश्यं तव मया **कार्यं भविष्यति** ॥२३११॥ ततो देवतया सर्वरत्नमयः **स्तूपो निर्मितः।** तत्र **भिक्षवो** रक्तपटा उपस्थिताः- अयमस्मदीयः स्तूपः। तैः समं सङ्घस्य **षण्मासान् विवादो** जातः। ततः **सङ्घो** ब्रूते- **को** नामात्रार्थे **शक्तः**? केनापि कथितं, यथा-अमुकः क्षपकः, ततः सङ्घेन स भण्यते क्षपक ! कायोत्सर्गेण देवतामाकम्पय। ततः **क्षपकस्य कायोत्सर्ग**करणं, देवताया **आकम्पनम्,** सा आगता ब्रूते- 'सन्दिशत, किं करोमि?' क्षपकेण भणिता- 'तथा कुरुत यथा सङ्घस्य जयो भवति,' ततो देवतया क्षपकस्य **खिंसना** कृता,

यथा— 'एतन्मया असंयत्या अपि कार्यं जातम्,' एवं खिंसित्वा सा ब्रूते— 'यूयं राज्ञः समीपं गत्वा ब्रूत, यदि रक्तपटानां स्तूपस्ततः कल्ये रक्ता पताका दृश्यताम्, अथाऽस्माकं तर्हि शुक्ला पताका'। राज्ञा प्रतिपन्नम् 'एवं भवतु,' ततो राज्ञा प्रत्ययिकपुरुषैः स्तूपो रक्षापितः। रात्रौ देवतया **शुक्ला पताका कृता**। प्रभाते दृष्टा स्तूपे शुक्ला पताका, जितं सङ्घेन ॥२३१२॥

**सूत्रम्— थेराणं थेरभूमिपत्ताणं आयारपकप्पे नामं अज्झयणे परिब्भट्ठे सिया; कप्पइ तेसिं संठवेत्ताण वा, असंठवेत्ताण वा आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥ १७॥**

'थेराण'मित्यादि, अस्य सम्बन्धमाह—

**एवं ताव पणट्ठे, भिक्खुस्स गणो न दिज्जए सुत्ते ।**
**नट्ठसुए मा हु गणं, हरेज्ज थेरे अतो सुत्तं ॥२३१३॥**

**एवं** उक्तेन प्रकारेण **तावत्प्रणष्टे सूत्रे** प्रकल्पनाम्न्यध्ययने **भिक्षोर्गणो न दीयते**। एवं **स्थविरे** आचार्ये **नष्टश्रुते मा हुः** निश्चितं **गणं हरेदतः सूत्रमाह** ॥२३१३॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या–**स्थविराणां स्थविरभूमिं प्राप्तानामा**चार्यपद-प्राप्तान**माचारप्रकल्पो नामाध्ययनं परिभ्रष्टं स्यात्, कल्पते तेषां** सूत्रं **संस्थापयताम-संस्थापयतां वा आचार्यत्वं वा यावत्क**रणादुपाध्यायत्वं वा स्थविरत्वं वा इति परिग्रहः, **गणावच्छेदकत्वमुद्देष्टुम्** अनुज्ञातुं, जीर्ण–महत्त्वकारणतः सूत्रधरणाशकनात्। एष सूत्रसंक्षेपार्थः ॥ साम्प्रतं[1] **भाष्यविस्तरः**—

**सुत्ते अणिंते लहुगा, अत्थे अणिंते धरेंति चउगुरुगा ।**
**सुत्तेण वायणा अत्थे, सोही तो दोहऽणुण्णाया ॥२३१४॥**



इदं सूत्रमापवादिकम्। उत्सर्गतः पुनः **सूत्रे अनागच्छति** यदि गणं धारयति तदा तस्य प्रायश्चित्तं चत्वारो **लघुकाः। अर्थे अनागच्छति** यदि गणं **धारयति** तदा **चत्वारो गुरुकाः**, आज्ञादयश्च दोषाः। तस्मादुभयधरेण गणो धारयितव्यः । किं कारणम्? अत आह–**सूत्रेण** आगच्छता **वाचनां** ददाति। **अर्थेन** आगच्छता प्रायश्चित्तस्थानमापन्नानां **शोधिं** करोति। तस्माद् **द्वाभ्याम**पि सम्पन्नो गणधारणे**ऽनुज्ञातः** ॥२३१४॥

---

१. सम्प्रति - वा. मो. पु. सं. ॥

**अवि य विणा सुत्तेणं, ववहारे ऊ अपच्चतो होइ ।**
**तेण उभयधरो ऊ, गणधारी सो अणुण्णातो ॥२३१५॥**

**अपि च विना सूत्रेण व्यवहारे** क्रियमाणे **अप्रत्ययो भवति**। तस्माद् व्यवहारे अर्थनिर्देशं कुर्वता सूत्रमवश्यमुच्चारणीयम्। यथा- इदं सूत्रम्, तस्मादयमेवात्र व्यवहारः, ततो भवति प्रत्ययः। **तेन स गणधारी उभयधरोऽनुज्ञातः** ॥२३१५॥

**असती कडजोगी पुण, अत्थे एतम्मि कप्पति धरेउं ।**
**जुण्णमहल्लो सुत्तं, न तरति पच्चुज्जुयारेउं ॥२३१६॥**

उभयधरस्य **असति** अभावे यः **कृतयोगी** नाम यः पूर्वमुभयधर आसीत् नेदानीं सोऽ**र्थे समागच्छति** गणं **धारयितुं कल्पते** । अथ केन कारणेन तस्य सूत्रमनेशत् ?। अत आह- **जुण्णमहल्लो** इत्यादि । जीर्णो नामैको नो महान्, यस्तरुणक एव सन् जरसा परिणतो जातः१, नो जीर्णो महानिति द्वितीयः, यो वृद्धोऽपि सन् दृढशरीरः२, जीर्णोऽपि च महानपि च तृतीयः३, नो जीर्णो नो महानिति चतुर्थः एष शून्यः ४। शेषाणां तु त्रयाणां एकतरो **न शक्नोति प्रत्युज्वालयितुम्,** अतः सूत्रं तस्य नश्यति ॥२३१६॥

**उभयधरम्मि उ सीसे, विज्जंते धारणा उ इच्छाए ।**
**मा परिभव नयणं वा, गच्छे व अणिच्छमाणम्मि ॥२३१७॥**

**उभयधरे** सूत्रार्थधरे **शिष्ये विद्यमाने** स्वयं गणस्य **धारणा इच्छया,** स्वयं वा गणं धारयति तस्य वा शिष्यस्योभयधरस्य ददाति। स हि गणस्य शिष्यस्य वा भावं जानाति। यदि शिष्यस्य गणं दास्यामि तत एते मम परिभवं करिष्यन्ति, अथवा मां त्यक्त्वा गच्छमादाय गमिष्यन्ति । यदि वा तमुभयधरं गणधरे स्थाप्यमानं गणो नेच्छति ततो **मा परिभवं** एते कार्षुः **नयनं वा** मां त्यक्त्वाऽन्यत्र गच्छस्य कार्षुरिति हेतोः, **अनिच्छति** वा गणे तस्य गणं न ददाति, किन्तु स्वयं धारयति । तत्र सूत्रम्। तेनोभयधरेण शिष्येण वाचयत्यर्थमात्मना ददाति। प्रागुक्तदोषाभावे तस्यं गणं समर्पयति ॥२३१७॥

**सूत्रम्— थेराणं थेरभूमिपत्ताणं आयारपकप्पे नामं अज्झयणे परिब्भट्ठे सिया; कप्पइ तेसिं सन्निसण्णाण वा, संतुयट्टाण वा, उत्ताणयाण वा, पासिल्लयाण वा, आयारपकप्पं नामं अज्झयणं दोच्चंपि तच्चंपि पडिपुच्छित्तए वा पडिसारेत्तए वा ॥१८॥**

'थेराणं थेरभूमिपत्ताणं' इत्यादि। **स्थविराणां स्थविरभूमिं प्राप्तानामाचारप्रकल्प**

**नामाध्ययनं परिभ्रष्टं स्यात्, कल्पते तेषां सन्निषण्णानां वा** निषद्यागतानां, **संतुयट्टाण वा** इति सम्यग् त्वगुवर्तनेन स्थितानाम्, **उत्तानानां वा, पासिल्लयाण व**त्ति पार्श्वतः संतिष्ठतां वा, **आचारप्रकल्पनामकमध्ययनं द्वितीयमपि तृतीयमपि,** अपिशब्दाच्चतुर्थमपि वारं **प्रत्येष्टुं वा प्रतिसारयितुं वा** अवमरत्नाधिकः प्रतिसारयति। स्थविराः प्रतीच्छन्ति। एष सूत्रसंक्षेपार्थः॥ अधुना **भाष्यविस्तरः**—

**एमेव बिइयसुत्तं, कारणियं संति बले न हावेति ।**
**जं जत्थ उ कितिकम्मं, निहाणसम ओमराइणिए ॥२३१८॥**

यथा प्राक्तनं सूत्रं कारणिकम् **एवमेवेदमपि सूत्रं कारणिकम्**। स च प्रत्युज्ज्वालयन् **सति बले** विनयं **न हापयति**। अथ कोऽसौ विनयो यस्तेन सूत्रं प्रत्युज्ज्वालयता सति बले न हापयितव्यः? इत्यत आह— **जं जत्थ उ** इत्यादि, **यत् कृतिकर्म** वन्दनकं **यत्र** सूत्रेऽर्थे वाधिकृतं तत्रा**वमरत्नाधिके निधानसमे** सूत्रमर्थं च प्रत्युज्ज्वालयता तद् न हापयितव्यम्। निधानसमे इति वदता निधानदृष्टान्तः सूचितः । स चैवं– यथा महति क्षुल्लके

वा निधाने उत्खनितव्ये तस्य तदनुरूपमुपचारमुत्खानको यदि करोति ततस्तमुत्खनितुं शक्नोति। अथ न करोति तदनुरूपमुपचारं तर्हि वृश्चिकाद्युपद्रवतो न शक्नोति। एवं यदि समरत्नाधिकेऽवमरत्नाधिके वा सूत्रमर्थं वा प्रत्युज्ज्वालयन् अपूर्वं वा पठन् तदनुरूपं विनयं न करोति तदा निर्जरालाभस्तस्य नोपजायते, न च शास्त्रं स्थिरपरिचितं भवति, विभङ्गं वा तस्य ज्ञानं विनयभ्रंशितया प्रान्तदेवता कुर्यात्कलहं वा ॥२३१८॥

एतदेवाभिधित्सुः प्रथमतः प्रायश्चित्तमाह—

**सुत्तम्मि य चउलहुगा, अत्थम्मि य चउगुरुं च गव्वेण ।**
**कितिकम्ममकुव्वंतो, पावति थेरो सति बलम्मि ॥२३१९॥**

**स्थविरः** प्रत्युज्ज्वालयन्नपूर्वं पठन् वा **सति बले** यदि गर्वेण **कृतिकर्म** न करोति, तर्हि तद् **अकुर्वन् सूत्रे** सूत्रविषये **चतुरो लघुकान्** प्राप्नोति, **अर्थे चतुर्गुरुकम्** ॥ २३१९ ॥

**उवयारहीणमफलं, होइ निहाणं करेइ वाऽणत्थं ।**
**इय निज्जराए लाभो, न होइ विब्भंग कलहो वा ॥२३२०॥**

यथा **उपचारहीनं निधानम् अफलं भवति,** नोत्खनितुं शक्यते इति भावः, **अनर्थं वा करोति,** वृश्चिकाद्युपद्रवकरणात्। **इति**-एवमनेनैव दृष्टान्तप्रकारेण कृतिकर्माऽकरणे **निर्जराया लाभो न भवति,** प्रान्तदेवताकोपवशाद् **विभङ्गो** वा तस्योपजायेत **कलहो वा** ॥ २३२० ॥

**दूरत्थो वा पुच्छइ, अहव निसिज्जाए सन्निसन्नो उ ।**
**अच्चासन्न निविट्ठुट्ठिए, य चउभंगो बोद्धव्वो ॥२३२१॥**

**अंजलिपणामअकरणं, विप्पेक्खंते दिसाऽहो-उड्ढमुहे ।**
**भासंतअणुवउत्ते, व हसंते पुच्छमाणे उ ॥२३२२॥**

**एएसु उ सव्वेसु वि, सुत्ते लहुतो उ अत्थे गुरुमासो ।**
**नाभीतोवरि[1] लहुगा, गुरुगमहो कायकंडुयणे ॥२३२३॥**

**दूरस्थितो वा पृच्छति अथवा निषद्यायां सन्निषण्णः** पृच्छति, शृणोतीति भावार्थः । यदि वा **अत्यासन्नः** ऊरुणा ऊरुं सङ्घृष्य शृणोति। **निविष्टोत्थिते चतुर्भङ्गी बोद्धव्या,** सा

१. नाभीओ गुरु लहुगा- पु. प्रे.॥

चैवं— निविष्टो निविष्टं पृच्छति१ऽ निविष्ट उत्थितं पृच्छति २, उत्थितो निविष्टं पृच्छति ३, उत्थित उत्थितं पृच्छति ४ ॥२३२१॥

तथा **अञ्जलेरकरणम्,** अर्थपरिसमाप्तौ प्रणामस्याकरणम्, तथा **दिशो विप्रेक्षमाणः** पृच्छति, यदि वाऽ**धोमुख ऊर्ध्वमुखो** वा शृणोति, न गुर्वभिमुखः, अथवा येन तेन वा सह **भाषमाणः** शृणोति, **अनुपयुक्तो** वा शृणोति, **हसन् वा पृच्छति** ॥२३२२॥

**एतेषु सर्वेष्वपि** स्थानेषु **सूत्रे** श्रूयमाणे प्रायश्चित्तं **लघुको** मासः, **अर्थे गुरुमासः,** तथा **नाभीत उपरि** सूत्रं शृण्वतः कायकण्डूयने चत्वारो **लघुकाः,** अर्थं शृण्वतश्चत्वारो **गुरुकाः।** नाभीतोऽ**धस्ताद्** सूत्रश्रवणे **कायकण्डूयने** चत्वारो **गुरुकाः,** अर्थश्रवणेऽपि चत्वारो गुरुकाः नवरं तपःकालयोरन्यतरेण गुरुकाः ॥२३२३॥



**तम्हा वज्जंतेणं, ठाणाणेयाणि पंजलुक्कडिणा ।**
**सोयव्व पयत्तेणं, कितिकम्मं वावि कायव्वं ॥२३२४॥**

यस्मादेवमविनयकरणे प्रायश्चित्तविधिः, **तस्मादेतानि** प्रागनन्तरमुपदर्शितानि **स्थानानि वर्जयित्वा प्राञ्जलिना** प्रकृताऽञ्जलिना **उत्कुडकेन प्रयत्नेन** आदरपरतया **श्रोतव्यम्।**

**कृतिकर्म चापि** वन्दनकमपि **कर्तव्यम्** । यद्यपि च [१]वन्दनके उपस्थितं वाचनाचार्यो ऽ[ना]नुजानाति तथापि क्षमाश्रमणं दत्त्वा कृतप्राञ्जलिना श्रोतव्यम् ॥ २३२४॥

**तेण वि धारयेव्वं, पच्छावि य उट्ठिएण मंडलीतो ।**
**वेट्ठुद्धनिसण्णास्स व, सारेयव्वं हवति भूयो ॥२३२५॥**

**तेनापि** श्रोत्रा यद् व्याख्यानमण्डल्यां सूत्रमण्डल्यां वा श्रुतं तद् **मण्डलीत उत्थितेन पश्चादपि धारयितव्यम्**। तस्य च धारयत **उपविष्टस्य ऊर्ध्वस्थितस्य निषन्नस्य वा** क्वचित् स्खलने तेनापि वाचनाचार्येण **भूयो भवति सारयितव्यं** गमयितव्यम् ॥२३२५॥



**अह से रोगो न होज्ज, ताहे भासंत एगपासम्मि ।**
**सन्निसण्णो तुयट्टो वा, अच्छएऽणुग्गह पवत्तो ॥२३२६॥**

**अथ से** तस्य स्थविरस्य **रोगो न भवेत् तर्हि** व्याख्यानमण्डल्या उत्थितो भाषमाणस्य अनुभाषमाणस्य चिन्तापयत इत्यर्थः, **एकपार्श्वे** तत्सेवाबुद्ध्या **सन्निषण्णः** सम्यग् निषद्यागतस्त्व**ग्वर्तितो** वा भाषमाणस्यानुग्रहप्रवृत्तस्तिष्ठति ॥ २३२६॥ पर आह—

---

१. वन्दनकेनोपस्थितं वाचनाचार्योनुजानाति- पु. प्रे.॥

**थेरस्स तस्स किं नू, एद्देहेण किलेसकरणेण ? ।**
**भण्णइ एगत्तुवयोग सद्धजणणं च तरुणाणं ॥२३२७॥**

अथ **तस्य स्थविरस्य** जीर्ण-महतः **किमेतावन्मात्रेण क्लेशकरणेन** ? सूरिराह— **भण्यते** अत्रोत्तरं दीयते- एवमाचरतस्तस्य सूत्राऽर्थाभ्यां सह एकत्वोपयोगो भवति। तथा **एकत्वोपयोगो**पयुक्तस्य तु सूत्रार्थाः सम्यग् लगन्ति। तथा **तरुणानां च श्रद्धाजननं** कृतं भवति। तथा हि-व्याख्यानमण्डल्या उत्थितमपि निजमाचार्यं जीर्णमहान्तमेवं विनयं कुर्वन्तं दृष्ट्वा चिन्तयन्ति— यद्यस्माकमाचार्यो जीर्णमहानप्येवं श्रुतस्य विनयं करोति ततोऽस्माभिस्तरुणैः सुतरां कर्तव्यः। आह शिष्यो- यथा जीर्णमहत आचार्यस्यानुग्रहः क्रियते, यथानुभाषमाणस्य एकपार्श्वे सन्निषण्णस्त्वग्वर्तितो वा तिष्ठतु, एवमन्यस्यापि क्रियते ? क्रियते इति ब्रूमः॥ २३२७॥

तथा चाह—

**सो उ गणी अगणी वा, अणुभासंतस्स सुणति पासम्मि ।**
**न चएइ जुण्णदेहो, होउ बद्धासणो सुचिरं ॥२३२८॥**

**स** जीर्णो महान् **गणी** आचार्य उपाध्यायो गणावच्छेदको वा **अगणी वा** अन्यो यः [१]स्थानानियुक्तः सः **अनुभाषमाणस्य** चिन्तापयत एकस्मिन् **पार्श्वे** सन्निषण्णस्त्वग्वर्तितो वा **शृणोति**, यतो **न शक्नोति जीर्णदेहो बद्धासनो भवितुं सुचिरं** कालम् ।

**सूत्रम्— जे निग्गंथा निग्गंथीओ य संभोइया सिया, नो ण्हं कप्पइ अन्नमन्नस्स अंतिए आलोएत्तए । अत्थि [२]य इत्थ केइ आलोयणारिहे; कप्पइ से तेसिं अंतिए आलोएत्तए; नत्थि [३]य इत्थ केइ आलोयणारिहे, एवं ण्हं कप्पइ अन्नमन्नस्स अंतिए आलोएत्तए ॥ १९ ॥**

"जे निग्गंथा य निग्गंथीतो य संभोतिया सिया" इत्यादि, अस्य सूत्रस्य सम्बन्धप्रतिपादनार्थमाह—

**थेरो अरिहो आलोयणाए, आयारकप्पितो जोग्गो ।**
**सा य न होइ विवक्खे, नेव सपक्खे अगीएसु ॥२३२९॥**

---

१. स्थाननि० पु. प्रे.॥ २.-३. या इथं- प्रतिलिपि । याइं- श्युब्रींग । या इत्थ-श्युब्रींग H पाठभेदः॥

**स्थविरः** पूर्वसूत्रेऽभिहितः, स च **आलोचनाया अर्हः**, सोऽपि च **योग्य** आलोचनाया भवति **आचारकल्पिक** आचारप्रकल्पाभिधानाध्ययनधारी। तत एवं सति **सा** आलोचना **न विपक्षे नापि सपक्षे अगीतेषु** अगीतार्थेषु **भवति,** तत्र संयताः संयतीनां विपक्षः, संयत्यः संयतानाम्, सपक्षः संयताः संयतानां, संयत्यः संयतीनाम् । तत्र विपक्षे सपक्षे चाऽगीतार्थेष्वा-लोचनाप्रतिषेधार्थमधिकृतं सूत्रम् ॥२३२९॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**ये निर्ग्रन्था निर्ग्रन्थ्यो वा सांभोगिकाः स्युस्तेषां, नो ण्हं** इति वाक्यालङ्कारे, **कल्पतेऽन्योन्यस्य** परस्परस्याऽन्तिके **आलोचयितु**मगीतार्थत्वात्। **अस्ति चेदत्र कश्चिदा-लोचनार्ह**स्तर्हि **कल्पते तस्यान्तिके आलोचयितुम्। नास्ति चेदालोचनार्ह एवं** सति **कल्पते अन्योन्यस्यान्तिके आलोचयितुम्** । एष सूत्रसंक्षेपार्थः॥ अधुना **भाष्यविस्तरः**-

**संभोइयत्ति भणिते, संभोगो छव्विहो उ आदीए ।**
**भेदप्पभेदतो वि य, णेगविहो होति नायव्वो ॥२३३०॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**साम्भोगिक इति** भणिते सम्भोगो विचार्यते। तत्राऽऽ**दौ सम्भोगः षड्विधो भवति । भेदप्रभेदतोऽपि च** एकैकस्य भेदस्य प्रभेदतः पुनर**नेकविधो भवति** ॥ २३३० ॥

तत्र प्रथमतः षड्विधमाह—

**ओह१ अभिग्गह२ दाणग्गहणे३ अणुपालणाए४ उववाए५ ।**
**संवासम्मि य छट्ठो६, संभोगविही मुणेयव्वो ॥२३३१॥**

**ओघे** उपध्यादौ१, **अभिग्रहे**२ **दानग्रहणे**३ **अनुपालनायाम्** ४ **उपपाते** ५। एवमेते पञ्च सम्भोगा भवन्ति, **षष्ठः सम्भोगविधिः संवासे ज्ञातव्यः** ६॥ २३३१ ॥

तत्र 'यथोद्देशं निर्देशः' इति न्यायात् प्रथमत ओघसम्भोगविधिमभिधित्सुराह—

**[1]उवहि१ सुय२ भत्त-पाणे३, अंजलिपग्गहे४इय ।**
**दावणाय५ निकाए य६ अब्भुट्ठाणेत्ति आवरे ७ ॥२३३२॥**

---

**१. मु. मध्ये अत्र 'ओघो पुण वारसहा' गाथाऽस्ति ॥**



For Private and Personal Use Only

**कीकम्मस्स य करणे८, वेयावच्चकरणे इय९ ।**
**समोसरण१० सन्निसेज्जा११, कहाए य पबंधणे१२ ॥२३३३॥**

ओघसम्भोगो द्वादशप्रकारः तद्यथा-**उपधि**विषयः १, **श्रुत**विषयः २, **भक्तपान**विषयः३, **अञ्जलीप्रग्रह**विषयः ४, **दावणाए** त्ति **दापना** शय्याऽऽहारोपधिस्वाध्यायशिष्यगणानां प्रदापनं तद्विषयः ५, **निकाय** त्ति **निकाचो** निकाचनं छन्दनं निमंत्रणमित्येकार्थाः, तद्विषयः ६, **अब्भुट्ठाणेत्ति आवरे** अपरेऽभ्युत्थानविषयः ७, **कीकम्मस्स य** इत्यादि, **कृतिकर्म** वन्दनकं तत्**करण**विषयः ८, **वैयावृत्त्यकरण**विषयः ९, **समवसरण**विषयः १०, **सन्निषद्या**विषयः ११, **कथाप्रबन्धन**विषयश्च १२ ॥ २३३३॥

तत्रोपधिसम्भोगः षट्प्रकारस्तथा चाह—

**उवहिस्स य छब्भेया, उग्गम १ उप्पायणे२सणासुद्धो ३ ।**
**परिकम्मण४ परिहरणा ५, संजोगो६ छट्ठओ होइ ॥२३३४॥**

**उपधेः** उपधिसम्भोगस्य **षड् भेदा** भवन्ति, तद्यथा-**उद्गमशुद्धः** १, **उत्पादनाशुद्धः** २,

**एषणा**शुद्धश्च ३, **परिकर्मणा**सम्भोगः ४, **परिहरणा**सम्भोगः ५, **संयोग**विषयः **षष्ठ**सम्भोगः ६, तत्र यत्साम्भोगिकस्साम्भोगिकेन सममाधाकर्मादिभिः षोडशभिरुद्गमदोषैः शुद्धमुपधिमुत्पादयति एष उद्गमशुद्ध उपधिसंभोगः१। अथाशुद्धमुत्पादयति तर्हि येन दोषेणाऽशुद्धमुत्पादयति तन्निष्पन्नं प्रायश्चित्तमापद्यते, तत्रापीयं व्यवस्था-अशुद्धग्राही साम्भोगिकः [१]शिक्ष्यमाणः 'सती मे प्रतिचोदने'ति मन्यमानो मिथ्यादुष्कृतपुरस्सरं 'न पुनरेवं करिष्यामी'ति ब्रुवाणः प्रत्यावर्तते तदा यत्प्रायश्चित्तमापन्नं तद् दत्त्वा सम्भोग्यते । एवं द्वितीयवारं तृतीयवारमपि, चतुर्थवेलायां त्वावृत्तस्यापि न सम्भोगः । अथ निष्कारणे अन्यसाम्भोगिकेन समं शुद्धमशुद्धं वोपधिमुत्पादयति तर्हि सोऽपि यदि शिक्ष्यमाणः [२]व्यावर्त्तते ततः सम्भोगविषयीक्रियते, अन्यथा प्रथमवेलायमपि तस्य विसम्भोगः, एवं द्वितीय-तृतीयवारमपि, चतुर्थवारमावृत्तस्यापि नियमतो विसम्भोगः। वारत्रयेऽपि तस्य प्रायश्चित्तं मासलघु। कारणे त्वन्यासाम्भोगिकेनापि सममुपधिमुत्पादयन् शुद्धः। एवं पार्श्वस्थादिभिर्गृहिभिर्यथाच्छन्दैश्च सह वेदितव्यम्। प्रायश्चित्तविधिरपि तथैव। नवरं यथाच्छन्दे मासगुरु, चतुर्गुरुकमित्य**परे**। योऽपि पार्श्वस्थादेः सङ्घाटकं प्रयच्छति, तस्यापि मासलघु। तथा संयतीभिः संविग्नाभिरसंविग्नाभिर्वा साम्भोगिकीभिरसाम्भोगिकीभिर्वा सममुद्गमेन

शुद्धमशुद्धं वोपधिमुत्पादयतश्चतुर्गुरुकम्। एतत् तावत् पुरुषवर्गेऽभिहितं संयतीवर्गेऽपि द्रष्टव्यम् (१) एवं षोडशभिरुत्पादनादोषैर्दशभिरेषणादोषैः [शुद्धं] सांभोगिकेन सममुपधिमुत्पादयन् शुद्धः, विपर्यासे प्रायश्चित्तविधिः पूर्ववत् (२-३)। परिकम्मणत्ति परिकर्मणा नाम यदुपधिमुचितप्रमाणकरणतः संयतप्रायोग्यं करोति। अत्र भङ्गाश्चत्वारः। तद्यथा-परिकर्मणा कारणे विधिना १, कारणेऽविधिना २, निष्कारणे विधिना ३, निष्कारणेऽविधिना ४। अत्र प्रथमभङ्गः शुद्धः१, द्वितीये मासलघु तपोगुरु२, तृतीये मासलघु कालगुरुकं३, चतुर्थे मासलघु द्वाभ्यां गुरुकम् ४। संविग्नैरन्यसाम्भोगिकैः समं चतुर्ष्वपि भङ्गेषु मासलघु, अत्रापि द्वितीयादिषु भङ्गेषु पूर्ववत् तपः-कालविशिष्टता। गृहस्थैः पार्श्वस्थादिभिः समं प्रत्येकं चतुर्लघुकम्, यथाच्छन्दैः समं चतुर्गुरुकम्, अत्रापि द्वितीयादिषु भङ्गेषु प्राग्वत् तपःकालविशिष्टता। तथा साम्भोगिकीनां संयतीनामुपधिं विधिना संयतीप्रायोग्यं गणधरः परिकर्मयन् ददानश्च परिशुद्धः। अविधिना परिकर्मयतश्चतुर्गुरु, पार्श्वस्थादिसंयतीनां गृहस्थानां च कारणे विधिनेत्यादिभङ्गचतुष्टये प्रत्येकं चतुर्गुरु, द्वितीयादिषु भङ्गेषु तपः-कालविशिष्टता प्राग्वत् (४)। तथा परिहरणा नाम परिभोग-स्तत्रापि भङ्गचतुष्टयम्कारणे विधिना १, कारणेऽविधिना २, निष्कारणे विधिना ३, निष्कारणेऽविधिना ४। तत्र प्रथमभङ्गे साम्भोगिकैः सममुपकरणं परिभुञ्जानः शुद्धः, शेषेषु

द्वितीयादिषु भङ्गेषु मासलघु तपःकालविशिष्टम्, असाम्भोगिकैः सममुपकरणं परिभुञ्जानस्य चतुर्ष्वपि भङ्गेषु मासलघु, द्वितीयादिषु तु तपःकालविशिष्टता, पार्श्वस्थादिभिर्गृहस्थादिभिश्च सममुपभुञ्जानस्य भङ्गचतुष्टयेऽपि प्रत्येकं चतुर्लघुकं, यथाच्छन्दैः संयतीभिर्गृहस्थादिभिश्च-[च]तुर्गुरु। उभयत्रापि द्वितीयादिषु भङ्गेषु तपःकालविशिष्टता (५) संयोगो द्व्यादिपदानां मीलनं, तत्र भङ्गाः षड्विंशतिः। तद्यथा-दश द्विकसंयोगाः, दश त्रिकसंयोगाः, पञ्च चतुष्कसंयोगाः एकः पञ्चसंयोगः। तत्र दश द्विकसंयोगा इमे- साम्भोगिकः साम्भोगिकेन सममुद्गमेनोत्पादनया च शुद्धमुपधिमुत्पादयतीति प्रथमः, उद्गमेनैषणया च द्वितीयः, उद्गमेन शुद्धमुत्पादयति परिकर्मयति चेति तृतीयः, उद्गमेन शुद्धमुत्पादयति परिहरति चेति चतुर्थः, एते चत्वारोऽपि भङ्गा उद्गमपदममुञ्चता लब्धाः, एवमुत्पादनापदामोचनेन लभ्यन्ते त्रयः, एषणापदामोचनेन द्वौ, परिकर्मणापरिहरणापदयोरेकः। दश त्रिकसंयोगा इमे- साम्भोगिकः साम्भोगिकेन सममुद्गमेनोत्पादनया एषणया च शुद्धमुत्पादयतीति प्रथमः, उद्गमेनोत्पादनया च शुद्धमुत्पादयति परिकर्मयति चेति द्वितीयः, उद्गमेनोत्पादनया च शुद्धमुत्पादयति परिहरति चेति तृतीय इत्याद्युपयुज्य वक्तव्यम् । एवं पञ्च चतुष्कसंयोगाः, एकः पञ्चकसंयोगश्च वक्तव्यः। एतेषु च षड्विंशतिभङ्गेषु सम्भोगिकेन समं शुद्धः, असाम्भोगिकादिभिः सममसांभोगिकादि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विषयं द्व्यादिसंयोगनिष्पन्नं प्रायश्चित्तम्। तद्यथा- उद्गमनिष्पन्नमुत्पादनानिष्पन्नमित्यादि ॥ २३३४॥

उक्त उपधिसम्भोगः, सम्प्रति श्रुतसंभोगादीनतिदेशत आह—

**एवं जहा निसीहे, पंचमउद्देसए समक्खाओ ।**
**संभोगविही सव्वो, तहेव इहयं पि वत्तव्वो ॥२३३५॥**

**एवम्** उक्तेन प्रकारेण **यथा निशीथे** निशीथाध्ययने **पञ्चम उद्देशके सर्वः** श्रुतादिविषयः **सम्भोगविधिः समाख्यातस्तथैवेहापि वक्तव्यः** । स च ग्रन्थगौरवभयान्न शक्यते लिखितुमिति तत एवावधारणीयः । एष च सम्भोगविधिः पूर्वमस्मिन् अर्धभरते सर्वसंविग्नानामेकरूप आसीत्। पश्चात् कालदोषत इमे साम्भोगिका इमे त्वसाम्भोगिका इति प्रवृत्तम् ॥ २३३५॥

किं कारणम्? इति चेत्? अत आह—

**अगडे१ भाउय२तिल३तंदुले४ य५ सरक्खे य गोणि असिवे य६ ।**
**अविणट्ठे संभोगे, सव्वे संभोइया आसी ॥२३३६॥**



For Private and Personal Use Only

पूर्व**मविनष्टे सम्भोगे सर्वे** संविग्नाः **साम्भोगिका** एकसम्भोगा **आसीरन्,** पश्चात्तु कालवैगुण्यतः साम्भोगिकाऽसाम्भोगिकविभागः । तत्र दृष्टान्तो**ऽवटाः**१ गाथायां जातावेकवचनम्,एवमुत्तरत्रापि। तथा द्वौ **भ्रातरौ** २ **तिलाः** ३ **तन्दुलाः** ४ **सरजस्काः** ५ **गोवर्गश्चाशिव**विषयः ६ ॥२३३६॥

तत्रावटदृष्टान्तभावनार्थमाह—

**आगंतु तदुत्थेण व, दोसेण विणट्ठे कूवे तो पुच्छा ।**
**कओ आणीय उदयं?, अविणट्ठे नाऽऽसि सा पुच्छा ॥२३३७॥**

एगस्स नगरस्स एक्कीए दिसाए बहवे महुरोदगा कूवा । तत्थ केइ कूवा आगंतुकेण तया -विसाइणा दोसेण, केई तदुत्थेण खार-लोण-विसपाणियसिरासंभवरूपेण विणट्ठा। तत्थ केसु वि कूवेसु पाणियं पिज्जमाणं कुट्ठाइणा सरीर[1]संदूसणकरं हवइ, केइ जीवंतकरा हवंति केई ण्हाणाऽऽयमणाइसु अविरुद्धा, केई ण्हाणाइसु वि विरुद्धा, तत्र बहुजणो एयद्दोसदुट्ठे ते नाउं आणिए पाणिए पुच्छइ— कओ आणियं?। तत्थ जइ निद्दोसं तो परिभुंजंति, अह

सदोसं तो वज्जंति। तत्थ वि जइ जाणंतेण सदोसमाणियं, ताहे सो तओ वावाराओ फेडिज्जइ तज्जिज्जइ य । अह अयाणंतेणमाणियं तो वारिज्जइ 'मा पुणो आणिज्जासि।'

अक्षरगमनिका त्वेवम्-**आगन्तुकेन तदुत्थेन वा दोषेण कूपे** कूपसङ्घाते **विनष्टे** सति ततस्तदनन्तरं यतस्ततो वा समानीते उदके लोकस्य **पृच्छा** प्रावर्तत— '**कुत आनीतमिद-मुदकम्?** इति । **अविनष्टे** कूपसङ्घाते **नासीत् सा पृच्छा** ।

एष दृष्टान्तोऽयमर्थोपनयः-अविनष्टे सम्भोगे न साम्भोगिका-ऽसाम्भोगिकपरीक्षा आसीत्; अधुना दुःषमानुभावतः केचित् चारित्रशरीरोत्तरगुणदूषका अभवन्, केचित् चारित्रजीवितव्य-परोपकाः, केचित् संस्पर्शपरिभोगिनः, केचित् संस्पर्शतोऽपि विवर्जिताः, ततः परीक्षा(१) ॥२३३७॥



अधुना भ्रातृदृष्टान्तमाह—

**भोइकुलसेवि भाउय, दुस्सीलेगे तु जातो पुच्छा ।**
**एमेव सेसएसु वि, होइ विभासा तिलाईसु ॥२३३८॥**

द्वौ **भ्रातरौ भोजिकुलसेवकौ** राजकुलेऽभ्यर्हितसेवकौ सर्वत्राऽवारितप्रसरौ, तयोः कनिष्ठोऽन्तःपुरे कृतानाचारो जातः। ततो राज्ञा प्रवेशो निवारितः। ज्येष्ठोऽपि च राज्ञोऽकथिते प्रवेशं न लभते। प्रतिहारेण तु कथिते राज्ञा पृच्छ्यते, क आगतो ज्येष्ठः कनिष्ठो वा? तत्र ज्येष्ठ इति कथिते स प्रवेश्यते। इयं तु **पृच्छा** पूर्वं नाऽऽसीत् । कालक्रमेण त्वेकस्मिन् कनिष्ठे **दुःशीले जाते** प्रावर्तत । उपनयभावना प्राग्वत् (२)॥

तिलादिदृष्टान्तानाह-**एमेवे**त्यादि, **एवमेव** अनेनैव प्रकारेण **शेषेष्वपि तिलादिषु** दृष्टान्तेषु **भवति विभाषा** व्याख्यानं कर्तव्यम् । तच्चेदम्— पूर्वं सर्वेष्वपि आपणेषु अपूतिकास्तिला अदुष्टजन्मानस्तन्दुला विक्रयाय प्रसार्यन्ते स्म । ततः कालदोषत एकेन वणिजा निकृतिबहुलेन पूतिकास्तिलाः प्रसारिताः। अपरेण तु दुष्टजन्मानस्तन्दुलाः। ततो लोकस्य पृच्छा प्रावर्तत— कीदृशास्तवापणे तन्दुलाः ? कीदृशा वा तिलाः? इति पूर्वं नाऽऽसीत् । उपनयः प्राग्वत् (३-४)॥

तथा एकस्मिन्नगरे एकस्यां दिशि बहूनि देवकुलानि तेषु सर्वेषु सरजस्का वसन्ति सुशीलाः, तान् सर्वानपि भूयान् जनो निर्विशेषं पूजयति, पश्चात्केषुचिद्देवकुलेषु दुःशीला

जातास्ततो निमन्त्रणवेलायां पृच्छा प्रवृत्ता- कतमान्निमन्त्रयामि? पूर्वं त्वेवंरूपा पृच्छा नाऽऽसीत्। उपनयः प्राग्वत् (५) ॥

तथा एकस्मिन् ग्रामे महान् गोवर्गः । स कदाचिदशिवेन गृहीतः। ततस्तस्मात् ग्रामादानीतासु गोषु लोकस्य पृच्छा अभवत् कुतो ग्रामादानीता? कस्य वा गोवर्गस्येयम्? इति, पूर्वं तु नाऽऽसीत् (६) ॥ एवमत्रापि विनष्टे सम्भोगे साम्भोगिकः परीक्ष्य सम्भोज्यते। तथा चाह—

**साहम्मय वइधम्मय, निघरिसभाणे तहेव कूवे य ।**
**गावी पुक्खरिणी या, नीयल्लग सेवआगमणे ॥२३३९॥**



**सधर्मता** समानधर्मशीलता, तां सम्यक् परीक्षया ज्ञात्वा सम्भुञ्जते, **विधर्मता** विगत-धर्मशीलता तां ज्ञात्वा परिवर्जयन्ति । यथा सुवर्णं **निघर्षे** निकषोपले परीक्ष्य यदि युक्तं ज्ञायते ततः प्रतिगृह्यते, अन्यथा तु परित्यज्यते । एवमज्ञातशीलोऽपि **भाजनेन** परीक्षणीयः। यदि भाजनस्य तलमघृष्टम् उपकरणं वा विधिना सीवितं तत '**आलएण विहारेणं**' [ ] इत्यादिवचनतः साधर्मिको ज्ञेयः, शेषस्तु वैधर्मिकः । यथा वा **कूपे** यदि वा **गोषु** यथा

वा **पुष्करिणी** यथा यो **निजकस्य** भ्रातुः **सेवकस्याऽऽगमने** परीक्षा तथात्रापि च परीक्षय सम्भोग-विसम्भोगौ ॥२३३९॥

उक्तः सप्रपञ्चः सम्भोगः । सम्प्रति येनाधिकारस्तमभिधित्सुरिदमाह—

**एएसिं कयरेणं, संभोगेणं तु होंति संभोगी ।**
**समणाणं समणीतो? भण्णइ अणुपालणाए उ ॥२३४०॥**

**एतेषाम्** अनन्तरोदितानां सम्भोगानां मध्ये **कतरेण सम्भोगेन सम्भोगिन्यः श्रमणानां श्रमण्यो भवन्ति**?, सूरिराह-**भण्यते, अनुपालनया** अनुपालनारूपेण सम्भोगेन ॥ २३४०॥

तदेवमुक्तः सम्भोगः, साम्प्रतमालोचनाविधिमाह—

**आलोयणा सपक्खे, परपक्खे चउगुरुं च आणादी ।**
**भिन्नकहादि विराहण, दट्ठूण व भावसंबंधो ॥२३४१॥**

**आलोचना सपक्षे** दातव्या। तद्यथा- निर्ग्रन्थो निर्ग्रन्थस्य पुरत आलोचयति, निर्ग्रन्थी निर्ग्रन्थ्याः पुरतः, यदि पुन**र्विपक्षे** आलोचयति, यथा निर्ग्रन्थो निर्ग्रन्थ्याः पुरतः, निर्ग्रन्थी

वा निर्ग्रन्थस्य, तदा प्रायश्चित्तं **चतुर्गुरुकम्** । न केवलं प्रायश्चित्तं चतुर्गुरुकं, किन्त्वा**ज्ञादयश्च** दोषाः। **च**शब्दो भिन्नक्रमः। स च तथैव योजितः। कस्मादेवम्? अत आह–'**भिन्नकहादि**' इत्यादि । चतुर्थव्रतातिचारमालोचयन्त्याः संयत्या भिन्नकथादोषो भवति । चतुर्थव्रतातिचार-कथनतस्तस्याः कदाचिदालोचनाधारस्य वा भावभेदो भवतीत्यर्थः । आदिशव्दात् धृष्टीभूता सा याच्त्रामपि कुर्यादिति परिग्रहः । एवं सति शील**विराधना** ।'**दट्ठूण व भावसंबंधो**' दृष्टिविकारेण मुखविकारेण वा स वा सा वा भावं दृष्ट्वा 'मामिच्छति' इति अभिप्रायं ज्ञात्वा **सम्बन्धो** घटना स्यात् ॥ २३४१॥

एतदेव व्याख्यानयति—

**मूलगुणेसु चउत्थे, विगडिज्जंते विराहणा हुज्जा ।**
**नित्थक्क दिट्ठिमुहरागतो य भावं वियाणंति ॥२३४२॥**

**मूलगुणेषु** मध्ये **चतुर्थे** मूलगुणातिचारे **विकट्यमाने** आलोच्यमाने **विराधना** शीलस्य भिन्नकथादिना प्रागुक्तस्वरूपेण **भवति** । तथा **नित्थक्का** धृष्टा सती याच्त्रां कुर्यात्। तथा

**दृष्टिरागतो मुखरागतो वा** परस्परस्य **भावं विजानीतः**, यथा— मामेष एषा वा इच्छतीति ततो घटना स्यात्। न केवलमेते विपक्षे आलोचनायां दोषाः किन्त्विमेऽपि ॥ २३४२॥

तानेवाह—

**अप्पच्चय निब्भयया, पेल्लणया जइपगासणे दोसा ।**
**वयणी वि होइ गम्मा, नियए दोसे पगासंति ॥२३४३॥**

**वंदत वाउडे[1] वा, गव्वो[2] तह लहुसगत्तणेण गणे ।**
**विगडिंत[3] पंजलिउडे दट्ठूणुड्डाह कुवियन्नू[4] ॥२३४४॥**

यतः संयत्याः पुरतः प्रकाशने आलोचनायामिमे दोषाः । तद्यथा–**अप्रत्ययः** 'किमेषा वराकी जानाति' इत्यवज्ञातो यत्किमपि सा प्रायश्चित्तं ददाति तत्र विश्वासाभावः । तथा भूयोऽपराधकरणे 'गुरुर्गरीयांसं दण्डं दास्यति' इति महत्याशङ्का, संयतीनां तु पुरुषस्य न

१. वा उड्डे- ला. । वा . उड्डो- ला. पाठान्तरम् ॥ २. गच्छो तध लहुसत्तग आणयणे- ला. ॥ ३. विगडेंत- ला. ॥ ४. कुवियं तू- ला ॥

भयमिति **निर्भयता,** तद्भावाच्च भूयो भूयोऽपराधकरणप्रवृत्तिः। तथा **पेल्लणये**ति यदि महत् प्रायश्चित्तं ददाति ततः संयतो ब्रूते-न भवत्येतत्प्रायश्चित्तम्, किन्त्विदमिदमिति। एवं प्रायश्चित्तस्य प्रेरणा। तथा **व्रतिन्यपि** यदि संयतस्य पुरत आलोचयति ततः सा **निजकान् दोषान् प्रकाशयन्ती गम्या भवति** यथा एकवारं तावदिदमाचरितं, भूयोऽपि सम्प्रति मया सह समाचर्यतां पश्चात्प्रायश्चित्तं दास्यते इति॥ २३४३ ॥ द्वितीयगाथा सम्प्रदायात् व्याख्येया॥ २३४४ ॥

यद्येवं तर्हि कथं पूर्वमार्यिकाः छेदश्रुतमधीयेरन्? कथं चाऽऽलोचनां दद्युः? अत आह—

**तो जाव अज्जरक्खिय, आगमववहारिणो वियाणित्ता ।**
**न भविस्सति दोसोत्ति, तो वायंती उ छेदसुयं ॥२३४५॥**

**यावदार्य**रक्षितास्ताव**दागमव्यवहारिणो**ऽभूवन्। ते चाऽऽगमव्यवहारबलेन **विज्ञाय,** यथा एतस्याश्छेदश्रुतवाचनायां **दोषो न भविष्यती**ति, संयतीमपि **छेदश्रुतं वाचयन्ति** स्म॥ २३४५ ॥

**आरेणाऽऽगमराहिया, मा विद्दाहिंति तो न वाएंति ।**
**तेण कहं कुव्वंतू, सोहिं तु अयाणमाणीतो? ॥२३४६॥**

आर्यरक्षिता**दारत आगमरहिताः**। ततस्ते **मा** छेदश्रुताध्ययनतः संयत्यो **विद्रास्यन्ति** विनङ्क्ष्यन्तीति हेतोश्छेदश्रुतानि संयतीर्न वाचयन्ति। अत्राऽऽह-**तेन** छेदश्रुताध्ययनाभावेन **कथं** ताः संयत्यो**ऽजानानाः शोधिं** कुर्वन्तु ? ॥२३४६॥

अत्राचार्य आह—

**तो जाव अज्जरक्खिय, सट्ठाणे पगासइंसु वइणीतो ।**
**असतीए विवक्खम्मि, वि एमेव य होंति समणा वि ॥२३४७॥**

यतः पूर्वमागमव्यवहारिणः स्युः, छेदश्रुतं च संयत्योऽधीयेरन् ततो **यावदार्यरक्षितास्तावद् व्रतिन्यः स्वस्थाने** [१]स्वपक्षे संयतीनां पार्श्वे **प्राकाशयन्** प्रकाशनामकार्षुः । स्वपक्षाभावे विपक्षेऽप्यालोचितवत्यः [२]श्रमण्यः । **एवमेव श्रमणा अपि भवन्ति** ज्ञातव्याः। किमुक्तं भवति? **श्रमणा अपि** सपक्षे आलोचितवन्तः । तदलाभे **विपक्षेऽपि** श्रमणीनां पार्श्वे इत्यर्थः, दोषाभावात्। [३]आगम-व्यवहारव्यवहारिभिर्हि दोषाभावमवबुध्य छेदश्रुतवाचना संयतीनां दत्ता

गाथा २३४२-२३४७ आर्यरक्षित-पर्यन्त आगम-व्यवहारः

१०२३ (B)

१. मु.। सपक्षे- पु. प्रे ॥ २. मु. । श्रमण्यः पु. प्रे. नास्ति ॥ ३. मु. । आगमव्यवहारिभिर्हि- पु. प्रे.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नान्यथेति, आर्यरक्षितादारतः पुनः श्रमणाः श्रमणानामेव समीपे आलोचयन्ति श्रमण्योऽपि श्रमणानाम् [समीपे], आगमव्यवहारव्यवच्छेदात्॥ २३४७॥

अत्रैव परमतमाशङ्क्य दूषयति—

**मेहुणवज्जं आरेण, केइ समणेसु ता पगासंति ।**
**तं तु न जुज्जइ जम्हा, लहुसगदोसा सपक्खे वि ॥२३४८॥**

आर्यरक्षितादारतः **श्रमणेषु** श्रमणानां पार्श्वे **ताः** श्रमण्यः **प्रकाशयन्ति** आलोचयन्ति **मैथुनवर्जं**, मैथुनं पुनः श्रमण्यः श्रमणीनामेव सकाशे आलोचयन्ति इति **केचिद्** व्याख्यान्ति[1], **तत्तु न युज्यते। यस्माल्लघुस्वकदोषाः सपक्षेऽपि**। किमुक्तं भवति? श्रमण्योऽपि स्वकलघुदोषतस्तुच्छत्वरूपस्वकदोषतः परिश्रावित्वं कुर्युः । परिभवं वा समुत्पादयेयुः। तस्मान्मैथुनमपि श्रमणानामेवान्तिके विकटनीयम् ॥ २३४८॥

**असती कडजोगी पुण, मोत्तूणं संकियाइं ठाणाइं ।**
**आइण्णे धुवकम्मिय, तरुणी थेरस्स दिट्ठिपहे ॥२३४९॥**



---

१. व्याचक्षते - तत् - वा. मो. पु. मु.॥

For Private and Personal Use Only

**आर्यरक्षित**कालेऽपि यदि संयत्या मूलगुणापराध आलोचयितव्यस्तर्हि संयत्याः सकाशे आलोच्यते। तस्याः **असति** अभावे यः **कृतयोगी** सूत्रतोऽर्थतश्च छेदग्रन्थधरः स्थविरस्तस्य समीपे आलोचयति। नवरं **शङ्कितानि स्थानानि** वक्ष्यमाणानि शून्यगृहादीनि **मुक्त्वा**। किञ्च **आचीर्णे** उचिते प्रदेशे आलोचयितव्यम्। यत्र **ध्रुवकर्मिको दृष्टिपथे** वर्तते, दृष्ट्या पश्यति, न तु शृणोति, तत्र जवनिकान्तरिता आलोचयति। **तरुणी थेरस्स** इत्येष तृतीयभङ्ग उपात्तः। स च शेषभङ्गानां त्रयाणामप्युपलक्षणं, ते चेमे-स्थविरा स्थविरस्यालोचयति १। स्थविरा तरुणस्यालोचयति २। तरुणी स्थविरस्यालोचयति ३। तरुणी तरुणस्य आलोचयति ४॥२३४९॥

यदुक्तं मुक्त्वा शङ्कितानि स्थानानि, सम्प्रति तान्येवोपदर्शयति—

**सुण्णघर- देउलुज्जाण-रण्ण-पच्छण्णुवस्सयस्संतो ।**
**एयविवज्जे ठायंति, तिण्णि चउरोऽहवा पंच ॥२३५०॥**

**शून्यगृहं देवकुलम् उद्यानम् अरण्यं प्रच्छन्नं** च स्थानं तथा **उपाश्रयस्यान्त**र्मध्ये **एतद्विवर्जे** एतद्विरहिते प्रदेशे आलोचनानिमित्तं **तिष्ठन्ति** । ते च जघन्यतस्त्रयो यदि वा **चत्वारोऽथवा पञ्च**। ते च त्रिप्रभृतयो वक्ष्यमाणभङ्गकानुसारेण प्रतिपत्तव्याः ॥२३५०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भङ्गकानेवाह—

**थेर-तरुणेसु भंगा, चउरो सव्वत्थ परिहरे दिट्ठिं ।**
**दोण्हं पुण तरुणाणं, थेरे थेरी य पच्चुरसं ॥२३५१॥**

स्थविर-तरुणेषु भङ्गाश्चत्वारः, ते च प्रागेवोपदर्शिताः स्थविरा स्थविरस्यालोचयतीत्यादि। तत्र यदि जवनिकाया अवकाशो नास्ति ततः **सर्वत्र** चतुर्ष्वपि भङ्गेषु दृष्टिं परिहरेत्। भूमिगतदृष्टिका सती आलोचयेत्, यथा आलोचनार्हः शृणोति। तत्र चतुर्थभङ्गे **द्वयोस्तरुणयोः स्थविरः स्थविरा च प्रत्युरस**मिति प्रत्यासन्नौ सहायौ दीयेते, येन परस्परं तौ दृष्टिं न बध्नीतः, नापि मुखविकारं कुरुतः। एवमस्मिन् चतुर्थे भङ्गे चत्वारो भवन्ति ॥२३५१॥

**थेरो पुण असहाओ, निग्गंथी थेरिया वि ससहाया ।**
**सरिसवयं च विवज्जे, असतीए पंचमं कुज्जा ॥२३५२॥**

तृतीयभङ्गे **पुनः स्थविरोऽसहायो**ऽपि भवतु, तरुण्याः पुनः **स्थविरा सहाया** दीयते । द्वितीयभङ्गे **निर्ग्रन्थी स्थविरापि ससहाया** कर्तव्या । तरुणस्यालोचनार्हस्य सहायोऽस्तु वा न वा, न कश्चिद्दोषः। एवं च तृतीये द्वितीये च भङ्गे त्रयो जना भवन्ति । तथा **सदृशवयो**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नियमतः सहायानां **विवर्जयेत्**, तदसम्भवे सदृशवया अपि भवेत् । तत्र प्रथमभङ्गे चतुर्थभङ्गे वा सदृशवयःसहायसम्भवे **पञ्चमं** क्षुल्लकं क्षुल्लिकां वा पटुकां कुर्यात् ॥२३५२॥

**ईसिं अण्णोअत्ता, ठिया उ आलोयए विवक्खम्मि ।**
**सरिपक्खे उक्कुडुओ, [1]पंजलिबद्धो वऽणुण्णातो ॥२३५३॥**

**विपक्षे** श्रमणस्य समीपे श्रमणी **आलोचयति, ईषदवनता** ऊर्ध्व**स्थिता**। **सदृशपक्षे** पुनः श्रमणः श्रमणस्य पार्श्वे पुन**रुत्कुटुकः** कृत**प्राञ्जलि**रालोचयति। अथ सोऽर्शोव्याधिपीडितः ततोऽनुज्ञापनां कृत्वा **अनुज्ञातः** सन् निषद्यायामुपविष्ट आलोचयति ॥ २३५३॥

**दिट्ठीए होंति गुरुगा, सविकारा ओसरत्ति सा भणिया ।**
**तस्स विवड्ढिते रागे, तिगिच्छ जयणाए कायव्वा ॥२३५४॥**

यो दृष्ट्या दृष्टिं बध्नाति, तस्य **दृष्टौ** सविकारायां **भवन्ति** प्रायश्चित्तं तया(दा) चत्वारो गुरुकाः। तत्र ये ते द्वितीयका दत्तास्ते यदि एकतरं सविकारं पश्यन्ति, तत आलोचनातोऽपसारयन्ति,

१. पंजलिविट्ठो- मु. ला.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा **अपसरता**ऽपसरत यूयं, न किमप्यालोचनया प्रयोजनमिति। अथ सा निर्ग्रन्थी स्वभावत एवोरालशरीरा सविकारा दृष्ट्वा **अपसरेति भणिता** सती अपसृता तथापि **तस्या**ऽऽलोचनाचार्यस्य यदि तस्या उपरि **विवर्द्धितो रागस्**तर्हि तस्मिन् सति **यतनया** चिकित्सा कर्तव्या ॥२३५४॥

तामेव यतनामाह—

**अण्णेहिं पगारेहिं, जाहे नियत्तेउ सो न तीरति उ ।**
**घेत्तूणा[1]ऽऽभरणाइं, तिगिच्छ जयणाए कायव्वा ॥२३५५॥**

**यदा अन्यैः प्रकारैस्**तं भावं **निवर्तयितुं न शक्नोति** तदा तस्याः संयत्या **[2]आभरणानि** वस्त्राणि **गृहीत्वा यतनया चिकित्सा कर्तव्या** ॥२३५५॥

एनामेवाह—

**जारिससिचएहि ठिया तारिसएहिं तमस्सती वरिया ।**
**संभलि [3]विणोककेयण, वेलयणं चिहुरगंडेहिं ॥२३५६॥**



---

१. °णाऽऽवरणाइं- मो. ॥ २. आवरणानि- मो ॥ ३. विणोयके° सं.॥

For Private and Personal Use Only

**यादृशैः सिचयैः** वस्त्रैः प्रावृतैः सा संयती **उपविष्टा** दृष्टा **तादृशैर्व**स्त्रैः तमः अन्धकारमस्या अस्तीति **तमस्विनी** रात्रिस्तस्यां तरुणसाधु**र्वरितः** प्रावृतः क्रियते । ततः **संभलित्ति** दूती प्रेष्यते। तंतो[1] **विनृको** नरविहीनो य ओको निवासः, गृहमित्यर्थः, तत्र **केतनं** सङ्केतो दीयते, दत्त्वा च स तत्र स्थितस्तावत्तिष्ठति, यावत् स तरुणसाधुः संयतीनेपथ्योपेत आगच्छति। तस्मिंश्चागते **चिकुरेषु** केशेषु **गण्डयोश्च वेलपनं** क्रीडनं करोति, तत्र यद्येतावता शुक्रनिपात-तस्तिष्ठति ततः सुन्दरम्। अथ न तिष्ठति तर्हि स संयतीनेपथ्योऽपसार्यते । प्रकारान्तरमारभ्यते ॥२३५६ ॥

तदेव प्रकारान्तरमाह—

**अहवा वि सिद्धपुत्तिं, पुव्वि गमेऊण तीय सिचएहिं ।**
**आवरिय कालियाए, सुण्णागारादि सम्मेलो ॥२३५७॥**

**अथवे**ति प्रकारान्तरद्योतने। **पूर्वं सिद्धपुत्रीं गमयित्वा तस्याः** संयत्याः **सिचयैरावृत्य कालिकायां** कृष्णायां रात्रौ **शून्यगृहादिषु** तया सह तस्य **सम्मेलः** सङ्गमः कर्तव्यः ॥ २३५७॥



---

१. ततो विना विनृको- पु. प्रे.॥

सम्प्रति यादृशा उत्सर्गत आलोचनार्हास्तादृशानभिधित्सुराह—

**गीयत्था कयकरणा, पोढा परिणामिया य गंभीरा ।**
**चिरदिक्खिया य वुड्ढा, जईण आलोयणाजोग्गा ॥२३५८॥**

**गीतार्थाः** सूत्रा-ऽर्थ-तदुभयनिष्णातत्वात्, **कृतकरणा** अनेकवारमालोचनायां सहायीभवनात्, **प्रौढाः** समर्थाः सूत्रतोऽर्थतश्च प्रायश्चित्तदाने पश्चात्कर्तुमशक्यत्वात्, **पारिणामिका** नापारिणामिका अतिपारिणामिका वा, गम्भीरा महत्यप्यालोचकस्य दोषे श्रुते अपरिश्राविणः, **चिरदीक्षिताः** प्रभूतकालप्रव्रजिताः, **वृद्धाः** श्रुतेन पर्यायेण वयसा च महान्तः, एवम्भूता **यतीनां** साधूनाम्, उपलक्षणमेतत् संयतीनां च, **आलोचनायोग्याः**॥ २३५८॥

**सूत्रम्— जे निग्गन्था य निग्गन्थीओ य संभोइया सिया, नो ण्हं कप्पइ अण्णमण्णेणं वेयावच्चं कारवेत्तए । अत्थि य इत्थ ण्हं केइ वेयावच्चकरे, कप्पइ णं तेणं वेयावच्चं कारवेत्तए; नत्थि य इत्थ णं केइ वेयावच्चकरे, एव णं कप्पइ अण्णमण्णेणं वेयावच्चं कारवेत्तए॥ २०॥**

"जे निग्गंथा य निग्गंथीतो य"। **ये निर्ग्रन्था निर्ग्रन्थ्यश्च सांभोगिकास्तेषां** नो, ण्हमिति

वाक्यालङ्कारे, **कल्पते अन्योन्यस्य वैयावृत्त्यं कारयितुं, अस्ति चेत् कश्चित् वैयावृत्त्यकरस्ततः कल्पते** तं वैयावृत्त्यं **कारयितुम्। नास्ति चेत् क्वचित् वैयावृत्त्यकरः एवं** सति **कल्पते अन्योन्यस्य वैयावृत्त्यं कारयितुमि**ति सूत्रसङ्क्षेपार्थः ॥ अधुना भाष्यविस्तरः—

**आलोयणाए दोसा, वेयावच्चे वि हुंति ते चेव।**
**नवरं पुण णाणत्तं, बितियपदे होइ कायव्वं ॥२३५९॥**

ये एव विपक्षे **आलोचयतां दोषा** उक्ताः, परस्परं **वैयावृत्त्येऽपि** वैयावृत्त्यकरणेऽपि **त एव,** दोषा **भवन्ति।** ये चाभ्यधिकास्तेऽनन्तरगाथायां वक्ष्यन्ते। **नवरं पुनर्नानात्वं द्वितीयपदे** अपवादपदे **भवति कर्तव्यम्** ॥ २३५९॥

तत्राभ्यधिकान् दोषान् अभिधित्सुराह—

**उउभयमाणसुहेहिं, देहसहावाणुलोमभुज्जेहिं ।**
**कढिणहियायाण वि मणं, वंकंतऽचिरेण कइयविया ॥२३६०॥**

**ऋतौ** ऋतौ यै**र्भज्यमानैः** सेव्यमानैः **भज सेवाया**मिति वचनात्, सुखं जन्यते तानि **ऋतुभज्यमानसुखानि,** तैस्तथा देहः शरीरं तस्य स्वो भावः स्वरूपं **देहस्वभावः,** तस्या**नुलोमानि** अनुकूलानि यानि **भोज्यानि** तैर्वैयावृत्त्यं कुर्वत्यः संयत्यो ये संयतीभिरानीतं **भुञ्जते** तेषां कठिनहृदयानामपि धृतिबलिष्ठानामपि संयमाद् मनोऽ**चिरेण** कालेन **वक्रयन्ति** च्यावयन्तीत्यर्थः। कथम्भूताः? इत्याह–**कैतविक्यः** कैतवेन कपटेन अन्यन्मनसि अन्यद्वाचि इत्यादिलक्षणेन निर्वृत्ताः कैतविक्यः॥ २३६०॥

सम्प्रति द्वितीयपदे विपक्षेऽपि वैयावृत्त्यकरणे युक्तिमुपन्यस्यति—



**जह चेव य बितियपदे, दलंति आलोयणं तु जयणाए ।**
**एमेव य बिइयपदे, वेयावच्चं तु अण्णोण्णं ॥२३६१॥**

**यथा चैव द्वितीयपदे** अपवादपदे विपक्षेपि **यतनया** संयत्यः श्रमणानां पार्श्वे **आलोचनां ददति।** **एवमेव द्वितीयपदे अन्योन्यस्मिन्** परस्परस्य **वैयावृत्यम**पि कुर्वन्ति ॥२३६१॥

तदेव द्वितीयपदमाह—

**भिक्खू विस मयण छेवग, एएहिं गणो उ होज्ज आवण्णो ।**
**वायपराइउवासे, संखडिकरणं च वित्थिण्णं ॥२३६२॥**

भिक्षूपासकः कोऽपि **विष**मिश्रं भोजनं दद्यात्, **मदनं** मदनकोद्रवकूरं वा प्रतिलाभयेत्। **छेवग**त्ति मारिर्वा सकलस्यापि साधुगणस्योपस्थिता। **एतैः** कारणै**र्गण आपन्नो** विपन्नो **भवति**। तत्र प्रथमतो भिक्षूपासकस्य प्रतिनिविष्टस्य विषमिश्रभोजनदानं भावयति— कोऽप्यु**पासको** भिक्षूपासको बहुजनमध्ये **वादे पराजितः** ततः स प्रतिनिविष्टो जातः। स च कैतवेनाऽऽचार्याणां समीपे सम्यगुपस्थितः- 'कथय मे भगवन्! आर्हतं धर्मम्'। आचार्येण कथितः। ततः स कैतवेन ब्रूते— 'अद्यप्रभृति ममाऽऽर्हतो धर्मो मया युष्मत्समीपे गृहीतः' एवमुक्त्वा आचार्यान् विज्ञपयति, यथा- मया भिक्षूणामर्थाय **विस्तीर्णं सङ्खडिकरणं** कृतं, प्रभूतं परमान्नमुपस्कृतं, कारितमित्यर्थः। तन्मा असंयतास्ते भुञ्जीरन्निति साधूनां प्रयच्छामि, अनुगृह्णीत मां यूयमिति । एवमुक्ते साधवश्चिन्तयन्ति- सत्यमेतत् यदेष ब्रूते ततो गृह्णीम इति। ततस्तेषु गतेषु तस्मिन् परमान्ने विषं क्षिप्तम्, साधूनां पर्याप्तं दत्तम्। तच्च साधुभिराहारितं, तेन सर्वे पतिताः ॥२३६२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदि वा तत्प्रदत्तं मदनकोद्रवकूरं भुक्त्वा पतिताः। एतदेवाह—

**कतियवधम्मकहाए, आउट्टो बेति भिक्खुगाणट्ठा ।**
**परमन्नमुवक्खडियं, मा[1] जाउ असंजयमुहाइं ॥२३६३॥**

**तं कुणहऽणुग्गहं मे साहू जोग्गेण एसणिज्जेणं ।**
**पडिलाभणा विसेणं, पडिया पडिती य सव्वेसिं ॥२३६४॥**

**कैतवेन धर्मकथायां** कथितायाम**आवृत्तो** ब्रूते- मया **भिक्षुकाणामर्थाय परमान्नमुपस्कृतं** कारितं, तन्**मा असंयतमुखानि यातु** ॥२३६३॥ **तस्मात् कुरुत मे साधुयोग्येनैषणीयेनानुग्रहम्।** एवमुक्ते गतेषु साधुषु तेन पापीयसा **विषेण** विषमिश्रेण परमान्नेन **प्रतिलाभना** कृता, यदि वा मदनकोद्रवकूरेण। सा वसत्यागतानां साधूनां मुखेषु **पतिता**। ततः **सर्वेषां** साधूनां **पतितिर्मरणमभूत्** ॥२३६४॥

१. मु. ला. । मं जाउ - पु. प्रे.। ला. पाठन्तरम् ॥



For Private and Personal Use Only

**आयंबिल-खमगाऽसइ,लद्धाण चरंतएण उ विसेण ।**
**बिइयपदे जयणाए, कुणमाणि इमा उ निद्दोसा ॥२३६५॥**

न च तत्र कोऽपि क्षपक आचाम्लो वा आसीत् यो विषादुद्धरति, ततः **क्षपकानामाचामाम्लानां** च **असति** अभावे तेषां च साधूनां **चरता** संचरिष्णुना **विषेण लब्धानां** मृतानामित्यर्थः। मार्या वा समुपस्थितया मृतानां **द्वितीयपदे इयं** संयती **यतनया** वैयावृत्त्यं कुर्वाणा **निर्दोषा**॥ २३६५॥

कीदृशी पुनर्वैयावृत्त्यकरणे योग्या? इत्यत आह—

**संबंधिणी गीयत्था, ववसायि थिरत्तणा य कयकरणा।**
**चिरपव्वइया य बहुस्सुया य परिणामिया जा य ॥२३६६॥**

**गंभीरा मद्दविया, मियवादी अप्पकोउहल्ला य ।**
**साहुं गिलाणगं खलु, पडिजग्गति एरिसी अज्जा ॥२३६७॥**

या आर्या ग्लानस्य प्रतिजागर्यमाणस्य भगिन्यादिनात्रकेण **सम्बन्धिनी**। तथा **गीतार्था**

एषणीयाऽनेषणीयविधौ सम्यक् कुशला। तथा **व्यवसायिनी**। या च **स्थिरत्वे** वर्तते, स्थिरा इत्यर्थः। तथा **कृतकरणा, चिरप्रव्रजिता, बहुश्रुता**। तथा **या पारिणामिकी**॥ २३६५॥ **गम्भीरा, मार्दविता** संजातमार्दवा **मितवादिनी, अल्पकुतूहला। ईदृशी आर्या** गणाभावे **ग्लानं [ साधुं ]** खलु **प्रतिजागर्ति** ॥२३६७॥

सम्प्रति व्यवसायिन्यादिपदानां व्याख्यानार्थमाह—

**ववसायी कायव्वे, थिरा उ जा संजमम्मि होइ दढा ।**
**कयकरण जीए बहुसो, वेयावच्चा कया कुसला ॥२३६८॥**

या **कर्तव्ये** व्यवसायेऽधिकारिणी[1] नाऽऽलस्येनोपहता[2] तिष्ठति सा **व्यसायिनी**, संयमे भवति **दृढा** सा **स्थिरा, यया बहुशो वैयावृत्त्यानि कृतानि** सा **कृतकरणा, कुशला** इत्यर्थः॥ २३६८॥

**चिरपव्वइय समाणं, तिण्हुवरिं बहुस्सुया पकप्पधरी ।**
**परिणामिय परिणामं, जा जाणइ पोग्गलाणं तु ॥२३६९॥**

१. °सायकारिणी- खं. सं. मु. मो.॥ २. °लस्योप° मो.॥

**चिरप्रव्रजिता** नाम या **तिसृणां समानां** वर्षाणामुपरि, या **प्रकल्पधरी** सा **बहुश्रुता**, या पुनः **पुद्गलानां** कर्म्मादिपुद्गलानां विचित्रं **परिणामं जानाति सा पारिणामिकी** ॥२३६९॥

**काउं न उत्तुणेई, गंभीरा मद्दवी अविम्हइया ।**
**कज्जे परिमियभासी, मियवादी होइ अज्जा उ ॥२३७०॥**

या वैयावृत्त्यं **कृत्वा न उत्तुणेइ** गर्वबुद्ध्या न प्रकाशयति सा **गम्भीरा, मार्दविनी अविस्मयिता**, तथा **कार्ये परिमितभाषिणी मितवादिनी** ॥२३७०॥

**कक्खंतर२ गुज्झादी, न निरक्खे अप्पकोउहल्ला य ।**
**एरिसगुणसंपन्ना, साहूकरणे भवे जोग्गा ॥२३७१॥**

या **कक्षान्तरगुह्यादीनि न निरीक्षते** सा भवत्यल्प**कुतूहला, ईदृशगुणसम्पन्ना साधुकरणे** साधुवैयावृत्त्यकरणे **भवत्यार्या योग्या**॥ २३७१॥

सम्प्रति वैयावृत्त्यक[1]रणविधानमाह—

---

१. **०करणे विधिमाह- मो.** ॥

**पडिपुच्छिऊण वेज्जे, दुल्लभदव्वम्मि होइ जयणा उ।**
**विसघाई खलु कणगं, निहि जोणीपाहुडे सड्ढे ॥२३७२॥**

**प्रतिपृच्छ्य वैद्यान्** यदि **दुर्लभद्रव्येण** प्रयोजनं जातं ततस्तस्मिन् उत्पाद्ये **भवति** वक्ष्यमाणा **यतना**। तामेवाह-**विसघाई** इत्यादि, **विषघाति खलु कनकं,** विषेण चोपहता: साधवस्तिष्ठन्ति, ततः सुवर्णेन प्रयोजनं जातम्। तत्र यदि ज्ञानेन[१] **निधिर्निखातो** ज्ञायते तर्हि तमुत्खन्य यावता प्रयोजनं तावद् गृह्णाति, शेषं तथैव स्थापयति । अथ निधिपरिज्ञानं नास्ति तर्हि **योनिप्राभृतोक्तेन** प्रकारेणोत्पादयति[२]। अथ योनिप्राभृतमपि नास्ति तर्हि **श्राद्धान्** श्रावकान् याचेत ॥२३७२॥

**असतीए अण्णलिंगं, तं पि जयणाए होइ कायव्वं ।**
**गहणे पण्णवणे वा, आगाढे हंसमादी वि ॥२३७३॥**

अथ श्राद्धा अपि तादृशा न सन्ति, ये सुवर्णं याचितं ददति, ततस्तेषां श्राद्धाना**मसति** अभावे आत्मना **ग्रहणाय प्रज्ञापनाय** वा यत् तत्रान्यदर्चितं **लिङ्गं तदपि यतनया कर्तव्यम्।**

---

१. ज्ञानमयेननिधि° वा. मो. पु. मु. ॥ २. दयेत्-सं. मु. ॥

सा चेयम्- पूर्वमगारस्त्रीलिङ्गेनोत्पादयेत्। तथाप्यनुत्पत्तावर्चितलिङ्गेन, तेनाप्युत्पादनाशक्तौ **हंसादि** वा यन्त्रमयं कृत्वा तेनोत्पादयेत्। यथा **कोक्कासो** यन्त्रमयान् कपोतान् कृत्वा शालिमुत्पादितवान् । एवं तावन्निर्ग्रन्थी निर्ग्रन्थस्य वैयावृत्त्यं करोति । एवं संयतोऽपि संयत्या ग्लानाया वैयावृत्त्यं करोति ॥ २३७३ ॥

**सूत्रम्— निग्गंथं च णं राओ वा वियाले वा दिहपट्ठो[१] लूसेज्जा; इत्थी वा पुरिसस्स ओमावेज्जा, पुरिसो वा इत्थीए ओमावेज्जा । एवं से कप्पइ, एवं से चिट्ठइ, परिहारं च से न पाउणइ-एस कप्पे थेरकप्पियाणं।**

**एवं से नो कप्पइ, एवं से नो चिट्ठइ, परिहारं [२]च नो पाउणइ-एस कप्पे जिणकप्पियाणंति बेमि ॥ ववहारस्स पञ्चमो उद्देसओ समत्तो ॥ २१ ॥**

"निग्गंथं च णं रातो वा वियाले वा" इत्यादि। अस्य सूत्रस्य सम्बन्धप्रतिपादनार्थमाह—

**पडिसिद्धमणुण्णायं, वेयावच्चं इमं खलु दुपक्खे ।**
**स च्चेव य समणुण्णा, इहंपि कप्पेसु णाणत्तं ॥२३७४॥**

---

१. दिहपुट्ठो- आगमप्रकाशने, श्युब्रींग पाठा० ॥ २. च से पा° आ. प्र. । च णं पा° प्रतिलिपि ॥

अनन्तरसूत्रे विपक्षे वैयावृत्त्यकरणं **प्रतिषिद्धम्** । तच्चेदम्-**वैयावृत्त्यं खलु पुनर्द्विपक्षे** स्वपक्षे परपक्षे चेत्यर्थः, सूत्रेणैवा**ऽनुज्ञातम्** ।"[१]अत्थि या इत्थ ण्हं केई वेयावच्चकरे कप्पति ण्हं वेयावच्चं करावेत्तए" इति वचनात् । **सा च समनुज्ञा** वैयावृत्त्यसमनुज्ञा **इहापि** अस्मिन्नपि सूत्रेऽभिधीयते। केवलं **कल्पयोर्नानात्वम्** अधिकमिति। एष सूत्रसम्बन्धः॥ २३७४॥

पुनः प्रकारान्तरेण सम्बन्धमाह—

**अत्थेण व आगाढं, भणियं इहमवि य होइ आगाढं ।**
**अहवा अतिप्पसत्तं, तेण निवारेइ जिणकप्पे ॥२३७५॥**



वाशब्दः पक्षान्तरद्योतने। पूर्वसूत्रे**ऽर्थेनाऽऽगाढं भणितं** सूचितं, तथा च आगाढे प्रयोजने समुत्पन्ने संयती संयतस्य वैयावृत्त्यं कुर्वती समनुज्ञाता, नान्यथा। **इहापि च भवत्यागाढं** प्रयोजनमधिकृत्य वैयावृत्त्यकरणमिति सम्बन्धः । **अथवाऽतिप्रसक्तं** खलु वैयावृत्त्यकरणं, **तेन जिनकल्पे निवारयति** ॥२३७५॥

---

१. अत्थि या इण्हि केई- पु. प्रे.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सुत्तम्मि कड्डियम्मी, वोच्चत्थ करेंते चउगुरू होंति ।**
**आणादिणो य दोसा, विराहणा जा भणिय पुव्विं ॥२३७६॥**

सर्वत्रापि **सूत्रे कर्षिते** उच्चारिते सति सम्बन्धः प्रदर्शनीयः । तथा श्रमणैः श्रमणस्य वैयावृत्त्यं कर्तव्यं, श्रमणीभिः श्रमण्याः, यदि पुनर्विपर्यासं करोति, तर्हि **विपर्यासं कुर्वति** प्रायश्चित्तं **चत्वारो गुरुकाः**, न केवलं प्रायश्चित्तम्, **आज्ञादयश्च** आज्ञा-ऽनवस्था-मिथ्यात्व-विराधनारूपाश्च दोषाः। तथा **या पूर्वं वैयावृत्त्य**सूत्रे **भणिता विराधना** शीलविराधना सा अत्रापि द्रष्टव्या ॥२३७६॥

"सुत्तम्मि कड्डियम्मी" इत्येतदेव प्रपञ्चयति—

**संबंधो दरिसिज्जइ, उस्सुत्तो खलु न विज्जते अत्थो ।**
**उच्चरितछिण्णपदे, विग्गहिए चेव अत्थो उ ॥२३७७॥**

सूत्रे उच्चारिते सति **सम्बन्धोऽ**नन्तरसूत्रादिभिः सह **दर्श्यते**, यतः सम्बन्धोऽर्थतो भवति। वर्णानां स्वतः सम्बन्धाभावात् । स **चार्थः खलु उत्सूत्रः** सूत्ररहितो **न विद्यते**, सम्बन्धे



For Private and Personal Use Only

चोपदर्शिते **उच्चारितसूत्रस्य छिन्नानि पदानि** कर्तव्यानि, पदच्छेदो विधातव्य इत्यर्थः। ततो यानि पदानि विग्रहभाञ्जि तेषु विग्रह उपदर्शनीयः। **विग्रहीते च सूत्रेऽर्थो** व्याख्येयः ॥२३७७॥

**अक्खेवो पुण कीरइ, कत्थइ विणा वि तस्सिद्धी ।**
**जत्थ अवायनिदरिसणं, एसेव उ होइ अक्खेवो ॥२३७८॥**

**आक्षेपः पुनः** क्वचित् **क्रियते**। यथा किं कारणं परपक्षे वैयावृत्त्यं न क्रियते ? कुत्रचित्पुन-**र्विनाप्याक्षेपं तत्सिद्धिः** आक्षेपसिद्धिः। कथम्? इत्याह-**यत्राऽपायनिदर्शनम्** अपायप्रकटन**मेष एव भवत्याक्षेपः**, आक्षेपहेतुकत्वात्। न खल्वाक्षेपसूचामन्तरेणापायप्रदर्शनं विपक्षे भवतीति परिभावनीयमेतत् ॥२३७८॥

सम्प्रत्याक्षेपप्रसिद्धी एव वैविक्त्येनाह—

**किं कारणं न कप्पइ?, अक्खेवो दोसदरिसणं सिद्धी ।**
**लोए वेदे समए, विरुद्धसेवादयो नाया ॥२३७९॥**

**किं कारणं** विपक्षे वैयावृत्त्यं **न कल्पते? इत्याक्षेपः।** विपक्षे **दोषदर्शनं सिद्धिः** प्रसिद्धिः। अत्रार्थे लोके वेदे समये च **विरुद्धसेवादयो ज्ञातानि।** किमुक्तं भवति ? यथा **लोके वेदे समये च विरुद्धसेवाया**मकल्पिकसेवायां च **दोषोपदर्शनम्** तदकरणे प्रसिद्धिः। एवमिहापि विपक्षे वैयावृत्त्यकरणेऽपायदर्शनमेव तदकरणे प्रसिद्धिः ॥२३७९॥

**तम्हा सपक्खकरणे, परिहरिया पुव्ववण्णिया दोसा ।**
**कप्पे छट्ठुद्देसे, तह चेव इहंपि दट्ठव्वा ॥२३८०॥**

यस्मादेवं विपक्षे वैयावृत्त्यकरणे प्रायश्चित्तादयो दोषास्**तस्मात्सपक्षे** वैयावृत्त्यं कर्तव्यम्। सपक्षे वैयावृत्त्यकरणे च ये **पूर्ववर्णिता दोषा**स्ते यथा कल्पा**ध्ययने षष्ठोद्देशे परिहृतास्तथा चैव इहापि द्रष्टव्याः** ॥२३८०॥

अत्र परप्रश्नमाह—

**चोएती परकरणं, नेच्छामो दोसपरिहरणहेउं ।**
**किं पुण भेसज्जगणो, घेतव्वो गिलाणरक्खट्ठा ॥२३८१॥**

**चोदयति** प्रश्नयति शिष्यो यथा- **परकरणे** परपक्षे वैयावृत्यकरणं **दोषपरिहरणहेतोः** दोषपरिहरणनिमित्तं **नेच्छामः** । **किं पुनः** केवलं **भैषज्यगणः** औषधसमूहो **ग्लानरक्षार्थं गृहीतव्यः** ॥२३८१ ॥

अत्रैव विपक्षे दोषमाह—

**पुव्वं तु अगहिएहिं, दूरा[१] जा ओसहाइं आणंति ।**
**ता चत्तो उ गिलाणो, दिट्ठंतो दंडियाईहिं ॥२३८२॥**

**पूर्वमगृहीतेषु** ग्लानप्रायोग्येषु भैषजेषु, गाथायां तृतीया सप्तम्यर्थे प्राकृतत्वात् । यावदार्या **दूरादौषधान्यानयन्ति, तावद्** ग्लानस्य आगाढादि परितापना भवति। तद्भावे च स परमार्थतस्त्यक्तो भवति। अत्रार्थे च **दृष्टान्तो दण्डिकादिभिः** ॥ २३८२॥

तमेव विभावयिषुरिदमाह—

**उवट्ठियम्मि संगामे, रण्णो बलसमागमे ।**
**एगो वेज्जेऽत्थ वारेइ, न तुब्भे जुद्धकोविया ॥२३८३॥**

**घेप्पंतु ओसहाइं, वणपट्टा-मक्खणाणि विविहाणि ।**
**सो बेयऽमंगलाइं, मा कुणह अणागयं चेव ॥२३८४॥**

द्वयोर्दण्डिकयो**रुपस्थिते** सङ्ग्रामे मिलिते च द्वयोरपि **बले**, द्वयोरपि **राज्ञोर्वैद्या** उपस्थिताः। तत्र **एको** दण्डिको **वैद्यानत्र** सङ्ग्रामप्रस्तावे उपस्थितान् **वारयति। न यूयं युद्धकोविदाः।** ततः किं युष्माभिः सङ्ग्रामे कर्तव्यम्? एवमुक्ते ते वैद्याः प्राहुः- यद्यपि न वयं युद्धकोविदास्तथापि प्रहारव्रणितेष्वस्माकं वैद्यक्रियोपयोगिनी तस्माद्वयमागच्छामः, **गृह्यन्तां चौषधानि व्रणपट्टा विविधानि** चानेकप्रकाराणि च **म्रक्षणानि**। एवमुक्ते **स** दण्डिको **ब्रवीति-मा कुरुतानागतमेवामङ्गलानि** तस्मान्निवर्तध्वं यूयमिति ॥२३८३-८४॥

**किं घेत्तव्वं रणे जोग्गं? पुच्छिया इतरेण ते ।**
**भणंति वणतेल्लाइं, घयदव्वोसहाणि य ॥२३८५॥**

**इतरेण** द्वितीयेन दण्डिकेन **ते** आत्मीया वैद्याः **पृष्टाः, किं रणे** संग्रामे **योग्यं गृहीतव्यम्?** एवमुक्तास्ते **भणन्ति**-व्रणसंरोहकाणि तैलानि **व्रणतैलानि**, तथाऽतिजीर्णं **घृतं**, द्रव्यौषधानि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च यैरौषधैः संयोजितैस्तैलं घृतं [1]वा निष्पद्यते, व्रणसंरोहकचूर्णो वा व्रणसंरोहणाय भवति, तानि **द्रव्यौषधानि**। ततो राज्ञा पुरुषाः सन्दिष्टाः। यद्वैद्यैरुपदिष्टं तत्सर्वं गृहीतम् ॥ २३८५॥

**भग्ग-सिव्विय-संसित्ता, वणा वेज्जेहि जस्स उ ।**
**सो पारगो उ संगामे, पडिवक्खो विवज्जए ॥२३८६॥**

ततः सङ्ग्रामे वर्त्तमाने **यस्य** राज्ञो ये पुरुषा मुद्गरादिप्रहारहतास्तेषां प्रहारा **वैद्यै**रौषधै**र्भग्राः**, ये च व्रणितास्तेषां व्रणाः **सीविताः** तत औषधैः **संसिक्ताः**, एवं व्रणिताः प्रहारिता द्वितीयदिवसे युद्धसमर्था जाताः । एवं द्वितीयदिवसे तृतीयदिवसेऽपि कृतम् । एवं **स** राजा वैद्योपदेशेनौषधसङ्ग्रहतः **सङ्ग्रामे पारगो अभूत्, प्रतिपक्षो विपर्यये** जित इत्यर्थः ॥२३८६॥

एष दृष्टान्तोऽयमर्थोपनयः—

**एवमेवाऽसपेज्जाइ, खज्ज-लेज्झाणि जोसि उ ।**
**भेसज्जाइं सहीणाइं, पारगा ते समाहिए ॥२३८७॥**

---

१. वाऽतिपच्यते- मो. । वा विपच्यते- सं. ॥



For Private and Personal Use Only

**एवमेव** दण्डिकदृष्टान्तगतेन प्रकारेण **येषा**माचार्याणां भैषजानि **असन्ति** अशनरूपाणि, **पेयानि** पानकरूपाणि, **खाद्यानि** खादिमरूपाणि, **लेह्यानि** च स्वादिमानि **स्वाधीनानि ते** आत्मनो गच्छस्य च **समाधेः पारगा** भवन्ति । ये पुनरौषधानां न सङ्ग्रहीतारस्ते समाधेरपारगाः ॥ २३८७ ॥

प्रकारान्तरेण दण्डिकदृष्टान्तमाह—

**अहवा राया दुविहो, आयभिसित्तो पराभिसित्तो य ।**
**आयभिसित्तो भरहो, तस्स उ पुत्तो परेणं तु ॥२३८८॥**

**अथवे**ति प्रकारान्तरद्योतने, **राजा द्विविधो** भवति, तद्यथा–**आत्माभिषिक्तः परा-भिषिक्तश्च।** आत्मनैव निजबलेन राज्येऽभिषिक्तः आत्माभिषिक्तः, परेणाभिषिक्तः पराभिषिक्तः। तत्राऽऽ**त्माभिषिक्तो** भरतश्चक्रवर्ती, **तस्य पुत्र** आदित्ययशाः **पराभिषिक्तः** ॥२३८८॥

**बलवाहणकोसा य, बुद्धी उप्पत्तियादिया ।**
**साहगो उभयोवेतो, सेसा तिण्णि असाहगा ॥२३८९॥**

**बलं** हस्त्यादि, **वाहनानि** यानानि, **कोशो** भाण्डागारः, तथा **बुद्धि**रौत्पत्तिक्यादिका। अत्र भङ्गाश्चत्वारः-एको बलवाहनादिसमग्रो नो बुद्धिसमग्रः १ एको नो बलवाहनादिसमग्रः किन्तु बुद्धिसमेतः २, एको बलवाहनादिसमेतोऽपि बुद्धिसमेतोऽपि ३, एको नो बलवाहनादि-समेतो नापि बुद्धिबलोपेतः ४। एषु चतुर्षु भङ्गेषु मध्ये य **उभयोपेतो** बलबाहनादिसमेतो बुद्धिसमेतश्चेत्यर्थः स राज्यस्य **साधकः शेषास्त्रयोऽसाधकाः** ॥ २३८९॥

एष दृष्टान्तोऽयमर्थोपनयः—

**बलवाहण-ऽत्थहीणो, बुद्धिहीणो न रक्खए रज्जं ।**
**इय सुत्त-ऽत्थविहीणो, ओसहहीणो य गच्छं तु ॥२३९०॥**

यथा **बलेन वाहनैरर्थेन च हीनो बुद्धिहीनश्च** राजा **राज्यं न रक्षति,** एवमाचार्योऽपि **सूत्रार्थविहीन औषधविहीनश्च गच्छं** न रक्षति ॥२३९०॥

**आय-पराभिसित्तेण, तम्हा आयरिएण उ ।**
**ओसहमादीणिचयो, कायव्वो चोयती सीसो ॥२३९१॥**

**तस्मादाचार्येण आत्माभिषिक्तेन** श्रुतकेवलिना इतरेण च **पराभिषिक्तेन औषधादिनिचयः कर्तव्यः**, इति **शिष्यश्चोदयति** ब्रूते ॥२३९१॥

**सीसेणाभिहिते एवं, बेई आयरिओ ततो ।**
**वदतो गुरुगा तुज्झं, आणादीया विराहणा ॥२३९२॥**

एवं **शिष्येणाभिहिते तत आचार्यो ब्रूते**-एवं वदतस्तव प्रायश्चित्तं चत्वारो **गुरुकाः, आज्ञादयश्च** दोषाः, **विराधना** सूत्रस्य ॥ २३९२॥

एतदेव भावयति—

**दिटुंतसरिस काउं, अप्पाणपरं च केइ नासंति ।**
**ओसहमादीनिचओ, कायव्वो जहेव राईणं ॥२३९३॥**

केचित् तव सदृशा **दृष्टान्तसदृशं दण्डिकसदृशमात्मानं परं च कृत्वा नाशयन्ति।** यथा— **औषधादिनिचयः कर्तव्यो यथा** राज्ञामिति ॥२३९३॥

एतदेवातिप्रसङ्गापादनेन दूषयति—

**कोस-कोट्ठार-दाराणि, पदातीमादीयं बलं ।**

**एवं मणुयपालाणं, किंणु तुज्झंपि रोयइ? ॥२३९४॥**

**कोश-कोष्ठागार-दाराः पदात्यादिकं बलमेतन्मनुष्यपालानां** भवति, तदेतत् **किंनु तवापि रोचते ?** एतदपि दृष्टान्तबलेन गृह्यतामिति भावः ॥२३९४॥

**जो वि ओसहमादीणं, निचयो सोवि अक्खमो ।**

**न संचए सुहं अत्थि, इह लोए परत्थ य ॥२३९५॥**

**योऽप्यौषधानां निचयः सोऽपि** सुखोत्पादनायाऽक्षमः । यतो **न सञ्चये सुखमस्ति इहलोके,** तदुत्पादन-तद्रक्षण-तन्नाशे दुःखसम्भवात् । **परत्र च** परलोके च सुखं नास्ति, परिग्रहधरणतः कुगतिप्रपातात् ॥२३९५॥

**आदि[1]सुतस्स विरोधो१, समणा चत्ता२गिहीण अणुकंपा३ ।**

**पुव्वायारिय अन्नाणी४, अणवत्था५ वंत६ मिच्छत्तं७ ॥२३९६॥**

---

१. ०सुत्तस्स-मु. सं. ॥

**आदिसूत्रस्य** दशवैकालिकस्य **विरोधः**, तथा एवं ब्रुवाणो भवान् परिग्रहे साधून्नियुङ्क्ते। तन्नियोगाच्च ते **त्यक्ताः**। तथा **गृहिणामनुकम्पा** अनुग्रहस्त्यक्तः, साधूनां स्वत एव भैषजादेः सम्भवात्। तथा ये **पूर्वाचार्याः** सन्निधिं प्रतिषिद्धवन्तस्ते **अज्ञानी**कृताः, सन्निधेर्भवता गुणोपदर्शनात्। **अनवस्था** चैवं प्रसज्यते। सन्निधेरिव भवताऽन्येनान्यस्यापि ग्रहणप्रसक्तेः तथा **वान्त**प्रतिसेवनं भवतः समापतितं, प्रतिषिद्धस्यापि सञ्चयस्य पुनर्ग्रहणात्। तथा **मिथ्यात्वं** मिथ्यावादित्वमनुषज्यते। यथावादम[१]करणात्, 'निष्परिग्रहा वय' मित्यभिधाय परिग्रहधारणात् ॥२३९६॥

एनामेव गाथां व्याचिख्यासुः प्रथमतः सूत्रस्य विरोधमुपदर्शयति—

**जं वुत्तमसणपाणं, खाइमं साइमं तहा ।**
**संचयं तु न कुव्वेज्जा, एयं दाइं विरोहियं ॥२३९७॥**



**यद्** दशवैकालिके **उक्तम्-अशनं पानं खादिमं तथा स्वादिमं संचयं न कुर्यात्**। तथा च तद्ग्रन्थः:

---

१. मकरणतः- मो.॥

*"असणं[१] पाणगं चेव खाइमं साइमं तहा ।*

*जे भिक्खू सन्निहिं कुज्जा, गिही पव्वइए न से"॥ [ ]*

इति। **तदिदानीं विरोधितं** विरोधमापादितं, सन्निधेरिदानीं त्वयाऽभ्युपगतत्वात् १ ॥२३९७॥

**परिग्गहे निजुज्जंता, परिचत्ता उ संजया ।**

**भारादिमाइया दोसा, पेहाऽपेहाइया इय॥२३९८॥**

**संयताः परिग्रहे नियुज्यमानाः परित्यक्ताः,** संसारे पातनात्। किञ्चान्यत् इहलोके **भारादयो** भारवहनादयो **दोषाः**, आदिशब्दात् कायक्लेश-सूत्रार्थहान्यादिदोषपरिग्रहः। तथा **प्रेक्षाऽप्रेक्षादिकाश्च**। तथाहि-यदि सर्वं प्रत्युपेक्षते ततः सूत्राऽर्थपरिमन्थः, अथ न प्रत्युपेक्षते तर्हि संसक्तिभावः, आदिशब्दात्तत्परितापनादिदोषपरिग्रहः॥ २३९८॥



---

**१. दशवैकालिक [ ६।१९ ] इत्थं पाठः दृश्यते-"लोहस्सेस अणुण्फासे, मन्ने अन्नयरामवि । जे सिया सन्निहिं कामे, गिहि पव्वइए न से ॥ "**

**अहवा तप्पडिबंधा य, अच्छंते निययादयो** । दारं २।
**अणुग्गहो गिहत्थाणं, सया दिंताण होइ सो** ॥२३९९॥ दारं ३।

**अथवा तत्प्रतिबन्धाद्** औषधनिचयप्रतिबन्धा**त्तिष्ठन्ति** सदावस्थायितया न तु विहारक्रमं कुर्वन्ति; तथा च सति **नैत्यिकादयः**, नैत्यिको नित्यवासी, आदिशब्दात् पार्श्वस्थादिपरिग्रहः, तदादयो दोषाः प्रसजन्ति। गतं 'समणा चत्ता' इतिद्वारम् २। अधुना 'गिहीण अणुकंपा' इति व्याख्यानयति— **गृहस्थानां सदा** साधूनां भेषजादि **प्रयच्छतामनुग्रहो भवति स** इदानीं परित्यक्तः। साधूनां स्वत एव तन्निचयभावात्३ ॥२३९९॥

सम्प्रति "पुव्वायरिय अन्नाणी" इत्येतद्व्याख्यानयति—

**पडीसिद्धा सन्निही, जेहिं पुव्वायरिएहिं ते वि उ** ।
**अन्नाणी उ कया एवं** दा. ४, **अणवत्थापसंगतो** ॥२४००॥ दा. ५।

**यैः पूर्वाचार्यैः प्रतिषिद्धः सन्निधिस्तेऽपि** त्वयैवं ब्रुवता **अज्ञानीकृताः**४। अनवस्थाद्वारमाह-**अनवस्थाप्रसङ्गतो** यथा त्वयौषधसञ्चयः कृतस्तथान्येऽन्यस्यापि करिष्यन्तीति प्रसङ्गतः सर्वस्याप्यनवस्था॥२४००॥

वान्तद्वारं मिथ्यात्वद्वारं चाह—

**वंतं निसेवियं होइ, गिण्हंता संचयं पुणो ।** दारं ६।

**मिच्छत्तं न जहावादी, न तहाकारी भवंति उ ॥२४०१॥** दारं ७।

सञ्चयं त्यक्त्वा पुनः **सङ्गृह्णतो वान्तं निषेवितं भवति** ६। तथा **मिथ्यात्वं** यतो न **यथावादिनः** उत्सूत्रप्ररूपणात्, **नापि तथाकारिणः** सञ्चयकरणात् ७॥२४०१॥

**एए अन्ने य जम्हा उ, दोसा होंति सवित्थरा ।**

**तम्हा तोसहमादीणं, संचयं तु न कुव्वए ॥२४०२॥**

**यस्मादेते** अनन्तरोदिता अन्ये च **दोषाः सविस्तरा भवन्ति तस्मादौषधादीनां सञ्चयं न कुर्यात्॥२४०२॥**

परस्यावकाशमाह—

**जइ दोसा भवंतेते, किं[1] खु घेत्तव्वयं ततो ।**

**समाहिसंधावणट्ठाए?, भणणती सुण तो इतो ॥२४०३॥**

१. किं नु घे॰ खं. वा. भा.॥

**यद्येते** अनन्तरोदिता **दोषा भवन्ति ततः** [२]**किं खु समाधिस्थापनाय ग्रहीतव्यम्** ? आचार्य आह-**भण्यते** अत्रोत्तरं दीयते, तदेव **तावदितो**ऽनन्तरमुच्यमानं **शृणु** ॥ २४०३॥

तदेवाह—

**नियमा विज्जगहणं, कायव्वं होइ दुविहदव्वं च ।**
**संजोगदिट्ठपाढी, असती गिहि अण्णातित्थीहिं ॥२४०४॥**

यया विद्ययाऽपमार्जनं क्रियते तस्या अन्यासां वा विद्यानामाचार्येण **नियमाद् ग्रहणं कर्तव्यम्**। तथा यदि कारणतश्छिन्नमडम्बे स्थातव्यं भवति, ततो दीर्घपृष्ठविषविघाताय **द्विविधं द्रव्यं** ग्रहीतव्यं, तच्चाग्रे वक्ष्यते। तस्मादाचार्यः **संयोगदृष्टपाठी** भवेत् । अनेकान् संयोगान् व्यापार्यमाणान् यो दृष्टवान्, यश्च तत्पाठं पठितवान् स संयोगदृष्टपाठी । अथ स्वयं संयोगदृष्टपाठी न भवति तर्हि तस्या**ऽसति गृहिभिः** कार्यते चिकित्सा। तेषामप्यसत्य**न्यतीर्थिभिः** ॥२४०४॥

यदुक्तं द्रव्यं ग्रहीतव्यं, तदभिधित्सुराह—

**चित्तमचित्तपरित्तमणंतसंजोइमं व इतरं वा ।**
**थावरजंगमजलजं, थलजं चेमादि दुविहं तु ॥२४०५॥**

द्विविधं द्रव्यं-**सचित्तमचित्तं** वा। यदि वा **परीत्तम् अनन्त**कायिकम्। अथवा **सांयोगिकम्** अनेकसंयोगनिष्पन्नम्, **इतरद्** असांयोगिकम् । अथवा **स्थावरं जङ्गमं** प्रत्युत्पन्ने कार्ये यदि स्थावरद्रव्यप्रयोगतः कथमपि गुणो न भवति, तदा अनन्यगत्या जङ्गमाङ्गं द्रव्यं प्रयुज्यते। अथवान्यथा द्विविधं द्रव्यं **जलजं थलजं च। एवमादि द्विविधं** द्रव्यं ग्रहीतव्यम् ॥ २४०५॥

इयं चिकित्सा दीर्घपृष्ठविषविघातायाभिहिता। सम्प्रत्यतिदेशेनान्यरोगेष्वपि तामाह—

**जह चेव दीहपट्ठे, विज्जा मंता य दुविहदव्वा य ।**
**एमेव सेसएसु वि, विज्जा दव्वा य रोगेसु ॥२४०६॥**

**यथा चैव दीर्घपृष्ठ**दंशे **विद्या मन्त्रा द्विविधानि च द्रव्याणि** ग्रहीतव्यानि। **एवमेव शेषेष्वपि रोगेषु विद्याद्रव्याणि** च ग्राह्याणि ॥ २४०६॥

**संजोगदिट्ठपाढी, न धरेंतम्मि चउगुरू होंति ।**
**आणादिणो य दोसा, विराहणा इमेहिं ठाणेहिं ॥२४०७॥**

आचार्येण स्वयं **संयोगदृष्टपाठिना** भवितव्यम्। यदि पुनः सति शक्तिसम्भवे संयोगदृष्टिपाठं **न धरति,** तर्हि तस्मिन्नधरति प्रायश्चित्तं **चत्वारो गुरुकाः**। न केवलं प्रायश्चित्तं, किन्तु **आज्ञादयश्च दोषाः, तथा विराधना एभिर्व**क्ष्यमाणैः स्थानैः ॥ २४०७॥

तान्येवाह—

**उप्पण्णे गेलण्णे, जो गणधारी न जाणइ तिगिच्छं ।**
**दीसंततो विणासो, सुह-दुक्खी तेण ऊ चत्ता ॥२४०८॥**

**उत्पन्ने ग्लानत्वे यो गणधारी चिकित्सां न जानाति,** तस्य **पश्यतः** सतो ग्लानस्य **विनाश** इति, **तेन सुखदुःखिनः** सुखदुःखोपसम्पन्नकाः स्वशिष्याः प्रातीच्छकाश्च **परित्यक्ताः** ॥ २४०८॥

कथं पश्यतः सतो ग्लानस्य शेषकाणां च विनाशः ? इत्यत आह—

**आउरत्तेण कायाणं, विसकुंभादिघायए ।**
**डाहे छेज्जे य जे अण्णे, भवंति समुवद्दवा ॥ २४०९ ॥**
**एते पावइ दोसा, अणागयं अगहियाए विज्जाए ।**
**असमाहीए सुयलंभं, केवललंभं च चुक्केज्जा ॥ २४१० ॥**

कस्यापि साधो**र्विषकुम्भो** लूता, **आदि**शब्दाद् **दाहा**दिपरिग्रहः, तस्मिन्नुत्थिते **आतुरत्वेन** आकुलत्वेन **विषकुम्भादिघाताय कायानाम्** उदकादीनामुपद्रवं कुर्यात् । तथा हि विषकुम्भे दाहे वा समुपस्थिते [१]व्याकुलीभूतः सन् तं शीतलेनोदकेन सिञ्चेत्, सचित्तेन वा कर्दमेन लिम्पेत्। तथा **दाघे छेदे** च **येऽन्ये भवन्ति समुपद्रवाः, एतान् दोषाननागतमगृहीतायां विद्यायां प्राप्नोति।** तथा तीव्रायां वेदनायामनुपशान्तायाम् **असमाधिना** असमाधिमरणेन म्रियेत, तथा च सति दीर्घं संसारमनुपरावर्तेत, चिरं च यदि जीवति तर्हि भूयांसं **श्रुतलाभं** प्राप्नुयात्, **केवल**ज्ञानं चोत्पादयेत् ॥२४०९-२४१०॥ तथा—

**१. किं खु स० खं.॥**

**इहलोइयाण परलोइयाण लद्धीण फेडितो होइ ।**
**इहलोगाऽऽमोसादी, परलोगे अणुत्तरादीया ॥२४११॥**

असमाधिमरणेन मरणतः स **ऐहलौकिकीनां पारलौकिकीनां** च **लब्धीनां** स **स्फेटित**स्त्याजितो **भवति**। तत्र **इहलोके** ऐहलौकिक्यो लब्धयः **आमर्षादयः** आमर्षौष-ध्यादयः, **परलोके** पारलौकिक्यः **अनुत्तरादयाः** अनुत्तराः लवसत्तमा देवाः, आदिशब्दात् सुकुलप्रत्यायातिश्रुतलाभादिपरिग्रहः॥ २४११॥

**असमाहीमरणेणं, एवं सव्वासि फेडितो होइ ।**
**जह आउगपरिहीणा, देवा लवसत्तमा जाया ॥२४१२॥**

**एवम्** अमुना प्रकारेण **सर्वासाम्** ऐहिकीनां पारत्रिकीनां च लब्धीना**मसमाधिमरणेन स्फेटितो भवति। यथा आयुष्कपरिहीणा देवा लवसत्तमा जाताः** आयुष्कपरिहाण्या सिद्धिलाभतो भ्रष्टा यथा देवा लवसत्तमा जाता इत्यर्थः ॥ २४१२॥

सम्प्रति लवसप्तमदेवस्वरूपमाह—

**सत्तलवा जइ आउं, पहुप्पमाणं ततो उ सिज्झंतो ।**
**तत्तियमेत्तं न हु, तं तो ते लवसत्तमा जाया ॥२४१३॥**

**यदि सप्तलवाः** कालविशेषा **आयुः प्रभवत्** स्यात्, सप्तलवप्रमाणं यद्यायुः प्राप्येतेत्यर्थः, **ततः सिध्येयुः**, परं **तद्** आयुस्तावन्मात्रं **न हु** नैवाऽभवत् **ततस्ते लवसप्तमा** देवा **जाताः**, लवे सप्तमे सिद्धिरभविष्यद् यदि तावदायुर्भवेद् येषां ते लवसप्तमाः '**नाम नाम्नैकार्थे समासो बहुलम्**' [ **मलय०** ना. ८-१] इति समासः ॥२४१३॥

के ते लवसप्तमाः ? इत्याह—

**सव्वट्ठसिद्धिनामे, उक्कोसठिईय विजयमादीसु ।**
**एगावसेसगब्भा, भवंति लवसत्तमा देवा ॥२४१४॥**

ये **देवाः सर्वार्थसिद्धिनामके** महाविमाने ये च **विजयादिषूत्कृष्टस्थित**य एकोऽवशेषो गर्भो येषां ते **एकावशेषगर्भा**स्ते **भवन्ति लवसप्तमाः** ॥२४१४॥

उपसंहारमाह—

**तम्हा उ सपक्खेणं, कायव्व गिलाणगस्स तेगिच्छं ।**
**विवक्खेण न कारेज्जा, एवं उदितम्मि चोदेति ॥२४१५॥**

यस्माद् विपक्षे दोषास्त**स्मात्सपक्षेण ग्लानस्य चिकित्सा**कर्म **कर्तव्यम्, विपक्षेण** पुनर्न **कारयेत्**। तदेवं सम्बन्धः, ततः सूत्रस्य व्याख्यालक्षणं, तदनु आक्षेप-परिहारौ, तत्प्रसक्त्याऽन्यदपि चाभिहितम् । सम्प्रति सूत्रव्याख्या क्रियते—

**निर्ग्रन्थं च**शब्दान्निर्ग्रन्थीं च **रात्रौ वा विकाले वा दीर्घपृष्ठः** सर्पो **लूषयेत्** दशेत् तत्र **स्त्री वा पुरुषस्य** हस्तेन तं विष**मपमार्जयेत्, पुरुषो वा स्त्रिया** हस्तेन, **एवं से** तस्य स्थविरकल्पिकस्य **कल्पते**। स्थविरकल्पस्याऽपवादबहुलत्वात्[1]। एवं च अमुना प्रकारेणापवाद-मासेवमानस्य **से** तस्य **तिष्ठति** पर्यायः, न पुनः स्थविरकल्पात्[2] परिभ्रश्यति, तेन छेदादयः प्रायश्चित्तविशेषास्तस्य न सन्ति, **परिहारं** च तपो **न प्राप्नोति** । कारणेन यतनया प्रवृत्तेः। **एष**

---

**१. आकुली° सं. वा. मो. पु. मु. ॥**

**कल्पः स्थविरकल्पिकानाम्**। **एवम**मुना प्रकारेण सपक्षेण विपक्षेण वा वैयावृत्त्यकारापणं **से** तस्य जिनकल्पिकस्य **न कल्पते**, केवलोत्सर्गप्रवृत्तत्त्वात्तस्येति भावः। **एव**मपवादसेवनेन **से** तस्य जिनकल्पपर्यायो **न तिष्ठति**, जिनकल्पात् पततीत्यर्थः। परिहारं च तपोविशेषं न परिपालयति, **एष कल्पो जिनकल्पिकानाम्**।

**एवं** सूत्रे व्यवस्थिते यदाचार्येण **प्रागुदितं** सपक्षेण वैयावृत्त्यं कारयितव्यम् न परपक्षेणेति, तत्र **चोदयति** ब्रूते परः ॥ २४१५॥

यदुच्यते तदाह—

**सुत्तम्मि अणुण्णायं, इह इं पुण अत्थतो निसेहेह ।**
**कायव्व सपक्खेणं, चोयग! सुत्तं तु कारणियं ॥२४१६॥**

**सूत्रे** विपक्षेणापि वैयावृत्त्यकारापण**मनुज्ञातम्**, **इह** इदानीं **इं** पादपूरणे, **पुनरर्थतो** यूयं परपक्षेण वैयावृत्त्यकारापणं **निषेधयत कर्तव्यम् सपक्षेण**ेति वचनात्, ततः सूत्र-भवद्व्याख्या-नयोर्विरोधः। अत्राचार्य आह-न विरोधः, यतो हे **चोदक! सूत्र**मिदं **कारणिकं** कारणापेक्षम् ॥ २४१६॥

तदेव कारणमाह—

**वेज्ज सपक्खाणऽसती, गिहि परतित्थीओ तिविह संबंधी ।**
**एमेव असंबंधी असोयवादेतरा सव्वे ॥२४१७॥**

**सपक्षाणां वैद्यानामसति** अभावे **गृही** पिता भ्राता स्वजनो वा स्थविरादिभेदत**स्त्रिविधो** यः **सम्बन्धी** स वैयावृत्त्यं कारणीयः । तदभावे **असम्बन्धी** स्थविर-मध्यम-तरुणभेदतस्त्रिभेदः पूर्वापूर्वालाभे उत्तरोत्तरः कारणीयः। तस्याऽभावे **परतीर्थिकः** पितृभ्रात्रादिसम्बन्धेन सम्बन्धी स्थविरादिभेदतस्त्रिभेदः पूर्वपूर्वाऽलाभे उत्तरोत्तरः कारणीयः। तस्याप्यलाभे असम्बन्ध्यपि स्थविरादिभेदतस्त्रिविध उत्क्रमेण कारयितव्यः। एते **सर्वे**ऽपि द्विधा[1]-**अशौचवादा इतरे** च। तत्र प्रथमतः सर्वत्राप्यशौचवादः कारयितव्यः, तदसम्भवे इतरोऽपि ॥२४१७॥

**एएसिं असतीए, गिहिगिणि परतित्थिगी तिविहभेया ।**
**एएसिं असतीए, समणी तिविहा करेइ जयणाए ॥२४१८॥**

१. °कल्पिक स्या° खं. ॥ २. त् प्रभश्य° मो. ॥

**एतेषां** प्राग्गाथानिर्दिष्टानां सर्वेषा**मसति** अभावे **गृहस्था** माता भगिनी। तदभावे स्वजना: स्थविर-मध्यम-तरुणभेदतस्त्रिविधा: पूर्वपूर्वालाभे उत्तरोत्तरा कारयितव्या । तदभावे असम्बन्धिनी स्थविरादिभेदतस्त्रिविधा प्राक्क्रमेण कारयितव्या। तस्या अलाभे **परतीर्थिकी** स्थविरादिभेदतस्त्रिप्रकारा पूर्वपूर्वालाभे उत्तरोत्तरा कारयितव्या। **एतेषां** च भेदानां सर्वेषामपि **असति** अलाभे **श्रमणी त्रिविधा** स्थविरादिभेदतस्त्रिप्रकारा पूर्वपूर्वालाभे उत्तरोत्तरा **यतनया करोति** ॥ २४१८॥

तामेव यतनामाह—

**दूती अद्दाए या, वत्थे अंतेउरे य दब्भे या ।**
**वियणे य तालवेंटे, चवेड ओमज्जणाजयणा ॥२४१९॥**



काचित् **दूत**विद्या भवति। तया च दूतविद्यया यो दूत आगच्छति, तस्य दंशस्थानमपमार्ज्यते, तेनेतरस्य दंशस्थानमुपशाम्यति। **अद्दाए**त्ति अपरा आदर्शविद्या, तया आतुर आदर्शे प्रतिबिम्बितोऽपमार्ज्यते आतुर: प्रगुणो जायते । अन्या विद्या **वस्त्रे** वस्त्रविषया भवति, तया परिजपितेन वस्त्रेण प्राव्रियमाणो वस्त्रेण वाऽपमृज्यमान आतुर: प्रगुणो भवति।

अपरा विद्या **अन्तःपुरे** आन्तःपुरिकीविद्या भवति, यया आतुरस्य नाम गृहीत्वा आत्मनो अङ्गमपमार्जयति आतुरश्च प्रगुणो जायते सा आन्तःपुरिकी। अन्या **दर्भे** दर्भविषया भवति विद्या, यया दर्भैरपमृज्यमान आतुरः प्रगुणो भवति। **वियणे यत्ति** व्यजनविषया विद्या यया व्यजनमभिमन्त्र्य तेनातुरोऽपमृज्यमानः स्वस्थो भवति सा व्यजनविद्या। एवं **तालवृन्त**विद्याऽपि भावनीया। **चपेटा** चापेटीविद्या, यया अन्यस्य चपेटायां दीयमानायामातुरः स्वस्थीभवति सा चापेटी। तत्र पूर्वं दूत्या विद्ययाऽपमार्जनं कर्तव्यम्। तदभावे आदर्शिक्या। एवं तावद्यावदन्ते चापेट्या। एषा **अपमार्जनायतना** ॥२४१९॥

एतदेव स्पष्टतरमाह—

**दूयस्सोमाइज्जइ, असती अद्दागपरिजवित्ताणं ।**
**परिजवियं वत्थं वा, पाउज्जइ तेण वोमाए ॥२४२०॥**

**एवं दब्भादीसुं, वि ओमाए असंफुसंतो हत्थेण ।**
**चावेडीविज्जाए ओमाए चवेडयं देंतो ॥२४२१॥**

दूत्या विद्यया **दूतस्या**गतस्या**ङ्गमपमार्ज्यते,** तस्या विद्याया **असति आदर्शे** सङ्क्रान्तमातुर-प्रतिबिम्बं **परिजप्या**(अपमार्ज्या)तुरः प्रगुणीकर्तव्यः । तदभावे वस्त्रविद्यया **परिजपितं वस्त्रं प्रावार्यते, तेन वा** परिजपितेन वस्त्रेणाऽऽतुरो**ऽपमार्ज्यते** ॥२४२०॥ **एवं दर्भादिभिरपि** दर्भविद्यादिभिः **हस्तेनासंस्पृशन्नपमार्जयेत्** । **चापेट्या** वा **विद्यया** अन्यस्य **चपेटां ददद**न्यो**ऽपमार्जयेत्।** विद्याः प्रायः पुरुषेषु भवन्ति । एष यतनागमो निर्ग्रन्थानां वेदितव्यः॥ २४२१॥

एष एव यतनागमो निर्ग्रन्थीनाम[1]पि भवति । तथा चाह—

**एसेव गमो नियमा, निग्गंथीणंपि होइ नायव्वो ।**
**विज्जादी मोत्तूणं, अकुसलकुसले य करणं च ॥२४२२॥**

**एष एव** अनन्तरोदितो यतना**गमो** नियमाद् निर्ग्रन्थीनामपि ज्ञातव्यः। तथा निर्ग्रन्थीनां **विद्यादि** न दातव्यम्। **मुक्त्वा** पूर्वगृहीतमसाधनं मन्त्रं, स हि कदाचिद्दीयेत न कश्चिद्दोषः।

१. द्विविधाः -मो. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा यदि निर्ग्रन्थोऽ**कुशलो** भवति निर्ग्रन्थी च **कुशला** तत्र **करणं** निर्ग्रन्थ्याः, निर्ग्रन्थी कारयेदित्यर्थः ॥२४२२॥

''विज्जादी मुत्तूणं'' इत्येतदेव व्याख्यानयति—

**मंतो हविज्ज कोई विज्जा उ ससाहणा न दायव्वा ।**
**तुच्छा गारवकरणं, पुव्वाहीया उ करेज्जा ॥२४२३॥**

**मन्त्रो** यदि **कश्चिद्** पूर्वगृहीतोऽस्ति स तु निर्ग्रन्थ्या दातव्यः। या तु ससाधना **विद्या** सा **न दातव्या**। कुतः इत्याह- सा प्रकृत्या **तुच्छा,** ततो विद्यालाभे **गौरवकरणं** तस्याः स्याद् गौरवमात्मनोऽतिशयेन कुर्यात् या तु **पूर्वाधीता** पूर्वगृहीता विद्या सा प्रागुक्तयतनाक्रमेण **कुर्यात्** ॥ २४२३॥

**अज्जाणं गेलन्ने, संथरमाणे सयं तु कायव्वं ।**
**वोच्चत्थे मास चउरो, लहु गुरुगा थेरए तरुणे ॥२४२४॥**

**आर्यिका** यदि **ग्लान**प्रयोजने स्वयं **समर्था**स्ततः **स्वयमेव** ताः **कुर्वन्ति** । एवं निर्ग्रन्था अपि भावनीयाः । यदि पुनर्विपर्यासः क्रियते, यथा निर्ग्रन्थानां ग्लानत्वे संस्तरति निर्ग्रन्थ्यो



For Private and Personal Use Only

यदि कुर्वन्ति, निर्ग्रन्थीनां वा निर्ग्रन्था इति तदा तस्मिन् **विपर्यासे स्थविरे** कारके प्रायश्चित्तं **चत्वारो लघुकाः, तरुणे** चत्वारो **गुरुकाः** ॥ २४२४॥

सम्प्रति कल्पे नानात्वं भावयति—

**जिणकप्पिए न कप्पइ, दप्पेणं अजयणाए थेराण ।**
**कप्पइ य कारणम्मी, जयणाए गच्छे[१] साविक्खो ॥२४२५॥**

**जिनकल्पिके** स्वपक्षेण परपक्षेण वा वैयावृत्त्यकारापणं **न कल्पते**, तथाकल्पत्वात्। **स्थविराणां** स्थविरकल्पिकानां पुनर्**दर्पेण** निष्कारण**मयतनया** च न कल्पते। **कारणे यतनया** पुनः **कल्पते**, यतो **गच्छे[२] स सापेक्ष** इति ॥ २४२५॥ गाथा २४२५

**चिट्ठइ परियातो से, तेण च्छेदाइया न पावेंति ।**
**परिहारं च न पावेइ, परिहार तवोत्ति एगट्ठं ॥२४२६॥**

१०४६ (A)

---

१. गच्छे सावे° पु. प्रे. । गच्छसावे° मो. ॥ २. गच्छसापे° मो. ॥

यतः **से** तस्य **पर्यायस्तिष्ठति तेन** कारणेन **छेदादिकास्तस्य** न **प्राप्नुवन्ति,** न भवन्तीत्यर्थः। **परिहारमपि च न प्राप्नोति,** कारणे यतनया कारापणात्। **परिहारः तप** इत्ये**कार्थम्** ॥२४२६॥

**॥ इति श्रीमलयगिरिविरचितायां व्यवहार[१]टीकायां पञ्चमोद्देशकः समाप्तः[२] ॥**

**ग्रन्थाग्रं ९०५॥**





---

१. हारस्य टीकायां पञ्च° संवा. पु. ॥ २. समाप्तः -मो. नास्ति ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# नोंध

For Private and Personal Use Only

# નોંધ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# नोंध

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only



KIRIT GRAPHICS
09898490091